K
1666

ಪಾಠಶಾಲೆಯಿಂದ ಬಳಸಿ

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ.....

SCANNED BOOK

Acc No 8320 L455

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 113. & 123.

श्रीमन्निम्बार्काचार्यविरचितदशश्लोकीव्याख्या

वेदान्तरत्नमञ्जूषा

श्रीभगवत्पुरुषोत्तमाचार्यकृता ।

वेदान्ततत्त्वबोधश्च ।

विद्वद्वरश्रीमदनन्तरामविरचितः ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा

रत्नगोपालभट्टेन संशोधितौ ।

VEDÂNTA RATNA MANJÛSHÂ

BY BHAGAVATPURUSHOTTAMÂCHÂRYA

And Vedantatatva Bodha By Anantarâma.

EDITED BY

Ratna Gopâl Bhatta.

SRI CHARITRENDRA SANSKRIT COLLEGE LIBRARY BANGALORE

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES:

AGENTS:—OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHṬHÂRÂMA MUKUNDAJÎ BOMBAY.

Printed by Harî Dâs, Gupta, Proprietor

AT THE VIDYÂ-VILÂSA PRESS,

BENARES.

1908,

Price Rupees Two.

Registered According to Act XXV. of 186

K-1666

K-1666

श्रीहरये नमः ।

श्रीवेदान्तरत्नमञ्जूषाभूमिका ।

इह खलु जगति चानेकशः प्रायशः प्रादुर्भूता संस्थिताः सन्तो गताश्चेति किन्तैः । किन्तु तेषामेव हि जन्म येषां यशःशरीरे न वा मरणदोषः । तेष्वेवाग्रगण्या भगवन्तः श्रीपुरुषोत्तमाचार्य्याः । इमे महात्मानः कदा स्वजन्मना तैलङ्गजनपदं कं ग्रामं भूषयामासुरिति निर्णेतुं परं नाऽशक्नुमः । किन्त्वेतच्चरणैः पूज्यपादश्रीभगवन्निम्बार्क-मुनिप्रणीतदशश्लोक्या "वेदान्तरत्नमञ्जूषा" नामनिर्णीताऽनिर्वचनीया टीका । अन्येऽपि बहवो ग्रन्थाः संग्रथितास्तेष्वेवैको विदुषामाश्चर्यावहः "सिद्धान्तक्षीरार्णवो" नामेति स्पष्टं सिद्धान्तसेतुग्रन्थात् । परञ्च खेदः, सम्प्रति इशानवगामित्वादिति ।

अस्यां मञ्जूषायां वर्त्तते साधारणरीत्या मायावादनिराकरणं यत्र तत्र, नाप्युपलभ्यते इतः पूर्वाचार्यप्रणीतासु कासु ग्रन्थलेखासु । अतोऽनुमीयतेऽजावादप्रवर्त्तकश्रीगौडपादार्यसमकालीनाः पूर्वोक्ताः पूज्याचार्य्याः ।

एतद्विषये कविचरितमपि प्रमाणम् । यद् गुर्जरभाषायां केनचिद् युरोपियनमहाशयेन निबद्धमस्ति ।

किञ्च, अन्तरस्थेश्वरपादपद्माद्येषां समुद्भूता वेदान्तजाह्नवी नाम, तेषां श्रीमद्देवाचार्याणामिह नेत्रेन्दुक्ष्माऽब्जे १११२ वैक्रमीयहायने जन्म, तेषां तावतोऽद्यातीताः ८५२ शरदः । श्री ६ देवाचार्याः किल श्रीपुरुषोत्तमाचार्येभ्यो दशसंख्याकाऽऽपारिका इत्यनुमित्या पञ्चमीय शताब्द्यां पूज्यपादश्री६भगवत्पुरुषोत्तमाचार्य्याणामाविर्भावः सिद्धः ।

इयं हि मञ्जूषा नाम मञ्जूषैका श्री६भगवन्निम्बार्कविरचित-दशश्लोकरत्नानाम् । इयन्तु सरससरलगुणैरन्या अपि टीका अतिक्रम्य वरीवर्त्ति । एषा किल भेदाभेदज्ञरसिकानामेकमात्रैव स्वादु निर्झरीति ॥ तथैतत्सम्प्रदायतत्त्वावगन्तृणामपि विदुषामियमुपयोगिनी भविष्यतीति संधार्य वाराणसीस्थ " चौखम्बा सस्कृतग्रन्थमाला" समध्यक्ष-श्रीहारदासगुप्तमहाशयाय मुद्रणार्थं दत्ता । एतेनापि महाशयेन निजपरमोदारतया सम्मुद्य सर्वजनोपकाराय प्राकाश्यं नीता । अत एवाऽयं धन्यवादार्हः साम्प्रतम् । सहैव वर्द्धमानस्थ-गोस्वामिश्री ६ श्रीमधुसूदनशरणदेवाचार्य्या अपि चानेकशोधन्यवादार्हाः, यैः पुस्तकादि प्रदानेन बहुशः साहाय्यं कृतमिति दिक् ॥

निवेदको विद्वद्वैष्णवपरिचर्योत्सुको
वृन्दारण्यवास्तव्यः
पं० किशोरदासः ।

श्रीमदंससनकनारदनिम्बार्कादिगुरुभ्यो नमः ।

वेदान्तरत्नमञ्जूषा ।

श्रीभगवत्पुरुषोत्तमाऽऽचार्यकृता ।

यो ब्रह्मेशसुरर्षिवन्दितपदो वेदान्तवेद्यो हरि-
स्तं वन्दे मनसा गिरा च शिरसा श्रीश्रीनिवासं गुरुम् ।
कण्ठे यस्य चकास्ति कौस्तुभमणिर्वेदान्ततत्त्वात्मको
भक्तेः श्रीर्हृदये शरण्यमगतेः कारुण्यसिन्धुं मुदा ॥ १ ॥

इह सकलब्रह्मरुद्रादिकिरीटकोटिवन्दितपादपीठेनानन्ताचिन्त्यस्वाभाविकस्वरूपशक्तिवैभवेन ज्ञानबलैश्वर्य्यवीर्यकारुण्यवात्सल्यदयातितिक्षाद्यनन्तकल्याणगुणार्णवेन जगज्जन्मादिहेतुना सर्वश्रुतिशिरोरत्नवेदान्तवेद्यचरणेन रमानिवासेन भगवता श्रीवासुदेवेन विष्णुना आत्मस्थापितवेदमार्गसंरक्षणाय नियुक्तो निरतिशयात्मप्रिय आत्मशक्त्युपबृंहितानन्तशक्तिः स्वहस्ताधारको निजायुधः कोटिसूर्य्यसमप्रकाशो भगवान् सुदर्शनोऽवनितलाऽवतीर्णस्तैलङ्गद्विजवरात्मना तस्मिन्नेव देशे, नियमानन्दाभिधो भगवदीयां सनातनीं कलौ नष्टां वेदान्तसन्ततिं प्रवर्तयिष्यन् शारिरकमीमांसावाक्यार्थरूपवेदान्तपारिजातसौरभाख्यादिग्रन्थरचनाव्याजेन सर्ववेदान्तार्थं संग्रहेण संदर्भयामास । तस्य च विधिप्राप्तोपनयनादिसंस्कृताधीतषडङ्गश्रुतिजिज्ञासितधर्ममीमांसानिरस्तकर्मफलादिविषयसंदेहकतत्फलनिर्विण्णभगवद्दिदृक्षालम्पट-

गुरुभक्तिसंपन्नमुमुक्ष्वधिकारिकत्वेनाऽनन्ताचिन्त्यापरिमितस्वरूप-गुणशक्तिवैभवपरब्रह्मभूतश्रीवासुदेवविषयकत्वेन श्रीभगवद्भावा-पत्तिलक्षणमोक्षप्रयोजनकत्वेनाचिन्त्यापारातिगम्भीराशयत्वमाक-लय्य मन्दमतीनां सर्वशास्त्रार्थजिज्ञासूनां शिथिलप्रयत्नानां शास्त्रा-र्थविचारासमर्थानां मुमुक्षूणामुपकारार्थं वेदान्तरत्नभूतां शास्त्रा-र्थकामधेनुं दशश्लोकीमपि निर्ममे । तथाच तत्रैवोक्तं स्वयमेव अथाधीतषडङ्गवेदेन कर्मफलविषयकक्षयाक्षयत्वोभयप्रकारवाक्य-जन्यसंशयाविष्टेन तत एव जिज्ञासितधर्ममिमांसानिश्चितकर्मत-त्प्रकारतत्फलविषयकज्ञानवता कर्मब्रह्मज्ञानफलयोः सान्तत्वान-न्तत्वसातिशयत्वनिरतिशयत्वविषयकव्यवसायजातनिर्वेदेन भग-वत्प्रसादेप्सुना तद्दर्शनेच्छालम्पटेन आचार्यैकदेवेन गुरुभक्त्येकहा-र्देन मुमुक्षुणा अनन्ताऽचिन्त्यस्वाभाविकरूपगुणशक्त्यादिभिर्बृह-त्तमो यो रमाकान्तः पुरुषोत्तमो ब्रह्मशब्दाभिधेयस्तद्विषयिका जिज्ञासा सततं संपादनीयेतिवाक्येन । तथाच शास्त्रं "स्वाध्यायो ऽध्येतव्यः, स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं, यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते, परीक्ष्य लोकान् कर्मजितान् ब्राह्मणो निर्वेदमायात्, नास्त्यकृतःकृ-तेन, जुष्टं यदा पश्यत्यन्यमीशं, यदा पश्यः पश्यते रुक्मवर्णं कर्तार-मीशं पुरुषं ब्रह्मयोनिं, यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः, यमेवैष वृणुते तेन लभ्यः, सर्वे वेदा यत् पदमामनन्ति, तं त्वौपनिषदं पुरुषं पृच्छामि, नामानि सर्वाणि यमाविशन्ति, शास्त्रयोनित्वात्, वेदैश्च सर्वैरहमेव वेद्यो, निरञ्जनः परमं साम्यमुपैति, तन्महिमानमिति वीतशोकः, बहवो ज्ञानतपसा पूता मद्भावमागताः, मम साधर्म्यमागताः,

तन्निष्ठस्य मोक्षव्यपदेशात्, तत्तु समन्वयात्, नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती" इत्यादि । भाषितं चेदं वाक्यं शङ्कावतारैः श्रीनिवासाचार्यचरणैः । उक्तञ्च विश्वाचार्यचरणैः—

शङ्कावतारः पुरुषोत्तमस्य
यस्य ध्वनिः शास्त्रमचिन्त्यशक्तिः ।
यत्स्पर्शमात्राद् ध्रुव आप्तकाम-
स्तं श्रीनिवासं शरणं प्रपद्ये, इति ॥

तस्या मिताक्षरैः कोष्ठचतुष्टयात्मिका वेदान्तरत्नमञ्जूषाख्या मितङ्माख्या यथामति विधीयते । तत्र प्रथमे पदार्थरत्नसंग्रहः । द्वितीये संप्रदायनिर्णयपूर्वकतत्प्राप्तवाक्यार्थरत्नसंग्रहः । तृतीये साधनकदम्बरत्नसंग्रहः । चतुर्थे पूर्वोक्तशास्त्रार्थस्मरणपूर्वकफल-रत्नसंग्रह इति विवेकः ।

तत्र प्रथमे निरूपणीयपदार्थेषु तावत् त्वम्पदार्थं निरूपय-ति—

ज्ञानस्वरूपं च हरेरधीनं
शरीरसंयोगवियोगयोग्यम् ॥
अणुं हि जीवं प्रतिदेहभिन्नं
ज्ञातृत्ववन्तं यदनन्तमाहुः ॥ १ ॥

ज्ञानेति ॥ चेतनं स्वञ्ज्योतिःस्वरूपम् । स्वयञ्ज्योतिष्ट्वं नाम करणव्यापारायत्तप्रकाशशून्यत्वम् । तेषामपि प्रकाशक-त्वात् स्वयञ्ज्योतिष्ट्वस्वरूपत्वसिद्धिः । अनेन तार्किकादिपक्षो-ऽपि व्यावर्त्यते । तथाच श्रूयते—यथा सैन्धवघनोऽनन्तरोऽबा-ह्यः कृत्स्नो रसघन एव,एवं वा रेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव, अत्रायं पुरुषः स्वयञ्ज्योतिर्भवतीति । चकारो

देहादिजडवर्गवैलक्षण्यसमुच्चयार्थको बाह्यपक्षनिरसनपरः । देहेन्द्रियमनोबुद्धिप्राणवैलक्षण्यत्वम् । तस्माद् वा एतस्मान्मनोमयादन्योऽन्तरात्मा विज्ञानमय इति श्रुतेः । परिच्छिन्नबाह्यानां पक्षे मायावादेऽतिप्रसङ्गं वारयति—**ज्ञातृत्ववन्तामिति**॥ज्ञानाश्रयत्वम् । योऽयं वेद जिघ्राणीति स आत्मा कतम इत्युपक्रम्य, पुरुष एव द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा विज्ञानात्मा पुरुषः, विज्ञातारम् अरे केन विजानीयात्, जानात्येवाऽयं पुरुषः, न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां, सोत्तमः पुरुषो नोपजनं स्मरन्निदं शरीरम्, एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः । पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, यद्वै पश्यन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽनाशित्वात्, न हि घ्रातुर्घ्रातेर्न हि रसयितू रसयतेर्न हि वक्तुर्वक्तेर्न हि श्रोतुः श्रुतेर्न हि मन्तुर्मतेर्न हि स्पर्ष्टुः स्पृष्टेर्न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्, अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मेत्यादिश्रुतिभ्यो, ज्ञोऽत एव, कर्ता शास्त्रार्थवत्त्वादिति न्यायाद्, एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विद इति गीयमानाच्च कर्तृत्वादीनामप्युपलक्षणं ज्ञातव्यम् ।

ननु स्वयञ्ज्योतीरूपस्य ज्ञानस्यात्मनो ज्ञानाश्रयत्वं विरुद्धम् । ज्ञानत्वाऽविशेषात् । न हि जले जलं भिन्नमवतिष्ठते, ज्योतिषि ज्योतिर्वा । अतो बुद्धिवृत्तिप्रतिबिम्बितस्य चेतनस्वरूपस्य ज्ञानत्वोपचार इतिचेन्न । न हि धर्म्मिधर्मयोरत्यन्तसाजात्यमभेदनियामकम्,अपि तु भेदाग्रहमात्रमेव तयोर्ज्ञानत्वाविशेषेऽपि धर्मित्वधर्मत्वावच्छेदेन विजातीयत्वाद् दृष्टान्तासिद्धिः । द्युमणितत्प्रभयोस्तैजसत्वसाम्येऽपि द्युमणित्वप्रभात्वावच्छिन्नतया धर्मिधर्मभावस्य दृष्टचरत्वान्नानुपपत्तिः । वस्तुतस्तु जले

ज्योतिषि चात्यन्तसाजात्येन भेदाग्रहेऽपि भेदस्य सत्त्वमेव । सावयवद्रव्यत्वेनानुमानात् । अन्यथा घटादौ पार्थिवावयवानामप्यभेदः कुतो नाशङ्कनीयः । तथात्र प्रयोगः—जले निक्षिप्तं जलं भिन्नत्वेनावस्थातुमर्हति, सावयवद्रव्यत्वात् । पार्थिवरजसि निक्षिप्तपार्थिवरजोवत् । तिलराशौ निक्षिप्ततिलवच्च । किञ्च, न हि बुद्धिवृत्तिप्रतिबिम्बिते चेतने ज्ञानत्वोपचाराभ्युपगमे ज्ञानजन्यव्यवहारसंभवः । तथात्वे च सूर्यप्रतिबिम्बेनापि सूर्य्यप्रकाश्यभूतदेशीयतमःशीतयोर्निवृत्तिः स्यात् । नच दृष्टचरा, युक्ता वा । किञ्चास्तां वृत्तिप्रतिबिम्बितचेतनस्य ज्ञानत्वव्यवहारः । प्रतिबिम्ब एव तावन्न सिद्ध्यति । उभयोश्चेतनवृत्त्योर्बिम्बोपाध्योर्निरवयवत्वान्नीरूपत्वाच्च । तथाभूतस्यापि प्रतिबिम्बभावाभ्युपगमे रसादीनामपि शब्दादौ कालादौ वा, कालादीनामपि रसादौ प्रतिबिम्बत्वापत्तेः । एतेनैव ब्रह्मप्रतिबिम्ब एव जीव इत्यपि निरस्तम् । दूषणसाम्यात् । ब्रह्मभूतबिम्बस्याऽविद्यारूपोपाधेश्च निरवयवत्वादिसाम्यात् । ननु नीरूपनिरवयवस्यापि रूपस्य गगनादेश्च प्रतिबिम्बदर्शनान्नोक्तविरोध इतिचेन्न । सावयवद्रव्याश्रितस्यैव रूपस्य सूर्य्यनक्षत्रादिप्रभायुक्तस्यैवाकाशस्य तथात्वदर्शनात् । उक्तानुपपत्तेस्तादवस्थ्यमेव । वस्तुतस्तु गगनं रूप्येव । पञ्चीकृतभूतत्वात् । पृथिव्यादिवत् । अत एव सावयवत्वपरिच्छिन्नत्वयोरपि तत्र भावान्न तत्प्रतिबिम्बदर्शनम् अनुपपत्त्युद्धारे प्रयोजकम् । एतेनैवाकाशे नीलत्वादिप्रसयो भ्रम इत्यपि निरस्तम् । रूपादेस्तत्र सत्त्वेन भ्रमत्वोक्तेस्तुच्छतरत्वात् । नच—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥

उपमा सूर्य्यकादिवदिति श्रुतिन्याययोर्बाध इति वाच्यम् । तयोरन्तर्यामिनिर्लेपत्वस्वतन्त्रत्वप्रतिपादनपरत्वात् । तथाहि । यथा सूर्य्यः स्वप्रभाव्याप्त्या जले तिष्ठन् न तद्गतशैत्यादिगुणैर्लिप्यते, प्रत्युत जलमेव स्वोष्मणा च प्रकाशेन चोष्णीकृत्यावभासयति । चन्द्रश्च तथैव स्वकरनिकरव्याप्त्या जलमेव भासयँस्तच्छैत्यं वर्द्धयति, न तु स्वयमपि तद्गतेन द्रवत्वेन लिप्त्वाऽऽर्द्रीभावं प्राप्नोति, तद्वत् परमात्माऽपि विश्वस्मिन् पदार्थे आत्मना एव व्याप्यावस्थितोऽपि तद्धर्म्मास्पृष्ट एव विश्वं प्रकाशते इति श्रुतिसूत्रयोरर्थः । अनेनैवोपमानेन ब्रह्मणः स्वातन्त्र्यप्रकाशकत्वं, विश्वस्य तदायत्तप्रकाशकत्वमप्युक्तं भवति । "अग्निर्यथैको भुवनं प्रविष्टो, रूपं रूपं प्रतिरूपो बभूव, एकस्तथा सर्वभूतान्तरात्मा, रूपं रूपं प्रतिरूपो बहिश्च, वायुर्यथैको भुवनं प्रविष्टो, रूपं रूपं प्रतिरूपो बभूव, एकस्तथा सर्वभूतान्तरात्मा, रूपं रूपं प्रतिरूपो बहिश्च, सूर्य्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः, एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः, एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्" इत्यादिकठवल्लीश्रुतिभ्य एकार्थत्वात् ।

ननु स्यादेतदविद्याब्रह्मणोरुपाधिबिम्बयोर्निरवयवत्वनीरूपत्वाभ्यां प्रतिबिम्बभावाऽनुपपत्तिः । किन्त्वविद्यावच्छिन्नमन्तःकरणावच्छिन्नं वा ब्रह्म प्रत्यगात्मशब्दाभिधेयम् । यथा घटावच्छिन्नाकाशस्य मठाकाशेन भेदस्तस्य चानवच्छिन्नेन महाकाशेनाभेदस्तथाऽन्तःकरणाऽवच्छिन्नस्य व्यष्टिरूपजीवस्याविद्यावच्छिन्नेन समष्टिरूपेण भेदस्तस्य च शुद्धेन नित्यमुक्तेनानवच्छिन्नेन ब्रह्मणाऽभेद उपाधिकृतो भेदश्चेतिचेन्न । विकल्पासहिष्णुतया

तुच्छत्वात् । तथाहि । उपाधिरविद्याभूतोऽन्तःकरणरूपो वा ? चेतनं शुद्धं निर्मुक्तं निर्विशेषं ब्रह्म, कुठारः काष्ठानीव छित्वा भिनत्ति तद्वद् भिनत्ति वा? यथावस्थितमेवैकदेशे स्थित्वाऽवच्छिनत्तीतिविवेचनीयम् । नाद्यः । सर्वगतस्य निरवयवस्य वस्तुनश्छेदनानर्हत्वात् । अन्यथा ब्रह्मणो निरवयवत्वसर्वतगत्वादीनां प्रत्यगात्मनामनादित्वाजत्वादेर्भङ्गप्रसङ्गात् । तद्विषयकश्रुतिव्याकोपाच्च । नापि द्वितीयः । तत्राप्युपाधेः परिच्छिन्नत्वं, सर्वगतत्वं वा । नान्त्यः ' उत्क्रान्तिगत्याद्यनुपपत्तेः । किञ्च । ब्रह्मणो विभुत्वेनोपाधेरपि तत्त्वात् सर्वस्यापि आवृतत्वेन शुद्धस्य मुक्तप्राप्यस्योच्छेदेन जगदान्ध्यापत्तेश्च । नाप्याद्यः । उपाधेः परिच्छिन्नत्वे हि उत्क्रान्त्यादिव्यवस्थासंपत्तावपि दोषाऽन्तरस्य सत्त्वात् । तथाच उपाधेर्गमनाद्यवस्थायां सर्वगतस्य ब्रह्मणो महाकाशवन्निश्चलत्वेन घटावच्छिन्नाकाशस्य घटगमनेन गमनाऽसंभववद् गमनाऽसंभवात् । पूर्वदेशस्थस्य चेतनक्षेत्रज्ञाख्यस्याऽऽकस्मिको मोक्षस्तदुत्तरदेशस्थस्य चेतनस्य नित्यमुक्तशुद्धबुद्धरूपस्य अकस्मान्निर्हेतुको बन्धश्च पदे पदे स्याताम् । कृतनाशाकृताभ्यागमप्रसङ्गश्च । तस्मादनादरणीयोऽयमवदच्छेदवादो विद्वद्भिः ।

किञ्चाहमर्थस्याप्युपलक्षणमेतत् । ज्ञातृत्वाभिन्नाहमर्थत्वमिति यावत् । अहं जानामीच्छामि करोम्यनुभवामीत्यादिप्रत्ययेभ्यः ।

ननु स्यादेतद्—अस्मदर्थस्यात्मस्वरूपत्वं यदि सर्वावस्थानुगतत्वं तस्य, तदेव तु न । सुषुप्त्याद्यवस्थास्वहमर्थस्य व्यभिचारदर्शनात् । अतश्च प्रकृतिकार्य्यरूप एवायमहं जानामीत्यादिप्रतीतिविषयोऽहमर्थः । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा इति गीयमानाच्चेतिचेन्न । उक्तस्य हेतोः स्वरूपसिद्धिशून्यत्वात् । तथाहि । सुषुप्त्यादावहमर्थस्यावगमो मानसिद्धः । एता-

वन्तं कालं सुखमहमस्वाप्सं न किंचिदवेदिषम्,एतावन्तं कालं मूर्च्छित एवासमित्यादिप्रत्यभिज्ञाया एवात्र मानत्वात् । तस्मात् तत्तदवस्थायामपि सुखाज्ञानविषयकज्ञानाश्रयाऽभिन्नोऽहमर्थोऽनुगत एव । विशेषविषयाभावेन विशेषविषयकप्रत्ययस्यानुत्थानात् ।

ननु एतावन्तं कालं मामपि अहं नावेदिषमिति प्रत्यभिज्ञानस्यास्मदर्थाभावविषयकस्यापन्होतुमशक्यत्वाद् व्यभिचारस्यतादवस्थ्याद्धेतुसिद्धिरितिचेन्न । भवदभिमेते प्रत्यभिज्ञानेऽपि तस्यानुगतत्वेन सत्त्वात् तत्र मामिति कर्मभूतद्वितीयान्तस्यास्मदर्थस्य जाग्रदाद्यवस्थानुभूतानादिकर्मसंस्कारनिरूपिताऽऽत्मत्वाभिमतदेहादियुक्तो विषयः । अहमित्यस्य प्रथमान्तस्य कर्तुरस्मदर्थस्य देहेन्द्रियादिविलक्षणशुद्धभगवदात्मकप्रत्यक्पदार्थो ज्ञाता विषयः । तथाच मामिति जाग्रदनुभूतस्य देहादियुक्तस्यात्मत्वेन अभिमतस्य तत्राभावान्निषेधविषयत्वं सूपपन्नम् । तथैव चाहमिति देहादिवियुक्तस्य शुद्धास्मदर्थस्य तत्र भावेन विशिष्टाभावविषयाऽनुभवाश्रयस्य तत्रापि सत्त्वात् तस्य ज्ञातृतया भानमपि सूपपन्नतरम् । *देहाद्यवच्छिन्नाहमर्थाभावविषयकानुभवाश्रयाभिन्नाऽहमर्थस्योक्तप्रत्यभिज्ञानविषयत्वे सति* । एवमहमर्थस्य सर्वावस्थाऽनुगतत्वाद् अनुभवस्मृत्योरेकाधिकरण्यनियमाच्च उक्तहेत्वसिद्धेस्तादवस्थ्यमेव । अन्यथा एतावन्तं कालं नाहमासम्, इदानीं जातोऽहम्,एतावन्तं कालं नाहमभवं, किन्तु किञ्चिदनुभवमात्रमासीदिदानीं तदन्योऽहमस्मीत्यादिप्रत्यभिज्ञानं स्यात् । तस्य तु कुत्राप्यदृष्टचरत्वाद्, अनुपपन्नत्वाच्च । तत्सिद्धम् उक्तप्रत्ययप्रमाणाज्ज्ञात्रभिन्नाहमर्थ एवात्मस्वरूप इति ।

किञ्च सर्वश्रुतिमूलभूतस्य सर्वमन्त्रभूषणरूपस्याप्यस्मदर्थ-

प्रयोगदर्शनाद् गायत्र्याख्यमन्त्रस्यायमेवार्थः । ज्ञात्रभिन्नास्मदर्थ एवात्मेति यावत् । ननु आत्मबुद्ध्योरन्योन्याध्यासाभिप्रायप्रयुक्तोऽयमस्मच्छब्दो नात्मस्वरूपविषयक इतिचेन्न । धीशब्दस्य पृथक् प्रयोगात् । अयमभिप्रायः । वेदमातृगायत्र्याख्याया देवतायाः सर्वज्ञत्वं, न वेति विवेचनीयम् । आद्ये, तया देवतयाऽयमस्मच्छब्दप्रयोगो ज्ञात्वैवाध्यासाभिप्रायेण दर्शित इति वक्तुं नैव शक्यः । अन्यथा मात्रादेरपि वत्सलतरायास्तस्या एवंभूतमिथ्यात्वोपदेशे सर्ववञ्चकतयाऽनाप्तत्वापत्तेः । द्वितीयेऽज्ञत्वादेवाप्रामाणिकत्वापत्तेस्तन्मूलकस्य सर्वस्यापि वेदस्य तच्छाखारूपस्याप्रामाणिकतरत्वापत्तेश्च । सर्वस्य वेदस्य बाधायां सत्यां बाह्यमतस्यैव वरीयस्त्वापत्तेश्च ।

किञ्चास्तां तावत् सुषुप्त्यादावहमर्थस्य व्यभिचारशङ्काऽवकाशो, मोक्षदशायामपि तस्यानुगतत्वेनात्मस्वरूपतासिद्धेरविरुद्धत्वात् । तथाहि । महाप्रलये विश्वलयात्मकेऽवशिष्यमाणस्यैकाद्वितीयादिशब्दाभिधेयस्य परब्रह्माख्यस्य पुरुषोत्तमस्य नित्यमुक्तत्वं निर्विवादम् । तथाच तस्यापि ज्ञात्रभिन्नाहमर्थस्वरूपत्वं श्रावयन्त्यस्तत्साम्यप्राप्तानां मुक्तानामपि तथात्वमर्थतः प्रतिपादयन्ति वेदान्तश्रुतयः । ब्रह्मैवेदमग्र आसीत्, तदात्मानं, वेदाहं ब्रह्मास्मीति, बहु स्यां प्रजायेय, नामरूपे व्याकरवाणि, त्रिवृतं त्रिवृतं करवाणीत्यादयः । मुक्तानामपि वामदेवादीनां तथैवानुभवश्रवणाच्चापि । तद्वै पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्य्यश्चेति ।

किञ्च, वेदाहं समतीतानि वर्तमानानि इति अस्मदर्थस्यैव सर्वज्ञत्वम् । अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा, अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत इति विश्वोत्पत्तिस्थितिप्रवृत्तिसंहारकार-

णत्वम् । इति मत्वा भजन्ते मां बुधा भावसमन्विता इति भजनीयविषयत्वम् । तद्भजतां च ज्ञानित्वम् । तेषामहं समुद्धर्ता मृत्युसंसारसागरादिति संसारनिवारकत्वम् । तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति अनुकम्पादिगुणाऽऽश्रयत्वं, ज्ञानदातृत्वम्, अज्ञाननाशकत्वं, सर्वधीनिष्ठत्वञ्च । भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति इति तद्विषयकज्ञानस्यैव मोक्षान्तरङ्गहेतुत्वम् । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते । मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः परां सिद्धिमितो गताः । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । बहवो ज्ञानतपसा पूता मद्भावमागता इति । मुक्तोपसृप्यव्यपदेशात् । तन्निष्ठस्य मोक्षव्यपदेशादिति सूत्रोक्तमुक्तोपसृप्यत्वम् । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति तदप्राप्तेः संसृतिहेतुत्वम् । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति पुरुषोत्तमत्वम् । अहमात्मा गुडाकेश, क्षेत्रज्ञं चापि मां विद्धि इति विश्वान्तरात्मत्वम् । विष्टभ्याहमिदं कृत्स्नमिति विश्वाधारत्वम् । न तदस्ति विना यत् स्यान्मया भूतं चरचरमिति विश्वव्यापकत्वम् । सर्वस्य चाहं हृदि सन्निविष्ट इति सर्वधीवृत्तिप्रवर्तकत्वम् । वेदैश्च सर्वैरहमेव वेद्य इति सर्वशास्त्रयोनित्वम् । अपरेयमितस्त्वन्यां, जीवभूतां महाबाहो ययेति चेतनाचेतनप्रकृत्यधिष्ठातृत्वम् । अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इति तदवज्ञाया मूढत्वराक्षसत्वासुरत्वमोहत्वभावापत्तिकारणत्वम् । मामेकं शरणं व्रजेति सर्वशरण्यत्वम् । अहं त्वां सर्व-

पापेभ्यो मोक्षयिष्यामि मा शुच इति निःशेषपापनिवारकत्वम् । न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्व इति कालत्रयाऽबाध्यत्वम् । मत्तः परतरं नाऽन्यत् किञ्चिदस्ति धनञ्जय इति साम्यातिशयशून्यतया ईश्वरकल्पानामपि नियन्तृत्वरूपं निरतिशयैश्वर्यं च स्वयमेव श्रीमुखेन गानात् । सर्वस्यापि गीताशास्त्रस्यास्मदर्थाभिन्नसर्वज्ञानन्ताचिन्त्यशक्त्याश्रयपुरुषोत्तमविषयकत्वमवगम्यते उदाहृतेभ्यो हेतुगर्भितश्लोकेभ्यः । तस्मादहमर्थ एव परब्रह्मभूतो विश्वात्मा भगवान् वासुदेव इति सिद्धम् ।

एवमेव कर्तृत्वमपि । तथाहि । तन्मनोऽनुकुरुतेत्यादिवाक्ये मनसः कर्मत्वं, शृण्वन्तः श्रोत्रेण विद्वांसो मनसेति करणत्वम् । मन उत्क्रामन्मीलित इवाश्नन् पिबन्नास्ते इत्यादिश्रुतौ मनस उत्क्रमणानन्तरमपि आत्मनः कर्तृत्वं, परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते जक्षन् क्रीडन् रममाणः सह ब्रह्मणा विपश्चितेति परमोक्षदशायां भगवद्भावापत्त्यनन्तरमपि कर्तृत्वं श्रूयते उदाहृतश्रुतिभ्यः । अतः सर्वावस्थानुगतत्वात् कर्तृत्वं स्वाभाविकमेवेत्यवगम्यते । इतरथा मनस एव कर्मत्वकरणत्वकर्तृत्वादिप्रसङ्गो दुर्वारः । तथात्वासंभवात् । अदृष्टचरत्वात् । नापि सुषुप्त्यादौ तदभावः शङ्कनीयः । ज्ञातृत्ववत् तस्यापि अनुगतत्वात् ।

किञ्च बद्धावस्थायां ज्ञानादिसंकोचेन करणनिमित्तकत्वाद्विशेषकर्तृत्वस्य करणानां च सुषुप्त्यादौ लयात् तदभानं न विरुद्धयते । नचैवं जाग्रदवस्थायां कदाचिदपि तदुपरमो न स्यादिति वाच्यम् । विशेषविषयसंबन्धिक्रियाया अपि तत्सहकारित्वात् । तस्या अभावे तदनाविर्भावो विरुद्धः । ननु करणक्रियादिनिमित्तकात्मनिष्ठकर्तृत्वकल्पने महागौरवाद् वरीयान्

उपाधेरेव कर्तृत्वाभ्युपगम इति चेन्न । उपाधेर्जडस्य कर्तृत्वाऽभ्युपगमेऽतिप्रसङ्गात् । ननूपाधिसंबन्धादकर्तुरप्यात्मनः कर्तृत्वं, नोपाधिमात्रस्येतिचेन्न । तथात्वे नपुंसकस्यापि स्त्रीसंबन्धमात्रेण प्रजोत्पत्तिः स्वीकरणीया स्यात् । एवं कुत्राप्यदृष्टचरीऽनुपपन्ना चेति । तस्मात् स्वाभाविककर्तृत्वाद्याश्रयस्यैवात्मनः स्वाभाविकदहनशक्त्याश्रयस्याग्नेः काष्ठादिसंबन्धेन तदाविर्भाववत् करणादिसंबन्धनिमित्तकस्तदाविर्भाव उपपन्नतरः । नचैवं कर्तृत्वनिषेधविषयकशास्त्रबाध इति वाच्यम् । तस्य स्वतन्त्रत्वावच्छिन्नकर्तृत्वादिनिषेधविषयकत्वेन समञ्जसत्वात् । अन्यथा, कर्ता शास्त्रार्थवत्त्वादिस्वधिकरणबाधस्यापि तुल्ययोगक्षेमत्वात् कथं नालोच्यते वादिभिः । ननु तस्य बुद्ध्यवच्छिन्ननिष्ठकर्तृत्वविषयकत्वान्न बाध इतिचेन्न । अशब्दानुमानिकसांख्यमतप्रवेशात् । तत्र दोषाणां पूर्वमेवोद्घाटितत्वात् । निराकृतत्वाच्चावच्छेदप्रतिबिम्बवादयोः । तस्माज्ज्ञातृत्ववत् कर्तृत्वमपि स्वाभाविकमात्मनः स्वरूपनिरूपितो धर्मविशेष इति साधीयान् ।

एवं भोक्तृत्वादयोऽप्यूहनीयाः । तथाहि सुषुप्त्यादौ सुखादिभोक्तृत्वे प्रत्यभिज्ञायाः, मोक्षे भगवत्स्वरूपगुणादिविषयानुभवानन्दभोक्तृत्वे, जक्षन् क्रीडन् रममाणः सह ब्रह्मणा विपश्चितेति श्रुतेश्च प्रमाणत्वात् ।

यद्वा ज्ञानस्वरूपमित्यनेनैव तार्किकपक्षव्यावृत्तिवद् बाह्यपक्षव्यावृत्तिरप्यर्थसिद्धा । उभयोरपि अचेतनात्माङ्गीकारसाम्यात् । चकारोऽहमर्थत्वसमुच्चयार्थक एवेति पदस्वारस्यं ज्ञेयम् ।

ननु स्यादेतत्, तथाप्युक्तलक्षणस्य परब्रह्मणि पुरुषोत्तमाख्येऽपि समन्वयात् तत्राऽतिप्रसङ्गस्तस्यापि लक्ष्यत्वाभ्युपगमेऽस्मत्पक्षपातादसन्तोषसिद्धेः सिद्धान्तभङ्ग इति चेत् तत्राह—

हरेरिति ॥ श्रीपुरुषोत्तमायत्तस्वरूपस्थितिप्रवृत्तिकत्वं, सर्वनियन्तुर्विश्वात्मनः श्रीवासुदेवस्यायत्तं,नियततन्त्रं स्वरूपं,स्थितिश्च, प्रवृत्तिश्च यस्य तत्त्वं, सर्वदेशसर्वकालीनवस्तुविषयकज्ञानादौ क्रियाप्रवृत्त्यादौ च स्वातन्त्र्याऽभावत्वमिति यावत् । तथाच देहादिजडवर्गभिन्नचेतनत्वे ज्ञानाश्रयत्वे च सति भगवदायत्तस्वरूपस्थितिप्रवृत्तिकत्वं त्रिविधानां प्रत्यगात्मनां साधारणम् । तत्र सत्यन्तस्य विशेषणद्वयात्मकस्य परमात्मसाधारणत्वेऽपि न क्षतिः। उत्तरदलस्याऽसाधारणस्य व्यावर्तकत्वान्नोक्तदोषगन्धस्पृष्टत्वात-स्पर्शावकाशः । उक्तासाधारणत्वे, श्रुतयः—" तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति, एष एव साधु कर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते, आत्मा हि परमः स्वतन्त्रोऽधिगुणो, जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः । अचिन्यशक्तिः पुरुषः पुराणः, नचान्येषां शक्तयस्तादृशाः स्युः, स कारयेत् पुण्यमथापि पापं न तावता दोषवानीशिताऽपि " इत्यादयः । " बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया । सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च " इति श्रीमुखेन स्वयमेव गीतानि च । जगद् वशे वर्ततेऽदः कृष्णस्य सचराचरमिति भीष्मश्चाह ।

नन्वीश्वरस्यैव पुण्यापुण्यकर्मणां प्रयोजककर्तृत्वाभ्युपगमे वैषम्यनैर्घृण्यप्रसक्तिः स्यादितिचेन्न । कर्मसापेक्षत्वात् । तथाह भगवान् सूत्रकारः—वैषम्यनैर्घृण्ये न सापेक्षत्वात्तादीति । ननु

तर्हि कर्मण एव प्रयोजकत्वमभ्युपगन्तव्यं, किमीश्वरेण सापेक्षेणेतिचेन्न । तस्य जडत्वेन कर्तृत्वनियन्तृत्वादेरसंभवात् । अन्यथा घटादावतिप्रसङ्गाच्च । नच प्रलये कर्मणोऽप्यभावात् कथमिव तत्सापेक्षत्वं परमात्मनः संपादनीयमिति वाच्यम् । कर्मणामनादित्वात् । इतरथा सृष्ट्यभावप्रसङ्गः । कृतनाशाऽकृताभ्यागमप्रसङ्गश्च । तथाच सूत्रं—न कर्माविभागादितिचेन्नानादित्वादिति । तस्मात् कर्मसापेक्षत्वात् पुण्यापुण्यादिप्रयोजकस्य नियन्तुर्न वैषम्यादिशङ्कावकाशः ।

एतदुक्तं भवति—यथा व्रीह्याम्रकण्टकादीनां विषमाणामप्युत्पत्तौ पर्जन्यस्यासाधारणहेतुत्वेऽपि वैषम्यस्य तत्तद्बीजवृत्तित्वेन न पर्जन्ये तत्प्रसक्तिरेवमेव पुण्यापुण्यसुखदुःखादीनां विषमाणामपि साधने परमात्मनोऽसाधारणत्वेऽपि वैषम्यस्य तद्बीजात्मकानादिकर्म्मनिष्ठत्वेन परमेश्वरे भगवति न वैषम्यादिप्रसङ्ग इति । तथाच श्रुतिः—पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति। नचैवं मुक्तौ कर्मणोऽभावादीश्वरतन्त्रत्वस्याभाव इति वाच्यम्। नियन्तृत्वनियम्यत्वयोस्तत्त्वम्पदार्थस्वरूपत्वात्। न हि स्वरूपनाश एव मुक्तिरपि तु स्वरूपापत्तिरेवेति । किञ्च । न वयं ब्रह्मनियन्तृत्वस्य कर्मसापेक्षत्वं ब्रूमः, किन्तु पुण्यादिकर्मकारयितृत्वे तत्फलदातृत्वे च । तयोर्मुक्तावभावेऽपि स्वरूपस्थितिप्रवृत्त्यादौ नियन्तृत्वस्य सदायतनत्वात् सर्वं समञ्जसम् । नच स्यादेतत्, तथापि परमात्मनः सर्वप्रयोजकत्वाभ्युपगमे शास्त्राऽऽचार्योपदेशस्य वैयर्थ्यापत्तिरिति वाच्यम् । भगवदायत्तस्वरूपस्थितिप्रवृत्त्यादिविषयकज्ञानाभाववन्तमेव मुमुक्षुमधिकृत्य शास्त्रस्य प्रवृत्त्यभ्युपगमात् सर्वमनवद्यम् ।

किञ्च, प्रत्यगात्मानः, परमात्मायत्तस्वरूपस्थितिप्रवृत्तिकाः ।

तदात्मकत्वात्। यो यदात्मकः स तदायत्तस्वरूपस्थितिप्रवृत्तिकः। मृदात्मकघटादिवत्। घटादीनां मृदात्मकत्वेन मृदायत्तस्वरूपस्थित्यादेर्दृष्टचरत्वाद् उक्तसिद्धान्ताऽनुमानस्यापि प्रमाणत्वम्। नचाचेतने व्यभिचारत्वेन हेतोरनैकान्त्यमिति वाच्यम्। तस्यापि साध्यत्वसाम्यात्। नन्वेवं तर्हि दृष्टान्तासिद्धिरितिचेन्न। व्यतिरेकिदृष्टान्तस्य खपुष्पादेः सत्त्वात्। चेतनाचेतनवस्तुजातं, ब्रह्माऽऽयत्तस्वरूपस्थितिप्रवृत्तिकम्। तदात्मकत्वात्। यन्नैवं तन्नैवम्। खपुष्पनरविषाणाद्यवस्तुवत्। किञ्चेश्वरपारतन्त्र्यस्येश्वरेऽपि सत्त्वादात्मायत्तत्वात् परमात्मनः परस्येति ब्रह्मण्यतिव्याप्तिस्तदवस्थैवेति। तर्काऽभिज्ञस्य देवानांप्रियस्य तात्पर्यमाकलय्य तद्व्यावृत्त्यर्थमन्यदसाधारणविशेषणं वदन् प्रत्यग्वृत्तिपरिमाणविवादं निराकरोति—अणुमिति॥ यद्वा, किंपरिमाणकोऽसौ प्रत्यगात्मेत्याशङ्क्यायां वैभवमाध्यमपरिमाणवादितार्किकादिबाह्यादिपक्षौ निराकरोति—अणुमिति॥ अणुपरिमाणकमिति यावत्। "अणुर्ह्येष आत्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश, अणुर्वा ह्येष आत्मा यं वा एते सिनीतः, पुण्यं पापं, बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चाऽऽनन्त्याय कल्पते" इत्यादिश्रुतेः। "उत्क्रान्तिगत्यागतीनां, नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्, तद्गुणसारत्वात् तद्व्यपदेशः प्राज्ञवद्" इत्यादिन्यायाच्च।

नन्वणुपरिमाणकस्य प्रत्यगात्मनो देहातिसूक्ष्मतमाल्पतरैकदेशस्थत्वेन मेर्वेकातिसूक्ष्मदेशस्थसर्षपस्येव सर्वशरीरानुसन्धातृत्वप्रकाशकत्वतत्तदवयववृत्तिसुखदुःखाद्यनुभवितृत्वादीनामसंभवस्य दुर्वारत्वान्नाणुत्वोपपत्तिरितिचेन्न। धर्म्मिणो जीवात्मनोऽणुत्वेऽपि तदाश्रितधर्मभूतज्ञानस्य विभुत्वेन सर्वस्य सामञ्ज-

स्यं स्यात् । गुणाद्वा लोकवदिति न्यायात् । "यथा प्रकाशय-
त्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशय-
ति भारते"ति दृष्टान्तोपपत्तिसहकृतभगवद्वचनाच्च। एतेनैव विभु-
विषयकशास्त्रस्यापि नैराकाङ्क्ष्यं व्याख्यातम् ।

ननु बुद्ध्युपाधिकृतमेवेदं श्रूयमाणमणुत्वं,न वास्तवम् । बुद्धे-
र्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट इति श्रव-
णाद्विभुपरिमाणकत्वमात्मनोऽभ्युपगन्तव्यमिति चेत् । अहो
विवेकनैपुण्यं देवानां हितकारिणः !! । स्वहस्तेनैव स्वगृहदाहो
नालोच्यते कथम् । भवद्भिरुदाहृतश्रुतेरणुपरत्वेनास्मदिष्टत्वाद्,
युष्मदनिष्टत्वाच्च । तथाहि । बुद्धेः परिमाणलक्षणेन गुणेन, तथै-
वात्मपरिमाणलक्षणेन गुणेन चोभयथाऽपि अवरः प्रत्यगात्मा
अणुपरिमाणक एव दृष्टः सूक्ष्मदर्शिभिरेकाग्रमनस्कैः। अवधार-
णेनान्ययोगव्यवच्छेदपरेण मध्यमविभुपक्षौ निरस्येते, न मध्य-
मपरिमाणको विभुपरिमाणको वा, किन्त्वाराग्रमात्रोपलक्षिताणु-
मात्र एवेत्यवधारणार्थः । यत्तूक्तं विभुरेवात्मेति तत्तुच्छम् ।
तथाहि । विभुत्वे बहुत्वमेकत्वं वा प्रत्यगात्मन इति विवेचनीयम्।
नाद्यः । तत्र मनसोऽणुत्वे विभुत्वे वा सर्वेषामपि विभूनां प्रत्य-
गात्मनां सर्वमूर्तसंयोगवत्त्वाविशेषात् सर्वैर्मनोभिः सह नित्यसंयु-
क्ततया सर्वेषां सर्वान्तरवृत्तिज्ञातृत्वापत्तेः । अत एव ब्रह्मण्यति-
प्रसङ्गाच्च । अहं त्वमयमिति प्रत्ययानां निगमनाविरहेण विभा-
गाभावापत्तेश्च । आत्मत्वेन मनःसंयोगत्वेन च विशेषाभावात् ।
नचात्मत्वसाम्येऽपि तत्तत्कर्म्मतज्जन्मसंस्कारविशिष्टमनोवैल-
क्षण्यादीनां परस्परभिन्नत्वेन नियामकानां सत्त्वान्नोक्तदोषाव-
काश इति वाच्यम् । तत्तत्कर्म्मादृष्टादीनामपि नियामकत्वेना-
भ्युपेतानां परस्परभिन्नानामपि सर्वेष्वात्मसंबन्धाऽविशेषात्

तत्राप्यन्यकल्पनेऽनवस्थापत्तेश्च । न द्वितीयः । तत्राप्येकस्य विभोरात्मनः सर्वैरन्तःकरणरूपोपाधिभिरवच्छिन्नत्वात् सर्वेषामुपहितानां सर्वज्ञातृत्वं समानम्। अन्यथा स्वस्यैवैकस्मिन् देशे वर्तमानानामन्तःकरणानां संबन्धेन तत्कृतदुःखाद्यनुभवत्वाऽभ्युगमे देवदत्तस्य स्वशिरःपादाद्यवयवद्दत्तिवेदनानुसंधानाभावप्रसङ्गात् । अननुसंधातुर्देहवज्जडत्वापत्तेः । ज्ञातृत्वादेरुपाधिधर्म्मत्वाभ्युपगमात् । उपाधेश्च चेतनत्वापत्तेश्च । उपाधेश्चाणुत्वस्वीकारेण शिरःपाण्याद्यवयवैर्युगपदसंबन्धतया तद्गतसुखादीनां युगपदनुसंन्धानाभावापत्तेश्च । उपाधेर्मध्यमपरिमाणाङ्गीकारे तदवच्छिन्नस्यापि तथात्वापत्त्या बौद्धपक्षस्वीकारापत्तेश्च । उपाध्यणुत्वनिरूपितजीवात्माणुत्वप्रतिपादितसिद्धान्तभङ्गाच्चोक्तेभ्यो हेतुभ्यो महापापीयानयं पक्षः । उक्तसिद्धान्तस्यैव श्रौतत्वाद् वरीयस्त्वम् ।

स्यादेतत् । तथाप्यणुत्वे निरवयवत्वस्याप्यवश्यंभावात् तथात्वे चेश्वरस्य तत्र व्याप्त्यसंभवेनान्तर्यामित्वभङ्गप्रसङ्गादितिचेन्न तुच्छतरत्वाच्छङ्कायाः । जीवस्य निरवयवत्वाणुत्वयोः सतोरपि परस्य व्यापनशीलत्वेनैव सर्वत्र व्यापकत्वात् । तथाहि । न हि नियन्तृनियम्यभावे, व्याप्यव्यापकभावे वा सावयवत्वनिरवयवत्वयोः प्रयोजकत्वम् । तथात्वे कालशब्दस्पर्शरूपादीनां निरवयवाणां नियम्यत्वाभावप्रसङ्गात् । किन्तु वस्तुगतव्याप्यव्यापकताशक्तिरेव नियामिका । एवञ्च सर्वगतस्य नियन्तुः सर्वव्यापनस्वरूपशक्तिमत्त्वात् सर्वमनवद्यमिति कृतं विस्तरेण । एवमेतैर्विशेषणैर्नित्यमुक्तादीनां साधारणलक्षणोक्त्या स्वरूपगुणपरिमाणानि निरूपितानि ।

इदानीं बद्धानां विशेषमाह—शरीरसंयोगवियोगयोग्य-

मिति ॥ अत्र शरीरशब्दस्तत्कारणभूतानादिकर्मात्मकाविद्योपलक्षणार्थः। कार्य्यकारणयोरभेदात्। अनादिकर्मरूपाविद्यावच्छेदलक्षणबन्धार्हत्वे सति तन्निवृत्तिपूर्वकभगवद्भावापत्तिलक्षणमोक्षार्हमिति यावत्। तथाहि। अनादिकर्मात्मकाविद्यावच्छिन्नो देवतिर्य्यङ्मनुष्यादिदेहरूपं संसारचक्रमनुभवन् श्रीभगवन्निर्हेतुककृपाकटाक्षावलोकितः, आचार्य्यदेवो भूत्वा तन्मुखानिर्झरितसच्छास्त्रसुधाल्पावितसंशयादिरोगो, भगवत्स्वरूपादिविषयकध्यानसन्ततिपरिपाकलब्धसाक्षात्कारनिरस्तकर्म्मबन्धो भगवद्भावापत्तिलक्षणमोक्षभागी भवतीति वाक्यार्थः। "यमेवैष वृणुते तेन लभ्यः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे। यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इत्यादिश्रुतिभ्यः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् इत्यादिभगवदुक्तेश्च।

ननु श्रीपुरुषोत्तमानुग्रहः परिच्छिन्नो? विभुर्वा?। नाद्यः। जीवानुग्रहवदप्रयोजकतयाऽकिञ्चित्कारित्वात्। कालादिपरिच्छेदेनानित्यत्वाच्च। नापि द्वितीयः। सर्वत्र व्याप्त्या सर्वमोक्षप्रसङ्गात्। तत्साधनतत्प्रतिपादकशास्त्रस्य वैयर्थ्यापत्तेश्चेतिचेन्न। व्यापकस्यापि तस्य श्रवणादिसाधनसंपन्ने आचार्य्यदेवभक्तिसंपृक्ते एवाविर्भावो, नान्यत्र। यथा न्यायपक्षे व्यापकस्यापि गोत्वादेः सास्नादिमत्येव संबन्धो, नान्यत्र। यथाचौपनिषदानां सिद्धान्ते ब्रह्मस्वरूपस्य विश्वात्मनः, अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति वचनात् सर्वत्र व्याप्त्यापि क्वचिदेव तदधिकारिविशेष आसन्नमोक्षके तत्साक्षात्कारो, नान्यत्र, तद्वत्।

एतेनैव सर्वेषामपि भगवदीयगुणानां स्वरूपवद् व्यापकत्वं मोक्षादिदानहेतुत्वं, स्वाभाविकत्वं चोक्तं भवति । अतो न सर्वमोक्षप्रसङ्गदोषोत्थानाऽवकाशः । नापि साधनादिवैयर्थ्यापत्तिः । स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतेः । एतच्चाऽग्रे निपुणं वक्ष्यामः ॥

अथ संख्याविवादं निराकरोति—प्रतिदेहभिन्नमिति ॥ देहं देहं प्रति भिन्नमिति प्रतिदेहभिन्नम् । ब्रह्मादिस्थावरान्तेषु चतुर्विधेष्वपि देहेषु स्वरूपेणैव भिन्नमिति यावत् । अनेन परमात्मनो जीवानां च महद्वैलक्षण्यमुक्तम् । परमेश्वरस्य सर्वत्रैकत्वात् । अत एव प्रत्यगात्मनामपि मिथोभेदसिद्धया एकजीववादिपक्षो निरस्तः । अन्यथा एकस्मिन्नपि सुप्ते मूर्छिते मृते वा निखिलस्यापि प्रतीत्यापत्तेः । एतेनैव सुखादिगुणसांकर्य्यशङ्कापि दूरतो निरस्ता भवति । तथाच शास्त्रम्—"अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा, य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति एष ते आत्माऽन्तर्याम्यऽमृतः, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, धियो यो नः प्रचोदयात्, शारीरश्चोभयेऽपि हि भेदेनैनमधीयते, भेदव्यपदेशाच्चाऽन्यः, अधिकं तु भेदनिर्देशात्, न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च । बहवो ज्ञानतपसा पूता मद्भावमागता"इत्यादि ॥

तथात्वेऽप्येकैकस्य जीवस्योक्तसाधनसंपत्त्या क्रमेण मोक्षाऽभ्युपगमे कदाचित् सर्वेषामेव मोक्षापत्तौ निःशेषकार्य्यकारणात्मकविश्वासन्ताभावप्रसङ्ग इत्याशङ्क्य समाधत्ते—यदनन्तमाहुरिति ॥ यद् यस्माज्जीवमनन्तमाहुस्तस्मान्नोक्तशङ्कावकाश

इत्यर्थः । अनन्तत्वं चात्र संख्यानिरूपितावसानशून्यत्वम् । असंख्याकमिति यावत् । आहुरित्यत्र वेदान्तवाक्यानि महर्षयश्चेति योज्यम् । तानि च पूर्वमेवोदाहृतानि । जीवमित्यत्रैकवचनोक्तिर्जीवत्वसामान्याभिप्रायिका । अन्यथा प्रतिदेहभिन्नमनन्तमित्यनयोर्विशेषणयोर्वैयर्थ्यापत्तेः । नचैकजीववादपक्षेऽपि उपाधिनैव तयोः संभव इति वाच्यम् । तथात्वेऽपि पूर्वोक्तदोषस्य तादवस्थ्यात् । तस्माज्जीवत्वजात्यभिप्रायकमेवात्रैकवचनमित्येव वरम् । आचार्य्यप्रोक्ता या जातिः, सा नित्या साऽजराऽमरेति उद्योगपर्वणि सनत्सुजातवचनात् ॥ १ ॥

एवं तावत् प्रत्यगात्मनः स्वरूपगुणपरिमाणसंख्याविशेषेषु प्रमाणपूर्वकं निरूपितेषु सत्सु तथाभूतप्रमाणसिद्धस्वरूपकं परमार्थसद्वस्तु चेत् कथं नानुभूयते इति शङ्कां परिहरन् विशिनष्टि—

अनादिमायापरियुक्तरूपं
त्वेनं विदुर्वै भगवत्प्रसादात् ॥
मुक्तं च बद्धं किल बद्धमुक्तं
प्रभेदबाहुल्यमथैषु बोध्यम् ॥ २ ॥

अनादिमायापरियुक्तरूपमिति ॥ अनाद्या अघटघटनापटीयस्या गुणमय्या मायया प्रकृत्या परियुक्तं परिवेष्टितं संकुचितं रूपं धर्मभूतज्ञानं यस्य तम् । श्रीभगवतः पुरुषोत्तमात् । पराङ्मुखतयाऽनादिकर्म्मात्मकाविद्यावच्छिन्नत्वाद् देहेन्द्रियादिलक्षणमायागुणाध्यितरङ्गताडितस्वरूपत्वेनासन्तसंकुचितज्ञानत्वान्नानुभूयते प्रत्यगात्मतत्त्वमित्यर्थः ।

ननु, एवं तर्हि, गौरनाद्यन्तवतीत्यादिश्रुतेर्मायागुणप्रवाहस्य अनाद्यनन्तत्वात् कदाचिदपि तज्ज्ञानं न स्यात् । तथात्वे च तितिक्षाविषयत्वमेव तद्विविदिषायाः, सुतरां वैयर्थ्यं च तत्प्रतिपादक-

शास्त्रस्यापीतिचेत् तत्राह–त्वेनं विदुर्वै भगवत्प्रसादादिति । वा इति निश्चयार्थः । तुशब्दः शङ्कानिरासपरः । एवं प्रमाणसिद्धमपि प्रत्यगात्मानं श्रीभगवतः पुरुषोत्तमस्यानुग्रहाद् विदुः । भगवदीयाऽनादिवैदिकसत्संप्रदायानुयायिन इति शेषः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मन इति श्रुतेः । एतदुक्तं भवति । मायाया अनाद्यनन्तत्वेऽपि तत्तत्क्षेत्रज्ञविशेषकर्म्मनिमित्तकबन्धमोक्षयोरीश्वरस्यैव प्रदातृत्वेन नियामकत्वात् । न माया, भावाभावयोः संसारबन्धस्थितिमोक्षहेतुरिति श्रुतेः । "बन्धको भवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः । दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इत्यादिस्मृतेश्च । तस्मात् तद्विषयकज्ञानसंकोचलक्षणाज्ञाननिवृत्तौ तज्ज्ञानविकाशो भवत्येव, घटस्थदीपस्य तदात्मकप्रतिबन्धसंकुचितप्रभस्य घटात्मकप्रतिबन्धनिवृत्तौ तत्प्रभाप्रकाशवत् । तस्मात् तज्जिज्ञासायाः सार्थकत्वान्न तितिक्षाविषयता, नापि तद्विधायकशास्त्रवैयर्थ्यमिति ।

नन्वनुग्रहस्यान्योपायसापेक्षत्वं न वा । नाद्यः । अप्रधानतापत्तेः । अन्योन्याश्रयापत्तेश्च । नापि द्वितीयः । सर्वत्र व्याप्तिप्रसङ्गादिति चेन्न । तस्य निरपेक्षत्वेऽपि नैर्घृण्यादिदोषनिवृत्तये, उपायान्तरप्रतिपादकशास्त्रबाधानिवृत्तये च साधनान्तरस्य व्याजमात्रत्वाभ्युपगमान्नोक्तविकल्पावकाशः । इदमत्राकूतम् । यद्यपि, न तत्समश्चाभ्यधिकश्च दृश्यते, न तत्समश्चाभ्यधिकः कुतोऽन्य इति श्रुतिस्मृतिभ्यः श्रीपुरुषोत्तमस्य रमाकान्तस्यातिशयसाम्यशून्यस्य भगवतः स्वतन्त्र एव प्रसादो, निरङ्कुशैश्वर्य्यत्वात् । तथापि साधनान्तरप्रतिपादकशास्त्रस्यापि स्वसत्यप्रतिज्ञत्वापादकत्वाद् बाधा मा भूत्, तस्मिन् बाधिते सति स्वस्य प्रतिज्ञाहानिप्रसङ्गेनानि-

ष्टत्वात् । इतरथा, रामो द्विर्नाभिभाषत इत्यादिशास्त्रबाधात् साधनान्तरस्यापि व्याजीक्रियते । किञ्च । सर्वथा निर्व्याजत्वाभ्युपगमे, नैर्घृण्यादिप्रसङ्गः स्यात् । न हि व्याजमात्रस्य वस्तुनः स्वातन्त्र्यहानिकारकत्वे शक्तिः । तथात्वे च न कश्चिद्विरोधः । अन्यथा, यमेवैष वृणुते तेन लभ्यः, मत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्, मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययमित्यादिशास्त्रव्याकोपाद् उक्तसिद्धान्त एव वरीयान्, अलं विस्तरेणेति ।

एवमेतावता जीवात्मस्वरूपादिकं निरूप्य तज्ज्ञानाऽज्ञानकारणं च निर्णीतमिदानीं पूर्वमुपक्षिप्तं जीवविशेषं विविनक्ति—मुक्तञ्चेति । चकारो बद्धसमुच्चयार्थकः । बद्धं चेत्यर्थः । भक्तं भजनाऽर्हं मुमुक्षुमिति तत्सापेक्षनिरूप्यत्वाद् बुभुक्षुरपि उक्तो भवति। स्वाभाविक्यपरिच्छिन्नध्येयाकारेन्द्रियवृत्तिमत्तया भजनशीलत्वाद् भक्तशब्दो मुमुक्षुवाचकः। तद्भिन्नस्तद्भाववद्बुभुक्षुरिति यावत् । यद्यपि बद्धमुक्तभेदाद् द्वैविध्यमुक्तम्, अथापि बद्धमुक्तप्रभेदबाहुल्यं बोध्यमित्यन्वयः । एतदुक्तं भवति । जीवात्मानस्तावद् द्विविधाः । बद्धमुक्तभेदात् । तत्र बद्धो नामानादिकर्मवासनाकार्यभूतदेवतिर्यग्याद्यनेकविधशरीरतत्संबन्धिषु आत्मत्वाऽऽत्मीयाभिमानदार्ढ्यवन्तो बद्धाः । तथाभूताश्च द्विविधाः । मुमुक्षुबुभुक्षुभेदात् । तत्र मुमुक्षव आध्यात्म्यादिविविधसांसारिकदुःखानुभवजातक्लेशवत्तया विरक्ताः सन्तः संसारान्मोक्षमिच्छव इति । तेऽपि द्विविधाः—भगवद्भावापत्तिलक्षणमुक्तिकामा, निजस्वरूपापत्तिकामाश्च। वैषयिकानन्दमिच्छवो बुभुक्षवः । तेऽपि द्विविधाः, भाविश्रेयस्का, नित्यसंसारिणश्चेति । मुक्ता अपि द्विविधाः, नित्यमुक्ता मुक्ताश्चेति। तत्राद्याश्च गर्भजन्मजरामरणादिप्रकृतितत्सं-

बन्धतत्कार्यदुःखविषयकानुभवशून्यत्वे सति नित्यभगवदीयदर्शनादिभजनानुभवानन्दैकरसाः । तेऽप्यानन्तर्य्यपार्षदभेदेन द्विविधाः । तत्रानन्तर्य्याः किरीटकटककुण्डलवंश्यादयः । पार्षदा विश्वक्सेनगरुडादयः । सदा पश्यन्ति सूरय इत्यादिवचनात् । मुक्ता नामाऽनादिकर्म्मात्मकाविद्यानिरूपितप्रकृतितत्कार्य्यसम्बन्धदुःखादिविनिर्मुक्ताः । तेऽपि द्विविधाः । "निरतिशयानन्दरूपभगवद्भावापत्तिलक्षणमुक्तिवन्त एके । "बहवो ज्ञानतपसा पूता मद्भावमागताः । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" इति भगवदुक्तेः । स्वस्वरूपानन्दापत्तिमात्रेण संतुष्टाश्चान्ये । तत्र भगवद्भावापन्नानां तदिच्छानुरूपनिजेच्छयानन्तविग्रहादिपरिग्रहोऽपि श्रुतिसिद्धो भगवदवतारादिवत् । स एकधा भवति द्विधा भवति त्रिधा भवति पञ्चधा भवति सहस्रधा भवत्यपरिमितो भवतीत्यादिवचनात् । अन्येऽपि भेदा आकरेषु द्रष्टव्याः । अलमतिविस्तरेण ॥ इति त्वम्पदार्थसंग्रहः ॥ २ ॥

अथाऽचेतनं निरूप्यते—

अप्राकृतं प्राकृतरूपकं च
कालस्वरूपं तदचेतनं मतम् ॥
मायाप्रधानादिपदप्रवाच्यं
शुक्लादिभेदाश्च समेऽपि तत्र ॥ ३ ॥

अप्राकृतमित्यादिना । अचेतनं त्रिविधं मतं श्रुतिभिरित्यन्वयः । अचेतनत्वं च चेतनविजातीयत्वम् । ज्ञातृत्वाद्यनधिकरणत्वञ्च । त्रैविध्यमेव विविच्यते—**अप्राकृतं प्राकृतरूपकं च कालस्वरूपमिति** । तत्र तावत् प्राकृतं विशिनष्टि—**मायाप्रधानादिपदप्रवाच्यमिति** । मायादिपदैरभिधीयमानं प्राकृतम् ।

आदिपदेन, तमोऽव्यक्तादिसंग्रहः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, प्रधानक्षेत्रज्ञपतिर्गुणेशः, अव्यक्तात् पुरुषः पर इति श्रुतिभ्यः । "अव्यक्तं कारणं यत्तत् प्रधानमृषिसत्तमैः । प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् । अक्षयं नान्यदाधारमप्रमेयमजरं ध्रुवम् । हेतुभूतमशेषस्य प्रकृतिः सा परा मुने । दैवी ह्येषा गुणमयी मम माया दुरत्यया" इत्यादिस्मृतिभ्यश्च । तदेव लक्षणमुखेन द्योतयति—**शुक्लादिभेदाश्च समेऽपि तत्रेति**। **तत्र** तस्मिन् प्राकृतपदार्थे, **समेऽपि** सर्वेऽपि शुक्लादिभेदाः सन्ति । आदिशब्देन लोहितादिग्रहः । शुक्लादिपदाभिधेयसत्त्वादिगुणत्रयाश्रयत्वं प्राकृतत्वमिति यावत् । अजामेकां लोहितशुक्लकृष्णामितिश्रुतेः । गुणाश्च सत्त्वरजस्तमांसि । तत्र ज्ञानादिकारणं गुणः सत्त्वम् । सत्त्वात् सञ्जायते ज्ञानमिति वचनात् । इदमेव रजस्तमसी अभीभूय उत्कृष्टं सन्मोक्षौपयिकमभिधीयते, श्रीभगवद्गीतोक्तशमदमादिसाधनकदम्बाऽऽचरणद्वारेण । लोभादिकारणं गुणविशेषो रजः । रजसो लोभ एव चेति वचनात् । इदमेव लोभादिवृद्ध्या क्षेत्रज्ञानां तत्त्वनिष्ठाभ्रंशहेतुः । प्रमादादिकारणं गुणविशेषस्तमः । प्रमादमोहौ तमसो भवतोऽज्ञानमेवचेति वचनात्। इदञ्च स्वपरस्वरूपावरणे प्रधानकारणम्। इदमेव गुणत्रयाश्रयभूतं द्रव्यं साम्यावस्थापन्नं सत् प्रधानादिशब्दवाच्यम् अनादिजीवादृष्टानुसारिण्या श्रीपुरुषोत्तमेच्छया विक्षिप्तं सद् गुणवैषम्यं भजते । स एव कार्य्यव्यक्तीभावकालः । "प्रधानं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययाविति स्मृतेः । सृष्टिक्रमश्च प्रलयावसाने सृष्टिसमये सृज्यमानप्रपञ्चवैचित्र्यकारणप्राणिकर्मसहकृताऽचिन्त्यशक्तिमतो भगवतः श्रीमाधवस्य प्रपञ्चोत्पादनविषयिकाभिरा-

कलनचिकीर्षाकृतिभिः प्रकृतौ विक्षेप उत्पाद्यते । तथाऽत्र श्रुतयः—यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, तदक्षैत बहु स्यां प्रजायेय, सोऽकामयत बहु स्यां, तन्मनोऽनुकुरुत इत्याद्याः । प्रकृतिपरिणाम एव व्यक्तकार्य्यादिशब्दैराभिधीयते । तच्चानेकविधम् । तथाहि—प्रथमं परमेश्वरेच्छातन्त्रप्रकृतिर्गुणवैषम्याद् कार्य्योन्मुखं प्राप्ता सती महत्तत्वं व्यञ्जयति । तदेवाध्यवसायहेतुः, सात्त्विकादिभेदात् त्रिविधश्चेति । ततोऽहंकारो जीवानां देहादावात्मबुद्ध्युत्पादनासाधारणहेतुः। सोऽपि सात्त्विकादिभेदात् त्रिविधो, वैकारिकतैजसभूतादिशब्दवाच्यश्च । तत्र वैकारिकादहंकारादिन्द्रियाधिष्ठात्र्यो देवता मनश्च। तदेव मनो वृत्तिभेदात् स्थानभेदाच्चान्तःकरणचतुष्टयसंज्ञां लभते । सात्त्विकाहंरोपादानकद्रव्यत्वे सत्यन्तर्ज्ञानकरणत्वं तत्त्वम् । चतुष्टयं च मनोबुद्धिचित्ताऽहंकारभेदाद् बोध्यम् । तत्र मननादिहेतुत्वं मनस्त्वम् । इदमेव मनः शब्दादिसंबन्धं सद् बन्धहेतुः । तत्परित्यागपूर्वकं सपरिकरभगवद्विषयप्रावण्ये सति मोक्षहेतुः । "मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्तं निर्विषयं स्मृतम् । मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च । अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम्" इतिवचनात्। बोधनकरणत्वं बुद्धित्वम्। देहादावहंकरणहेतुत्वम् अहंकारत्वम् । चिन्तनहेतुत्वं चित्तत्वम् । तेषां चन्द्रब्रह्मरुद्रक्षेत्रज्ञा अधिष्ठात्र्यो देवताः । तथाच सुबालोपनिषच्छ्रुतयः—मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतं, बुद्धिरध्यात्मं बोधयितव्यमधिभूतं ब्रह्मा तत्राधिदैवतम्, अहंकारोऽध्यात्मम् अहंकर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम्, चित्तमध्यात्मं चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतमित्याद्याः । क्वचिच्चैषामधिष्ठातृत्वेन वासुदेवादयश्चतुर्व्यूहदेवा अप्युच्यन्ते । तेषां मन-

आदिषूपास्यत्वेन प्रतिपादनाभिप्रायत्वान्नोक्तसिद्धान्तविरोधः। चन्द्रादीनां तत्प्रवर्तकत्वं, व्यूहदेवानां तदन्तर्यामितया तत्रोपास्यत्वमुभयमपि घटत एवेत्यर्थः। मनसः स्थानं गलान्तरं, बुद्धेर्वदनम्, अहंकारस्य हृदयं, चित्तस्य नाभिरिति शारीरकोपनिषत्पाठादेषां स्थानक्रमोऽपि ज्ञेयः। तैजसाहंकाराद् बाह्येन्द्रियाणि दशसंख्याकानि जायन्ते। शब्दादिविषयबाह्यज्ञानकर्मैकतरकरणत्वे सति तैजसाहंकारोपादानकद्रव्यत्वं बाह्येन्द्रियत्वम्। तद् द्विविधम्। ज्ञानेन्द्रियं कर्मेन्द्रियं चेति। तत्र शब्दादिविषयकबाह्यज्ञानासाधारणकारणत्वं ज्ञानेन्द्रियत्वम्। तच्च पञ्चधा, श्रोत्रत्वक्चक्षूरसनघ्राणभेदात्। शब्दमात्रग्राहकमिन्द्रियं श्रोत्रम्। मनुष्याणां कर्णशष्कुल्यवच्छिन्नदेशवर्ति, पादोदराणां नयनवृत्ति। रूपमात्रग्राहकमिन्द्रियं चक्षुः। नयनवृत्ति। स्पर्शमात्रग्राहकमिन्द्रियं त्वक्। सर्वशरीरवृत्ति। नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्शाऽनुपलम्भः। रसमात्रग्राहकमिन्द्रियं रसनं, जिह्वाग्रवर्ति। गन्धमात्रग्राहकमिन्द्रियं घ्राणम्। नासाग्रवृत्ति। तेषां दिग्वातार्कवरुणाऽश्विनोऽधिष्ठात्र्यो देवताः। शब्दस्पर्शरूपरसगन्धा विषयाश्च। स्थानादि स्थानिभ्यो नेयन्त इत्युपक्रम्य, चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतम्। १। श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतम्। २। नासाऽध्यात्मं घ्रातव्यमधिभूतं पृथिवी तत्राधिदैवतम्। ३। जिह्वाध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतम्। ४। त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतम्। ५। इत्यादिश्रुतेः। पृथ्वीशब्देनाश्विनौ लक्ष्येते। अन्यथा वाक्यान्तरविरोधात्। एतेषां पञ्चमहाभूताप्यायकत्वेन भौतिकत्वमप्युपचर्य्यते। वचनादानाद्यसाधारणकारणमिन्द्रियम्। कर्मेन्द्रियं वाक्पाणिपादपायूपस्थसंज्ञाभेदात् पञ्चविधम्। तत्र

वर्णोच्चारणासाधारणकारणेन्द्रियं वाक्, कण्ठादिस्थानवृत्तिः । "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च" इत्यादि वेदभाष्ये । पश्वादीनां तत्संस्कारशून्यत्वात् तदभावः । शिल्पादानाद्यऽसाधारणकारणमिन्द्रियं पाणिः । मनुष्यादीनां कराङ्गुल्यादिवृत्तिः । हस्त्यादीनां नासाग्रादिवृत्तिः । विहरणक्रियाऽसाधारणकारणमिन्द्रियं पादः । मनुष्यादीनामङ्घ्रिवृत्तिः । भुजगपक्ष्यादीनामुरःपक्षादिवृत्तिः । मलविसर्गकारणमिन्द्रियं पायुस्तदवयववृत्तिः । आनन्दविशेषकारणमिन्द्रियमुपस्थं मेहनादिवृत्ति । तेषां वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठात्र्यो देवताः । वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्माणि । तथाच श्रुतयः—वागध्यात्मं, वक्तव्यमधिभूतम्, अग्निस्तत्राधिदैवतम् । हस्तावध्यात्मम्, आदातव्यमधिभूतम्, इन्द्रस्तत्राधिदैवतम् । पादावध्यात्मं, गन्तव्यमधिभूतं, विष्णुस्तत्राधिदैवतम् । पायुरध्यात्मं, विसर्गयितव्यमधिभूतं, मृत्युस्तत्राधिदैवतम् । उपस्थोऽध्यात्मम्, आनन्दयितव्यमधिभूतं, प्रजापतिस्तत्राधिदैवतमित्याद्याः सुबालोपनिषत्पठिताः । तानि चाणूनि प्रतिशरीरं भिन्नानीनि यावदत्यन्तप्रलयमवास्थातिस्वभावकानि । भूतादिलक्षणतामसाहङ्काराच्छब्दादिपञ्च, तन्मात्राणि, आकाशादिपञ्च महाभूतानि चोत्पद्यन्ते । तामसाहंकारस्य भूतानां चान्तरालिको व्यवहितसूक्ष्मपरिणामात्मकं द्रव्यं तन्मात्रशब्दाभिधेयम् । दुग्धदध्नोरान्तरालिककलिलादिपरिणामवत् । तदेव स्थूलावस्थापन्नं भूतशब्दवाच्यं भवति । एवञ्च भूतादिसंज्ञकाहङ्काराच्छब्दतन्मात्रम् । शब्दतन्मात्रादाकाशः । आकाशात् स्पर्शतन्मात्रम् । स्पर्शतन्मात्राद्वायुः । वायो रूपतन्मात्रम् । तस्मात् तेजः । तेजसो रसतन्मात्रम् । तस्मादापः ।

अद्भ्यो गन्धतन्मात्रम् । तस्मात् पृथिवीत्युत्पत्तिक्रमः ।

तेषां गुणाश्च शब्दस्पर्शरूपरसगन्धाः पञ्चैव । तत्र सर्वेऽपि पृथिव्या गुणाः । अपां गुणाश्चत्वारो रसपर्यन्ताः । तेजोगुणस्त्रयो रूपाऽवसानाः । वायोः शब्दस्पर्शौ । नभसः शब्दमात्रम् । तत्र श्रुतयः—शब्दस्पर्शरूपरसगन्धाः पृथिव्यागुणाः । तेषु गन्धहीनाश्चत्वारोऽपां गुणाः । तेषु गन्धरसहीनास्त्रयो गुणा अग्नेः । शब्दस्पर्शाविति वायोः । शब्द एक आकाशस्येति लौकिकोपनिषदि पठ्यमानाः । "आकाशवायुतेजांसि सलिलं पृथिवी तथा । शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरैरिति" वैष्णवपुराणवचनं च । एतेन तेषां लक्षणमप्युक्तं भवति । तथाहि—स्पर्शाद्यनाधारत्वे सति विशिष्टशब्दाश्रयत्वमाकाशत्वम् । विशिष्टशब्दाधारत्वे सति अवकाशहेतुत्वं च । विशिष्टस्पर्शाश्रयत्वे सति रूपशून्यत्वम्, अनुष्णाशीतस्पर्शवत्त्वे सति गन्धशून्यत्वं वायुत्वम् । तत्र शरीरधारणादिहेतुर्वायुविशेषः प्राणः । स च पञ्चविधः—प्राणापानव्यानोदानसमानभेदात् । ऊर्ध्वगतिमान् नासादिस्थानवृत्तिः प्राणः । अधोगतिः पाय्वादिस्थानवृत्तिरपानः । विश्वगतिरखिलशरीरवृत्तिर्व्यानः । पीताऽशितपानाद्युद्गारक्रियाहेतुः कण्ठस्थानवृत्तिरुदानः । अशितपीताऽऽदिसमीकरणहेतुः समानः, सर्वाङ्गवृत्तिः । अन्यथा सर्वत्र समीकरणानुपपत्तेः । तथा च श्रुतयः—अथ योऽयमूर्ध्वमुत्क्रामत्येष वा वं स प्राणः । अथ योऽयमवागुत्क्रामत्येष वा व सोऽपानः । येनैताः शिरा अनुव्याप्ता एष वा व स व्यानः । अथ योऽयं पीतमशितमुद्गिरत्येष वा व स उदानः । अथ योऽयं स्थविष्ठमन्नं पातयितुमपाने स्थापयति, अण्विष्ठं चाङ्गे समानयति एष वा व स समान इत्याद्या मैत्रेयोपनिषत्पठिताः ।

कैचित्तु, नागकूर्म्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः । तत्र नाग उद्गिरणकरः, कूर्म्म उन्मीलनकरः, कृकलः, क्षुधाकरो, देवदत्तो जृम्भणकरो, धनञ्जयः पोषणकर इति वदन्ति तच्चिन्त्यम् । एषां प्राणादिष्वेवान्तर्भावान्न पृथग्ग्रहः ।

उष्णस्पर्शवत्त्वे सति भास्वररूपाधारत्वं, विशिष्टरूपाश्रयत्वे सति गन्धशून्यत्वं च तेजस्त्वम् । शीतस्पर्शवत्त्वं, गन्धाभावत्त्वे सति विशिष्टरसवत्त्वम् अपां लक्षणम् । विशिष्टगन्धाश्रयत्वम्, अनुष्णाशीतस्पर्शत्वे सति रूपाद्याश्रयत्वं च, शब्दाश्रयत्वे सति स्पर्शादिमत्त्वं, रसवत्त्वे सति गन्धादिमत्त्वं च पृथिवीलक्षणमिति बोध्यम् ।

इत्थं प्रकृतिमहदहंकाराः,मनो,दशेन्द्रियाणि,तन्मात्रापञ्चकं, भूतपञ्चकं चेति चतुर्विंशतितत्त्वानि ।

अत्र केचिन्महाभूतोत्पत्तिक्रमं वर्णयन्ति । अन्ये च भूतादेः पञ्चतन्मात्राणि, तेभ्यः क्रमात् पञ्चमहाभूतोत्पत्तिमाहुः ।

इतरे तु भूतादेः शब्दतन्मात्रं, तत आकाशः स्पर्शतन्मात्रं च जायते । स्पर्शतन्मात्राद् वायुः, रूपतन्मात्रं च जायते इत्यादिक्रमेण सृष्टिमाहुः । तच्चिन्त्यम् । प्रलयक्रमविरोधात् । नचैवं सृष्टिश्रुतीनां परस्परविरुद्धक्रमपरत्वेनैकतमस्य क्रमस्यापि प्रामाण्यं न स्यात् । सर्वासामपि श्रुतित्वेन तुल्यप्रामाण्यादिति वाच्यम् । गुणोपसंहारन्यायेन सर्वस्यापि वाक्यजातस्य सामञ्जस्यमेव । तस्मादुक्तक्रमस्य वरीयस्त्वम् । स्मृत्युपबृंहितश्रुतिविषयत्वात् । तथाच श्रुतिः—स होवाच तं हि वै पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीत्, तस्मादव्यक्तमेवाक्षरं, तस्मादक्षरान्महत्तत्त्वं, महतो वै अहङ्कारस्तस्मादेवाहङ्कारात् पञ्च तन्मात्राणि, तेभ्यो भूतानीति गोपालोपनिषत्पठिता । व्याख्याता चैषा श्रीपराशरेण "प्रधानं पुरुषं चैव

प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाऽव्ययौ । स एव क्षोभको ब्रह्मन् क्षोभ्यश्च परमेश्वरः । स संकोचविकाशाभ्यां प्रधानत्वेऽपि च स्थितः । गुणसाम्यात् ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने । गुणव्यञ्जनसंभूतः सर्गकाले द्विजोत्तम । सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् । प्रधानतत्त्वेन समं त्वचा बीजमिवावृतम् । वैकारिकस्तैजसश्च भूतादिश्चैष तामसः । त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत । भूतादिस्तु विकुर्वाणः शब्दतन्मात्रकं ततः । ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् । आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह । बलवानभवद् वायुस्तस्य स्पर्शो गुणो मतः । ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह । ज्योतिरुत्पद्यते वायोस्तद्रूपं गुणमुच्यते । ज्योतिश्चापि विकुर्वाणो रसमात्रं ससर्ज ह । संभवन्ति ततोऽम्भांसि रसाधाराणि तानि च । विकुर्वाणानि चाम्भांसि गन्धमात्रं ससर्जिरे । संघातो जायते तस्मात्तस्य गन्धो गुणो मतः । भूततन्मात्रसर्गोऽयमहङ्कारात्तु तामसात् । तैजसादिन्द्रियाण्याहुर्देवा वैकारिका दश । एकादशं मनश्चात्र देवा वैकारिकाः स्मृता" इत्यादिना । इह च तन्मात्राणां विषयाणां च समानसंज्ञास्मरणादभेदशङ्का न कार्य्या । पूर्वेषां भूतकारणत्वेन द्रव्यत्वम्, उत्तरेषां च तदाश्रितत्वेन तद्गुणत्वमिति विवेकः । अन्यथा तेषामेव भूतोपादानत्वं तद्गुणत्वं च महद्विरुद्धमेव । तत्र प्रकृतिमहदहङ्काराः, पञ्च भूतानि च स्थूलदेहस्योपादानकारणानि । इन्द्रियाणि भूषणे रत्नानीव तदाक्रम्य स्थितानि । पञ्चतन्मात्राणि, मनो, दशेन्द्रियाणि, प्राणश्च सूक्ष्मदेहस्योपादानानि । तत्र प्राणस्य स्पर्शतन्मात्रकार्य्यत्वात् तेनैकीकृत्य श्रुतौ षोडशसंख्यात्वव्यपदेशः । इमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीत्यादि । शरीरलक्षण च, चेतननियताधेयत्वे

सति तद्भोगायतनत्वं, चेतननियताश्रयत्वे सति तदपृथक्सिद्धत्वं चेतननियतशेषत्वं च। शरीरं द्विविधं–नित्यानित्यभेदात्। तत्र नित्यं सर्वमङ्गलाश्रयं ध्यानविषयं ध्यातॄणां सर्वपुरुषार्थकारणं श्रीरमाकान्तस्य विग्रहम्। नित्यमुक्तानां विष्वक्सेननन्दसुनन्दनादिपार्षदानां स्वाभाविकं गरुडाद्याकारं च तच्चोपरिष्टान्निरूपयिष्यामः। अनित्यं द्विविधम्-अकर्मजं तज्जं चेति। आद्यमीश्वरस्य विराडादिरूपं, गरुडादीनां मुक्तानामीश्वरेच्छातन्त्रस्वेच्छात्तं तत्तदाकारं च। कर्म्मजन्यं च कर्मतारतम्यादनेकविधम्। स्थावरजङ्गमादिभेदात्। स्थावरं भूधरवृक्षादिरूपम्। जङ्गमं देवतिर्य्यङ्मनुष्यनारक्यादिरूपम्। तदेव सामान्यतो ज़रायुजाण्डजोद्भिज्जादिभेदभिन्नं च बोद्धव्यम्। किञ्च महदादिशरीरान्तं सर्वमपि तत्तदवस्थापन्नं तदभिन्नमेव। तत्कार्य्यत्वात्। यथा मृत्पिण्डजन्यं मृण्मयं घटाद्यवस्थापन्नमपि मृदभिन्नमेव तद्वत्। अवस्थान्तरभाक्त्वेनैव नामरूपसंख्याव्यवहारादिभेदसिद्धिः। कार्य्यकारणयोरभेदात्, तदनन्यत्वमारम्भणशब्दादिभ्य इति न्यायात्। कारणद्रव्यमेवावस्थान्तरमापन्नं सद्रूपं च कार्य्यत्वेनाभिधीयते। सदेव सौम्येदमग्र आसीदित्यादिसत्कार्य्यवादिनी श्रुतिः। अन्यथा कार्योत्पत्तिरेव न स्यात्। नहि गगनकुसमादेरुत्पत्तिः क्वापि केनचिद् दृष्टा श्रुता वा। "नासतो विद्यते भावः। असतः सभवः कुतः" इत्यादिस्मृतेः। तस्मात् सदेव कार्य्यमुत्पद्यते कारणात्मकं चेति सिद्धान्तः। प्रकृत्यादीनि च जीवानां भोग्यभोगोपकरणभोगस्थानानि। तत्र भोग्यं शब्दादिकं तत्तद्विशिष्टद्रव्यमन्नपानादिकं च। भोगोपकरणं शरीरेन्द्रियमनोबुद्ध्यादि। भोगस्थानानि ब्रह्माण्डान्तर्गतचतुर्दशभुवनानि। तान्येव प्रकृत्यादीनि श्रीपुरुषोत्तमस्य क्रीडातदुपकरणतत्स्थानानि चेति विवेकः।

ब्रह्माण्डं च कपित्थफलाकारं पञ्चीकृतपञ्चमहाभूतारब्धं चतुर्दशलोकगर्भकं प्राकृतं द्रव्यं मुमुक्षुहेयं च । तथाच संन्यास-प्रकरणपठिताऽऽरण्यश्रुतिः— भूर्लोकभुवर्लोकस्वर्लोकमहर्लोक-जनलोकतपोलोकसत्यलोकं चातलपातालवितलसुतलतलातल-रसातलमहातलं ब्रह्माण्डं च विसर्जयेदिति । तस्य वैचित्र्यसंस्थान-प्रकारस्तु वैष्णवे श्रीपराशरेण पठितः । तथाहि—

"जम्बूद्वीपः समस्तानामेतेषां मध्यमस्थितः । तस्यापि मेरुर्मैत्रेय मध्ये कनकपर्वतः । भूपद्मस्य स शैलोऽसौ कर्णिका इव संस्थितः । जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः । मैत्रेय वल-याकारः स्थितः क्षारोदधिर्बहिः ॥ १ ॥ संवेष्टय क्षारमुदधिं प्लक्ष-द्वीपं तथा स्मृतः । तथैवेक्षुरसोदेन परिवेषानुकारिणा ॥ २ ॥ शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः । विस्तारद्विगुणेनाऽथ सर्वतः संवृतः स्थितः । एष द्वीपः समुद्रेण सुरोदेन समावृतः । विस्तारः शाल्मलस्यैव समेन तु समन्ततः ॥ ३ ॥ सुरोदकः परिवृतः कुशद्वीपेन सर्वतः । शाल्मलस्य च विस्तारात् द्विगुणेन समन्ततः । तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ॥ ४ ॥ घृतो-दश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः । कुशद्वीपस्य विस्तारात् द्विगु-णो यस्य विस्तरः । क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च । आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥ ५ ॥ दधिमण्डो-दकश्चापि शाकद्वीपेन संवृतः । क्रौञ्चद्वीपस्य विस्तारात् द्विगुणेन महामुने । शाकद्वीपस्तु मैत्रेय क्षीरोदेन समावृतः । शाकद्वीपप्र-माणेन वलयेनेव वेष्टितः ॥ ६ ॥ क्षीराब्धिः सर्वतो ब्रह्मन् पुष्क-राख्येन वेष्टितः । द्वीपेन शाकद्वीपात् तु द्विगुणेन समन्ततः । स्वादू-दकेनोदधिना पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्ता-रान्मण्डलं तथा ॥ ७ ॥ स्वादूदकस्य परितो दृश्यते लोकसंस्थितिः ।

द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता। लोकालोकस्ततः शैलो योजनायुतविस्तरः । ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम्। तमश्चाण्डकटाहेन समन्तात् परिवेष्टितः । पञ्चाशत्कोटिविस्तारा सेयमुर्वी महामुने। दशसाहस्रमेकैकं पातालं चापि सत्तम। अतलं वितलं चैव तितलं च गभस्तिमत्। महाख्यं सुतलं चापि पातालं चापि सप्तमम् । ततश्च नरका विप्र भुवोऽधः सलिलस्य च । पापिनो येषु पात्यन्ते ताञ्च्छृणुष्व महामुने। अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः । देवाश्चाधोमुखान् सर्वानधः पश्यन्ति नारकान्। रविचन्द्रमसोर्यावन्मयूखैरवभास्यते । ससमुद्रसरिच्छैला तावती पृथिवी स्मृता। यावत्प्रमाणं पृथिवीविस्तारपरिमण्डलात् । नभस्तावत्प्रमाणं वै व्यासमण्डलतो द्विज। भूमेर्योजनलक्षे तु सौरं मैत्रेय मण्डलम्। लक्षाद् दिवाकरस्यापि मण्डलं शशिनः स्थितम्। पूर्णे दशसहस्रे तु योजनानां निशाकरात्। नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते। द्वे लक्षे चोत्तरे ब्रह्मन् बुधो नक्षत्रमण्डलात्। तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः। अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः। लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः। सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे सम्यगास्थितः। सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम। ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः। मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः। ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः । एकयोजनकोटिस्तु यत्र ते कल्पवासिनः। द्वे कोटी तु जनो लोको यत्र ते ब्रह्मणः सुताः। सनन्दनाद्याः कथिता मैत्रेयाऽमलचेतसः । चतुर्गुणोत्तरे चोर्ध्वं जनलोकात् तपः स्मृतम्। षड्गुणेन तपोलोकात् सत्यलोको विराजते। पादगम्यं तु यत्किञ्चिद्वस्त्वपि पृथिवीमयम्। स भूर्लोकः समाख्यातो विस्तरोऽस्य मयोदितः । भूमिसूर्यान्तरं यत्तु

सिद्धादिमुनिसेवितम् । भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम । ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्दश । स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः । त्रैलोक्यमेतत्कृतकं मैत्रेय परिपठ्यते । जनस्तपस्तथा सत्यमिति चाकृतकं त्रिकम् । कृताकृतकयोर्मध्यं महर्लोक इति स्मृतः । शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति । एते सप्त मया लोका मैत्रेय कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः । एतदण्डकटाहेन तिर्य्यक् चोर्द्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् । दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतम् । स चाम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः । वह्निश्च वायुना वायुर्मैत्रेय नभसाऽऽवृतः । भूतादिना नभः सोऽपि महता परिवेष्टितः । दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तं च समावृत्य प्रधानं सप्तवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं चापि विद्यते । तदनन्तमसंख्यातं प्रमाणं चापि वै यतः । हेतुभूतमशेषस्य प्रकृतिः सा महामुने । अण्डानां तु सहस्राणां सहस्राण्ययुतानि च । ईदृशानां तथा तत्र कोटिकोटिशतानि च" इति॥

अस्यायमर्थः । पद्माकारा पञ्चाशत्कोटियोजनपरिमाणिका भूः । तत्र लक्षयोजनपरिमाणको जम्बूद्वीपः । तन्मध्ये कर्णिकाकारो मेरुः । स परितो नवभिर्वर्षैरावृतः । तस्य दक्षिणतो भारतादीनि त्रीणि वर्षाणि । उत्तरतो रम्यकादीनि त्रीणि पूर्वतो भद्राश्वम् । पश्चिमतः केतुमालम् । मध्ये चेलावृतवर्षम् । एतन्नववर्षात्मको लक्षयोजनपरिमाणकोऽयं जम्बूद्वीपस्तत्परिमाणकेन क्षारोदकार्णवेन वृतः ॥ १ ॥ सोऽर्णवो द्विगुणेन सप्तवर्षात्मकेन प्लक्षद्वीपेन । सोऽपि तत्परिमाणकेनेक्षुरसार्णवेन ॥ २ ॥ सोऽर्णवो द्विगुणेन सप्तवर्षात्मकेन शाल्मलद्वीपेन । स च तत्प-

रिमाणकेन सुरार्णवेन ॥ ३ ॥ सोऽर्णवस्तद्द्विगुणेन सप्तवर्षात्मकेन कुशद्वीपेन । सोऽपि तत्परिमाणकेन घृतार्णवेन ॥ ४ ॥ सोऽपि द्विगुणेन सप्तवर्षात्मकेन क्रौञ्चद्वीपेन । सोऽपि तत्परिमाणकेन दधिमण्डोदार्णवेन ॥ ५ ॥ सोऽर्णवो द्विगुणेन सप्तवर्षात्मकेन शाकद्वीपेन । सोऽपि तत्परिमाणकेन क्षीरार्णवेन ॥६॥ क्षीराब्धिश्च तद्द्विगुणेन द्विवर्षात्मकेन पुष्करद्वीपेन स च तत्परिमाणकेन मधुरजलार्णवेन वेष्टितः ॥ ७ ॥ सप्तद्वीपात्मकोऽयं भूभागः । सार्णवः स्वस्माद् द्विगुणीकृतया काञ्चनभूम्या वृतः । सा च लोकालोकेन भूधरेण । स चान्धेन तमसा । तत्तमो गर्भोदकेन । तदुदकं चाण्डकटाहेनेति तिर्यक्संस्थानप्रकारः । तस्या अधस्ताद् पूर्वोक्ता अतलादयः सप्तलोकास्तेषां मध्ये रौरवादय एकविंशतिर्नरकाः पापात्मककर्मफलभोगभूमयस्ततोऽधोऽन्धंतमस्ततो गर्भोदकं, ततोऽण्डकटाह इत्यधःसंस्थानप्रकारः ॥

अथ पादगम्यपृथिवीमयः प्रदेशो भूर्लोकः ॥ १ ॥ तदुपरि लक्षयोजनाद् सूर्य्यमण्डलम् । तावत्पर्यन्तप्रदेशः सिद्धादिमुनिसेवितो भुवर्लोकः ॥ २ ॥ तदुपर्य्युपरि चन्द्रनक्षत्रबुधशुक्रभौमबृहस्पतिसप्तर्षिमण्डलानि । तदुपरि ध्रुवो ज्योतिश्चक्रस्य मेढीभूतः सूर्य्यमण्डलाद् ध्रुवपर्य्यन्तो देशश्चतुर्दशलक्षयोजनविस्तीर्णः स्वर्लोकः ॥ ३ ॥ तत उपरि कोटियोजनोच्छ्रायो महर्लोकः ॥ ४ ॥ तदुपरि द्विगुणोच्छ्रायो जनलोकः ॥ ५ ॥ तदुपरि तच्चतुर्गुणस्तपोलोकः ॥ ६ ॥ तदुपरि द्वादशकोट्युच्छ्रायः सत्यलोकः ॥ ७ ॥ ततस्तमस्ततो गर्भोदकं ततोऽण्डकटाहः । "सप्तसागरमानस्तु गर्भोदस्तदनन्तरम् । कोटियोजनमानस्तु कटाहः संव्यवस्थितः" इत्यादिवचनाद् कोटियोजनोच्छ्रायोऽण्डकटाहः । तच्च ब्रह्माण्डं दशगुणोत्तरोत्तरावरणैः सप्तभिरा-

वृतम् । इत्थं ह्येकाण्डसन्निवेश उक्तः । ईदृशान्यनन्तकोटिब्रह्माण्डानि ईश्वरविभूत्यात्मके प्रधानेऽर्णवोदके जलबुद्बुदानीव भ्रमन्ति । अत एव तस्याप्यनन्तत्वम् । तत्र चतुर्मुखावसाना सृष्टिः साक्षादीश्वरकृता तदुत्तरा च चतुर्मुखादिपरम्परयेति विवेकः । महदादि पृथिव्यन्तं समष्टिशब्दाभिधेयम् । यथा सेनावनराश्यादिव्यवहारः तेष्वेकैकदेशमादाय क्रियमाणं कार्य्यमस्मद्बुद्धीन्द्रियशरीरादि व्यष्टिशब्दवाच्यम् । यथा वृक्षधान्यादिव्यवहारः॥

पञ्चीकरणप्रक्रिया च भगवान् श्रीपुरुषोत्तमः पृथिव्यादिपञ्चभूतानि सृष्ट्वा एकैकं महाभूतं द्विधा विभज्य द्वयोर्भागयोः स्वभागमेकं पृथङ्निधाय द्वितीयं भागं पुनश्चतुःकृत्य ताँश्च भूतान्तरेषु चतुर्षु संयोजयति । एवं चिकीर्षितेषु पञ्चस्वपि भूतेष्वेकैकस्य भूतस्यार्द्धं स्वभागो, द्वितीयार्द्धं चतुर्णां भूतानां भागेषु योजनमिति । तदुक्तं—विभज्य द्विधा पञ्चभूतानि देवस्तदर्धानि पश्चाद् विभागानि कृत्वा तदन्येषु मुख्येषु भागेषु तत्तन्नियुञ्जन् स पञ्चीकृतं पश्यति स्मेति । तथाच स्वभागस्य भूयस्त्वेनान्यभागानामल्पत्वेन पृथिव्यादिपृथग्व्यवहारोऽपि समञ्जसः । त्रिवृत्करणश्रुतिश्च पञ्चीकरणस्याप्युपलक्षणत्वादत्रापि मानम् । पञ्चीकरणत्वादेव शब्दादीनां सर्वत्रोपलम्भः सूपपन्नः । महदादिशरीरपर्य्यन्तेषु मध्ये, शरीरम् अन्नविकारत्वादन्नमयः पुरुष उच्यते । मन एव कर्मेन्द्रियैः सहितं सन्मनोमयः पुरुषः । प्राणादिपञ्चकं कर्मेन्द्रियसहितं सत् प्राणमयः पुरुषः । विज्ञानमयः पुरुषो जीवात्मा । आनन्दमयश्च पुरुषः परमात्मा परं ब्रह्मेति । तद्विस्तरश्चानन्दमयाधिकरणे श्रीनिवासाचार्य्यचरणैर्निपुणं प्रतिपादितः । स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतयस्तैत्तिरीयके आम्नाताः ॥

अथ सृष्टिव्युत्क्रमेण लयो, न तु कारणनाशक्रमेण । कारणनाशानन्तरमाश्रयाभावेन कार्य्यावस्थेतरसंभवात् । क्रमश्च पृथिवी गन्धतन्मात्रद्वारेणाऽप्सु लीयते । आपो रसतन्मात्रद्वारा तेजसि तेजो रूपतन्मात्रद्वारा वायौ । स च स्पर्शतन्मात्रद्वारा व्योम्नि । तच्च शब्दतन्मात्रलयपूर्वकं भूतादितामसाहंकारे । इन्द्रियाणि राजसाहंकारे । मनो देवाश्च वैकारिके । त्रिविधोऽप्यहंकारो महति । स चाव्यक्ते । सोऽपि पुरुषे । स च ब्रह्मणि पुरुषोत्तमाख्ये इति । तथैव सुबालोपनिषद्याम्नायते, पृथिव्यप्सु लीयते, आपस्तेजसि, तेजो वायौ प्रलीयते, वायुराकाशे प्रलीयते, आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते, भूतादिर्महति, महानव्यक्ते, अव्यक्तमक्षरे, अक्षरं तमसि, तमः परे देव एकीभवतीति । वैष्णवे च—" जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते । वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते " इति ॥ " प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्च उभावेतौ लीयेते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुनामा स देवेषु वेदान्तेषु च गीयते " इत्यादि ॥ इत्थं त्रिविधेष्वऽचेतनेषु प्राकृतं निरूपितम् ॥

अथ द्वितीयमाह—कालस्वरूपमिति ॥ प्राकृताप्राकृतोभयभिन्नत्वे सत्यचेतनद्रव्यविशेषः कालशब्दवाच्यः । स च नित्यो विभुश्च । अथ हं वा नित्यानि पुरुषः प्रकृतिः काल इति श्रुतेः । सदेव सोम्येदमग्र आसीदित्यादिषु सृष्टेः प्राक् प्रलयसमयेऽपि कालस्य सत्त्वाभ्युपगमात् । अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते इति वैष्णववचनात् । न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते इत्यादेश्च ॥ स च भूतभ-

विष्यद्-वर्त्तमान-युगपच्चिर क्षिप्राऽऽदिव्यवहारहेतुः, सर्गप्रलययो-र्निमित्तं च, परमाण्वादिपरार्द्धावसानव्यवहारासाधारणकरणं च। तत्र यावता दिवाकरः परमाणुपरिमाणकं देशमाक्रामति स कालः परमाणुशब्दाभिधेयः । द्वौ परमाणू द्व्यणुकस्त्रयो द्व्यणु-काख्यरेणुः । त्रसरेणुत्रयं त्रुटिः । त्रुटिशतं वेधः । त्रिभिर्वेधै-र्लवः । तैस्त्रिभिर्निमेषः । पञ्चदशनिमेषाः काष्ठा । त्रिंशत्काष्ठाः कला । कलास्त्रिंशन्मुहूर्तः । मुहूर्तैस्त्रिंशद्भिर्मानुषमहोरात्रम् । तैः पञ्चदशभिः पक्षः । द्वौ पक्षौ मासः । द्वौ मासावृतुः । षड्भिर्मासै-रयनम् । द्वे अयने वर्षम् । तत्र दक्षिणायनं देवानां रात्रिरुत्त-रायणं च दिनम् । दिव्यैर्वर्षसहस्रैर्द्वादशभिः कृतादियुगचतुष्ट-यम् । तत्राष्टशतोत्तरचतुःसहस्रवर्षपरिमितं कृतयुगं ससन्ध्यम् । षट्शतोत्तरत्रिसहस्रपरिमितं ससन्ध्यं त्रेतायुगम् । चतुःशतोत्तर-द्विसहस्रवर्षपरिमितं द्वापरयुगं ससन्ध्यम् । शतद्वयोत्तरसहस्र-वर्षपरिमितं कलियुगं ससन्ध्यं च भवति । चतुर्युगसहस्रपरिमितं चतुर्मुखस्य दिवसम् । तत्रैकस्मिन् दिवसे मनवश्चतुर्दश जाय-न्ते । तथैव सप्तर्षयो महेन्द्रादयश्च । चतुर्युगाणां साधिका-न्येकसप्तति मन्वन्तरं मनोः काल उच्यते । तस्य चतुर्दशगुणं ब्राह्ममहस्तत्परिमाणिका च रात्रिः । ईदृशाहोरात्राणां मानेन वर्षशतं चतुर्मुखायुः । तदर्द्धं परार्द्धम् । तत्रैकं व्यतीतम् । द्वितीयपरार्द्धस्य वर्तमानस्य प्रथमोऽयं कल्पो वाराहसंज्ञकः । सर्व-मपि प्राकृतं कालाधीनम् । कालस्य एतत्सर्वनियामकत्वेऽपि परमेश्वरनियम्यत्वमेव । ज्ञः कालकालो गुणिसर्वविद्य इति श्रुतेः। लीलाविभूतौ तु परमेश्वरस्य कालपारतन्त्र्यानुकरणमात्रमेव । नित्यविभूतौ तु न तत्प्रभावशङ्काऽपि । कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुरित्यादिवचनात्। स च कालो-

ऽखण्डत्वात्। स्वरूपेण नित्यः। कार्य्यरूपेणानित्यः। तत्कार्यमौपाधिकम्। उपाधिश्च सूर्य्यपरिभ्रमणरूपा क्रियैवेति विवेकः॥

अथाऽप्राकृतं निरूप्यते—अप्राकृतमिति। तत्त्वं नाम, त्रिगुणाश्रयप्रधानकालविलक्षणं प्रकाशात्मकमनावरकस्वभावमऽचेतनद्रव्यत्वम्। आदित्यवर्णं तमसः परस्ताद् इत्यादिश्रुतेः। तमःशब्दाभिधेयाभ्यां प्रधानकालाभ्यां परं विलक्षणम्, आदित्यवत् प्रकाशरूपमित्यर्थः। एतेन त्रिगुणात्मकद्रव्यभिन्नमपि शुद्धमायाकार्य्यमिति मतनिरासः। तत्र च प्रकृतिमण्डलाद्भिन्नदेशीयमपरिच्छिन्नं, प्राकृतदेशीयं तु परिच्छिन्नमिव दृश्यमानमप्यपरिच्छिन्नमेव। तच्चैकादशाध्याये विश्वरूपदर्शने स्वयमेव श्रीभगवता गीतं, दर्शितं चार्जुनाय। आनन्दाभिव्यञ्जकत्वादानन्दसंज्ञकम्। नित्यविभूतिपरमात्मलोकपरमव्योमविष्णुपदपरमपदादिशब्दाभिधेयं च। योऽस्याऽध्यक्षः परमे व्योमन् तिष्ठति तद्विष्णोः परमं पदम्, एते वै निरयास्तात लोकस्य परमात्मन इत्यादिवचनेभ्यः। तच्च भगवदीयानादिसंकल्पात् तस्य तदीयानां नित्यमुक्तानां च भोग्यादिरूपेणानेकरूपम्। तत्र भोग्यं भगवद्विग्रहादिभोगोपकरणं च भूषणाऽऽयुधयानाऽऽसनालंकारकुसुमपत्रफलादिस्थानं च। गोपुरचत्वरप्राकारमणिमण्डपवनोपवनसरोवरादिकम्। तत्रेश्वरस्य नित्यमुक्तानां च विग्रहसंस्थानं, तदीयानाद्यनन्तेच्छासिद्धं स्वाभाविकमेव। बद्धमुक्तानां तु विग्रहं भगवत्प्रसादनिवृत्तप्रकृतिसंबन्धानाम् अनादिसिद्धैरेव विग्रहादिभिर्योगः। न तत्र जन्यत्वादिविकारशङ्काऽपि। निर्विकारत्वात्। यथोत्सवादिसमये प्राक्सिद्धा वस्त्रभूषणालङ्कारादयो राजभिः स्वभृत्येभ्यो दीयन्ते, तथैव प्रकृतिवियोगसमये पूर्वसिद्धा नित्याः सर्वविकारशून्या विग्रहादयस्तत्सेवोपकरणरूपाः श्रीपुरुषोत्तमेन

भूतेभ्यो दीयन्ते इति । तन्मङ्गलविग्रहश्च स्वरूपवदनन्तकल्याणगुणाश्रयो, गुणाश्च निरतिशयसौन्दर्य्यमार्दवलावण्यसौगन्ध्यसौकुमार्यादयोऽपरिमिता अनन्ताश्च । सर्वगन्धः सर्वरसः, आप्रणखात् सुवर्ण इत्यादिश्रुतिभ्यः श्रीभगवतः सर्वदर्शनस्पर्शनगमनादिशक्तिमत्त्वान्न तत्रेन्द्रियादिविभागकल्पनापेक्षा । गौरवात् । तथाच श्रुतिः—अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । यस्मादन्तीन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वत आदत्ते इत्यादि । तत्साम्यं भजतामपि तथैव व्यवहारः । निरञ्जनः परमं साम्यमुपैतीति श्रुतेः, मम साधर्म्यमागता इति स्मृतेश्च । कालातीतवस्तुत्वान्न तत्र कालप्रभावः । कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुरिति चतुर्थांशे ब्रह्मवचनादिति त्रिविधाचेतनसंग्रहः ॥ ३ ॥

अथ परमात्मतत्त्वं निरूपयति—

स्वभावतोऽपास्तसमस्तदोष-
मशेषकल्याणगुणैकराशिम् ॥
व्यूहाङ्गिनं ब्रह्म परं वरेण्यं
ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥ ४ ॥

स्वभावत इत्यादिना ॥ तत्राऽथाऽतो ब्रह्मजिज्ञासा इत्युपक्रमसूत्रार्थमाह—वयं ब्रह्म ध्यायेमेति योजना । ब्रह्मशब्दस्य चतुर्मुखवेदादावपि वृत्तित्वात् तत्रातिप्रसङ्गं वारयन्नाह—परमिति । ब्रह्मपदार्थमाह—कृष्णमिति । परत्वं च क्षराक्षराभ्यामुत्कृष्टत्वम् । तस्याश्रयो भगवान् श्रीकृष्ण एव । तथाच स्वयमेव गीतः । "यस्मात् क्षरमितीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद् भजति मां सर्वभावेन भारत"

इति श्रीकृष्णं पुरुषोत्तमत्वेन जानतः सर्ववित्त्वं प्रतिपादितम् । तस्मात् स एवात्र परब्रह्मशब्दाभिधेय इति सिद्धम् ॥

ध्यायेमेत्यत्र विध्यर्थकप्रथमपुरुषे प्रयोक्तव्येऽपि स्वेषां स्वाभाविकदास्यत्वेन तद्ध्यानाश्रयत्वनिश्चयाद्युत्तमपुरुषप्रयोगः—प्रधानक्षेत्रज्ञपतिः, पति पतीनामित्यादिश्रुतेः—तस्य तत्स्वामित्वे प्रमाणम् । बहुवचनाद्धयेकजीववादिमतनिरासः । स च पूर्वमेव व्याख्यातः । "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । अंशो नानाव्यदेशात् । न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । नचैवं न भविष्यामः सर्वे वयमतः परम्" इत्यादिभ्यस्त्रैकालिकबहुत्वप्रतिपादकवचनेभ्यः । ध्यैधातुप्रयोगाद्युक्तसूत्रे इष्यमाणज्ञानस्य ध्यानात्मकत्वं सूत्रकृताऽभिप्रेतमिति निश्चीयते । आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति विषयवाक्ये ध्यानस्यैव विधेयत्वश्रवणात् । अत्र दर्शनमुद्दिश्य निदिध्यासनं विधीयते । एवं विधीयमानं निदिध्यासनमेव ज्ञानापरपर्यायभूतं ज्ञानशब्देन सूत्रयामास भगवान् बादरायण इत्यर्थः । सूत्रविषयवाक्ययोरेकार्थत्वनियमात् । तत्रापि विषयवाक्यस्य मूलरूपत्वेन स्वतःप्रामाण्येन बलीयस्त्वात् तदनुसारेणैव सूत्रार्थोऽप्यवश्यं नेय इति सर्ववादिसाधारणन्यायात् । अन्यथा सूत्रविषयवाक्ययोर्विरुद्धार्थपरत्वाभ्युपगमे विषयविषयिभावानुपपत्तेः । एतत्सर्वमभिप्रेत्य, ध्यानप्रयोगोक्तिः ॥

किंविषयकध्यानमत्र विधेयमित्यपेक्षायामाह—कृष्णमिति कृष्णविषयकमित्यर्थः ॥

प्रसङ्गाद् विधिर्मीमांस्यते । प्रयोजनत्वावच्छिन्नवदर्थविधायकत्वेनार्थवान् शब्दो विधिः । यथा स्वर्गकामो यजेदित्यत्र स्व-

र्थात्मकप्रयोजनवतोऽर्थस्य यजधात्वर्थस्य यजनस्य विधायको लिङ्प्रत्ययः। तेन यजनस्य प्रयोजनवत्तया विधीयमानत्वात् तद्विधायकशब्दस्य विधित्वमिति लक्षणसमन्वयः। स च त्रिविधः—अपूर्व-नियम-परिसंख्याभेदात्। तत्राऽत्यन्ताप्राप्तार्थ-विधायकत्वमपूर्वविधित्वम्। यथा, व्रीहीन् प्रोक्षतीति। प्रोक्षणा-त्मकसंस्कारकर्मणो विधिमन्तरेण मानान्तरेणाऽत्यन्ताप्राप्तत्वात्। तत्फलकोऽयं प्रोक्षणविधिरित्यर्थः ॥१॥ पक्षे प्राप्तस्याप्राप्तांश-पूरको नियमः। यथा—व्रीहिनवहन्तीति। अत्र विध्यभावेऽपि पुरोडाशीयद्रव्यात्मकानां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावह-ननप्राप्तिर्भविष्यतीति न तत्फलकोऽयं विधिः, किन्त्वाक्षेपादेव लोकावगतकारणत्वसाम्यान्नखविदलनादिरापि प्राप्नुयादित्यवह-ननांशस्याप्राप्तिस्तदंशपरिपूर्तिफलकोऽयं विधिः। अवहन्या-देव, न तु प्रकारान्तरेण वैतुष्यमात्रं कुर्य्यादित्यर्थः ॥२॥ उभय-प्राप्तावितरव्यावृत्तिफलकः परिसंख्याविधिः। यथा, इमामगृ-भ्णन् रशनाम् ऋतस्येत्यश्वाभिधानीमादत्ते इति। अत्राऽश्वरश-नाग्रहणं गर्दभरशनाग्रहणं चानुष्ठेयम्। तत्रेमामगृभ्णन्निति मन्त्रो रशनाग्रहणप्रकाशनात्मकसामर्थ्यरूपाल्लिङ्गादेव गर्दभरशनाग्रहण-वदश्वरशनाग्रहणेऽपि प्राप्त एवेति न तत्प्राप्तिफलकोऽयं विधिः। प्राप्तस्य प्राप्ते पिष्टपेषणवन्निष्फलत्वाद् वैयर्थ्यापत्तेः। अपि तु लिङ्गाविशेषाद् अश्वरशनाग्रहणवद् गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयादिति तन्निवृत्तिफलकोऽयं विधिरित्यर्थः ॥ ३ ॥ स च दूषणत्रयवत्त्वाद् दुष्टः। दूषणानि च स्वार्थत्यागः, परार्थकल्पना प्राप्तबाधश्च। अत्र स्वार्थोऽश्वरशनाग्रहस्तस्य त्यागः। परार्थो गर्दभरशनाग्रहनिषेधस्तस्य कल्पनं, प्राप्तश्चाऽत्र स्वार्थरूपोऽश्व-रशनाग्रहस्तस्य बाधश्चेति विवेकः। "विधिरत्यन्तमप्राप्तौ नियमः

पाक्षिके सति । तत्र त्वन्यत्र च प्राप्तौ परिसंख्येति गीयते"इति वचनात् । तत्र वेदान्तवाक्यानां भगवत्स्वरूपगुणादिप्रतिपादनपरत्वं निश्चित्य तत्प्रतिपाद्यं ध्येयस्वरूपादिकं साक्षात् पश्यत आचार्य्यस्य मुखात् तदनुभूतवाक्यार्थस्य ग्रहणं श्रवणम् । श्रुतस्य चोपदृष्टार्थस्य स्वानुभवविषयीकरणाय शास्त्रानुकूलयुक्तिभिर्विचारविशेषो मननम् । मननविषयस्यार्थस्य साक्षात्कारकारणभूतमनवरतध्यानं निदिध्यासनम् । उक्तलक्षणस्याऽस्य श्रवणादेरन्तरङ्गत्वादपूर्वविधिरेवायमिति ज्ञातव्यम् । तत्र निदिध्यासनस्य साक्षादर्शनान्तरङ्गत्वाद्विधेयत्वम् । श्रवणमननयोश्च तदपेक्षया बहिरङ्गत्वात् परम्परया ध्यानसाधनत्वमिति सिद्धान्तः ॥

इदानीं लक्षणसूत्रादीन्यन्यान्यपि व्याचक्षाणो भगवत्पदार्थाऽभिन्नपदार्थमाह निर्वचनमुखेन—स्वभावत इति । स्वभावेनैवानादिप्रकृत्यैवापास्ता निरस्ताः समस्ता दोषा यस्मात् तं दोषाश्चाविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः पञ्च । अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशा इति पातञ्जलसूत्रात् । ते एव तमो—मोह—महामोह—तामिस्राऽन्धतामिस्रसंज्ञकाः । तत्र स्वरूपावरकं तमः ॥ १ ॥ देहादावहम्बुद्धिर्मोहः ॥ २ ॥ भोगेच्छा महामोहः ॥ ३ ॥ तामिस्रः क्रोधः ॥ ४ ॥ अतन्नाशे स्वनाशबुद्धिरन्धतामिस्रः ॥ ५॥ "तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः । महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा । मरणं ह्यन्धतामिस्रस्तामिस्रः क्रोध उच्यते । अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः"इति वैष्णवपुराणवचनात् । जन्मास्तित्ववृद्धिपरिणामापक्षयमरणात्मका विकाराः षड्विधाः, सत्त्वरजस्तमांसि प्राकृतगुणास्तत्कार्य्यभूताश्चानन्ता बद्धक्षेत्रज्ञधर्माः । तदसन्ता-

ऽभावाश्रयम् । अशेषदोषात्यन्ताभावश्च सार्वज्ञादिवद् भावरूपो धर्मविशेषः । तथाच श्रुतिः—य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः, "कर्मक्लेशविपाकाद्यैरस्पृष्टस्याखिलेशितुः । ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे"इति पराशरोक्तिश्च । अनेन निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनमित्यादिनिर्गुणवाक्यानि व्याख्यातानि भवन्ति । तेषां हेयगुणादिनिषेधपरत्वात् ॥

नन्वेवं तर्हि गुणदोषवत्त्वाभावान्निर्विशेषत्वासिद्धिः, सा चास्मत्संमतत्वादिष्टैवेतिचेत् तत्राह—अशेषकल्याणगुणैकराशिमिति । अशेषाणां कल्याणात्मकानां गुणानाम् एको मुख्यो यो राशिः पुञ्जभूतस्तम्, अशेषकल्याणगुणानामेके मुख्या राशयो यस्मिंस्तमिति वा, सर्वकल्याणानां मोक्षप्रदातृत्वादीनामनन्ताचिन्त्यस्वाभाविकगुणानां ज्ञानादीनां चैको मुख्यो राशिः समुदायभूतस्तस्याधारस्तमिति वा । गुणाश्च ज्ञानशक्तिबलैश्वर्य्यतेजोवीर्यासैशील्यवात्सल्यार्जवसौहार्दसर्वशरण्यत्वसौम्यकरुणास्थिरत्वधैर्य्यदयामाधुर्य्यमार्दवादयः । तत्र ज्ञानं सर्वदेशकालवस्तुविषयकप्रत्यक्षानुभवरूपम् । शक्तिश्च अघटघटनापटीयस्त्वरूपसामर्थ्यम् । बलं विश्वधारणादिशक्तिः । ऐश्वर्य्यं नियमनशक्तिः । श्रमहेतोरपरिमितत्वेऽपि श्रमशून्यत्वं तेजः । वीर्य्यं परैरनभिभूयमानत्वे सति पराभिभवनसामर्थ्यम् । एते जगत्सृष्ट्याद्युपकारकाः षड् भगवच्छब्दवाच्यपरब्रह्माश्रिताः ।

जात्यादिमहत्त्वमनपेक्ष्यातिमन्दैरप्यमायया संश्लेषभाक्त्वं सुशीलत्वम् । भृत्यदोषाननुसंधानं वात्सल्यम् । आश्रितदुःखासहिष्णुत्वं मार्दवम् । मनोवाक्कायैः समत्वमार्जवम् । आत्मशक्तिमति-

क्रम्य पररक्षणोद्यमः सौहार्दम् । ब्रह्मादिस्थावरान्तैः साधारणोपायत्वं सर्वशरण्यत्वं, तदेव सौम्यशब्दाभिधेयम् । परदोषक्षपणस्वभावः कारुण्यम् । युद्धादावचलत्वं स्थिरत्वम् । प्रतिज्ञापालनत्वं धैर्य्यत्वम् । निर्हेतुकपरदुःखादुःखित्वे सति तन्निराचिकीर्षा दया । अमृतपानवत् स्वादुदर्शित्वं माधुर्य्यमित्यादयः स्वाभाविका अनन्ताश्च । एते सौशील्यादयस्तु भगवदाश्रयणे आश्रितरक्षणे चोपयोगिन इति विवेकः । सूत्रिताश्चैते भगवता श्रीबादरायणेन—विवक्षितगुणोपपत्तेश्चेति । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति, सत्यकामः सत्यसंकल्पः सर्वाल्लोकानीशत ईशनीभिः, सर्वस्य शरणं सुहृत्, विष्णोर्नु कं वीर्य्याणि प्रावोचत् यः पार्थिवानि विममे रजांसि, न ते विष्णोर्जायमानो न जातो देवस्य महिम्नः परमं तमाप, सहस्रधा महिमानः सहस्र इत्यादिना श्रूयन्ते च । "ज्ञानशक्तिबलैश्वर्य्यतेजोवीर्य्याण्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः । स सर्वभूतप्रकृतिं विकारान् गुणाँश्च दोषाँश्च मुने व्यतीतः । अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले । समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशावृतभूतसर्गः । इच्छागृहीताऽभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ । तेजोबलैश्वर्य्यमहाऽवबोधस्ववीर्य्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे । स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः । सर्वेश्वरः सर्वगः सर्ववेत्ता समस्तशक्तिः परमेश्वराख्य" इत्यादिस्मरणं च । कल्याणधर्माश्च जगज्जन्मादिकारणत्व—शास्त्रयोनित्व—मोक्षप्रदत्व—सर्वकर्मफलप्रदत्व—विश्वाधारत्व—सर्वव्यापित्व—सर्वनियन्तृत्व—निरतिशयसूक्ष्मत्व—निरतिशयमहत्त्वेश्वरेश्वरत्व—सर्वानतिक्रमणीयत्वादयो ह्यसं-

ख्याताः । जन्माद्यस्य यतः शास्त्रयोनित्वात् । तन्निष्ठस्य मोक्षव्यपदेशात् । अन्तस्तद्धर्मोपदेशात् । आकाशस्तल्लिङ्गात् । फलमत उपपत्तेरित्यादिसूत्रेभ्यः । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति । यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः । स कारणं कारणाधिपाधिपः । सर्वे वेदा यत्पदमामनन्ति । तं त्वौपनिषदं पुरुषं पृच्छामि । तद्वेदगुह्योपनिषत्सुगूढः संसारबन्धस्थितिमोक्षहेतुः । कर्म्माध्यक्षः सर्वभूताधिवासः । तस्मिँल्लोकाः श्रिताः सर्वे सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् । यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश ओषधिषु वनस्पतिषु तस्मै देवाय नमो नमः । एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूताऽन्तरात्मा सर्वाल्लोकानीशत ईशनीभिः । सर्वस्य प्रभुमीशानं तमीशानं वरदं भूतमीड्यम् । सूक्ष्माच्च सूक्ष्मतरं विभाति यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । अणोरणीयान्महतो महीयान् । तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । तदु नास्येति कश्चनेत्यादिश्रुतिभ्यः । अहं सर्वस्य प्रभवो मतः सर्वं प्रवर्तते वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृत् । नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती । वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च हरिः सर्वत्र गीयते । बन्धको भवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः । मोक्षयिष्यामि मा शुचः । यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया । मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । बुद्धिर्मनो महद्वायुस्तेजो-

ऽम्भः खं मही च या । चतुर्विधं च यद् भूतं सर्वं कृष्णे प्रतिष्ठितम् इत्यादिस्मृतिभ्यः । एतेन स्वरूपेण बृहद्गुणयोगाच्च यद् बृहत्तमं वस्तु तद् ब्रह्मशब्दवाच्यमिति निर्वचनसिद्धिः । बृंहति बृंहयति तस्मादुच्यते परं ब्रह्मेति श्रुतेः । एष प्रकृतिरव्यक्तः कर्ता चैव सनातनः । परं च सर्वभूतेभ्यस्तस्माद् वृद्धतमोऽच्युतः । बृहत्त्वाद् बृंहणत्वाच्च ब्रह्मेत्यादिस्मृतेश्च । तथाहि, बृहि बृहि वृद्धाविस्मादातोरौणादिकगणपठितेन मनप्रत्ययेन ब्रह्मशब्दो व्युत्पन्नः । योगवृत्त्या ब्रह्मपदस्य निरतिशयबृहत्त्वपरत्वे सिद्धे तस्यासंकोचेन देशकालवस्तुपरिच्छेदशून्ये वस्तुनि पर्य्यवसानं निश्चीयते । तथाभूतश्च भगवच्छब्दवाच्यः पुरुषोत्तमो रमाकान्तः श्रीकृष्ण एवेति फलितम् ।

परत्वादेव—व्यूहाङ्गिनामिति । उपलक्षणार्थोऽयं व्यूहशब्दोऽन्यावतारमूर्तीनाम् । तथाच व्यूहा अवताराश्चाङ्गानि तान्येव विद्यन्ते यस्य तम् अनन्तमूर्तिकम् । सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूप इति श्रुतेः । उभयविभूतिपतिमिति यावत् । अवतारावस्थायाम् अव्यक्तशक्तित्वेऽपि अजहद्गुणशक्तिकत्वादतिशयसाम्यशून्यत्वात् परिपूर्णमेव । तस्मात् कृष्ण एव परो देवस्तं ध्यायेदित्यादिश्रुतेः मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति गीयमानाच्च । तत्र व्यूहो नाम श्रीपुरुषोत्तमो विश्वसृष्ट्याद्यर्थं तथाविधोपासनार्थं च व्यूहात्मनाऽवस्थितो भवति, वासुदेव—संकर्षण—प्रद्युम्नाऽनिरुद्धभेदेन चतुर्विधः । " व्यूहात्मानं चतुर्धा वै वासुदेवादिमूर्तिभिः । सृष्ट्यादीनि करोत्येष विश्रुतात्मा जनार्दन " इत्यादिवचनात् । केशवाऽऽदयोऽपि द्वादशव्यूहमूर्तय, ऊर्द्ध्वपुण्ड्रविधायकमन्त्रदेवता-

स्तत्र तत्र ध्येयाः । अवतारो नाम—स्वेच्छया धर्मसंस्थापनार्थम्, अधर्मोपशमनार्थं, स्वीयानां वाञ्छापूर्त्यर्थं च विविधविग्रहैराविर्भावविशेषः ।

अवतारास्त्रिविधाः—गुणावताराः, पुरुषावताराः, लीलाऽवताराश्च । गुणनियन्तृत्वेन तदभिमानिदेवकालादिभिः सृष्ट्यादिकर्ता गुणावतारः । तत्र रजोगुणनियामको रजोमात्रोपाधिकस्तद्गुणाभिमानिचतुर्मुखकालदक्षादिद्वारेण जगत्स्रष्टा, सत्त्वनियन्ता च, स्वयमेव स्वात्मना सत्त्वमात्रोपहितेन कालमन्वादिद्वारेण पालको रक्षिता च । तमोगुणनियामकश्च तदभिमानिरुद्रकालादिद्वारेण संहर्ता चेति । पुरुषावताराश्च महत्स्रष्टृप्रकृतिनियन्ता कारणार्णवशायी प्रथमः । अथ गर्भोदशायी समष्ट्यन्तर्यामी द्वितीयः । क्षीरोदशायी व्यष्ट्यन्तर्यामी तृतीयः पुरुषः । " प्रथमं तु महत्स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते " इति वचनात् । उपाधिभेदात् तत्तदवस्थापन्नस्तत्तत्संज्ञां भजत इत्यर्थः ॥

अथ लीलावताराः । तेऽपि द्विविधाः । आवेशावतारा स्वरूपावताराश्च । आवेशोऽपि द्विविधः, स्वांशावेशः शक्त्यंशाऽवेशश्च । स्वांशावेशो नाम जीवव्यवधानाभावेन साक्षात्स्वांशेन प्राकृतविग्रहादावावेशः । यथा नरनारायणादिरूपः । शक्त्यंशमात्रेणाविश्य जीवादिव्यवहितस्तत्कार्यसाधकः शक्त्यंशावेशः । स च तारतम्यभेदात् प्रभवविभवसंज्ञको भवति । तत्राद्यो धन्वन्तरिपरशुरामादयः । द्वितीयः कपिलऋषभचतुःसननारदव्यासादिरूपः ।

अथ स्वरूपावतारः । स्वरूपेण सच्चिदानन्दात्मकेनाविर्भावः । स्वरूपावतारश्च दीपाद् दीपान्तरवदभिन्नस्वरूपगुणशक्तिकः ।

सोऽपि द्विविधोंऽशरूपः पूर्णरूपश्च । तत्र पूर्णोऽपि अल्पगुणशक्त्याविष्करणाद् अंश इत्युच्यते मत्स्यकूर्मवराहवामनहयग्रीवहंसादिरूपः । पूर्णशक्त्यादिव्यक्तीकरणाद् पूर्णः श्रीनृसिंहो दाशरथी रामः श्रीकृष्णश्चेति विवेकः ।

एवं पूर्णत्वमुक्त्वा सर्वोपास्यत्वमाह—**वरेण्यमिति** ॥ स्वरूपेण तद्गुणैर्दिव्यमङ्गलविग्रहेण विग्रहगुणैश्च सौन्दर्य्यसौकुमार्य्यमाधुर्य्यलावण्यादिभिः साधारणत्वेन ब्रह्मादिश्वपाकान्तैर्वरणीयमित्यर्थः । एष एवाऽचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूप इत्यादिश्रुतेः ।

सौन्दर्य्यं व्यनक्ति—**कमलेक्षणमिति** । कमलोपमे ईक्षणे यस्य तम् । "सत्पुण्डरीकनयनं मेघाभं वैद्युताऽम्बरम् । नमः कमलनेत्राय नमः कमलमालिने" इति मन्त्रवर्णात् । उपलक्षणं चैतत्तदन्येषामङ्गानाम् । एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यकेशः हिरण्यश्मश्रुः । आप्रणखात् सुवर्णः । आनन्दरूपममृतं यद् विभाति । यदात्मको भगवांस्तदात्मिका व्यक्तिः, किमात्मको भगवान्, ज्ञानात्मक ऐश्वर्य्यात्मको, विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिश्रुतेः । यद्वा कमलया लक्ष्म्या ईक्ष्यते इति कमलेक्षणस्तं सौन्दर्यसीमानमित्यर्थः । रमामानसहंसाय गोविन्दाय नमो नम इति मन्त्रवर्णात् । अत एव हरिं ध्यातॄणां मनोहरं, तेषामेव पापं हरतीति वा "हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः" इति वचनात् । ब्रह्मादीनामपि हरणहेतुत्वाद्वा । "ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । प्रसह्य हरते यस्माद् तस्माद्धरिरितीर्य्यते" इति वचनात् ॥

किञ्च वेदमातृव्याख्यारूपोऽप्ययं श्लोकः । तथाहि—यो नो धियः प्रचोदयात् तत्सवितुर्देवस्य वरेण्यं भर्गो धीमहि इत्यन्वयः । तत्र यो नो धियः प्रचोदयादित्यस्यार्थः—कमलेक्षणमिमनेन संगृह्यते हृत्कमले ईक्ष्यते योगिभिरिति कमलेक्षणस्तं सर्वधीनियन्तारम् । " अष्टपत्रं विकसितं हृत्पद्मं यत्र संस्थितम् । अन्तः प्रविष्टः शास्ता जनानाम् । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया " इति शास्त्रात् । देवपदार्थमाह—ब्रह्मेति । स्वरूपगुणादिभिर्निरतिशयबृहद्वस्तु ब्रह्मशब्दाभिधेयमित्युक्तं पुरस्तात् । तदेव देवपदेन अभिधीयते । तथाहि । दीव्यति क्रीडति विश्वसर्गादिभिरिति देवः । ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे इति मन्त्रवर्णात् । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति भगवद्वचनाच्च । विजिगीषतेऽसुरानिति देवः । कंसवंशविनाशाय केशिचाणूरघातिने । संरक्षणाय साधूनां विनाशाय च दुष्कृतामिति । सर्वभूतेष्वन्तर्यामितया व्यवहरतीति देवः । य आत्मानमन्तरो यमयति, एष त आत्माऽन्तर्याम्यऽमृतः । सर्वस्य चाहं हृदि संन्निविष्ट इति । द्योतत इति देवः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति । येन सूर्य्यस्तपति तेजसेद्धः । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाऽग्नौ तत्तेजो विद्धि मामकमिति । स्तूयते ब्रह्मादिभिरिति देवः । तमेकं गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं परमया स्तुत्या स्तोषयामि, स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिरिति । सर्वत्र गच्छतीति देवः । यः सर्वज्ञः सर्ववित् । वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चनेति । अनेजदेकं मनसो जवीयः । मया ततमिदं सर्वं जगव्यक्तमूर्तिना

ಪುಸ್ತಕ ಸಂಖ್ಯೆ 13166

इति । एको वशी सर्वगः कृष्ण ईड्यः । मोदते वेति देवः । एष आनन्दयातीत्यादिनिर्वचनेभ्यो देवशब्दो ब्रह्मवाचक इति भावः । एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति श्रुतेः । सूत्रितं चैतद् भगवता बादरायणेन जिज्ञासाविषयतया देवपदार्थस्य ब्रह्मत्वेन । एवं व्युत्पत्तिमुखेन व्याख्यातो देवशब्दः । इदानीं लक्षणमुखेनाप्याह । तत्सवितुरिति तच्छब्दो गायत्रीविषयभूतध्येयमन्तर्यामिणमाह । योऽस्माकं बुद्धिप्रेरकः स चासौ सविता च तस्येति यत्तदोर्नित्यसंबन्धात् । जगत् सूयते यस्मादिति सविता । प्रजानां च प्रसवनात् सवितेत्यभिधीयते इति विष्णुधर्म्मोत्तरवचनात् । उपलक्षणं चैतत् स्थितिप्रलयोः । तथाच विश्वस्य जन्मस्थितिलयकारणमिति सिद्धम् । ब्रह्मलक्षणं, यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् ब्रह्म तद्विजिज्ञासस्वेति श्रुतेः । यतः सर्वाणि भूतानि प्रभवन्ति युगागमे । यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादिस्मृतेः । जन्माद्यस्य यत इति न्यायाच्च । एवमुदाहृतेभ्यः प्रमाणवाक्येभ्य उक्तानां निर्वचनानां लक्षणस्य च विषयः, समन्वयाधिकरणं च श्रीभगवान् वासुदेव एवेति निश्चित्य भर्गःपदं व्याचष्टे—कृष्णमिति भर्गमिति भर्जयति ध्यातॄणां कर्माणि इति भर्गो दिव्यमङ्गलवपुर्वाचकः सकारान्तो द्वितीयैकवचनोऽयं भर्गःशब्दः । यदा पश्यः पश्यते रुक्मवर्णमित्यारभ्य, तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुतिभ्यो दिव्यमङ्गलविग्रहः कृष्ण एव भर्गःशब्दाभिधेयः । तमेकं गोविन्दं सच्चिदानन्दविग्रहमिति मंन्त्रवर्णात् । किञ्च । तदु होचुः कः

कृष्ण इति प्रश्ने, पापकर्षकमिति उत्तरवचनात् पापं कर्षयति निर्मूलयतीति कृष्ण इति निरुक्तिरुक्ता । पापशब्दः पुण्यस्याऽप्युलक्षणार्थः । तथाच ध्यातॄणां पापपुण्यात्मककर्मकर्षकत्वात् कृष्णो भर्गःशब्दवाच्य इति भावः । यद्वा, भरणगमनयोगाद् अकारान्तोऽयं भर्गशब्दो विश्वभर्तृसर्वव्यापिविश्वाऽन्तर्यामिसर्वकारणब्रह्मवाचकः । तथाच यो भर्ग इति यच्छब्देनान्वेति यः सर्वभर्ता सर्वगो देव इत्यर्थः । एतेन शास्त्रयोनित्वं सर्ववेदसमन्वितत्वं मोक्षप्रदातृत्वं चोक्तं भवति । तथाहि । यज्जगत्कारणं तदेव वेदान्तशास्त्रविषयभूतं वस्तु । तत्रैव सर्वशास्त्रसमन्वयान्मोक्षकारणमिति सूत्रकृतामभिप्रायः । अथातो ब्रह्मजिज्ञासा इत्यारभ्य, अनावृत्तिः शब्दादित्यन्तेनाध्यायचतुष्टयात्मकेन शास्त्रेण निर्णीतः ।

मोक्षप्रदत्वात्सर्वोपास्यत्वमाह—वरेण्यमिति । मुमुक्षुभिरनन्यतया वरणीयमित्यर्थः । मुनयो ह वै ब्रह्माणमूचुः कः परमो देवः कुतो मृत्युर्बिभेति इत्युपक्रमे प्रश्नः । तस्माद् कृष्ण एव परो देवस्तं ध्यायेदित्युत्तरोपसंहारवाक्याद् यो गायत्रीप्रतिपाद्यो देवः स एव कृष्णस्तं ध्यायेदित्यर्थः । तदेवाह—ध्यायेमेति । धीमहीत्यस्यापरपर्यायः । आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्यादि श्रुत्युक्तविधौ । धीमहीतिशब्दप्रयोगश्छान्दसः ।

इदानीं सर्वोपासनानामत्रैवाऽन्तर्भावमाह—

व्यूहाङ्गिनमिति । ननु, यतो वा इमानि भूतानि जायन्ते, जन्माद्यस्य यत इत्यादौ सामान्यप्रयोगात् सामान्यस्य यत्तदादेर्विशेषतन्त्रत्वाद्विशेषाऽपेक्षायां जगत्कारणविधायकश्रुतीनां, हिरण्यगर्भः समवर्तताग्रे, आदिकर्ता स भूतानां ब्रह्माऽग्रे समव-

तर्त, ब्रह्मा देवानां प्रथमः संबभूव, विश्वस्य कर्ता भुवनस्य गोप्ता, विरिञ्चो वा इदं विरेचयति विदधाति इति ब्रह्मा वा विरिञ्चः, एतस्माद्धीमे रूपनामनी, न सन्नचासच्छिव एव केवलः, एको रुद्रो न द्वितीयाय तस्थुः, यो देवानां प्रभवश्चोद्भवश्चेत्यादीनां ब्रह्मरुद्रादिविविधविषयकत्वात् कथं कृष्णस्य जगत्कारणत्वं निश्चीयते इत्याशङ्कायां समाधानमाह—

परमिति । कारणकारणम् ईश्वरेश्वरं देवदेवं ब्रह्मरुद्रादिजनकं ब्रह्मादिगुरुमित्यर्थः । तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतं, स कारणं कारणाधिपाधिपः, न तस्य कश्चिज्जनिता न चाधिप इति श्रुतेः । मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय, परः पराणां सकला न यत्र क्लेशादयः सन्तीत्यादिस्मृतेश्च । ब्रह्मादीनां तु क्वचिदैश्वर्यश्रवणेऽपि जन्यत्वकर्म्मतन्त्रत्वादिश्रवणान्न परत्वयोग इत्यर्थः । एको ह वै नारायण आसीन्न ब्रह्मा नेशानः । तस्य ध्यानान्तःस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत, तस्य ध्यानान्तःस्थललाटात् स्वेदोऽपतत् ता इमाः प्रपतत्, ता आपः, तत्र हिरण्मयमण्डं, तत्र ब्रह्मा चतुर्मुखोऽजायत, नारायणाद् ब्रह्मा जायते नारायणाद् रुद्रः, यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै, यो ब्रह्माणं विदधाति पूर्वं यो वै विद्यास्तस्मै गोपायति स्म कृष्णः, अस्य देवमीढुषो दया विष्णोरेव प्रवृद्धेर्हविर्भिर्ददेह रुद्रो रुद्रीयमहित्वमिति बह्वृचः । सोऽब्रवीद्वरं वृणुष्व, अहमेव पशूनामधिपतिरसानीति तस्माद् रुद्रः पशूनामधिपतिरिति भगवत उभयोः साक्षाज्जन्म विद्यादिलाभश्च श्रूयते । तथैव स्मर्यते च—"यस्य प्रसादादहमच्युतस्य भूतः प्रजासृष्टिकरोऽन्तकारी । क्रोधाच्च रुद्रः स्थितिहेतभूतो यस्माच्च मध्ये पुरुषः परस्तादि"ति वैष्णवे ।

"प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै । तौ हि मां न च जानीतो मम मायाविमोहितौ" इति मोक्षधर्मे । "युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम । मया सृष्टः पुरा ब्रह्मा मद्यज्ञमयजत् स्वयम् । ततस्तस्य वरान् प्रीतो ददावहमनुत्तमान् । मत्पुत्रत्वं च कल्पादौ लोकाऽध्यक्षत्वमेव च, इति । विश्वरूपो महादेवः सर्वमेधे महाक्रतौ जुहाव सर्वभूतानि स्वयमात्मानमात्मना । महादेवः सर्वयज्ञे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव । विश्वाँल्लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासा, इति भारते । ब्रह्मादयः सुराः सर्वे विष्णुमाराध्य ते पुरा । स्वं स्वं पदमनुप्राप्ताः केशवस्य प्रसादतः, इति नारसिंहे । ते देवा ऋषयश्चैव नानातनुसमाश्रिताः । भक्त्या संपूजयन्त्येनं गतिं चैषां ददाति सः । ततस्ते विबुधाः सर्वे ब्रह्मा ते च महर्षयः । वेददृष्टेन विधिना वैष्णवं क्रतुमारभन् । आपुरादित्यवर्णं तं पुरुषं तमसः परम्, इति नारायणीये । तत्रैव भगवान्—येन यः कल्पितो भागः स तथा मामुपागतः । प्रीतोऽहं प्रदिशाम्यद्य फलमाहुतिलक्षणमिति । छान्दोग्ये च, विरूपाक्षाय धात्रेशाय विश्वदेवाय ब्रह्मणः पुत्राय ज्येष्ठाय इति शतपथब्राह्मणे च, संवत्सरात् कुमारोऽजायत कुमारोऽरोदीत् प्रजापतिरब्रवीत् किं रोदिषि यच्च मम तपसोऽधिजातोऽसीति, सोऽब्रवीदनपहतपाप्माऽहमस्मि हन्त नामानं मे देहीति । नारायणः परो देवस्तस्माज्जातश्चतुर्मुखः । तस्माद्रुद्रोऽभवद्देवः स च सर्वज्ञतां गत, इति वराहे । अहं ब्रह्मा चाद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः । मत्तो जगज्जङ्गमं स्थावरं च सर्वे वेदाः सरहस्याश्च पुत्र" इति नारायणीये इति श्रुतिस्मृतिभ्यो भगवतः सकाशाच्चतुर्मुखजन्मद्वारेण रुद्रोद्भवः । स च कल्पभेदाद् भेदोऽध्यवसातव्यः ।

ननु क्वचिद् ब्रह्मशिवलिङ्गादिषु पुराणेषु ब्रह्मशिवादीनां परत्वं व्याख्यातम्। तथा सति तेषामपि पुराणत्वेन प्रमाणत्वाऽविशेषत्वात् कथं विष्णोरेव परत्वं निश्चीयते इतिचेन्न। तेषां तु पुराणत्वाऽविशेषेऽपि राजसतामसत्वाभ्यां संसारहेतुत्वेन दुर्बलत्वात्। सात्त्विकैर्मोक्षकारणभूतैस्तेषां बाध्यत्वं युक्तमेव। एदुक्तं भवति—पुराणानि चतुर्विधानि सात्त्विकराजसतामससंकीर्णभेदात्। सात्त्विककालोद्भवं सात्त्विकविषयाधिकारिकं सात्त्विकम्। राजसकालोद्भवं राजसवस्तुप्रतिपादकं तथाभूताधिकारिकं राजसम्। एवमन्यदप्यूहनीयम्। तथाच मात्स्ये—"संकीर्णास्तामसाश्चैव राजसाः सात्त्विकाः स्मृताः। कल्पाश्चतुर्विधाः प्रोक्ता ब्रह्मणो दिवसाश्च ये। यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य च माहात्म्यं तत्तत्कल्पे विधीयते। अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्। राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः। संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते। सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम्, इति। कौर्मेऽपि, असंख्यातास्तदा कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः। सात्त्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरेः। तामसेषु शिवस्योक्तं राजसेषु प्रजापते"रिति तत्रैव। वैष्णवपाद्मादीनां सात्त्विकमूलत्वेन कात्स्न्र्येनाद्युत्पन्नज्ञानत्वात् प्राबल्यम्। इतरेषां तु रजस्तमोमूलत्वेन विक्षेपावरणार्हत्वात् परतत्त्वापह्नवपरत्वात् तद्विपरीतानां परत्वप्रकाशकत्वाच्च संशयविपर्ययहेतुत्वेन बाध्यत्वम्। एवं हि मुमुक्षुभिः श्रेयस्कामै राजसादीन् हित्वा सात्त्विकान्येवावलम्ब्यानि श्रेयस्कारणभूतानि सदा सेव्यानीति। तथाचाह भगवान् मनुः—"या वेदबाह्याः

स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृता" इति । उपलक्षणं चात्र पुराणशब्दः। उक्तलक्षणः श्लोको वा, श्लोकार्द्धं वा, पादमात्रं वा सात्त्विकं चेदुपादेयम्। राजसलक्षणं च श्लोकादि चेद्धेयम्। तथैव तामसं संकीर्णं चेति विवेचनीयम्।

ननु यद्येवं तर्हि सर्वैरप्येवं निर्णीय सात्त्विकमेव किमिति न सेव्यते इति चेन्न। दुष्कृतयोगादिति ब्रूमः। तच्च स्वयमेव गीतं भगवता श्रीमुखेनाऽन्वयव्यतिरेकाभ्यां "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। मायया ऽपहृतज्ञाना आसुरं भावमाश्रिताः। येषां त्वन्तगतम्, इति श्लोकः। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्"इति। किञ्च। मनुष्याणां सहस्रेषु तपोदानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते इति वचनात्। ततश्च जन्मसमये श्रीभगवत्कृपाकटाक्षावलोकितः सात्त्विको भूत्वा सात्त्विकैः संगम्य सात्त्विकान्येव सेवते मुच्यते च। अन्यथा अन्यैरवलोकितश्चेत् तथाभूतैरेव संगम्य संसारी भवति। तथाचोक्तं मोक्षधर्म्मे। "जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः। पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः। रजसा तमसा चैव मानसं समभिप्लुतम्" इति। सात्त्विकैः सेव्यते विष्णुस्तामसैरेव शंकरः। राजसैः सेव्यते ब्रह्मा संकीर्णैश्च सरस्वती, इत्यादीन्यन्यान्यपि चिन्तनीयानि।

ननु गायत्रीवृत्तिसवितृपदस्य सूर्य्यरूढत्वाद् रूढेश्च योगबाधकत्वेन बलवत्त्वात् सूर्य्यप्रतिपादक एव गायत्रीमन्त्र इत्यवगम्यते। तथाच गायत्रीविषयस्यैव वेदान्तविषत्वात् सूर्य्यस्यैव निरतिशयपरत्वमितिचेन्न। रूढेर्योगाद् बलवत्त्वेऽपि तात्पर्यबाधे

विपर्य्ययदर्शनात्। आकाशप्राणादिषु तथा निर्णयात्। तथाहि श्रूयते छान्दोग्ये शालावत्यजैवालिसंवादे, अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायान् आकाशः परायणमिति। अत्राकाशशब्दो भूताकाशपरो, ब्रह्मपरो वेति संशयः। तत्र भूताकाशपर एवेति पूर्वपक्षः। कुतः?। आकाशशब्दस्य भूताकाशे रूढत्वाद् योगवृत्तेः, रूढेर्बलीयस्त्वादिति प्राप्ते, सिद्धान्तः—आकाशस्तल्लिङ्गादिति। आकाशः परमात्मैव। कुतः? तल्लिङ्गात्। वाक्यशेषे तस्यैव परमात्मनोऽसाधारणलिङ्गानां जगत्कारणत्वज्यायस्त्वपरायणत्वादीनां श्रवणात्। भूताकाशस्य च वाय्वादीनां कारणत्वेऽपि सर्वकारणत्वासंभवात्। तस्माद्वा एतस्माद्वा आत्मन आकाशः संभूत इति जन्यत्वश्रावणाच्च। य आकाशमन्तरो यमयतीति नियम्यत्वश्रवणाच्च। तस्माल्लिङ्गाऽन्यथाऽनुपपत्तिसहकृतयोगवृत्तेर्बलीयस्त्वाद् रूढेर्बाध इति। सर्वमभिव्याप्य काशत इत्याकाशः। तमेव भान्तमनुभाति सर्वमिति श्रुत्यन्तरात्। तथैवान्यदपि तत्राम्नायते, कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्तेति। तत्र प्राणशब्दो वायुवृतौ, ब्रह्मणि वेति संशयः। वायुवृतौ एव शक्त इति पूर्वपक्षः। कुतस्तत्रैव प्राणशब्दस्य रूढत्वेनातिप्रसिद्धत्वात्। तत्र ब्रूते—अत एव प्राण इति। प्राणपदाभिधेयः पुरुषोत्तम एव। कुतः?। अत एव = सर्वभूताभिसंवेशनादिपरमात्मलिङ्गादेव। तथाच वायुवृतावनुपपन्नत्वाद् इति समन्वयाध्याये प्रथमपादे निर्णितं सूत्रकृद्भिः। तथैवात्रापि सवितृशब्दस्य रूढिवृत्त्याऽऽदित्यपरत्वेऽपि सर्वधी-

नियन्तृत्वादीनां परमात्मासाधारणलिङ्गादीनां तत्रासंभवाद् योगवृत्त्या ब्रह्मविषयकत्वं निश्चीयते । आदित्यस्य तु नियम्यत्वजन्यत्वपराङ्गत्वपरतन्त्रप्रकाशकत्वादीनाम् अनीश्वरलिङ्गादीनां श्रवणाज्जीवत्वं स्पष्टमेव । एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः । भीषाऽस्माद् वातः पवते भीषोदेति सूर्य्यः, चक्षोः सूर्योऽजायत, सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ, येन सूर्यस्तपति तेजसेद्धः । न यत्र सूर्य्यो भाति न चन्द्रतारकम् । यत्र न सूर्य्यस्तपति, यत्र वायुर्न वातीत्यादिश्रुतिभ्यः । तस्माद्गायत्रीमन्त्रप्रतिपाद्यः सर्वज्ञः सर्वशक्तिः स्वाभावकाचिन्त्यानन्तकल्याणगुणाश्रयः श्रीभगवान् पुरुषोत्तमो रमाकान्त एवेति सिद्धम् ।

ननु "एकमेवाद्वितीयं ब्रह्म नेह नानाऽस्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम् । यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । यद्वाचानभ्युदितं येन वागभ्युद्यते" इत्यादिश्रुतिभिर्ब्रह्मण एकत्वनिर्गुणत्वनिर्विशेषत्वज्ञानाविषयत्वशब्दाद्यगोचरत्वादिप्रतिपादनात् कथमुक्तप्रकारकब्रह्मप्रतिपत्तिस्तथात्वे चोक्तश्रुतीनां निर्विषयतया व्याकोपात् । तच्चाऽनिष्टमितिचेन्न । सर्वश्रुतीनामस्मत्सिद्धान्ताऽविरोधित्वात् । तथाहि । सदाकाशप्राणज्योतिरात्मब्रह्मनारायणादिशब्दाभिधेयस्य विश्वकारणस्यैकत्वाभ्युपगमात् तत्परोऽयं वाक्यकदम्बः । एवञ्चैकशब्दो जगत्कारणस्यैकत्वं विदधाति ।

अन्ययोगव्यवच्छेदार्थकेनाऽवधारणेन च तत्साम्यं निराक्रियते, अद्वितीयपदेन च तदाधिक्यमिति बोध्यम् । न तत्समश्चाभ्य-

धिकश्च दृश्यते इति श्रुत्यन्तरात् । एवं सदाद्यनेकशब्दप्रयोगात् तदर्थे कारणे नानात्वसंभावनावारणायाह । इह जगत्कारणे नानाशब्दवाच्येऽपि नानात्वं नास्ति । तस्यैकत्वात् । नानात्वदर्शनस्य फलमाह । मृत्योः स मृत्युमाप्नोति । सदैव जन्ममरणादिदुःखात्मकसंसारभाग् भवति । नानात्वदर्शनमास्तां, नानेव दर्शनस्यैतावत् फलमित्यर्थ इति कैमुत्योक्त्या महादोषः सूचितः । यद्वा क्वचिच्चतुर्मुखादीनां कारणत्वश्रवणात् तत्र तथात्वशङ्कावारणायेदं वाक्यम् । इह जगत्कारणे नाना चतुर्मुखत्रिनयनादिभेदो नास्ति । कारणस्य एकत्वावधारणात् । तेषां च नियम्यत्वादिश्रवणात् । अवरत्वं पूर्वमेवोक्तम् । शेषं समानम् । तथैव निर्गुणवाक्यानां हेयगुणविशेषनिषेधपरत्वेन नैराकाङ्क्ष्यात् । नच निर्गुणमिति सामान्यशब्दप्रयोगाद् धर्म्ममात्राऽपवाद इति वाच्यम् । तेषां स्वाभाविकत्वश्रवणात् स्वाभाविकवस्तुनो निषेधाविषयत्वनियमात् । न हि अग्नेर्दहनप्रकाशनादिधर्मो निषेद्धुं शक्यः केनाऽपि विदुषा । अन्यथा, अस्थूलादिवाक्यैः स्वरूपस्यापि निषेधोऽभ्युपगन्तव्यः । स्वाभाविकत्वाविशेषात् । तस्माद्धेयगुणनिषेधपराण्येव निर्गुणवाक्यानीति न तैर्विरोधशङ्कावकाशः । नापि ज्ञानाविषयकवाक्यविरोधः । तेषामियत्ताऽवच्छिन्नविषयकनिषेधरूपत्वात् । तथाहि । यस्य पुंसः परमेश्वरस्वरूपगुणादिविषयकेयत्तावच्छेदेन अमतम् अननुभूतमनुमानादिभिः, तस्य मतं तेन मतम् अपरिच्छिन्नत्वेन ज्ञातमित्यर्थः । यस्य तु स्वरूपादि इयत्तावच्छेदेन मतं स न वेद । परिच्छिन्नदर्शित्वात् । भगवत्स्वरूपगुणादीनाम् अनन्तत्वेनाऽचिन्त्यत्वात् । सत्यं ज्ञानमनन्तं ब्रह्म । विष्णोर्नु कं वीर्य्याणि प्रावोचं यः पार्थिवानि विममे रजांसि । न ते विष्णोर्जायमानो न जातो देवस्य महिम्नः

परमं तमाप । सहस्रधा महिमानः सहस्रः । एष एवाऽचिन्त्यः परः परमो हरिरादिरनादिरनन्त इत्यादिश्रुतिभ्यः । एवमेवान्यदपि वाक्यं व्याख्येयम् । ऐक्यार्थ्यात् । अन्यथा, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय । य एवं विदुरमृतास्ते भवन्ति । यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तं निगच्छतीत्यादिवाक्यव्याकोपात् । ज्ञानाऽभावेऽनिर्मोक्षप्रसङ्गाच्च । तत्रैव वाक्यशेषे, मतं तस्य,विज्ञातमविजानतामिति ज्ञानविषयत्वप्रतिपादनाच्च । किञ्च । यतो वाचो निवर्तन्ते इत्यत्र, यतः सर्वज्ञात् सर्वशक्तेः स्वाभाविकाऽचिन्त्यानन्तकल्याणगुणाश्रयात्पुरुषोत्तमात्, तस्यानन्दादीनामन्तमप्राप्य मनसा सह वाचो निवर्तन्ते इति तेषामनन्तत्वाद् उदाहृतवाक्येभ्यः । अन्यथा तत्रैव मन्त्रशेषे, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति तदीयानन्दस्य ज्ञानविषयत्वं भयनिवृत्तिफलकत्वं चोक्तं विरुद्ध्यते । तं त्वौपनिषदं पुरुषं पृच्छामः । सर्वे वेदा यत्पदमामनन्ति । वेदैश्च सर्वैरहमेव वेद्यः । नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वतीत्यादिशास्त्रविरोधात् सर्वं हि उपदेशशास्त्रं दत्तिलाञ्जलि स्याद्, उपदेष्टृसंततिनाशश्च । तस्मादुक्तलक्षणं ब्रह्मैव गायत्रीप्रतिपाद्यत्वात् सर्ववेदान्तविषय इत्येव साधीयान् । तथैव च सूत्रितं च भगवता बादरायणेन,शास्त्रयोनित्वादिति ।

कैश्चिन्निर्विशेषं ब्रह्माभ्युपगम्यते । तत्तुच्छम् । सर्वप्रमाणाऽविषयत्वेन शशशृङ्गायमाणत्वात् । तथाहि । प्रमाकरणं प्रमाणं तत् त्रिविधम् । प्रत्यक्षाऽनुमानशब्दभेदात् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । श्रीगुरुं चक्षुषा पश्यामि, हरिगाथां श्रोत्रेण शृणोमि, तुलसीसौरभं घ्राणेन जिघ्रामीत्यादिविषयसंबद्धमिन्द्रियं तत्करणत्वात् प्रत्यक्षप्रमाणम् १ । व्याप्तिधीजन्यं ज्ञानमनुमितिः ।

यथा–पर्वतो वह्निमान्, धूमवत्त्वात् । यो यो धूमवान् स स वह्निमान् । यथा महानसः । इन्द्रियमनोबुद्धयादीनि आत्मा न भवन्ति, करणत्वात् । दण्डादिवदिति । तत्करणमनुमानम् २ । आप्तप्रयुक्तं वाक्यं शब्दः । भ्रमादिहेतुबुद्धिमान्द्यादिचतुष्टयाऽप्रामाण्यकारणशून्यत्वे सति यथार्थवक्तृत्वमाप्तत्वम् । तच्च तारतम्यादिभेदात् त्रिविधम् । तत्राप्ततमो वेदस्तद्वाक्यं प्रमाणतमम् । आप्तमूलकत्वेनान्यनिरपेक्षत्वाच्छ्रुत्यर्थस्मर्तारो मन्वादय आप्ततराः । तेषां वाक्यं प्रमाणतरम् । श्रुतिमूलकत्वेन तत्सापेक्षत्वाच्छ्रुतिस्मृतिव्याख्यातार आप्तास्तद्वाक्यं प्रमाणम् । उभयमूलकत्वेनोभयसापेक्षत्वात् । तत्र प्रत्यक्षाऽनुमानयोः प्रमाणत्वेऽपि क्वचिन्मायामूर्द्धादिदर्शने देवदत्तस्यैवायं मूर्द्धेति प्रत्यक्षे, दृष्ट्वा तत्कालविनष्टाऽग्नौ चिरमधिकधूमोद्गारिणि गिरौ–पर्वतो वह्निमान् धूमवत्त्वादित्याद्यनुमाने च व्यभिचारदर्शनात् सापेक्षत्वेन निर्बलत्वम् । शब्दस्य तु निरपेक्षत्वात् प्रबलत्वमिति विवेकः ३ । उपमानादीनां चात्रैवान्तर्भावान्नपार्थक्यम् । न तत्र प्रत्यक्षं प्रमाणपदवीमवतिष्ठते । तस्यातीन्द्रियत्वाभ्युपगमात् । नाऽप्यनुमानं, लिङ्गशून्यत्वात् । नेन्द्रियाणि, नानुमानमिति श्रुतेः । नाऽप्यागमः । सर्वधर्मशून्यतया शब्दवृत्त्यविषयत्वात् । तथाहि । शब्दवृत्तिर्द्विधा, मुख्याऽमुख्यभेदात् । आद्या शक्तिरूपा । सा च-अस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छासंकेत इति तार्किकैरभिधीयते । अर्थप्रतीतिजननसामर्थ्यलक्षणः स्वाभाविकः संबन्ध इति मीमांसका आहुः । चक्षुरादिवृत्तिविषयप्रकाशनयोग्यत्ववच्छब्दस्य तत्तदर्थप्रकाशनयोग्यतालक्षणसंबन्ध इति शाब्दिकाः । अघटघटनापटीयसी ब्रह्माश्रितस्वाभाविकी, शक्तिमच्छब्दाश्रिता तदर्थप्रकाशनार्हताऽभिन्ना चेति ह्यौपनिषदाः । सर्वथाऽपि, शब्दा-

श्रितातदर्थप्रकाशनयोग्यतेतिसामान्यंसर्वधारणलक्षणमितिसिद्धम्। सा त्रिधा रूढिर्योगो योगरूढिश्चेति। तत्र समुदायशक्तिः रूढिः। यथाहरिः, नारद इत्यादिः। रूढो द्विविधः, पर्यायोऽनेकार्थश्च। तत्र पर्यायो हस्तकरादयः। अनेकार्थो हरिः सैन्धवादयः। अवयवशक्तिर्योगः। माधवो रमाकान्तः शौरिः शास्ता वासुदेवः। उभयप्रवृत्तिहेतुकी तृतीया। यथा, सोमः, पङ्कजः ५। द्वितीयापि द्विविधा, लक्षणा गौणी च। तत्र शक्यसंबन्धो लक्षणा। सा त्रिधा, जहत्स्वार्थाऽजहत्स्वार्था, जहदजहत्स्वार्था चेति। तत्राद्या यथा गङ्गायां घोषः। अत्र प्रवाहशक्तस्य गङ्गापदस्य शक्यसंबन्धे तीरे वृत्तिः। यथा वा मञ्चाः क्रोशन्तीत्यत्र मञ्चे शक्तस्य मञ्चशब्दस्य तत्संबन्धेषु पुरुषेषु वृत्तिः। अजहत्स्वार्था च, यथा काकेभ्यो दधि रक्ष्यताम्। अत्र काकत्वेन काके शक्तस्यापि काकशब्दस्य दध्युपघातकत्वेन काकतदितरेषु वृत्तिः। यथा वा, शोणो धावतीत्यत्र शोणगुणगमनरूपस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तद्वति तदधिष्ठानरूपे गवादौ वृत्तिः। शक्यैकदेशपरित्यागे सति शक्यैकदेशवृत्तिस्तृतीया। यथा सोऽयं देवदत्त इत्यत्र तद्देशकालवैशिष्ट्यैतद्देशकालवैशिष्ट्ययोर्युगपदन्वयानुपपत्त्या देशकालादिविशेषणत्यागेन देवदत्तपिण्डमात्रमेव लक्षणया बोध्यते। शक्यस्थलक्ष्यमाणगुणसंबन्धो गौणी। यथा सिंहो देवदत्तः। अत्र सिंहवृत्तिक्रौर्य्यादिगुणानां लक्षणया माणवके देवदत्ते वृत्तिः। सैव लक्षितलक्षणेत्यप्यभिधीयते२। तत्र न तावन्निर्विशेषवस्तुनि रूढिवृत्तेः संभवः। जातिगुणक्रियाद्यभावात्। नापि योगवृत्तिः संभवति। निर्विशेषस्य धातुप्रत्ययार्थत्वाभावात्। नापि लक्षणा, सबन्धशून्यत्वात्। नापि गौणी। निर्गुणत्वाऽभ्युपगमात्। तस्मात् सर्वप्रमाणशून्यत्वादनादरणीयं श्रेयोर्थिभिः। अतः

सर्वज्ञसर्वशक्तिसर्ववेदान्तवेद्यविश्वजन्मादिकारणं परं ब्रह्म श्रीपुरुषोत्तम एव, स चाऽभिन्ननिमित्तोपादानात्मकः । नचाऽभिन्ननिमित्तोपादनरूपस्य क्वाप्यऽदृष्टचरत्वात् कथं तत्सिद्धिरिति वाच्यम् । घटेश्वरसंयोगादौ जीवगतज्ञानादौ च कार्य्ये ईशजीवयोस्तथाभूतकारणत्वदर्शनान्नाऽसन्ताऽप्रसिद्धिः । तदृष्टान्तेनात्रापि तथात्वमभ्युपगम्यते । ब्रह्म, जगदभिन्ननिमित्तोपादानं भवितुमर्हति । नादृशशक्तिमत्त्वात् । जीवगतज्ञानादौ जीववत् । घटेश्वरसंयोगे ईश्वरवच्चेत्यनुमानमत्रानुसंधेयं, प्रकृतिश्चेति शास्त्रं च ।

ननु कीदृशमिदं कार्य्यम् । न तावत् संघातरूपम्, आरब्धं वा शक्यते वक्तुम् । अवैदिकत्वात् । नापि परिणामः । आकाशकल्पस्य विभोर्वस्तुनः परिणामासंभवात् । तथाच प्रयोगः—ब्रह्म परिणामानर्हं भवितुमर्हति । विभुपरिमाणकत्वात् । निरवयवत्वाच्च । आकाशवत् । तस्माद् ब्रह्मविवर्तमेवेदं जगदिति चेन्न । निरवयवस्यापि विभोः परिणमनसामर्थ्ययोगात् परिणामसंभवात् । ननु सावयवस्यैव क्षीरादेः परिणामदर्शनान्न निरवयवस्येति तादवस्थ्यमेवास्य दोषस्येति चेन्न । क्षीरपरमाण्वादौ तद्व्यभिचारात् । तथाहि । न हि सावयवत्वं वस्तुपरिणामे प्रयोजकम्, अपि तु वस्तुगता तादृशी शक्तिरेव । अन्यथा जलस्यापि सावयवत्वाविशेषेण दधिभावपरिणामापत्तेर्दुर्वारत्वात् । क्षीरावयवानां निरवयवत्वाच्च । अयं भावः । द्रव्यपरिणामेऽवयविगता शक्तिः कारणम् ? अवयवनिष्ठा वा ? नाद्यः । द्रवद्रव्येऽतिरिक्तस्यावयवित्वं, त्वया नाभ्युपगमात् । द्वितीये तु क्षीरावयवाः सावयवा, निरवयवा वा इति विवेचनीयम् । न तावत् सावयवाः, । अनवस्थानात् । क्षीराब्धेः कुण्डपरिमाणापत्तेश्च । अवयवानामानन्त्यात् । अतो निरवयवा एवेति अकामेन त्वया-

ऽभ्युपगन्तव्याः । एवञ्च निरवयवस्य परिणामाभावत्वनियमभङ्गात् स्वरूपासिद्धो हेुर्निरवयवत्वमिति । नापि विभोः परिणामाऽभावनियमः । आकाशस्यापि वाय्वात्मना परिणामो दृश्यते । आकाशाद्वायुरिति श्रुतेः । अनेन द्वितीयस्य हेतोरपि सत्प्रतिपक्षत्वं दृष्टान्तविकलत्वं चोक्तं भवति । तथाच प्रयोगः—ब्रह्म परिणामयोग्यं, विभुत्वात् । आकाशवदिति । तत् सिद्धं निरवयवस्य विभोर्ब्रह्मणः परिणामात्मकमिदं कार्य्यमिति तादृशशक्तिमत्त्वादेवेति । श्रूयते च, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादि । स्मर्य्यतेऽपि, शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णतेति ।

ननु स्यादेतन्निरवयवस्यापि विभोस्तादृक्शक्तियोगात् परिणामस्तथापि परिणामाभ्युपगमे विकारित्वप्रकामतोऽप्यवश्यं भावि । तच्च दूषितत्वादनिष्टम् । कृत्स्नप्रसक्तिर्निरवयवत्वशब्दव्याकोपो वेति न्यायात् । अत्रैवं विवेकः । ब्रह्मणः कार्य्यभावापत्तौ कृत्स्नस्य परिणामस्तदेकदेशस्य वा । आद्ये सर्वस्यापि परिणतत्वान्मुक्तोपसृप्याभावप्रसङ्गः, अनित्यतायोगश्च । द्वितीये तु अनित्यत्वस्य तादवस्थ्यम् । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्यादि निरवयत्वविषयवाक्यव्याकोपश्चेति । तस्मादयोग्य एव परिणामपक्ष इतिचेन्न । उदाहृतेषु आकाशादिषु निरवयवत्वविभुत्वसाम्येऽपि निर्विकारित्वदर्शनेन निर्दोषत्वात् । आकाशस्य वाय्वात्मना शब्दात्मना परिणतस्य उक्तदोषवत्त्वाऽदर्शनात् । आकाशवत् सर्वगतश्च नित्य इतिश्रुत्या तथात्वश्रवणात् । तस्मान्निरवयवस्यापि विभोर्ब्रह्मणः परिणामेऽपि तादृशशक्तियोगादेवाविकारित्वमपीति बोध्यम् । वस्तुतस्तु, आत्मकृतेः

परिणामादित्यादौ परिणामशब्दः शक्तिविक्षेपवाचकः । ब्रह्मस्वरूपे परिणामानभ्युपगमान्नोक्तदूषणगन्धस्पर्शनावकाशः ।तथाचाऽप्रच्युतस्वरूपस्यैवोर्णनाभ्यादेः स्वशक्तिविक्षेपलक्षणपरिणामवत्त्वेऽपि नोक्तदोषयोगः । यथोर्णनाभिः सृजते गृह्णते च, यथा सतः पुरुषात् केशलोमानि यथा पृथिव्या औषधयः संभवन्ति तथाऽक्षरात् संभवतीह विश्वमिति श्रवणात्, तथैव परिणामेन विश्वस्य भगवान् हरिरिति स्मरणाच्च । नच शक्तिविक्षेपः परिणाम इत्यत्र किं मानमिति वाच्यम् । शास्त्रस्यैव मानत्वात् । " प्रधानं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाऽव्ययावि"त्यत्र क्षोभशब्दप्रयोगः । स च विक्षेपपर्य्याय एव । किञ्च । " प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः । तद्वद् भूतानि भूतात्मा सृष्टानि ग्रसते पुनरि"ति भीष्मः कण्ठवेणैव पठतीति निरवद्यम् अभिन्ननिमित्तोपादानकारणं ब्रह्मेति । तत्रोपादानत्वं नाम—चेतनाचेतनात्मकानां सूक्ष्मावस्थापन्नानां स्वस्वाभाविकशक्तीनां तत्तद्गतसद्रूपकार्य्याणां च स्थूलतया प्रकाशकत्वम् । निमित्तत्वञ्च—स्वस्वानादिकर्म्मसंस्कारवशीभूतात्यन्तसंकुचितस्मृत्यनर्हज्ञानानां चेतनानां कर्मफलभोगार्हज्ञानप्रकाशेन तत्तत्कर्मफलतत्तद्भोगसाधनैः सह संयोजयितृत्वम् । तदुभयाभिन्नत्वं तत्त्वम् । एवंभूतस्य कारणत्वस्य स्वरूपगतत्वाद्, यतो वा इमानि भूतानि जायन्त इत्यादिभिरीश्वरस्वरूपलक्षणमेवेति बोध्यम् । नच तथात्वे सत्यादिलक्षणवैयर्थ्यापत्तिरिति वाच्यम् । जगत्कारणत्वस्य कार्य्यनिरूपितत्वेन सापेक्षत्वात् सत्यादेश्च तन्निरपेक्षत्वादिति सर्वं समञ्जसमिति भावः ।

यदुक्तं ब्रह्मविवर्तमेवेदं जगादिति । तत्तुच्छम् । अश्रुतत्वेनाऽप्रामाणिकत्वात् । ननु सदेव सोम्येदमग्र आसीत्, तदेवर्तं तदु

सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिसादिश्रुतौ ब्रह्मणः सत्यत्वाऽवधारणाद् अन्ययोगव्यवच्छेदार्थकोऽयम् एवकार उक्तार्थे विश्वारोपितत्वे प्रमाणम् । आरोपितत्वादेवाऽसत्यत्वमितिचेन्न । असत आरोपासंभवात् । एकत्र सत एवान्यत्राऽऽरोपनियमात् । न हि स्वरूपेणाऽसतः शशशृङ्गादेः क्वचिदारोपो दृष्टः श्रुतो वा । नचारोपे तद्विषयकप्रतीतिमात्रमपेक्षितं, न सत्यत्वमपीति वाच्यम् । असतः प्रतीतेरेवाऽसंभवात् । ननु रज्जौ सर्पप्रतीतेरिव प्रपञ्चप्रतीतेरपि दोषमात्रमेव कारणमपेक्षितं, न विषयसद्भाव इतिचेन्न । दोषात्मककारणस्यापि असत्यत्वाविशेषेण तव पक्षे प्रतीतिलक्षणकार्य्योत्पत्तेरसंभवात् । कार्य्यस्य कारणसत्तापेक्षितत्वनियमात् । कुत्राप्यसतः कारणत्वाऽदर्शनाच्च । नचाऽसतोऽप्यारोपितसर्प्पस्य भयादिकार्यजनकत्वदर्शनात् कार्य्यस्य कारणसत्ताऽपेक्षितत्वनियमभङ्ग इति वाच्यम् । स्वरूपेणाऽसतः कार्य्योत्पत्त्यनुकूलशक्त्याश्रयत्वभूतकारणत्वाऽसंभवात् । भ्रमस्थलेऽपि सर्पविषयकज्ञानस्यैव भयादिहेतुत्वं, न विषयस्येति । अन्यथा कारणमात्रस्याप्यसत्यत्वाभ्युपगमे कार्य्योत्पत्तिकथाया एवानुपपन्नत्वात् । नचाऽसतोऽपि रज्जुसर्पादेर्ज्ञानकारणत्वोपपत्तिवद् भयकारणत्वोपपत्तिरपि किं नाङ्गीक्रियते इति वाच्यम् । दोषस्यैवासद्विषयकज्ञानकारणत्वेन भ्रमस्थलेऽपि विषयस्य ज्ञानकारणत्वाभावात् । नन्वतीतानागतदृष्टिविषयकज्ञानोत्पत्तिस्थले सत एव दृष्टिरूपविषयस्य स्वज्ञानजनकत्वदर्शनात् तथाऽत्रापि संभाव्यमिति चेन्न । अतीतदृष्टिविषयकज्ञानोत्पत्तौ तत्कार्यस्येदानींतनस्य सत एवान्नादेरनागतदृष्टिविषयकज्ञानोत्पत्तौ च तज्ज्ञापकरूपकारणस्य सत एव ज्योतिःशास्त्रस्य विद्यमानत्वान्नाऽसतो विषयस्य कुत्रापि ज्ञानादिकारण-

त्वमिति। तद् सिद्धम्—असत आरोपासंभवादप्रमाणकत्वं विवर्तस्येति । नच वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेरेवात्र प्रमाणत्वाद् कथमप्रमाणत्वमितिचेन्न । विकारो नामधेयमित्यत्र विकारशब्दपाठाद् विकारत्वं च परिणमिते एव द्रव्ये दृष्टचरम् । अन्यथा भ्रान्तिर्नामधेयमित्युक्तं स्याद् ।

किञ्च, विवर्तदृष्टान्तानां रज्जुसर्पशुक्तिरजतादीनां भवदभिमतानां काप्यदर्शनादापि प्रतिज्ञाबाधाच्च । तथाहि । छान्दोग्ये आम्नायते—उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति, कथं नु भगवः स आदेशो भवतीति । यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् यथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यादित्यादिना कारणविज्ञानेन कार्य्यविज्ञानं प्रतिपादितम् । तत्र यथा मृत्पिण्डस्य घटादिविकारोपादानस्य विज्ञानेन सर्वं मृद्विकारजातं विज्ञायते, न तथा रज्जुविज्ञानेन सर्प्पमात्रं विज्ञायते । नापि शुक्तिविज्ञानेन रजतजातं चेति सर्वानुभवविरोधाद् प्रतिज्ञाहानिरित्यर्थः ।

तस्माद् कार्य्यत्वाद् सदेव जगदिति वैदिकानां सिद्धान्तः। तथाच श्रुतिः—सदेव सोम्येदमग्र आसीद् । गौरनाद्यन्तवती जनित्री भूतभाविनी । सिताऽसिता च रक्ता च सर्वकामदुघा विभोः । ऊर्द्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तद् सदासीद्, प्राणा वै सत्यं, तेषामेष सत्यम्, असत्यमाहुर्ज्जगदेतदज्ञाः शक्तिं हरेर्न विदुर्यै परां हि । यः सत्यरूपे जगदेतदीदृक् सृष्ट्वा त्वभूद् सत्यकर्मा महात्मा । अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते । अथैनमाहुर्नित्यकर्मेति नित्यं ह्येवासौ कुरुते । अष्टरूपामजां ध्रुवामित्यादिः । सत्त्वाच्चावरस्य । असद्व्यपदेशादितिचेन्न धर्मान्तरेण वाक्यशेषाद् । युक्तेः शब्दान्तराच्चेत्यादिन्या-

यः । ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । असत्प्रतिष्ठं च जगदाहुरनीश्वरमित्यादि भगवद्गीतं च ।

ननु, असद्वा इदमग्र आसीदित्यादिनाऽसत्त्वस्यापि श्रुतिसिद्धत्वात् कथमपह्नव इतिचेन्न । तस्य विकारित्वलक्षणासत्त्वविषयत्वात् । तथाचाह भगवान् पराशरः—तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवादिति वैष्णवे । किञ्च कार्य्यं सदेव स्वकारणादुद्भवति । अन्यथा तिलेभ्य इव सिक्ताभ्योऽपि तैलमुद्भवेदिति पूर्वमेवोक्तम् । तस्माद्विकारित्वावच्छिन्नसत्ताकमिदं जगत् कारणावस्थापन्नम् अनुद्भूतम् अनभिव्यक्तनामरूपकम् असदादिशब्दैरभिधीयते । तदेवाभिव्यक्तनामरूपकम् आविर्भूतं सदादिशब्दवाच्यमिति सर्वश्रुत्यविरोधः । वैष्णवे ध्रुवः—न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः । संयमे विश्वमखिलं बीजभूते तथा त्वयि । बीजादङ्कुरसंभूतो न्यग्रोधः सुसमुत्थितः । विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगदिति । श्रीसूत्रकारेण निर्णीतः—पटवच्चेति सूत्रेण । यथा संकुचितः पटः पटत्वेनागृह्यमाणोऽपि पट एव, प्रसारणे तु स्पष्टतया गृह्यत एव, तथा तिरोभावावस्थायामनभिव्यक्तमपि कार्य्यं नामरूपाभ्यामगृह्यमाणमपि सदेव । आविर्भावावस्थायां तु प्रत्यक्षागमाभ्यां सत्त्वेन स्पष्टं गृह्यते इति सूत्रार्थः ।

ननु, जगन्मिथ्या । दृश्यत्वात् । शुक्तिरजवद्—इत्यनुमाने जगदसत्त्वे प्रमाणमितिचेन्न । दृश्यत्वस्य हेतोः साध्याभाववति ब्रह्मणि अतिव्याप्त्या साधारणानैकान्तिकत्वेन हेत्वाभासकत्वात् । एवं दृश्यत्वाधिकरणसाम्यात् तेनैव हेतुना ब्रह्मणोऽपि मिथ्यात्वं किमिति नाभ्युपगम्यते भवद्भिर्मनीषिभिः । ब्रह्म

मिथ्या, दृश्यत्वात्, प्रपञ्चवदिति वक्तुं शक्यत्वात् । श्रूयते हि ब्रह्मणो दृश्यत्वम्—आत्मा वा अरे द्रष्टव्यः, यदा पश्यस्यन्यमीशम्,आत्मन्यरे दृष्टे, दृश्यते त्वग्र्यया बुद्ध्या, सदा पश्यन्ति सूरयः, यत् तत् पश्यसि तद्वद, तमसः पारं दर्शयति, तस्मिन् दृष्टे परावरे इत्यादिभिः ।

ननु, न चक्षुषा गृह्यते नापि वाचा, न सदृशे तिष्ठति रूपमस्य, न चक्षुषा पश्यति कश्चनैनं, तत्र यः परमात्मा तु स नित्यो निर्गुणः स्मृतः, यं न देवा न मुनयो न चाहं न च शंकरः, जानन्ति परमेशस्य तद्विष्णोः परमं पदमित्यादिश्रुतिस्मृतिभ्यो निर्गुणस्य ब्रह्मणः सर्वप्रमाणाविषयतया स्वप्रकाशत्वाभिधानाच्च तवोदाहृतवाक्यविषयस्य ब्रह्मणो मायावच्छिन्नत्वावगमादवरत्वमभ्युपगम्यते । तथाभूतस्य मिथ्यात्वमिष्टापत्तिमेवेतिचेन्न । दर्शनविषयस्यैव परत्वाभिधानात् । स एवास्माज्जीवाघनात् परात् परं पुरुषमीक्षते, ततस्तु तं पश्यति निष्कलं ध्यायमानः, प्रधानपुरुषाव्यक्तकालानां परमं हि यत्, पश्यन्ति सूरयो नित्यं तद्विष्णोः परमं पदमित्यादिश्रुतिस्मृतिभ्य उक्तश्रुतीनां दर्शनानर्हचक्षुरादिनिषेधविषयकत्वान्नैराकाङ्क्ष्यं व्याख्येयम् । तथाच गीतं स्वयमेव भगवता—न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमिति । तस्मादसद्धेतुकमिदमनुमानं न प्रमाणपदवीमारोढुमर्हतीत्युक्तसिद्धान्तस्यैव वरीयस्त्वं मुमुक्षुभिर्ध्येयम् अलं विस्तरेण॥४॥

एवमखिलाविद्यादिदोषगन्धस्पर्शानर्हस्यानन्ताचिन्त्यस्वाभाविककल्याणगुणसागरस्य परब्रह्मभूतस्य श्रीपुरुषोत्तमस्य भगवतः सर्वजगज्जन्मादिकारणत्वं सर्वशास्त्रवेद्यत्वं सर्वोपास्यत्वं मोक्षप्रदातृत्वं मुक्तोपसृप्यत्वं प्रतिपाद्य, इदानीं, श्रीश्च ते

लक्ष्मीश्च ते पत्न्यावहोरात्रे पार्श्वे इत्यादिश्रुत्युक्तलक्ष्म्यादिवैशिष्ट्यं विधत्ते—

अङ्के तु वामे वृषभानुजां मुदा
विराजमानामनुरूपसौभगाम् ॥
सखीसहस्रैः परिषेवितां सदा
स्मरेम देवीं सकलेष्टकामदाम् ॥ ५ ॥

अङ्क इत्यादिना । वयमुक्तलक्षणस्याघटघटनापटुतराचिन्यानन्तविचित्रशक्तिमतो भगवतः श्रीकृष्णस्य वामाऽङ्केऽनुरूपसौभगां लक्ष्मीरूक्मिण्याख्यां सदा स्मरेम इत्यन्वयः । अनुरूपत्वं नाम भगवद्विग्रहगुणाद्युपमेयविग्रहगुणादिमत्त्वम् । अनुरूपा चासौ सौभगा च तामिति विग्रहः । तथाच स्मर्य्यते श्रीपराशरेण—देवत्वे देवदेहेयं मानुषत्वे च मानुषी । विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुमिति । राघवत्वे भवेत् सीता रूक्मिणी कृष्णजन्मनि । अन्येषु चावतारेषु विष्णोरेषाऽनपायिनीति । कीदृशीमित्यपेक्षायां विशिनष्टि—देवीमिति । देवस्य गायत्रीमन्त्रप्रतिपाद्यस्य सर्वशास्त्रार्थभूतस्य श्रीवासुदेवस्य पत्नी देवी तां, श्रियं देवीमुपह्वये इत्यादिश्रुतेः । अनेन योगवृत्त्या तद्गुणा उच्यन्ते । तथाहि । दीव्यति क्रीडति अनेकावतारैरिति देवी । विष्णोर्देहानुरूपां वै विधत्ते ह्यात्मनस्तनुम् इति । १ । दीव्यति विजिगीषते देवादीन् शीलादिगुणापहारेणेति वा । "सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः । पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे" इति ।२। दीव्यति व्यवहरति तत्तदात्मना तत्तत्प्रकारेण चेति वा देवी । "अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः । बोधो विष्णुरियं बुद्धिर्धर्मोऽसौ सक्रिया त्वियम्" इति । ३ । द्योतते स्वरूपेण गुणैश्चेति वा देवी । ईश्वरीं सर्व-

भूतानां, यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदारामिति श्रुतेः। ४। स्तूयते देवैरिति वा। "नमस्ये सर्वभूतानां जननीमब्जसंभवाम्। श्रियमुन्निद्रपद्माक्षीं विष्णोर्वक्षस्थलाश्रिताम्" इत्यारभ्य, न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः। प्रसीद देवि पद्माक्षि मास्माँस्त्याक्षीः कदाचनेत्यन्तेन स्तोत्रेण अन्यैश्चेति। ५। सर्वत्र गच्छतीति वा। "नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी। यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तमाः। त्वयैव विष्णुना चाऽम्ब जगद्व्याप्तं चराचरम्" इति। ६। मोदते वेति। आनन्दमूर्तित्वादानन्दमूर्त्याश्रितत्वाच्च। सूर्य्यां हिरण्मयीम्, ईश्वरीं सर्वभूतानामिति श्रुतेः। ७। पुनः कीदृशीं—**सखीसहस्रैः परिषेवितां सदेति**। सखीनां स्वपरिचारिकाणां सहस्रैरपरिमितैः सदा नित्यं सेवितामू। किञ्च, सेवनप्रयोजनं दर्शयन् विशिनष्टि—**सकलेष्टकामदामिति**। सर्वेभ्यश्चतुर्विधेभ्यो भक्तेभ्यः पुरुषार्थचतुष्टयं तत्तदिच्छानुसारेण ददातीति तथा तामू। "यज्ञविद्या महाविद्या गुह्यविद्या च शोभने। आत्मविद्या च देवी त्वं विमुक्तिफलदायिनी" इति स्मरणात्।

एवं लक्ष्म्या वैशिष्ट्यं विधाय व्रजस्त्रीशब्दवाच्याया, गोपीप्रधानभूतायाः श्रीवृषभानुजाया नित्ययोगं विधत्ते—**वृषभानुजामिति**। चकारोऽत्राध्याहर्तव्यः समुच्चयार्थम्। तथाच वृषभानुजां च स्मरेम इत्यन्वयः। ततः स्वरूपगुणादिद्योतनाय तां विशिनष्टि—**वामाङ्के मुदा विराजमानामिति**। वामाङ्क इत्यस्य पूर्वं, श्रीभगवत इति शब्दोऽध्याहर्तव्यः। अङ्कस्याङ्किसापेक्षत्वात्, श्रीभगवतो वामाऽङ्के विराजमानाम्। वामाङ्कशब्दप्रयोगादस्या लक्ष्मीवत् पत्नीत्वम् अनपायित्वं च दर्शितम्। मुदा

निरतिशयप्रेमानन्दमूर्त्या। एतेनास्याः प्रेमाधिष्ठातृत्वं सूच्यते विराजमानाम्। विशेषेण स्वरूपेण विग्रहेण प्रेमकारुण्यादिगुणैश्च राजते दीप्यते इति तथा ताम्। तथाचाम्नायते ऋक्परिशिष्टश्रुतौ—राधया माधवो देवो माधवेन च राधिका। विराजत इत्यादि। अनयैव श्रुत्या अन्योऽन्यसाहित्यविधानपरया नित्यसंबन्धः प्रेमोत्कर्षश्चोक्त इति भावः। यद्यप्यनयोर्मध्ये ऐश्वर्याधिष्ठातृत्वेन लक्ष्म्याः प्राधान्यात् तस्या एव पूर्वं प्रयोग उचितस्तथापि ब्रजस्त्रियः प्रेमाधिष्ठातृतया तच्चरणस्मरणस्य प्रेमदातृत्वात् पूर्वप्रयोगः। "कृष्णात्मिका जगत्कर्त्री मूलप्रकृतिरुक्मिणी। ब्रजस्त्रीजनसंभूतश्रुतिभ्यो ब्रह्मसंगत" इति मन्त्रात्। जनेषु संभूताः प्रसिद्धा याः श्रुतयस्ताभ्यः प्रमाणभूताभ्य आभ्यां रुक्मिणीब्रजस्त्रीभ्यां श्रीगोपालाख्यस्य ब्रह्मणः संगतः नित्यसबन्ध इति मन्त्रार्थः। उपलक्षणार्थोऽयं सत्यभामायाः। तथाच रुक्मिणीसत्यभामाब्रजस्त्रीविशिष्टः श्रीभगवान् पुरुषोत्तमो वासुदेवः सांप्रदायिभिर्वैष्णवैः सदोपासनीयः। द्विभुजश्चतुर्भुजश्च स्वप्रीत्यनुरूपेणोभयविधत्वात् तस्य नात्र तारतम्यभावः। ध्यातृभावनाया एवात्र नियामकत्वात्। तथाच, मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुते इत्यारभ्य, श्रीवत्सलाञ्छनं हृत्स्थकौस्तुभप्रभया युतम्। चतुर्भुजं शंखचक्रशार्ङ्गपद्मगदान्वितम्। हिरण्मयं सौम्यतनुं स्वभक्तायाऽभयप्रदम्। ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वेति। सत्पुण्डरीकनयनं मेघाभं वैद्युताऽम्बरम्। द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम्। गोपीगोपगवावीतं सुरद्रुमलताश्रयम्। दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम्। कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम्। चिन्तयँश्चेतसा कृष्णं मुक्तो भवति संसृतेरित्युभयविधस्यापि

ध्यानस्य मोक्षहेतुत्वश्रवणादुभयस्य तुल्यफलत्वाद् ध्येयत्वा-
ऽविशेष इति सांप्रदायराद्धान्तः ॥ ५ ॥

इति श्रीभगवत्पुरुषोत्तमाचार्य्यविरचितायां वेदान्तरत्न-
मञ्जूषायां सिद्धान्तरत्नविवृत्तौ पदार्थसंग्रहाधारो
नाम प्रथमा कोष्ठिका ॥ १ ॥

अथ वेदान्तरत्नमञ्जूषायां द्वितीयः कोष्ठः ।

उक्तसिद्धान्ते विधिमाह—

उपासनीयं नितरां जनैः सदा
प्रहाणयेऽज्ञानतमोऽनुवृत्तेः ॥
सनन्दनाद्यैर्मुनिभिस्तथोक्तं
श्रीनारदाऽखिलतत्त्वसाक्षिणे ॥ ६ ॥

उपासनीयमिति । मुमुक्षुभिर्जनैरुक्तलक्षणं परं ब्रह्म सदोपासनीयम् । विध्यर्थकतव्यप्रत्ययस्थानेऽनीयरूप्रत्ययः । सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, भूमा त्वेव विजिज्ञासितव्यः, आत्मानमेव लोकमुपासीत, तस्मात् कृष्ण एव परो देवस्तं ध्यायेत् तं रसयेत् तं यजेत् तं भजेदित्यादिविधिश्रवणात् । सदेति कालव्यवच्छेदं निराकरोति। "आलोड्य सर्वशास्त्राणि विचार्य्य च पुनः पुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा । स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किंकरा" इत्यादिस्मरणात् । दिवसे दिवसे सकृत्सकृत् कृतस्याऽवच्छेदकः कालः सदाशब्दवाच्यस्तद्वारणायाह—नितरामिति । गङ्गादिप्रवाहवत् क्षणाद्यपरिच्छेदेन । "यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्यते । सा हानिस्तन्महच्छिद्रं सा भ्रान्तिसा च विक्रिया" इत्यादिवचनात् । एतेन स्मृतिसन्तानस्याऽपरिच्छिन्नत्वं विधीयते । तथाच श्रुतिः—आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति । श्रीभगवदुपासनस्याऽधिकारिसाधारण्यसूचनाय सामान्यजनशब्दप्रयोगः, श्रीभगवतः सर्वाधिकार्य्यऽनुरूपोपासनविषयकत्वसाम्याद्, वैदिकोपासने तु त्रैवर्णिक एवाधिकारीति । पौराणिके चतुर्थोऽपीति विवेकः ।

उपासनप्रयोजनमाह—प्रहाणयेऽज्ञानतमोऽनुवृत्तेरिति। अज्ञानतमोऽनुवृत्तेः प्रहाणये इति योजना । अनादिकर्माख्याऽज्ञानमेव तमः, स्वरूपादितिरोधानस्वभावकत्वात् । तस्यानुवृत्तिः सम्बन्धः श्रीपुरुषोत्तमप्राप्तिप्रतिबन्धकस्तस्य प्रहाणये ध्वंसायेति यावत् । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति श्रवणात् । "अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् । तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" इति भगवद्वचनाच्च ॥

ननु "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत" इत्यादिश्रुतेरुपासनाविषयस्य ब्रह्मत्वनिषेधात् कथमित्थोपासनाविधानं, कथन्तरां च परब्रह्मण उपास्यत्वमित्याशङ्कानिरासार्थं स्वसंप्रदायसंततिं प्रमाणयन् संप्रदायस्यानादित्वं वैदिकत्वं चाह भगवनाचार्य्यः—सनन्दनाद्यैर्मुनिभिस्तथोक्तमिति । सनन्दनादीनां भगवदवतारत्वात् तदुपदेशस्य प्रमाणान्तरनैरपेक्ष्यं सूचयति सनन्दनशब्दप्रयोगादेवेति भावः । मुनिभिरित्यनेन च तेषु अप्रमाणकारणानां प्रमादादीनामयोगाद् आप्ततमत्वमुक्तम् । उपदेशवैभवदानस्य संप्रदानोत्कर्षादपि अन्यप्रमाणनैरपेक्ष्यमित्याह—श्रीनारदायेति । अस्मद्गुरवे इत्यर्थः । तेनैव मह्यं यदुपदिष्टं तदेवाऽत्रोक्तं मयाऽपीति शेषः । श्रीगुरुं विशिनष्टि—अखिलतत्त्वसाक्षिणे इति । सर्वतत्त्वविषयकप्रत्यक्षानुभवाश्रयभूताय सर्वज्ञायेति । इदं महोपनिषदं चतुर्वेदसमन्वितमिति वचनात् सर्ववेदार्थरूपश्रीपञ्चरात्रप्रवर्तकायेति भावः । ननु सोऽहं भगवः शोचामि तं मां शोकस्य पारं दर्शयत्वित्यादेस्तस्यैव वचनेन नारद-

स्य शोकाश्रयत्वश्रवणात् कथं सर्वज्ञत्वमिति चेन्न । उपदेशोत्तरकालीनत्वादाचार्य्याणां वाक्यस्य । श्रीसनन्दनादिचरणोपसत्तेः पूर्वं शोकवत्त्वेऽपि श्रीभगवद्गुरूपदेशेन सकारणशोकनिवृत्त्या सर्वज्ञतासिद्धेरित्यर्थः । तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति वाक्यशेषश्रवणात् । यद्वा श्रीनारदस्य भगवत सार्वज्ञयोगेऽपि सर्वलोकोपकारार्थकावतारत्वाद् गुरूपसत्तिरूपाधिकारं ग्राहयितुं श्रीपुरुषोत्तमलीलाऽनुकारणंवदज्ञत्वाऽनुकरणं बोध्यम्। तथाचोभयवाक्यस्य नैराकाङ्क्ष्यादविरोध इत्यर्थः ॥

अयं भावः । नेदं यदिदमुपासत इत्यनेन ब्रह्मण उपास्यता निषिद्धेतिसत्यं, तथापि परिच्छिन्नोपासनविषयक एवायं निषेधो,न तु विश्वात्मपरमात्मोपासनविषयक इति निश्चीयते । तथाचात्रैवादौ नामाद्यनेकपरिच्छिन्नोपासनं विधायान्ते भूमाविषयकोपासनस्यैवोपदेशविधानश्रवणात् । अन्यथा तदनुपपत्तेः । तथा ह्याम्नायते छान्दोग्ये—अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद् वेत्थ तेन मोपसीद ततस्त ऊर्द्ध्वं वक्ष्यामीति, स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वाणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पविद्यां देवयजनविद्यामेतद्भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नाऽऽत्मविच्छ्रुतं ह्येव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामि तं मां भगवाञ्च्छोकस्य पारं तारयत्विति, तं होवाच यद्वै किञ्चिदध्यगीष्ठा नामैवैतदित्युक्त्वा, नाम वा ऋग्वेद इत्यादिना नाम्न एव सर्वविद्यारूपतां विधाय, नामोपास्वेति नामोपासनमु-

पदिश्य, यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवतीति फलं चोपदिष्टम् । एवमेव वाङ्मनःसंकल्पादिविशेषकोपासनानामुत्तरोत्तरभूयस्त्वं तत्फलानामपि तथात्वं चोक्त्वा अवसाने भूमोपासनमुपदिष्टवान्, यो वै भूमा तदेव सुखं नाल्पे सुखमास्ति भूमैव सुखं भूमा त्वेव विजज्ञासितव्य इति भूमानं भगवो विजिज्ञासे इति यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद् विजानाति तदल्पं यो वै भूमा तदऽमृतमथ यदल्प तन्मर्त्यं, स भगवः कस्मिन् प्रतिष्ठते इति ? स्वे महिम्नि यदि वा न महिम्नीति । गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्य्यं क्षेत्राण्यायतनानि इति नाहमेवं ब्रवीमीति होवाचाऽन्यो ह्यन्यस्मिन् प्रतिष्ठित इति सं एवाधस्ताद् स एव उपरिष्टाद् स पश्चाद् स पुरस्ताद् स दक्षिणतः स उत्तरतः स एवेदं सर्वमिति । स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुनः आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति । अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषां सर्वेषु लोकेषु अकामचारो भवति तस्य ह वा एतस्यैवं पश्यत इत्यारभ्य आत्मन एवेदं सर्वमिति, न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां, सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः । स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकादशधा स्मृतः । शतं च दश चैकश्च सहस्राणि च विंशतिः । आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति । अस्यार्थः— श्रीनारदः श्री-

सनत्कुमारमुपसाद उपसत्तिविधिपूर्वकं शरणं जगामेत्यर्थः । हे भगवः,शोकतरणोपायमधीहि शिक्षयेति प्रार्थयामासेतिशेषः तमुपसन्नं नारदं श्रीसनत्कुमार उवाच,यद्वेत्थेत्यादि । त्वयाऽधीत यावज्ज्ञानं संपादितं तावत्सर्वमनूद्यतां, तत ऊर्द्धं यत् त्वया नाधीतं स्याद् तद् वक्ष्यामीति । एवं श्रीगुरुणा विद्यानुवादे संप्रेरितः स नारद उवाच—ऋग्वेदम् इत्यादि । तत्रैतद्भगवोऽध्येमीत्यन्तः स्पष्टार्थको ग्रन्थः । विद्यानुवादरूपत्वात् । ततश्च सोऽहमित्यादिः मार्थनेति विभागः । सोऽहं भगवः शोचामि एतत् पूर्वोक्तं सर्वमध्येमि अधीतवानस्मि तथापि शोको मां न मुञ्चतीत्यर्थः । ननु ईदृग्विद्यावतोऽपि शोकानिवृत्तौ किं कारणमित्यत आह, मन्त्रविदेवास्मीति । अन्ययोगव्यवच्छेदार्थकावधारणं स्वयमेव व्याकुर्वञ्च्छोककारणं स्वयमेव स्फुटयति—श्रुतमिति । भगवद्दृशेभ्यो महद्भ्यो मयैतच्छ्रुतं, तरति शोकमिति । आत्मवित् = चेतनाऽचेतनजगदात्मभूतपरब्रह्मस्वरूपगुणाऽऽदिविषयकप्रत्यक्षज्ञानाश्रयः पुमान् सकारणं शोकं तरतीति । यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं, तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेत्यादिश्रुतिस्मृतिभ्यस्तथाभूतज्ञानाभावः शोककारणमित्याह—नात्मविदस्मीति । सर्वविद्यासु सतीष्वापि आत्मज्ञानशून्यत्वाच्छोचामीति भावः । एवं प्रार्थितः करुणाब्धिः । तं होवाच यद्वै किञ्चिदध्यगीष्ठा नामैवैतन्नामोपास्वेत्यादिना वागाद्यल्पफलकपरिच्छिन्नोपासनमुपदिश्य पूर्णं पूर्णफलकं भूमोपासनमुपदिशति भगवान् सनत्कुमारः—यो वै भूमेति । एतेन सुखदुःखकारणयोर्भूमाल्पयोरुद्देश उक्तस्तयोर्भूमैव विधेय इत्युपदिशति—

भूमा त्वेव विजिज्ञासितव्य इति । तदेव सूत्रितं भगवताबादरायणेन, अथातो ब्रह्मजिज्ञासेति । तत्र हेतुः—भूमैव सुखमिति । अत्र भूमशब्दो ब्रह्मपर्य्यायः सुखशब्दश्चानन्दपर्यायः । विज्ञानमानन्दं ब्रह्म, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते इत्यादिलक्षणवाक्यात् । एवमनुशिष्टो नारदस्तमेवोद्दिष्टं पृच्छति—भूमानं भगवो विजिज्ञासे इति । एवं पृष्टो भगवान् सनत्कुमारः पूर्वोद्दिष्टयोर्भूमाल्पयोर्लक्षणमाह—यत्र नान्यदिति । यत्र यस्यां भूमजिज्ञासायां पूर्वोक्तनामद्युपासनेष्विवान्यदवच्छेदकं नामादिकं न पश्यति न शृणोति न विजानाति स भूमेति देशकालवस्तुपरिच्छेदशून्यः सर्वसमानाधिकरणार्हो भगवान् भूमशब्दाभिधेय इत्यर्थः । भूमा संप्रसादादध्युपदेशादिति सूत्राद् यत्र येषु पूर्वोक्तेषु नामवागाद्युपासनेषु अन्यदवच्छेदकं वागादिरूपं पश्यति शृणोति विजानाति वा तदल्पं परिच्छिन्नमन्तवच्चेत्यर्थः । अपरिच्छिन्नत्वादेव भूम्नः अमृतत्वं, कालादिपरिच्छिन्नत्वादेवाल्पस्य मर्त्यत्वमित्याह—यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यमिति । यदि पूर्ववत्तस्योपाधिरूपमवच्छेदकं नामवागादिकं नास्ति तर्हि स कुत्र आस्ते इति पृच्छति— स भगवः कस्मिन् प्रतिष्ठित इति । तत्रोत्तरमाह— स्वमहिम्नीति । तर्हि परिच्छेदो दुर्वार इत्याशङ्क्य यदि वा न स्वमहिम्नीति । स्वमहिम्नो ब्रह्मात्मकत्वेन स्वाभिन्नसत्तात्मकत्वात् । तदेव विवृणोति— गोअश्वमित्यादि । इह लोके गवादि महिमेत्याचक्षते इति । यथा क्षेत्रज्ञानां गवादयो महिमानस्तेषां तदन्यत्वेन तदन्यत्रावस्थाननियमाद् अश्वे देवदत्तो हस्तिनि यज्ञदत्तः क्षेत्रे आयतने वा तिष्ठतीति प्रत्ययो जायते, नात्र तथा नियमोऽपि त्वात्माधारत्वमेवेत्याह— अन्यो ह्यन्यस्मिन् प्रतिष्ठते यथा नाहमेवं ब्रवीमीति । कथमुच्यते तर्हि भवद्भिरित्य-

पेक्षायां तस्य सर्वान्तरात्मत्वं विधास्यन् सर्वत्र व्याप्त्या सर्वस्य तदविनाभावनियममाह— स एवाधस्तादित्यादि। एवं तस्य विश्वान्तरात्मत्वं विश्वव्याप्तियोगं चोक्त्वा पूर्णत्वात् पूर्णफलकत्वमाह—स वा एष एवं पश्यन्नेवं मन्वान इत्यादिना। आत्मनि ब्रह्मण्येव रतिर्यस्य, नाहम्ममास्पदयोः, शब्दादिपञ्चेन्द्रियविषयेषु वस्त्रालङ्कारादिषु वेति। तथैव आत्मना विष्णुनैव सह क्रीडा यस्य, न लौकिकैः क्रीडोपकरणैरत एवात्मा भगवानेव मिथुनं यस्य, न भार्यादि। ततश्चात्मना तेनैवानन्दो यस्य, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति वाक्यान्तरात् न बाह्यविषयैस्तत्साधनैर्वेति। तथा यक्ष्यन् क्रीडन् रममाणः सह ब्रह्मणा विपश्चतेति वाक्यान्तरात् स उक्तलक्षणः पुमान् स्वराडिति स्वेनैव भगवता विश्वान्तरात्मना राजते दीप्यते, नेन्द्रियादिभिः सूर्य्यादिभिर्वा प्रकाशकारणैरिति तथा सार्वज्ञादिविकासात्। तच्चानन्तरमेव प्रतिपादयिष्यते, सर्वं ह पश्यति इत्यादिना। अथोक्तोपासनदार्ढ्यार्थं परिच्छिन्नोपास्यविषयकपरिच्छिन्नफलकान्यदेवाद्युपासनपरान् मूढान् निन्दति भगवती श्रुतिः— अथ येऽन्यथातो विदुरिति। अथेति पक्षान्तरे। ये मूढा, अत उपदिष्टसिद्धान्ताद् विपर्य्ययं देवान्तरम् उपास्यत्वेन निश्चितवन्तः। कथमिव जानन्ति ते इत्यपेक्षायां तेषां ज्ञानस्यानुकरणमाह— अन्यराजान इति। अन्ये ब्रह्मरुद्रेन्द्रादयोऽपि राजान इति मोक्षदातारः स्वतन्त्रा मोक्षार्थिनोपासितव्या इति ते क्षय्यलोकाः स्वर्गपशुपुत्रादयो जन्मादिलक्षणसंसरणहेतवो भवन्ति। तेषां क्षेत्रज्ञत्वाविशेषेण मोक्षदातृत्वायोगादस्वातन्त्र्याच्च मोक्षदानानर्हत्वं शिवोपदिष्टं, स्वानुभूतं चाह घण्टाकर्णो हरिवंशे कैलाशयात्रायाम्—अहं कैलाशनिलयमासाद्य वृषभ-

ध्वजम् । आराध्य तं महादेवमस्तुमं सततं शिवम् । ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः । ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ । मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः । मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः । तस्माद् गत्वा च बदरीं तत्राराध्य जनार्दनम् । मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाऽऽश्रमे इत्यादि । भारते पारतन्त्र्यमपि तेषां स्फुटमेव— युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम इति । महादेवः सर्वयज्ञे महात्मा हुत्वात्मानं देवदेवो बभूव । विश्वाँल्लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासा इति तत्रैव । योऽन्यां देवतामुपास्ते अन्योसावन्योऽहमस्मीति न स वेद यथा पशुरिति वाक्यान्तरात् । यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्य तस्याऽचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तान् । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसामिति भगवद्वचनाच्च । तस्मात्तुच्छफलकत्वात् तुच्छोपासनं त्याज्यं मुमुक्षुभिरिति भावः । तच्चोपरिष्टाद् व्याख्यास्यामः । एतेनैव पूर्वोक्तानामपि नामवागाद्युपासनानां तुच्छत्वमुक्तं भवति । किञ्च तेषामत्रैवाऽन्तर्भावो, वृक्षस्य मूलनिषेचने स्कन्धशाखापत्रपुष्पादिनिषेचनवद् भगवतो विश्वरूपत्वेन सर्वमूलत्वादित्याह— तस्य ह वा एतस्यैव पश्यत इत्यारभ्य, आत्मन एवेदं सर्वमित्यन्तेन । आत्मनो भगवत एव तस्य पूर्वोक्तलक्षणस्याधिकारिणः पूर्वोपदिष्टानां प्राणाद्युपासानानां फलसम्पत्तिर्जायते इति निर्गलितः सर्ववाक्यार्थः । उक्तोपासनानुवादः स्पष्टार्थकः । किञ्चास्याऽवान्तरफलसम्पत्तिरपि स्वतोऽनायासेनैव जायते, पाकाद्यर्थं ज्वालितादग्नेः

काष्ठदाहवदित्याह—न पश्य इत्यादि। पश्यो भूम्नः स्वरूपगुणादिविषयकप्रत्यक्षानुभवाश्रयो मृत्युं न पश्यति, प्रमादं न गच्छतीति। प्रमादं वै मृत्युमहं ब्रवीमीति वचनात्। न रोगम् आध्यात्मिकादितापं, नोत दुःखतां कामक्रोधादिहेतुकेन्द्रियताडनरूपाम्। "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेद्"इति भगवद्वचनात्। ननु यत्र नान्यत् पश्यतीत्यादिना सामान्यपदप्रयोगाद् द्वितीयवस्तुविषयकदर्शनमात्रं निषिद्ध्यते। कथमन्यथा व्याख्यातमित्याशङ्क्य निरस्यँस्तस्य सार्वज्ञ्ययोगं समवाप्तकामत्वं चाह— सर्वं ह पश्यः पश्यति इति। सर्वदेशकालवस्तुविषयकज्ञानवान् भवति। सर्वशः सर्वप्रकारेण सर्वमाप्नोतीति आप्तकामो भवतीति यावत्। तस्य शक्तियोगमाह— स एकधेत्यादिना। भगवदिच्छानुरूपसंकल्पमात्रेणैकधा सहस्रधा भवनशीलो भवतीति समुदायार्थः

तत्र साधनपरम्परामाह— आहारशुद्धाविति। एतद्वाक्यमग्रे साधननिर्णये व्याख्यामस्तस्य तत्रोपयोगादत्रोपरम्यते। अथोपसंहरति— तस्मा इति। तस्मै उपदिष्टार्थग्रहणचतुराय, तत्र हेतुः— मृदितकषायाय, जन्मत एव शुद्धत्वात्। स्पष्टार्थकोऽवशिष्टो ग्रन्थ इति संक्षेपार्थः। किञ्चारोप्यस्यैव निषेधविषयत्वं, न प्रमाणसिद्धस्य वस्तुन इति न्यायस्य सर्वसाधारणत्वात्। यथाऽन्यत्राऽगाङ्गे जले गङ्गात्वमारोप्य पुनर्नेदं गाङ्गमिति निषेधस्य संभवात्, न तु साक्षाद्विष्णुपादोदक्यां भागीरथ्यां गङ्गात्वनिषेधोऽपि प्रमाणपदवीमापद्यते, अपि तु बालभाषितामिवाऽप्रमाणतामेव याति। यथा वा— पुरुषो वा व गौतमाग्निर्योषिद्वा व गौतमाग्निरित्यग्निविद्यायां योषित्पुरुषयोरुपासनार्थमग्नित्वमारोपितं रूपकरीत्या तन्निषेधश्चेदर्ह एव, न तु प्रसिद्धेऽग्निहोमा-

ऽग्नौ तन्निषेधस्पर्शः । प्रसक्षमानसिद्धत्वात् । तथा प्रकृते अतद्व-स्तुषु, नाम ब्रह्मेत्युपासीतेत्यादिश्रुयक्तेषु वागादिषु आरोपित-ब्रह्मत्वनिषेधो, न तथा सर्वेश्वरे साक्षात्परब्रह्मणि पुरुषोत्तमे तत्स्पर्शावकाशः । तत्तु, नेदं ब्रह्मेतीदंकारणैव द्योतमानत्वान्ना-ऽश्रुतार्थकल्पनाप्रसङ्गोऽत्र संभाव्यः । इदंकारास्पदनामादिप्रप-ञ्चात्यन्तविलक्षणं ब्रह्मेति वाक्यार्थः । तस्मादुपास्य एव पर-ब्रह्मभूतः श्रीपुरुषोत्तमः सर्ववेदान्तवेद्य इति सिद्धम् । अलमति-विस्तरेण ॥

इत्थं तावत्, तत्त्वमसि सर्वं खल्विदं ब्रह्मेत्यादिवाक्यवृत्ति-तत्त्वमादिपदार्था निरूपिताः । तत्र ज्ञानस्वरूपमित्यादिश्लोक-द्वयेन त्वंपदार्थः, अप्राकृतमित्येकेन श्लोकेनेदंपदार्थः, स्वभाव-तोऽपास्तमित्यादियुग्मेन तत्पदार्थश्च व्याख्यातः । उपासनीय-मित्येकेन श्लोकेन च तत्पदार्थस्य सर्वोपास्यत्वं, तदुपासनस्य विधेयत्वं प्रतिपादितम् ॥ ६ ॥

इदानीमुक्तोपासनस्य निदिध्यासनाख्यस्याऽन्तरङ्गं, श्रो-तव्य इत्यादिश्रुतिविधेयं वाक्यजन्यज्ञानं निरूपयँस्तत्त्वमस्यादे-र्वाक्यस्यार्थमाह—

सर्वं हि विज्ञानमतो यथार्थकं
श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः ॥
ब्रह्मात्मकत्वादिति वेदविन्मतं
त्रिरूपतापि श्रुतिसूत्रसाधिता ॥ ७ ॥

सर्वं हीति । हि यस्मान्निखिलस्य वस्तुनः श्रुतिस्मृतिभ्यो ब्रह्मात्मकत्वादतः सर्वं विज्ञानं यथार्थकम्—इत्यन्वयः । यतस्त्रि-रूपता श्रुतिसूत्रसाधिता तस्मात् साऽपि यथार्थेति, अपिशब्दा-ऽर्थः । उक्तार्थे प्रमाणं दर्शयन्नाह—इति वेदविन्मतम् । वेद-

विदामौपनिषदानां श्रीव्यासमन्वादीनां मतं निर्णीतोऽर्थः सिद्धान्त इत्यर्थः । तत्र निखिलशब्दः क्षेत्रक्षेत्रज्ञप्रकृतिपुरुषक्षराक्षरादिशब्दाभिधेयचेतनाचेतनपदार्थोपस्थापकः । प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः । प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । क्षेत्रक्षेत्रज्ञयोर्ज्ञानम् । द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति स्मृतेश्च । वस्तुशब्दस्तस्य मिथ्यात्वाऽवस्तुत्वाऽसत्यत्वादिपक्षनिरसनपरः । तस्य नित्यत्वाभिधानपरत्वात् । तथाच—नित्यो नित्यानां चेतनश्चेतनानां गौरनाद्यन्तवतीति श्रुतेः । न त्वेवाहं जातु नासं, प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । अश्वत्थं प्राहुरव्ययमिति स्मृतेश्च । श्रुतिस्मृतिभ्योऽस्य ब्रह्मात्मकत्वं च । एष सर्वभूतान्तराऽऽत्मा, एष ते आत्माऽन्तर्याम्यऽमृतः, एष मे आत्माऽन्तर्यामीत्यादिश्रुतेः । आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति न्यायात् । अहमात्मा गुडाकेश सर्वभूताशयस्थितः । इन्द्रियाणि मनो बुद्धिः सत्त्व तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव चेत्यादिस्मृतेश्च । तत् सिद्धं श्रुतिस्मृतिभ्यः सर्वस्यापि चेतनाचेतनभूतस्य जगतो ब्रह्मात्मकत्वं, परब्रह्मणः पुरुषोत्तमस्य च विश्वाऽन्तरात्मत्वमिति । अतः सर्वं विज्ञानं यथार्थकमिति । अतः सर्वस्य ब्रह्मात्मकत्वादेव सर्वमिति सर्वशब्दाभिधेयचेतनाचेतनरूपविश्वविषयकमिति विज्ञानं विशेषज्ञानं यथार्थवस्तुविषयकत्वाद् यथार्थम् । किञ्च, त्रिरूपतापि श्रुतिसूत्रसाधितेति । भोक्तृभोग्यनियन्तृरूपता त्रिरूपताऽपि यथार्थैवेति शेषः । तत्र हेतुः श्रुतिसूत्रसाधितेतिश्रुतिसूत्रसाधितत्वादितिश्रुतिसूत्रैर्निर्णयासाधारणप्रमाणभूतैर्निर्णीतत्वादितियावत् । तथाचश्रुतिः—भोक्ता भोग्यं प्रेरितारं च मत्वा, आनन्दं ब्रह्मणो विद्वान् न बिभेति, सर्वं प्रोक्तं त्रिविधं

ब्रह्मभेतदिसादि । अथाऽतो ब्रह्मजिज्ञासेसादिसूत्राणि अत्रानुसंधेयानि । तत्र जिज्ञासुजिज्ञासाजिज्ञास्यरूपतापतिपादनपरत्वादुक्तसूत्रस्य । एवमन्यदप्यनुसंधेयम् । इति वेदविन्मतामिति इत्थं ब्रह्मात्मकत्वतदायत्तस्थितिप्रवृत्तिकत्वतद्व्याप्यत्वेभ्यो ब्रह्माऽभिन्नत्वात् । त्रैरूपत्वश्रवणस्मरणाभ्यां स्वरूपेण भिन्नत्वाच्च ब्रह्मभिन्नाभिन्नं चेतनाचेतनात्मकं विश्वमिति वेदविदां श्रीसनत्कुमारनारदव्यासादीनां मतं निर्णीतः सिद्धान्त इत्यर्थः । तदनन्यत्वमारम्भणशब्दादिभ्यः, अधिकं तु भेदनिर्देशात्, भेदव्यपदेशाच्चान्य इत्युभयार्थप्रतिपादनपरेभ्यः सूत्रेभ्यः, अंशो नानाव्यपदेशादन्यथाचाऽपि दाशकितवादित्वमधीयत एके, उभयव्यपदेशात् त्वहिकुण्डलवदिति घटकसूत्राभ्यां चोभयप्रकारकत्वमिति बोध्यम् । तथाच श्रुतयः—सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्, आत्मा वा इदमेक एवाग्र आसीत्, तत् त्वमसि, अयमात्मा ब्रह्म, सोऽहं ब्रह्मास्मि, आत्मैवेदं सर्वं, सर्वमिदं ब्रह्म, त्वं वा अहमस्मि भगवो देवते, अहं वै त्वमसि देवते, यदेवह तदमुत्र यदमुत्र तदन्विह यश्चेह पुरुषे यश्चासावादित्ये स एकः, तदाऽऽत्मानमेवावेदऽहं ब्रह्मास्मीति, सर्वं खल्विदं ब्रह्म तज्जलानितीसाद्याः, सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः, क्षेत्रज्ञं चापि मां विद्धि, एकः समस्तं यदिहास्ति किञ्चित् तदच्युतो, नास्ति परं ततोऽन्यत् । सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् । सकलमिदमहं च वासुदेवः, यथाऽऽहवसुधा सर्वं सस्यमेतद्धि चौकसः । अहं भवो भवन्तश्च सर्वे नारायणात्मकाः । यदा समस्तदेहेषु पुमानेको व्यवस्थितः । तदा हि को भवान् कोऽहमित्येतदफलं वच इत्याद्याः स्मृतयश्च । नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, ज्ञाज्ञौ

द्वावजावीशानीशौ, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, जुष्टं यदा पश्यत्यन्यमीशं पृथगात्मानं प्रेरितारं च मत्वा, प्रधानक्षेत्रज्ञपतिर्गुणेशः अक्षरात् परतः परः, तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन, भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः, यद्भूतयोनिं परिपश्यन्ति धीराः, ज्योतिषां ज्योतिः, एष योनिः सर्वस्य स्थावरस्य चरस्य, सर्वाँल्लोकानीशत ईशनीभिः, सर्वस्य प्रभुमीशानं, तमीशानं वरदं भूतमीड्यं यस्मान्नाणीयो न ज्यायानस्ति कश्चित्, अणोरणीयान् महतो महायान्, एष देवो विश्वकर्मा महात्मा स एव काले भुवनस्य गोप्ता विश्वाधिपतिः, न तस्य प्रतिमाऽस्तीह यस्य नाम महद्यशः, न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गं स कारणं कारणाधिपाधिपः, न तस्य कश्चिज्जनिता नचाधिपः तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं, पतिं पतीनां, सर्वगन्धः सर्वरसः, एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्, आदित्यवर्णं तमसः परस्तात्, यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिं, हिरण्यकेशः हिरण्यश्मश्रुः, आप्रणखात् सुवर्णः, प्राणस्य प्राणं श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो वाचं चक्षुषश्चक्षुः आनन्दमूर्त्तिः सत्यकामः सत्यसंकल्पः, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, सर्वस्य वशी सर्वस्येशानः, स विश्वकृद्विश्वविदात्मयोनिर्यः कालकालो गुणिसर्वविद्य इत्याद्याः। भेदव्यदेशाच्चान्यः, अधिकं तु भेदनिर्देशात्, शारीरश्चोभयेऽपि हि भेदेनैनमधीयते, विवक्षितगुणोपपत्तेश्च, सर्वधर्मोपपत्तेश्च, सर्वोपेता चेत्यादिन्यायाः। जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्। अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्। लोका-

ध्यक्षं स्तुवन्निसं सर्वदुःखातिगो भवेत् । ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्। लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् । पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् । दैवतं देवतानां च भूतानां योऽव्ययः पिता इति । न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः। अहं सर्वस्य प्रभवो, मत्तः परतरं नान्यत् किञ्चिदस्ति, मम साधर्म्ममागताः, पूता मद्भावमागताः, द्वाविमौ पुरुषौ लोके क्षराश्चाऽक्षर एव च, उत्तमः पुरुषस्त्वन्यः, चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन, महात्मानस्तु मां पार्थ, तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते, उदाराः सर्व एवैते, भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्, सुहृदं सर्व भूतानां ज्ञात्वा मां शान्तिमृच्छति, तद्धाम परमं मम, मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः, स्थूलैः सूक्ष्मैस्तथा सूक्ष्मसूक्ष्मैः सूक्ष्मतरैस्तथा स्थूलैः स्थूलतरैश्चैव तत्सर्वं प्राणिभिर्वृतम्। अङ्गुलस्याष्टमो भागो न सोऽस्ति मुनिसत्तम। न सन्ति प्राणिनो यत्र निजकर्मनिबन्धनाः । सर्वे चैते वशं यान्ति यमस्य भगवन् किल । आयुषोऽन्ते ततो यान्ति यातनास्तत्प्रचोदिताः । यातनाभ्यः परिभ्रष्टा देवाद्यास्स्वथ योनिषु । जन्तवः परिवर्त्तन्ते शास्त्राणामेष निश्चयः । परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां नवैष्णवानाम्। अहमऽमरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः । हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः । त्वं परस्त्वं परस्याद्यः परतस्त्वं परात्मकः । परस्मात् परमो यस्त्वं तस्य तोष्यामि किन्न्वहम्। निर्मलज्ञानरूपाय विज्ञाननिलयाय च । उद्गीथाय नमस्तुभ्यं रथन्तर नमोऽस्तु ते । यं विदुर्वेदतत्त्वज्ञा ब्रह्माद्याः सनकादयः । विचिन्वन्तः प्रदीपेन ज्ञानाख्येन च केशव सोऽसि देव जगन्नाथ यो दृष्टो ब्रह्मवादिभिः । यं प्राप्य न निव-

र्त्तन्ते योगिनोऽमलचेतसः। त्वामाहुः सकला वेदा ब्रह्मेति ज्ञाननिश्चयाः। त्वमेवेदं जगत्सर्वं त्वयि सर्वं प्रतिष्ठितम्। एवं जानीत हे विप्रा ये भक्ता द्रष्टुमागताः। एतदेव परं वस्तु नैतस्माद् परमस्ति वः। एतदेव सदा विप्रा ध्येयं सततमानसैः। एष वो मोक्षदाता चएष मार्ग उदाहृतः। एवमुक्तास्ततः सर्वे मुनयः पुण्यशालिनः। यथावदुपगृह्णाना निरसन् संशयं नृप। छिन्नो नः संशयः सर्वो गृहीतार्थः स तादृशः। परंपरस्यापि परंपरं यत् परं परस्यापि परमं च देवम्। परंपरंस्यापि परं प्रभुं च त्वामाहुरग्र्यं पुरुषं पुराणम्। परंपरस्यापि परंपरायणम्, परं च गुह्यं परमं च मन्त्रम्। परेण योगेन परं सुगुप्तं त्वामाहुरग्र्यं पुरुषं पुराणम्। यत्र सर्वं यतः सर्वमुत्पन्नं सत्पुरःसरम्। सर्वभूतश्च यो देवः पराणामपि यः परः। परः परस्माद् पुरुषाद् परमात्मा स्वरूपधृक् योगिभिश्चिन्त्यते यस्तु मुक्तिहेतुर्मुमुक्षुभिः। अथवा सर्वविद्विष्णुः सर्वस्य हृदि संस्थितः। जानात्येव सदा भावं प्राणिनां शोभनेतरम् इत्याद्याः स्मृतयश्च। तत्र,ब्रह्मात्मकत्वादिति ब्रह्म आत्मा यस्य चेतनाचेतनरूपवस्तुजातस्य तद्ब्रह्मात्मकं तस्य भावस्तत्त्वं तस्माद्। एष मे आत्माऽन्तर्यामी, एष ते आत्मान्तर्यामी,अन्तःप्रविष्टः शास्ता जनानाम्, सर्वात्मा सर्वव्यापी सर्वभूतान्तरात्मा, पतिं विश्वस्यात्मेश्वरम्। आत्मेति तूपगच्छन्ति ग्राहयन्ति च, अहमात्मा गुडाकेश सर्वभूताशयस्थितः, सर्वस्य चाहं हृदि सन्निविष्टः, अहं भवो भवन्तश्च सर्वे नारायणात्मकाः, इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः, वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव चेत्यादिश्रुतिस्मृतिभ्यः।

यो यदात्मकः स तदभेदव्यपदेशार्हः। सुवर्णकुण्डलादिवदिति व्याप्तिश्चातिप्रसिद्धत्वात्। किञ्च तदायत्तास्थितिप्र-

वृत्तिकत्वादिति। तत्तस्य ब्रह्मण आयत्ता आधीना स्थितिः प्रवृत्तिश्च यस्य वस्तुमात्रस्य तत्तथा, तस्य भावस्तत्त्वं तस्मात् । सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः। एतदक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, भीषाऽस्माद्वातः पवते, अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । किमनेन जगन्नाथ सर्वं त्वद्वशगं जगत्। विश्वं चेदं त्वद्वशे विश्वयोने। नमोऽस्तु ते शार्ङ्गचक्राऽसिपाणे । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया। ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्। जगद्वशे वर्त्ततेऽदः कृष्णस्य सचराचराचरमिति वाक्यकदम्बात्। किञ्च, यद् यदायत्तस्थितिप्रवृत्तिकं वस्तु तत्तदऽभेदव्यपदेशार्हमित्याम्नायते छान्दोग्ये प्राणसंवादे, न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राण इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्तीत्यादिना। अपि च तद्व्याप्यत्वादिति। यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्यं नारायणः स्थितः। द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वा इत्यादिशास्त्रात्। यो यद्व्याप्यः स तद्रूप इत्यत्र, योऽयं तवागतो देव समीपे देवतागणः । स त्वमेव जगत् सृष्ट्वा यतः सर्वगतो भवान्। सर्वं समाप्नोषि ततोऽसि सर्व इत्यादिस्मृतेर्मानत्वं बोध्यम्। एतदुक्तं भवति। सत्ता तावद् द्विविधा, स्वतन्त्रपरतन्त्रभेदात्। तत्र स्वतन्त्रसत्ता नाम आत्माश्रितत्वे सति स्वायत्तस्थितिप्रवृत्तिकता । सा परब्रह्मविश्वात्मनिष्ठा। सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्, एतदक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः, भीषास्माद्वातः पवते भीषोदेति सूर्यः, भीषास्मादग्निश्चेन्द्रश्च मृत्युर्द्धावति पञ्चमः, आत्मा हि परमः स्वतन्त्रोऽधिगुणः, एष सर्वेश्वरः, स एष सर्वाधिपतिः स कारणं

कारणाधिपाधिपः, न तस्य कश्चिज्जनिता न चाधिप इत्यादिश्रुतिभ्यः, सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । शास्ता विष्णुरशेषस्येत्यादिस्मृतिभ्यश्च । एवं स्वतन्त्रसत्ताश्रयो निरस्तसाम्यातिशयो विश्वात्मा परब्रह्म भगवान् पुरुषोत्तम इति सिद्धम् । परतन्त्रसत्त्वं च पराऽऽयत्तस्थितिप्रवृत्तिकत्वम् । तच्च चेतनाचेतनात्मकनियम्यवर्गवृत्ति यदासीत्तदधीनमासीत् । जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः । मत्तः सर्वं प्रवर्त्तते । सत्त्वं स्वातन्त्र्यमुदिष्टं तच्च कृष्णे न चापरे । अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारत इति श्रुतिस्मृतिभ्यः । परतन्त्रसत्त्वं द्विविधं, कूटस्थं, विकारशीलं चेति । तत्र कौटस्थ्यं नाम जन्मादिविकारशून्यत्वे सति नित्यत्वम् । तच्च जीवात्मवर्गाश्रितम् । तदाश्रयो जीवप्रत्यगक्षरपुरुषक्षेत्रज्ञादिशब्दाभिधेयः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोक्तभोगामजोऽन्यः । न जायते न म्रियते वा विपश्चित् । अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे इत्यादिभ्यः । द्वितीयं विक्रियायुक्तत्वे सत्यनाद्यनन्तत्वम् । तत्तु प्रकृतिवर्गाश्रितम् । तदाश्रयं च कार्य्यकारणात्मकं प्रधानप्रकृत्यादिशब्दवाच्यम् । गौरनाद्यन्तवती जनित्री भूताभाविनी । सिताऽसिता च रक्ता च सर्वकामदुघा विभोरित्यादिश्रुतेः । त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् । अचेतना परार्था च नित्या सततविक्रिया । तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवदित्यादिवैष्णववचनाच्च । तथा च स्वतन्त्रसत्त्वविषयिकाऽभेदवाक्यप्रवृत्तिः । तस्यैक्यात् तयैव तेषां नैराकाङ्क्ष्यं, तथैव भेदनिषेधपराणां चापि चेतनाचेतनवस्तुवृत्तिस्वतन्त्रसत्त्वनिषेधपरत्वेन तेषां स्वार्थ एव प्रामाण्यात् । भेदवाक्यानां तु परतन्त्रसत्त्वविषयकत्वेनैव स्वार्थविधायकत्वात् सर्वं समञ्जसम् ।

एवं, तत्त्वमस्यादिवाक्यानां महावाक्यत्वेनोभयप्रकारवाक्यनिष्ठ-विरोधपरिहारपरत्वमनुसंधेयम् । इतरथा वाक्यानां परस्परविरोधेन एकार्थत्वासंभवात् । बहूनां वाक्यानामविरोधेनैकार्थविधानपरत्वमेव हि महावाक्यत्वम् । तथा च विश्वात्मा पुरुषोत्तमः स्वाश्रितात्म-सत्तया विश्वस्मादभिन्नः, तथैव ह्यात्मीयचेतनाचेतननियम्यवर्ग-वृत्तिपरतन्त्रसत्त्वाभावरूपेण विश्वविलक्षणत्वापरपर्य्यायेण सार्व-ज्ञादिवद्भावरूपेणात्मासाधारणेन धर्मेण अस्थूलादिवाक्यप्रतिपाद्येन विश्वस्माद्भिन्न इति विश्वभिन्नाभिन्नश्रीपुरुषोत्तमपरब्रह्मभूतो भग-वान् रमाकान्तः सर्ववेदान्तार्थ इति सिद्धान्तः ।

एवं स्वतन्त्रसत्त्वं परतन्त्रसत्त्वाभावं चाश्रित्य तत्त्वमस्यादि-वाक्यानि भेदाभेदवाक्यानां परस्परविरुद्धानामविरुद्धमन्वेतुकामा-नि भिन्नाभिन्नब्रह्म प्रतिपादयन्ति । तथाहि । तत्त्वमसीत्यत्र त-च्छब्दः सर्वज्ञसर्वशक्तिविश्वात्मपरब्रह्मभूतस्वतन्त्रसत्ताश्रयप्रतिपा-दनपरः । त्वंपदश्च तदात्मीयतदात्मकपरतन्त्रसत्ताश्रयजीवात्म-वाचकः । असिशब्दश्चोभयपदार्थसम्बन्धाभिधानपरः । स च स-म्बन्धस्तदात्मकस्य त्वम्पदवाच्यस्य तत्पदार्थेन सह स्वातन्त्र्य-सत्त्वाभेदसहिष्णुपरतन्त्रसत्त्वभेदरूपः । तत्पदार्थवृत्तिस्वतन्त्रसत्ताश्र-याभिन्नब्रह्मात्मकपरतन्त्रसत्त्वाश्रयाभिन्नस्त्वम्पदार्थ इति वाक्या-र्थः । तत्पदार्थो विश्वात्मा, त्वम्पदार्थः क्षेत्रज्ञान्तरात्मा, तयोरभेदो घटो द्रव्यं, पृथिवी द्रव्यमित्यादिवद् मुख्य एवातो युक्तम् उक्त-सिद्धान्तस्य साधीयस्त्वम् । ननु तत्पदार्थो विश्वात्मा पुरुषोत्तम इति निर्विवादत्वान्नात्र शङ्कावकाशः, परन्तु त्वम्पदार्थस्य क्षेत्रज्ञतया सुप्रसिद्धत्वात् कथमिव क्षेत्रज्ञान्तरात्मत्वं प्रतिपाद्यते इति चेदुच्यते समाहितमनस्त्वेन श्रूयताम् । यथाऽग्नेर्दीगित्यत्राग्निशब्दोऽकारगका-राद्यवच्छिन्नानुपूर्वीकाग्निशब्दवाचकः । अग्नौ जुहोतीत्यत्र स एवाग्नि-

शब्दो दहनप्रकाशनादिशक्त्यवच्छिन्नवस्तु विधायकः । उभयार्थविधायकत्वमग्निशब्दस्य शक्यत्वेन मुख्यमेवेति शाब्दिकानां मतं तथैव ह्यौपनिषदानां सिद्धान्ते सर्वेषामपि ब्रह्मरुद्रादिचेतनाचेतनवस्तुमात्रपराणां शब्दानां तत्तत्पदार्थवाचकत्वे तत्तदात्मभूतब्रह्मपरत्वम् अविरुद्धं, ब्रह्मणः सर्वात्मकत्वात् । यथा चतुर्मुखादिपिण्डाश्चतुर्मुखादिशब्दानां शक्यास्तदवच्छिन्नास्तत्तच्चेतयितारश्च उभयेऽपि चतुर्मुखादिशब्दैर्विधातुं सुशक्यास्तथा तेषां चतुर्मुखादिपिण्डतत्तदवच्छिन्नक्षेत्रज्ञाभिधानपरत्वे तेषामन्तरात्मत्वाद्ब्रह्माभिधानपरत्वं वक्तुं सुशकमिति भावः । एतदभिप्रेत्य वस्तुजातस्य ब्रह्मत्वमुद्घोषयन्ति श्रुतयः । भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मेतदित्याद्याः । ननूदाहृतस्याग्न्यादिशब्दस्योभयार्थविधायकत्वे पाणिन्यादिस्मृतेः प्रामाण्याद् उक्तार्थस्य प्रामाण्यं शक्यते वक्तुं, न तथोक्तसिद्धान्ते किञ्चित्प्रमाणमुपलभामहे । श्रुतिमूलशून्यस्योपमानमात्रस्यात्यन्तदुर्बलत्वादिति चेन्न । नामानि सर्वाणि यमाविशन्ति, सर्वे वेदा यत्पदमामनन्तीत्यादिश्रुतीनामेवात्र मानत्वात् । किञ्च । सर्वश्रुतिमूलभूतगायत्र्याख्यमन्त्रोऽपि उभयप्रकारसत्ताप्रतिपादकत्वेनोक्तसिद्धान्ते प्रमाणम् । तथाहि । देवशब्दाभिधेयस्य पुरुषोत्तमस्य सर्वनियन्तृत्वप्रतिपादनात् स्वतन्त्रसत्ताश्रयत्वम् । अस्मच्छब्दाभिधेयानां चेतनानां, धीशब्दोपलक्षिताचेतनवस्तुनश्च तन्नियम्यत्वाभिधानात् परतन्त्रसत्ताश्रयत्वमिति । तत्सिद्धं विश्वभिन्नाभिन्नं ब्रह्म सर्ववेदान्तार्थ इति ।

ननु स्वतन्त्रसत्तानिरूप्यं परतन्त्रसत्त्वं, तन्निरूप्यं च स्वतन्त्रसत्त्वमित्यन्योन्याश्रयदोषापत्तिरिति चेन्न। स्वतन्त्रसत्त्वे नियन्तृत्वव्यापकत्वसर्वात्मत्वसर्वज्ञत्वादीनां, परतन्त्रसत्त्वे च नियम्यत्वव्याप्यत्वात्मीयत्वाल्पज्ञत्वादीनां स्वाभाविकानां प्रयोजकानां सत्त्वान्नो-

क्तदोषगन्धसंबन्धः । न चोक्तसिद्धान्तेऽवच्छेदकाभावो भाव्यः ।
भिन्नाभिन्नत्वस्यैवाखण्डोपाधेरवच्छेदकत्वाभ्युपगमात् । एवं सर्वेषा-
मपि वाक्यानां स्वार्थे शक्तिवृत्त्यैव प्रामाण्यान्न विरोधशङ्कावकाशः ।
एतेनैव सर्वं खल्विदं ब्रह्म तज्जलानितीत्यादीन्यपि वाक्यानि व्या-
ख्यातानि भवन्ति । तुल्ययोगक्षेमाच्च तेषाम् । अलं विस्तरेण ॥ ७ ॥

इति श्रीवेदान्तरत्नमञ्जूषायां भगवत्पुरुषोत्तमाचार्य्यविरचितायां
सिद्धान्तरत्नविवृत्तौ वाक्यार्थसंग्रहाधारो नाम
द्वितीया कोष्ठिका समाप्ता ॥ २ ॥



अथ वेदान्तरत्नमञ्जूषायां तृतीयः कोष्ठः ।

एवं तावत् पूर्वस्मिन् ग्रन्थे प्रथमप्रकरणे तत्त्वमादिपदार्थाः संग्रहेण निरूपिताः । द्वितीये च भेदपराणामभेदपराणां भेदनिषेधविषयकाणाम् अस्थूलादीनां वाक्यानां चाऽविरोधविधिना समन्वयप्रक्रियापूर्वकं स्वार्थे प्रामाण्यं प्रतिपादितम् । अथेदानीं साधनानि विधीयन्ते । तानि च कर्मज्ञानभक्तिप्रपत्तिगुर्वाज्ञानुवृत्तियोगभेदाद् द्विविधानि । तत्र कर्मयोगस्त्रिविधः । नित्यनैमित्तिककाम्यभेदात् । तत्राऽहरहः सन्ध्यामुपासीत, यावज्जीवमग्निहोत्रं जुहोतीत्यादिना नित्यकर्त्तव्यतया विधीयमानानि संध्योपासनजपस्नानतर्पणादीनि नित्यानिं । एवं यज्ञदानाध्ययनानि त्रैवर्णिकद्विजातिसाधारणानि । याजनाऽऽदानाध्यापनानि द्विजाग्र्यासाधारणानि । तेषां त्रयाणां तु निष्कामतयाऽनुष्ठाने नित्यत्वं सकामतयाऽनुष्ठाने च वृत्तित्वमिति विभागः । तच्च याजनादिनापि यावद्देहयात्रामात्रमेवादानम् । अधिकं तु प्रतिग्रहः । अन्यथाऽऽदानस्य तृतीयस्य वैयर्थ्यात् । अत एव षट्कर्मकत्रिकर्मकद्विजातिविभागः । ब्राह्मणस्य षट्कर्मत्वं क्षत्रियवैश्ययोस्त्रिकर्मत्वं चेति । अथेन्द्रियनिग्रहतीर्थसेवनोपवासफलाहारदेहशोषणान्नदानादीनि सर्वसाधारणानि । कर्तृत्वाद्यभिमानशून्यैर्मुमुक्षुभिरनुष्ठितानां तेषां मनःशुद्धिपरम्परया ज्ञानभक्तिजनकत्वेन मोक्षसाधकत्वम् । सकामत्वेनानुष्ठीयमाने च काम्यकर्मकोटावन्तर्भाव इति विवेकः । अथ केनचित् कालादिविशेषनिमित्तेन विधीयमानं श्राद्धादिकं कर्म नैमित्तिकम् । स्वर्गकामो यजेतेत्यादिना सकाममधिकृत्य विधीयमानानि काम्यानि । तत्र काम्यानां निषिद्ध-

वत् संसारहेतुत्वाविशेषान्मुमुक्षुभिस्तानि हेयान्येव । नित्यनैमित्तिकानि च स्वस्ववर्णाश्रमाधिकारानुसारेण भगवदाज्ञापालनात्मकत्वभजनरूपत्वाद् आवश्यकतयाऽनुष्ठेयानि । तत्र त्रैवर्णिकैर्वैदिकानि, एकजातिना स्वानुरूपाणि पौराणिकतर्पणान्नदानादीनि इति विशेषः । तथाच गीयते श्रीमुखेन– ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः । स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा गच्छति तच्छृणु । यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इत्यादिना । किञ्च वर्णाश्रमत्यागस्याऽश्रौतत्वात् सांप्रदायिकैर्मुमुक्षुभिराश्रमित्वेनैव भाव्यम्। तथाच स्मर्य्यते वैष्णवपुराणे, ब्रह्मचारी। गृहस्थश्च वानप्रस्थस्तथाश्रमी । परिव्राट् च चतुर्थोऽत्र पञ्चमो नोपविद्यते । वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यत् त्वत्तोषकारणमिति वैष्णवे और्वः । नाचारहीनं प्रपुनन्ति वेदा इति सनत्सुजातवचनात् । किञ्च श्रुतिस्मृत्युदितं धर्म्मं वर्णाश्रमविभागजम् । उल्लङ्घ्य ये प्रवर्तन्ते स्वेच्छया कूटयुक्तिभिः । विकर्माभिरता मूढा युक्तिप्रागल्भ्यदुर्मदाः । पाषण्डिनस्ते दुःशीला नरकार्हा नराधमा इति विष्णुधर्मे । किञ्च, वर्णाश्रमधर्मस्य वैष्णवलक्षणत्वविधानादप्यावश्यकत्वम् । तत्रैव यमगीतायां वैष्णवलक्षणे, न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे । न हरति न च हन्ति किञ्चिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तमिति । वर्णपदञ्चात्राश्रमोपलक्षणार्थम् । तयोः साहित्यनियमात् । विपक्षे वैष्णवत्वहानिप्रसङ्गः । स च स्मर्य्यते स्वयमेव, श्रुतिस्मृती ममैवाज्ञे ते य उल्लङ्घ्य प्रवर्त्तते । आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णव इति । तथाभूतत्यागस्य तामसत्वविधानात् । निय-

तस्य तु संन्यासः कर्म्मणो नोपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्तित इति दैत्यभागत्वप्रतिपादनाच्च । तथा हरिवंशे श्रीवामनोक्तिर्बलिं प्रति, वेदोक्तं ये परित्यज्य धर्ममन्यं प्रकुर्वते । तत्सर्वं तव दैत्येन्द्र मत्प्रसादाद् भविष्यतीति । आश्रमादिधर्मत्यागेन नग्नत्वप्रसङ्गः स्मर्य्यते वैष्णवे । ऋग्यजुःसामसंज्ञेयं त्रयी वर्णात्रती द्विज । एतामुज्झति यो मोहात् स नग्नः पातकी स्मृत इति । कलिधर्मे व्यासोक्तेश्च, नास्तिक्यपरमाश्चैव केचिद्धर्मविलोपकाः । भविष्यन्ति नरा मूढा मन्दाः पण्डितमानिन इति ।
ननु सर्वधर्मान् परित्यज्येत्यादिना सर्वकर्मत्यागविधानस्यापि साक्षाद्ज्ञानात् कथमिव नित्यनैमित्तिकानामवश्यकर्त्तव्यतेति । सत्यम् । त्यागशब्दस्य फलकर्तृत्वादित्यागपरत्वात् । स्वस्य कर्तृत्वाभावदार्ढ्यभावनया त्यागस्य मुख्यत्वमेव सिद्धेः । तथाच तत्रैव, त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते इत्यादि । तत्रैव कर्मकर्त्तव्यत्वहेयत्वयोर्निर्णयः स्वयमेव उक्तः श्रीमुखेन । एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमामिति । ननु प्रायश्चित्तरूपस्यापि कर्मणो विलक्षणत्वेन स्मरणात् कथमिव कर्मणां त्रैविध्यमितिचेन्न । नैमित्तिकेष्वन्तर्भावात् । पापनिवृत्त्यात्मकनिमित्तेन विधीयमानत्वात् । नचैवं नित्यानामपि प्रत्यवायनिवृत्तिलक्षणनिमित्तेन विधेयत्वं कल्पयित्वा तेषामपि तत्रैवान्तर्भावेन द्वैविध्यमेव किं न स्यादिति वाच्यम् । तेषां प्रायश्चित्तत्वसाम्येऽपि नित्यपापानां प्रायश्चित्तत्वात् । नित्यत्ववैशेष्यमिति भावः ॥ १ ॥ अथ ज्ञानयोगः, पूर्वोक्तकर्मयोगानुष्ठाननिर्मलमनस्कैर्जातशास्त्राधिकारकैर्मुमुक्षुभिरभ्यस्यमानाच्छ्रवणादेर्जायमानः परब्रह्माख्यश्रीपुरुषोत्तमस्व-

रूपगुणशक्तिवैभवादिविषयकानुभवविशेषस्तत्प्रसादहेतुकसाक्षात्कारद्वारेण मोक्षहेतुः ॥ २ ॥ अथ भक्तियोगो नाम वार्षिकगङ्गाप्रवाहवदनवच्छिन्न आप्राणधारणादहरहः प्रवर्द्धमानो भगवत्स्मरणसन्ततिरूपानुभूतिविशेषः ॥ ३ ॥ प्रपत्तियोगो नाम शास्त्रोक्तज्ञानादिसर्वसाधनेषु स्वस्याऽसामर्थ्यमाकलय्य सदाचारोपदिष्टमार्गेण करुणावरुणालये रमाकान्ते भगवति श्रीवासुदेवे आत्मभारनिक्षेपणरूपः ॥ ४ ॥ गुर्वाज्ञानुवृत्तियोगो नाम प्रपत्तेरङ्गानामपि कालादिप्रतिबन्धकबाहुल्येनानुष्ठानाद्यशक्तेरसम्भवम् आत्मनि विचार्य्य श्रीगुरुमेव मोक्षाद्युपायं फलं च मत्वा तच्चरणारविन्दयोः सर्वात्मभावेनात्मभारं समर्प्याज्ञबालवत् तदुक्तमात्राचरणम् ॥ ५ ॥ तत्र कर्मयोगः श्रीभगवच्चरणैराचार्य्यैः सदाचारप्रकाशे निर्णीतः । ज्ञानयोगश्चात्रैव ग्रन्थे संगृहीतः । भक्तियोगोऽपि निरन्तरश्लोके वक्ष्यते । प्रपत्तिगुर्वाज्ञानुवृत्तियोगौ चास्मिन् श्लोके प्रतिपाद्येते—

नान्या गतिः कृष्णपदारविन्दात्
संदृश्यते ब्रह्मशिवादिवन्दितात् ॥
भक्तेच्छयोपात्तसुचिन्त्यविग्रहा-
दचिन्त्यशक्तेरविचिन्त्यसाशयात् ॥ ८ ॥

नान्या गतिरिति ॥ तत्र, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। यो ब्रह्माणं विदधाति पूर्वं यो वा विद्यास्तस्मै गोपायति स्म कृष्णः, तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणं व्रजेत्।सर्वस्य शरणं सुहृत् । तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखम् । यावन्न याति शरणं त्वामशेषाऽघनाशनम् । वृथैव भवतो जाता भूयसी जन्मसन्ततिः । तस्यामन्यतरं जन्म संचिन्त्य शरणं व्रज ।

अथ पातकभीतस्त्वं सर्वभावेन भारत । विमुक्तान्यसमारम्भा-न्नारायणपरो भव । शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः । तेऽपि मृत्युमतिक्रम्य यान्ति विष्णोः परं पदम् । तमेव शरणं गच्छ सर्वभावेन भारत । मत्प्रसादाद्वाप्नोति शाश्वतं पदमव्ययम् । सर्व-धर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्ष-यिष्यामि मा शुचः । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते । सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो द-दाम्येतद् व्रतं मम । ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः । कर्तारमकृतं देवं भूतानां प्रभवाप्ययम् । य एनं संश्रयन्तीह भक्त्या नारायणं हरिम् । ते तरन्तीह दुर्गाणि नात्र कार्य्या विचारणे-ति श्रुतिस्मृतीतिहासादिवाक्यानां निर्णीतोऽर्थः प्रतिपाद्यते । प्रथमपादेन- नान्या गतिः कृष्णपदारविन्दादिति ॥

श्रीकृष्णपदारविन्दादन्या गतिः क्षेत्रज्ञानां न संदृश्यते श्रुति-स्मृतिष्वित्यन्वयः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गति-रिति श्रुतेः । गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । अ-हमेव गतिस्तेषां निराशीःकर्मकारिणाम् । त्वं हिलोकगतिर्ब्रह्मन् न केचित् त्वां विजानते । न हि विष्णुम् ऋते काचिद्गतिरन्या विधीयते । इत्येव सततं वेदा गायन्ति नात्र संशयः । अगतीनां गतिर्भवानित्यादिस्मृतेः । एवं करणव्युत्पत्त्या कर्मव्युत्पत्त्या चो-पायोपेयपरोऽयं गतिशब्दः । तत्र गम्यतेऽनयेति करणव्युत्पत्त्या पुरुषार्थोपायभूतः श्रीभगवान् कृष्ण एवेति गतिपदार्थः । तथैव गीयते च श्रीमुखेनैव । अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपा-सते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् । तेषामहं समु-द्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात् पार्थ मय्यावेशित-चेतसाम् । तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्म-

भावस्थो ज्ञानदीपेन भास्वता । मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मच्चिता मद्गतप्राणा बोधयन्तः परस्परम् । कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इत्यन्वयमुखेन, सर्वारम्भपरित्यागी भक्तिमान् यः स मे प्रियः । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेत्यादिव्यतिरेकेण च स्वस्यैवात्माऽनन्यशरणानां सर्वपुरुषार्थसाधनत्वविधानात् । तथैव, गम्यत इति गतिः प्राप्योऽपि श्रीपुरुषोत्तम एवेति । तत्रैवान्वयव्यतिरेकाभ्यां गीयमानात् । यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते । मम साधर्म्यमागताः । मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इत्यन्वयवाक्येभ्यः । आब्रह्म भुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमित्यादिव्यतिरेकवचनेभ्यश्च । उपलक्षणं चैतत् सर्वसम्बन्धाश्रयोऽपि स एव । माता पिता तथा भ्राता सर्वस्य शरणं सुहृदिति शरण्यस्यैव भगवतः सर्वसम्बन्धित्वश्रवणात् । पिताऽसि लोकस्य चराचरस्य, त्वमस्य पूज्यश्च गुरुर्गरीयान् । पिताहमस्य जगतो माता धाता पितामहः । त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव इत्यादिश्रवणाच्च । किञ्च ममैवांशो जीवलोके, मद्भक्त एतद्विज्ञाय, यो मद्भक्तः स मे प्रियः । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । प्रतिजाने प्रियोऽसि मे । मम साधर्म्यमागता इत्यादिना

स्वस्यैव सर्वसम्बन्धत्वदृढीकरणाय तत्र तत्र षष्ठीप्रयोगस्य स्वयमेव श्रीमुखेनाभ्यस्यमानाच्च । किञ्चाऽनेन प्रपत्तिस्वरूपमप्युक्तं भवति । अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थना मतिः । शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यतामिति लक्षणसमन्वयात् । सा च षड्विधा । आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्ज्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा । आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिरिति भगवच्छास्त्रवचनात् । तत्र सर्वात्मत्वं पुरुषोत्तमस्य निश्चित्य, ब्रह्मादिस्तम्बपर्य्यन्तप्राणिमात्रस्यानुकूल्याचाराध्यवसायः प्रथमाङ्गम् । चराचराणि भूतानि सर्वाणि भगवद्वपुः । अतस्तदानुकूल्यं मे कर्त्तव्यमिति निश्चयः । श्रूयते हि सर्वात्मत्वं भगवतः—अन्तःप्रविष्टः शास्ता जनानां, सर्वात्मा, अहमात्मा गुडाकेश सर्वभूताशयस्थित इत्यादिगानाच्च । १ । हिंसामात्सर्य्यादिपूर्वोक्तविपरीताचारत्यागः, प्रातिकूल्यस्य वर्ज्जनं द्वितीयम् । तच्च विरोधिस्वरूपनिर्णये वक्ष्यते । परापवादं पैशुन्यमनृतं यो न भाषते । अनुद्वेगकरं चापि तोष्यते तेन केशवः । परपत्नीपरद्रव्यपरहिंसासु यो मतिम् । न करोति पुमान् भूप तोष्यते तेन केशवः । न ताडयति नो हन्ति प्राणिनोऽन्याँश्च देहिनः । यो मनुष्यो मनुष्येन्द्र तोष्यते तेन केशव इति सगरं प्रति और्वः । मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पण्डवेति उभयत्र प्रमाणम् । २ । वात्सल्यादिगुणरत्नाकरः सर्वाश्रयः सर्वशरण्यः प्रपन्नानस्मान् रक्षिष्यत्येवेति निश्चयो विश्वासः । (आत्मरक्षाविषयात्मकतद्रक्षितृत्वव्यवसायविशेष इति यावत्) । रक्षिष्यत्यनुकूलान्नइति या सुदृढा मतिः । सविश्वासो भवेच्छक्र सर्वदुष्कृतनाशन इति तृतीयम् । योगक्षेमं वहाम्यहम् । अहं त्वा

सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति भगवद्वचनात् । ३ । सर्वज्ञः सर्वरक्षासमर्थःकारुण्यवात्सल्यादिगुणसागरोऽपि पुरुषोत्तमः प्रार्थनाशून्यैरात्मपराङ्मुखैरप्रार्थितो न गोपायति । अन्यथा सर्वमोक्षप्रसङ्गात् । शास्त्रसेतुभङ्गापत्तेश्चेति निश्चित्य बुद्धेः सदैव प्रार्थनाप्रावण्यं गोप्तृत्ववरणभूतश्चतुर्थः । आत्मरक्षाविषयात्मकतद्रक्षितृत्वव्यसायविशेष इति यावत् । अप्रार्थितो न गोपायेदिति या प्रार्थनामतिः । गोपायिता भवत्येव गोप्तृत्ववरणं स्मृतम् । प्रार्थनास्वरूपं तु– श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर । संसारसागरे मग्नं मामुद्धर जगद्गुरो । केशव क्लेशहरण नारायण जनार्दन । गोविन्द परमानन्द मां समुद्धर माधवेत्यादिमन्त्रैः स्पष्टं ज्ञायते । कमलनयन वासुदेव विष्णो धरणिधराऽच्युत शङ्खचक्रपाणे । भव शरणमुदीरयन्ति ये वै त्यज्य भट दूरतरेण तानपापानिति यमवचनाच्च । राजधर्म्मे भीष्मः । त्वत्प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे । यच्छ्रेयः पुण्डरीकाक्ष तद् ध्यायस्व सुरोत्तमेत्यादेश्च । ४ । प्रपत्तव्यस्य माधवस्यासाधारणप्रसादहेतुः प्रपत्तिरेवेति निश्चयेन तेन रक्ष्यमाणस्यात्मनोऽहंममत्वस्वाम्यादीनां भारस्य श्रीभगवति अर्पणमात्मनिक्षेपः । आत्माऽऽत्मीयभरन्यासो ह्यात्मनिक्षेप उच्यते इति लक्षणवचनात् । उपरिचराख्याने च, आत्मा राज्यं धनं मित्रं कलत्रं वाहनानि च । एतद्भगवते सर्वमिति तत्प्रोज्झितं सदेति वाल्मीकीये भरतः । राज्यं चाहं च रामस्य धर्म्मं वक्तुमिहार्हसीति । द्व्यक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् । ममेति च भवेन्मृत्युर्न ममेति च शाश्वतमिति भारतवचनात् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति चरमोपदेशात् । ५ ।

उपायानामसिद्ध्या तद्विपरीतानामपायानां स्वतः प्राप्त्या च कर्तृ-

त्वाद्यभिनिवेशरूपगर्वहानिः कार्पण्यम् । उपाया नैव सिद्ध्यन्तीत्यपाया विविधास्तथा । इति या गर्वहानिस्तदैन्यं कार्पण्यमुच्यते इति वचनात् । ६ । एतेषु षट्सु आत्मनिक्षेप एवाङ्गित्वान्मुख्यः । अन्ये च तत्सहकारिणस्तदङ्गभूता इति विवेकः । किञ्च, अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिरिति लक्षणवचनेनैव, अकिञ्चनोऽगतिरत्राधिक्रियते इत्युक्तम् । तच्च मुमुक्षुत्वादीनामप्युपलक्षणम् । एवञ्चाऽकिञ्चनोऽनन्यगतिः सात्त्विको भगवत्प्राप्तिकामो मुमुक्षुः सार्ववर्णिकोऽज्ञः सर्वज्ञो वा निर्विण्णोऽत्राधिकारीति बोध्यम् । तत्राऽकिञ्चनत्वं नाम सर्वसाधनानुष्ठानसामर्थ्यादिविषयककर्तृत्वादिरूपाभिमानादिसर्वस्वशून्यत्वम् । अगतित्वं चानन्यगतित्वम् । तच्च भगवद्व्यतिरिक्तान्यसाधनफलसंबन्धलक्षणगतिशून्यत्वम् । तच्चोक्तम्–अकिञ्चनोऽगतिरिति । मुमुक्षुत्वं च संसृतिमोक्षेच्छावत्त्वम् । मुमुक्षुर्वै शरणमहं प्रपद्ये, मुमुक्षुर्वै शरणं व्रजेदिति मन्त्रवर्णात् । सात्त्विकत्वं च भगवता गीतं, सात्त्विकधृतिबुद्ध्यादिमत्त्वं तत्र द्रष्टव्यम् । सर्ववर्णादिसाधारण्यं च वैष्णवे और्वेणोक्तम् । वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यत् तत्तोषकारणमिति । अज्ञसर्वज्ञसाधारण्यं च शौनकेनोक्तं जितमन्त्राख्याने, अज्ञसर्वज्ञभक्तानां गतिर्गम्यो भवेदिति। किञ्च, यो ब्रह्माणं विदधाति पूर्वमित्यादिमन्त्राभ्यां वेदमात्रऽर्थसंग्राहकाभ्यां ब्रह्मादिजनकत्वतदुपदेष्टृत्वसर्वबुद्ध्यादिप्रवर्तकत्वसर्वशरण्यत्वादिनिरूपणेन जगज्जन्मादिकारणं सर्ववेदान्तवेद्यचेतनाऽचेतनाऽन्तरात्मा सर्वबुद्ध्यादिप्रवर्तकस्तत्प्रकाशको मुक्तप्राप्यो देवोऽस्याः प्रपत्तेः प्रतिपत्तव्यः ।

स च श्रीभगवान् कृष्ण एवेति प्रतिपादितम् । तच्च पूर्वमेव गायत्रीव्याख्यानेनोक्तम् । एवं श्रीकृष्णपदारविन्दादन्या साधनसाध्यसम्ब-

न्धादिरूपा गतिर्जीवानां न संदृश्यते कुत्रापि श्रुत्यादिष्विति सिद्धम्। तस्य सर्वसाधानादिरूपत्वात् । ननु हिरण्यगर्भः समवर्तताग्रे आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत, विरिञ्चो वा व जगद्विरेचयति विदधातीति ब्रह्मा वा व विरिञ्चः । एको रुद्रो न द्वितीयाय तस्थुर्यो देवानां प्रभवश्चोद्भवश्च, न सन्न चासच्छिव एव केवलः, ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामित्यादिना ह्यन्येषामपि जगत्कारणत्वाद्यैश्वर्य्ययोगश्रवणेन तेषामपि प्रपत्तव्यतारूपगतित्वसम्भवात् । किञ्च, कर्मणैव हि संसिद्धिमास्थिता जनकादयः। न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा इत्यादिनोपायरूपगतेरपि दृश्यमानत्वात् कथमिव श्रीकृष्णादृतेऽन्यगतेरभावत्वमिति चेत् तत्राह । ब्रह्मशिवादिवन्दितादिति ।

ब्रह्मशिवौ आदी येषां ते तथा तैर्वन्दितात् । तेषां स्तुतिनमस्कादिविषयभूतादिति यावत् । यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च तमेकं गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामीत्यादिश्रुतेः । तथाच वैष्णवे, एते वयं वृत्ररिपुस्तथाऽयं नासत्यदस्रौ वरुणस्तथैव । इमे च रुद्रा वसवः समूर्य्याः समीरणाऽग्निप्रमुखास्तथाऽन्ये । सुराः समस्ताः सुरनाथ कार्य्यमेभिर्मया यच्च तदीश सर्वम्। आज्ञापयाज्ञां प्रतिपालयन्तस्तथैव तिष्ठाम सदाऽस्तदोषाः । अथ सनत्सुजातः, यदुक्तं महज्ज्योतिर्दीप्यमानं महद्यशः । तद्वै देवा उपास्यन्ते यस्मादेको विराजते । योगिनस्तत् प्रपश्यन्ति भगवन्तं सनातनम् । वैष्णवे अदितिः । ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा । विष्णुमायामहावर्तमोहान्धतमसावृताः । आराध्य त्वामभीप्सन्ते कामानात्मविशुद्धये । तत्रैव बलभद्रः । सेन्द्ररुद्राश्वि-

वसुभिरादित्यैर्मरुदग्निभिः । चिन्त्यसे त्वमचिन्त्यात्मन् समस्तैश्चैव योगिभिः । तत्रैव नागपत्न्यः । ज्ञातोऽसि देवदेवेश सर्वशस्त्वमनुत्तमः । न समर्थाः सुराः स्तोतुं यमनन्यभवं विभुम् । तत्रैव कालियः, ब्रह्माद्यैरर्च्यते दिव्यैर्यश्च पुष्पानुलेपनैः । नन्दनादिसमुद्भूतैः सोऽर्च्यते वा कथं मया । तत्रैव यमः, अहममरगणार्चितेन धात्रा यम इत्यादि । सर्वे नमस्यन्ति च सिद्धसंघाः । कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे । स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिरिति-श्रीभगवद्गीतायाम् अर्जुनः । राजधर्मे वैशम्पायनः—

ततस्ते व्याससहिताः सर्व एव महर्षयः । ऋग्यजुःसामसंयुक्तैर्वचोभिः कृष्णमर्चयन् । नारायणीये श्रीकृष्णः । ऋषिभिर्ब्रह्मणा चैव विबुधैश्च सुपूजितः । उवाच देवमीशानमीशः स जगतो हरिरित्यादि-स्मृतिभ्यश्च । आदिना श्रीसनत्कुमारनारदकश्यपादितीन्द्रादयो गृह्यन्ते । तत्र ब्रह्मा, ॐनमो विश्वरूपाय विश्वस्थित्यन्तहेतवे । विश्वेश्वराय विश्वाय गोविन्दाय नमो नम इत्यादिमन्त्रेभ्यः । अथ वैष्णवे, सत्त्वादयो न सन्तीशे यत्र च प्राकृताः गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु । तत्रैव, नमाम सर्वं सर्वेशमनन्तमजमव्ययम् । लोकधामधराधारमप्रकाशमभेदिनम् । यत्र सर्वं यतः सर्वमुत्पन्नं सत्पुरःसरम् । सर्वभूतश्च यो देवः पराणामपि-यः परः । योगिभिश्चिन्त्यते योऽसौ मुक्तिहेतुर्मुमुक्षुभिः । पुनस्तत्रैव, नमो नमस्तेऽस्तु सहस्रमूर्ते सहस्रबाहो बहुवक्त्रपाद । नमो नमस्ते जगतः प्रवृत्तिविनाशसंस्थानकराऽप्रमेय । तत्रैवासुरजिताः, आराधनाय लोकानां विष्णोरीशस्य यां गिरम् । वक्ष्यामो भगवानाद्यस्तया विष्णुः प्रसीदतु । यतो भूतान्यशेषाणि प्रसूतानि महात्मनः । यस्मिंश्च प्रलयं यान्ति कस्तं स्तोतुमपीश्वरः ।

पुनस्तत्रैव, यस्य प्रसादादहमच्युतस्य भूतः प्रजासृष्टिकरोऽन्तकारी । क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्तात् । अथ हरिवंशे नृसिंहचरित्रे, सांख्ये योगे च या बुद्धिस्तत्त्वार्थपरिनिष्ठिता । भगवन् वेदविद्यात्मा पुरुषः शाश्वतो ध्रुवः। अथ शिवः, वृषभध्वजवन्द्यायेति मन्त्रवर्णात् । हरिवंशे बाणबन्धने, कृष्ण कृष्ण महाबाहो जाने त्वां पुरुषोत्तमम् । लोकानां त्वं गतिर्देव त्वत्प्रसूतमिदं जगत् । वन्देऽहं त्वां जगन्नाथं जगतामीश्वरं हरिम् । तत्रैव कैलाशयात्रायां, यत् तत्कारणमाहुस्त्वां सांख्याः प्रकृतिसंज्ञकम् । त्रिधा भूतं जगद्योनि प्रधानं कारणात्मकम् । पुनस्तत्रैव, नमो भगवते तुभ्यं वासुदेवाय वेधसे । यस्य भासा जगत्सर्वं भासते नित्यमच्युत । अथ सनकादयो हरिवंशे, अस्तुवन् भक्तिनम्रास्तं सनकाद्या मुनीश्वराः । जयदेव जगन्नाथ भूतभावन भावन । नताः स्म भूतादिनमादिदेवमजं जनित्रं सकलस्य जन्तोः।परावरेशं वरदं वरेण्यं नमो नमः सत्यपते जगत्पते । वैष्णवे च, जयेश्वराणां परमेश केशव प्रभो गदाशङ्खवरासिचक्रधृक् । प्रसूतिनाशस्थितिहेतुरीश्वर त्वमेव नान्यत् परमं च यत्पदम् । हरिवंशे नारदः । नमः कृष्णाय हरये वेधसे भूतधारिणे । देवदेव जगन्नाथ नमस्ते चक्रधारिणे । नम ॐङ्काररूपाय त्रयीरूपाय विष्णवे । सोऽसि देव जगन्नाथ यो दृष्टो ब्रह्मवादिभिः । यं प्राप्य न निवर्तन्ते योगिनो यतचेतसः । वैष्णवे प्रह्लादः । नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम । नमोऽस्तु विष्णवे तस्मै नमस्तस्मै पुनः पुनः । यत्र सर्वं यतः सर्वं यः सर्वः सर्वसंश्रयः । तत्रैव ध्रुवः । भूतादीनां समस्तानां गन्धादीनां च शाश्वतः। बुद्ध्यादीनां प्रधानस्य पुरुषस्य च यः परः । तं ब्रह्मभूतमात्मानमशेषजगतः परम् । प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वर । तत्रैव प्र-

चेतसः । नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती । तमाद्यं तमशेषस्य जगतः परमं विभुम् । तत्रैवादितिः । नमस्ते पुण्डरीकाक्ष भक्तानामभयङ्कर । प्रणेतर्मनसो बुद्धेरिन्द्रियाणां गुणात्मक । हरिवंशे कश्यपः । ॐनमो भगवते वासुदेवाय । ॐप्रणवात्मने सपक्षग नमोऽस्तु ते । वैष्णवे सोमः । पारं परं विष्णुमपारपारः परः परेभ्यः परमार्थरूपी । स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः । तत्रैवेन्द्रः । सकलभुवनसूतेर्मूर्तिरम्या तु सूक्ष्मा सकलविदितवेदैर्ज्ञायते यस्य नान्यैः । तमजमकृतमीशं शाश्वतं स्वेच्छयैनं जगदुपकृतिमर्त्यं को विजेतुं समर्थः । तत्रैव पृथिवी । त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः । वासुदेवमनाराध्य को मोक्षं समवाप्स्यति । राजधर्मे धर्मपुत्रः । नमस्ते पुण्डरीकाक्ष पुनः पुनरिन्दम । त्वामेकमाहुः पुरुषं त्वामाहुः सात्वतां पतिम् । योनिस्त्वमस्य प्रलयश्च कृष्ण त्वमेव चेदं सृजसि विश्वमग्रे, विश्वं चेदं त्वद्वशे विश्वयोने, नमोऽस्तु ते शार्ङ्गचक्रासिपाणे। हरिवंशे दुर्वासाः । वेदान्ते प्रथितं तेजस्तव चेदं विचार्य्यते । ये च विज्ञानतृप्तास्तु योगिनो वीतकल्मषाः । पश्यन्ति हृत्सरोजे हि तवैवेदं वपुः प्रभो । वेदैर्यद्गीयते तेजो ब्रह्मेति प्रतिपाद्यते । तदेवेदं विजानेऽहं रूपमैश्वरमीश्वर । तत्रैव परशुरामः । विष्णो कृष्ण हृषीकेश वासुदेव जनार्दन । जगदादि जगत्पूज्य जगदीश महेश्वर । कृष्ण सर्वस्य लोकस्य शृणु मे नैष्ठिकं वचः । तत्रैव देवी—

जाने त्वां सर्वभूतानां स्रष्टारं पुरुषोत्तमम् । पद्मनाभं हृषीकेशं लोकानामादिसम्भवम् । नार्हसे देव हन्तुं वै बाणमप्रतिमं रणे । प्रयच्छ ह्यभयं बाणे जीव पुत्र त्वमेव चेति । मोक्षधर्म्मे उशनाः । नमस्तस्मै भगवते देवाय प्रभविष्णवे । यस्य पृथ्वीतलं जातमाकाशं बाहुगोचरे । वैष्णवे पराशरः । अविकाराय शुद्धाय नित्याय

परमात्मने। सदैकरूपरूपाय विष्णवे सर्वजिष्णवे। राजधर्मे भीष्मः। नमस्ते भगवन् विष्णो लोकानां निधनोद्भव । त्वं हि कर्त्ता हृषीकेश संहर्त्ता चाऽपराजितः। विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव। अपवर्गोऽसि भूतानां पञ्चानां परतः स्थित इति॥

ननु, नमस्ते शितिकण्ठाय नीलग्रीवाय वेधसे इत्यादिभिः श्रीभगवता कृतस्यापि शिवस्तवस्य प्रसिद्धत्वात् कथं ब्रह्मशिवादिवन्दनीयः श्रीकृष्ण एवेति, नान्ये इति चेन्न। एतस्याः शङ्कायास्तत्रैव शिवेनैव निराकृतत्वादेव । तथाहि। श्रीभगवति तपस्यति सति इन्द्रादयो देवाः सर्वे महर्षयश्च तेन संशयेन ग्रस्ताः सन्तस्तत्र गत्वा तपस्तपन्तं शिवार्चनादि कुर्वन्तं श्रीभगवन्तं दृष्ट्वा परमविस्मयं प्राप्ता इत्याह वैशपायनस्तत्रैव। तत इन्द्रः स्वयं तत्र आरुह्य गजमुत्तमम् । द्रष्टुं सर्वेश्वरं विष्णुं तपस्यन्तं समाययौ। ततो यमस्तु भगवानारुह्य महिषं वरम्। किन्नरैश्च स्वयं साक्षादाययौ नगमुत्तमम्। प्रचेता हंसमारुह्य वारुणैश्च समन्वितः। श्वेतच्छत्रसमायुक्तः श्वेतव्यजनवीजितः । ययौ कैलाशशिखरं द्रष्टुं केशवमञ्जसा। अन्ये चापि तथा देवा आदित्या वसवस्तथा। रुद्राश्चैव तथा राजन् द्रष्टुं केशवमाययुः । सिद्धाश्च मुनयश्चैव गन्धर्वा यक्षकिन्नराः। पर्वतो नारदश्चैव तथाऽन्ये मुनिसत्तमाः। विस्मयस्थितलोलाक्षाः सर्वे देवगणास्तथा। आश्चर्यं खलु पश्यध्वं न भूतं न भविष्यति । योगिध्येयः स्वयं कृष्णो यत्तप्यति गुरुः स्वयमिति। पुनश्च शिवागमनस्तवनादेः पश्चात्तेषां भगद्विषयकाऽसंभावनाविपरीतभावनाबाहुल्ययोगं दृष्ट्वा श्रीभगवताऽन्यपूजनादेरयथार्थत्वम्, अन्यैश्च भगवत्पूजनादेर्याथात्म्यं दर्शयँस्तेषामसंभावनादिनिवृत्तये प्रथमं भगवन्तं शिवः स्तौति इत्याह वैशंपायनः। इत्युक्त्वा पुनराहेदं याथात्म्यं दर्शयन्निव। मुनीनां श्रोतुकामानां

याथात्म्यं तत्र सत्तमः । अञ्जलिं संपुटं कृत्वा विष्णुमुद्दिश्य शङ्करः । उमया सार्द्धमीशानो याथात्म्यं वक्तुमैहत । हरे कुर्वति तत्रैवमञ्जलिं कुरुसत्तम । मुनयो देवगन्धर्वाः सिद्धाश्च सह किन्नराः । अञ्जलिं चक्रिरे विष्णौ देवदेवेश्वरे हरौ । मयि अञ्जलिबद्धे एतैरपि अञ्जलिः कृतः । मया स्तूयमाने भगवति तेषां संशयादिनिवृत्तिः स्वत एव भविष्यतीति निश्चित्य स्तौति महादेवो भगवतः पुरुषोत्तमत्वं प्रकाशयन्, यत्तत्कारणमाहुस्तत्सांख्याः प्रकृतिसंज्ञकम् इत्यारभ्य, नमस्करोमि सर्वात्मन्नमस्तेऽस्तु सदा हरे इत्यन्तेन स्तोत्रेण । किञ्चैवमपि तेषामसंभावनाद्यनिवृत्तिं दृष्ट्वा तन्निवृत्तये मुनीनुपदिष्टवान् । इत्युक्त्वा देवदेवेशं मुनीनाह पुनः शिवः । एवं जानीत हे विप्रा ये भक्ता द्रष्टुमागताः । एतदेव परं वस्तु नैतस्मात् परमस्ति वः । एतदेव विजानीध्वमेतद्वः परमं तपः । एतदेव सदा विप्रा ध्येयं सततमानसैः । एतद्वः परमं श्रेय एतद्वः परमं धनम् । एतद्वो जन्मनः कृत्यमेतद्वस्तपसः फलम् । एष वः पुण्यनिलय एष धर्मः सनातनः । एष वो मोक्षदाता च एषमार्ग उदाहृतः । एतदेव प्रशसन्ति विद्वांसो ब्रह्मवादिनः । एष ब्रह्मविदां मार्गः कथितो वेदवादिभिः । एवमेव विजानीत नात्र कार्य्या विचारणेति—अध्यायेन शिवमुखादेव श्रीभगवतो निरतिशयपरत्वश्रेयोरूपत्वतपआदिकर्मफलत्वपुण्याधिष्ठानत्वमोक्षप्रदातृत्वमोक्षसंप्रदायप्रवर्त्तकत्वादियोगं श्रुत्वा नष्टसंशयविपर्य्यया बभूवुरित्याह वैशम्पायनः । एवमुक्तास्ततः सर्वे मुनयः पुण्यशालिनः । यथावदुपगृह्णाना निरसन् संशयं नृप । एवमेवेति तं विप्राः प्राहुः प्राञ्जलयो हरम् । छिन्नो नः संशयः सर्वो गृहीतार्थः स तादृशः । एतदर्थं समायाता वयमद्य तवालयम् । संगमाद्युवयोः सर्वो नष्टो मोहो महानिह । यथाह भगवान् रुद्रो यतामः सततं

हरौ । इति ते मुनयः प्रीताः प्रणेमुः केशवं हरिमिति । किञ्च, तेषामसंभावनादिनिवृत्तावपि विष्णुरुद्रयोः साम्यबुद्धेस्तादवस्थ्यं ज्ञात्वा द्वितीयस्तोत्रेण श्रीभगवतो निरस्तसाम्यातिशयत्वं विष्णवँस्तं निराकरोति इत्याह वैशम्पायनः । ततः स भगवान् रुद्रः सर्वान् विस्मापयन्निव । स्तुत्या प्रचक्रमे स्तोतुं विष्णुं विश्वेश्वरं हरिम् । अथर्याभिः श्रुतियुक्ताभिर्मुनीनां शृण्वतां तदा । नमो भगवते तुभ्यं वासुदेवाय धीमहि । यस्य भासा जगत् सर्वं भासते नित्यमच्युत, इत्यारभ्य, भूयो भूयो नमस्तेऽस्तु पाहि लोकान् जनार्दन इत्यन्तेन स्तोत्रेण स्तोत्रफलकथनेनाप्युपदिष्टवान् । ये चेमं धारयिष्यन्ति स्तवं पापविमोचनम् । तेषां प्रीतः प्रसन्नात्मा पठतां शृण्वतां हरिः । श्रेयो दास्यति धर्मात्मा नात्र कार्य्या विचारणा । अवश्यं मनसा ध्यात केशवं भक्तवत्सलम् । श्रेयः प्राप्तुं यदिच्छन्तो भवन्तः संशितव्रता इति । एवमुपदेशपौनःपुन्येन निःशेषनष्टसंशयादिकास्ते कृतार्था बभूवुरित्याह । ततस्ते मुनयः सर्वे परां निर्वृतिमाययुः । तमेव परमं तत्त्वं मत्वा नारायणं हरिम् । विस्मयं परमं गत्वा मेनिरे स्वकृतार्थतामिति । तस्मात् कैलाशयात्राख्यानं श्रीभगवतो निरतिशयविषयकमेवेति बोध्यम् । किञ्च दानधर्मेऽपि श्रीकृष्णस्य साम्यातिशयशून्यत्वं शिवेनैव निर्णीतम् । ऋषीन् प्रति । पितामहादेः पितरः शाश्वतः पुरुषो हरिः । कृष्णो जाम्बूनदाभासो व्यभ्रः सूर्य्य इवोदितः । श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः । ब्रह्मा तस्योदरभवस्तथाहं च शिरोभवः । सर्वज्ञः सर्वसंश्लिष्टः सर्वगः सर्वतोमुखः । परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः । न तस्मात् परमं भूतं त्रिषु लोकेषु किञ्चनेत्यादि । किञ्च । नारायणीयेऽप्याख्यानेऽर्जुन इममेव संशयं श्रीकृष्णं पृष्ट्वा तन्मुखेनैव निर्णयं कारयामास । तथाहि ।

भवान् सर्वेश्वरः सर्वसेव्यो जगत्कारणभूतः कस्माद् रुद्रमपूजयदिति पृष्टे श्रीकृष्ण उवाच । अहमात्मा हि लोकानां विश्वानां पाण्डुनन्दन । तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् । यद्यहं नार्चयेयैवमीशानं वरदं शिवम् । आत्मानं नार्चयेत् कश्चिदिति मे भावितात्मनः । मया प्रमाणं हि कृतं लोकस्तदनुवर्तते । इति संचिन्त्य मनसा पुराणं रुद्रमीश्वरम् । पुत्रार्थमाराधितवानहमात्मानमात्मना । न हि विष्णुः प्रणमति कस्मैचिद् विबुधाय च । ऋते आत्मानमेवेति ततो रुद्रं भजाम्यहम् । सब्रह्मकाः सरुद्राश्च सेन्द्रा देवा महर्षयः । अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् । भविष्यतां वर्त्ततां च भूतानां चैव भारत । सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्च नित्यश इति । एतदुक्तं भवति । रुद्रस्य पूजायामात्मानमेवाहमपूजयं, न तु रुद्रम् । मम विष्णोर्विश्वात्मत्वात् शिवस्यापि विश्वान्तःपातित्वेन मदात्मकत्वाविशेषात् विश्वस्मिंश्च मदात्मीये व्याप्ये च मम व्यापकत्वात् । लोकसंग्रहार्थं तत्र तत्र स्वात्मानमेव पूजयामि । तदेव व्यनक्ति ह्यन्वयव्यतिरेकाभ्यां—श्रीविष्णुरात्मानम् ऋतेऽन्यं न प्रणमतीति । व्यतिरेकः सब्रह्मकाः सरुद्राः सर्षयश्च सर्वे देवाः श्रीविष्णुं प्रणमन्ति अर्चयन्ति, तस्य सर्वश्रेष्ठत्वेन अतिशयसाम्यानर्हत्वेन च सर्वपूज्यत्वादित्यन्वयः । तस्माद्भगवतान्यपूजनं लीलामात्रं लोकसंग्रहार्थत्वात् । नारदादिपूजावदिति सिद्धान्तः । ननु यद्येवं तर्हि लोकसंग्रहार्थमेव तदनन्यभक्तैरपि अवश्यं करणीतया प्राप्तमितिचेन्न । श्रुतिस्मृतिनिषिद्धत्वात् । अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि, न स वेद यथा पशुः । यो वै स्वां देवतामतियजति परस्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ इत्यादि श्रुतिभ्यः । यो यो यां यां तनुं

भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तान् । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् । देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपीति भगवद्वचनात् । तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः । कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणेति भगवतां विष्णोर्ध्यानविषयत्वं विधाय, अन्ये च पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः । अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनय इति वैष्णवपुराणवचनाच्च । अस्यार्थः । यः पुमान् श्रीभगवतः सर्वेश्वरात् शास्त्रयोनेर्जगज्जन्मादिकारणान्मोक्षदातुः पुरुषोत्तमादन्यां ब्रह्मरुद्रेन्द्रादिरूपां देवतामुपास्ते । उपासनप्रकारमाह । असौ ब्रह्मरुद्रादिः देवोऽन्य ईश्वरः, अहमन्यो जीव इति भावेन स न वेद, तत्त्वतो न जानाति । तेषां भगवदाराधनजन्यप्रसादलभ्यपरिच्छिन्नैश्वर्यवत्त्वेऽपि सर्वेश्वरत्वशास्त्रयोनित्वजगत्कारणत्वसर्वनियन्तृत्वमोक्षप्रदातृत्वाद्यऽयोगेन निरतिशयैश्वर्याश्रयत्वाभावेन च जीवत्वाविशेषात् । तथाह श्रीपराशरः । अशुद्धास्ते समस्तास्तु देवद्याः कर्मयोनय इति । तत्र दृष्टान्तः । यथा पशुरिति । ज्ञानेन हीनाः पशुभिः समाना इति वचनात् । स्वां देवतां स्वेनार्चनीयां विश्वात्मभूतां श्रीपुरुषोत्तमाख्याम् । अतियजति परस्वायै देवतायै ब्रह्मरुद्रादिरूपायै भगवन्तमतिक्रम्य निरीश्वरं यजति स पापीयान्, पतिदेवताया युवत्याः स्वपतीतरदर्शनादिवत् पातिव्रतभङ्गलक्षणदुःसहमहदपराधत्वात् । तस्य फलमाह । च्यवते । न परां प्राप्नोतीति । स्वधर्मादनन्यवैष्णवत्वरूपाद् हीयते । श्रीपुरुषोत्तममप्राप्य संसरतीत्यर्थः । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति भगवदुक्तेः । अन्यदप्यन्वयव्यतिरेकवाक्यमाह । तमेवैकमिति । तच्छब्दो वेदान्तप्रसिद्धब्रह्मात्मस-

दादिशब्दाभिधेयं परब्रह्मभूतं भगवन्तमभिदधाति । एवैकशब्दौ साम्यातिशयव्यवच्छेदकपरौ । अन्या अन्यदेवताविषया वाच इति । यद्यन्यविषया वागपि निषिद्धत्वेन हेया, तर्हि अन्यविषय-ध्यानार्चनादिकं हेयमिति किं वक्तव्यमिति कैमुत्यन्यायपरोऽयं वाक्शब्दः । तद्भक्त्यल्पमेधसामित्यल्पमेधःशब्दोऽपि पशुशब्दव-ज्ज्ञानहीनत्वविधायकः । स्पष्टमन्यत् । किञ्च, आलिङ्गनं वरं मन्ये व्यालव्याघ्रजलौकसाम् । न सङ्गः शल्ययुक्तानां नानादेवोपसे-विनामित्यादिवचनादन्यदेवोपासकानां सङ्गोऽपि महानिषिद्धः, किं पुनस्तदुपासनमित्यलं विस्तरेण । तत् सिद्धं ब्रह्मादिवन्दित-चरणारविन्दः श्रीपुरुषोत्तम एवेति। ब्रह्मशिवादिसेव्यत्वे हेतुमाह । अचिंन्त्यशक्तेरिति । इयत्तावच्छेदेन चिन्तयितुं योग्या चिन्त्या, तर्कगोचरेति यावत् । न चिन्त्या तर्कगोचरा शक्तिर्यस्य सोऽचि-न्त्यशक्तिस्तस्मात् । उपलक्षणं चैतज्ज्ञानैश्वर्यादीनाम् । स्वरूपवद् यावदात्मभाविविचित्रा अपरिच्छिन्ना असंख्याताः स्वाभाविक्यो-ऽघटघटनापटीयस्यः शक्तयो ज्ञानादयश्च यस्य स तथा तस्मादिति। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्या-दिश्रवणात् । शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णतेति । अनेन भगवच्छब्दोऽपि व्याख्यातः । समग्रातिश-यसाम्यानर्हताज्ञानशक्त्यादियोगविधानात् । ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना । तद् ब्रह्म परमं धाम तद् ध्येयं मोक्षकाङ्क्षिणा । श्रुतिवाक्योदि-तं सूक्ष्मं तद्विष्णोः परमं पदम् । तदेव भगवद्वाच्यं स्वरूपं परमा-त्मनः । वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः । शुद्धे महा-विभूत्याख्ये परे ब्रह्मणि वर्त्तते । मैत्रेय भगवच्छब्दः सर्वकारण-

कारणे । एवमेष महाशब्दो भगवानिति सत्तम । परमो ब्रह्मभूतस्य वासुदेवस्य नान्यगः । ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयादिभिर्गुणैरित्यादिस्मृतिभ्यः ।

एतेनानिर्वचनीयशक्तिवादः प्रत्युक्तः । अचिन्त्यस्वाभाविकभावादिशब्दवाच्यत्वाभिधानात् ।

नन्वेवं यदि ब्रह्मशिवसनकाऽऽदिवन्दनसंप्रदानभूतचरणो निरतिशयैश्वर्य्यादिगुणाश्रयः श्रीभगवान् पुरुषोत्तमस्तर्हि दीनानां तत्र प्रवेशस्याप्यसम्भवात् सर्वशरण्यत्वासिद्धिरितिचेन्न । तस्य वात्सल्यकारुण्यादिगुणसागरत्वेन भक्तपारतन्त्र्यस्वभावत्वादित्याह । भक्तेच्छयोपात्तसुचिन्त्यविग्रहादिति । भक्तानामिच्छा भक्तेच्छा तयोपात्तो व्यक्तीकृतो विश्वरूपादिसुचिन्त्यो विग्रहो येन स भक्तेच्छयोपात्तसुचिन्त्यविग्रहस्तस्मात् । यथार्ज्जुनादीच्छया विश्वरूपादिव्यक्तिः । तथाहि । एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर । द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम इत्यर्ज्जुनेन प्रार्थितः श्रीभगवान् कृष्णः, पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति प्रतिज्ञायार्जुनस्यैतेन चक्षुषा तद्रूपदर्शनानर्हतां मत्वा, दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमिति चक्षुः प्रदाय विश्वरूपं दर्शयामासेत्याह सञ्जयः—

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् । अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् । दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् । दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद् भासस्तस्य महात्मनः । तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा । अपश्यद् देवदेवस्य शरीरे पाण्डवस्तदा ।

किञ्च पश्यन् स्वयमप्याहार्ज्जुनः, पश्यामि देवाँस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् । अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् । नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपमित्यादिना । किञ्च, विश्वरूपं पश्यन्, दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो इति भीतः, आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद । विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिमिति स्वरूपप्रवृत्तिजिज्ञासुं च ज्ञात्वा आश्वास्य स्वरूपप्रवृत्तिं ज्ञापयामास, कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्त इत्यादिना । पुनश्च भगवतः कालस्वरूपं सर्वसेनासंहारार्थप्रवृत्तिं ज्ञात्वा पूर्वकृतापराधं सप्रणयमपि, स्थाने हृषीकेश इत्यारभ्य, नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते । सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वाऽपि । यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु । एकोऽथवाऽप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम् । पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः । तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमिशमीड्यम् । पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुमिति स्तुतिनतिसंबन्धं व्यञ्जयन् नानापराधक्षमापनपूर्वकं, तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवासेतिचतुर्भुजरूपदिदृक्षया प्रार्थितः श्रीभगवान्, मया प्रसन्नेन तवाऽर्ज्जुनेदं रूपं परं दर्शितमात्मयोगात् । तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वमिति स्वप्रसादस्यैवात्म-

दर्शनासाधारणहेतुत्वं, न वेदयज्ञाध्ययनैर्नदानैर्न च क्रियाभिर्न तपोभिरुग्रैः । एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीरेति । अन्येषां साधनानां सव्यभिचारित्वं प्रपञ्च्य, मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् । व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्येत्यादिना भीतं तमाश्वास्य चतुर्भुजरूपं पुनदर्शयामास । किञ्चाऽर्जुनोऽपि दृष्ट्वा हृष्ट आह । दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन । इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गत इत्यादि । यद्यपि जगत्कारणत्वविश्वात्मत्वब्रह्मादिसेव्यत्वमुक्तप्राप्यत्वशास्त्रयोनित्वसर्वज्ञानैश्वर्यशक्तिवैराग्यादिधर्मयोगाद् ब्रह्मरुद्रादीनामपि दुर्लभो भगवान् रमाकान्तस्तथापि भक्तिप्रपत्त्योर्व्याजमाहात्म्येन शरणागतवत्सलत्वकारुण्यदयादिविशेषगुणविवशतया प्रपन्नानां भक्तानां सुलभ एवेति भावः। उद्घुष्यते च भक्तिप्रपत्त्योर्माहात्म्यं श्रुतिस्मृतीतिहासपुराणादिवाक्यैः । तत्र भक्तिमाहात्म्यद्योतकं शास्त्रं यथा गोपालोत्तरतापनीये श्रीभगवद्वाक्यं ब्रह्माणं प्रति, यथा त्वं सह पुत्रैस्तु यथा रुद्रो गणैः सह । यथा श्रियाऽभियुक्तोऽहं तथा भक्तो मम प्रिय इति मन्त्रात् । नारसिंहमन्त्रराजव्याख्याने च, अथ कस्मादुच्यते मृत्युमृत्युरिति, यस्मात् स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयतीत्यादिश्रुतेः । भक्तिरेनैवं वर्द्धयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी इत्याद्याः श्रुतयः । नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा । भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तर । न वेदयज्ञाध्ययनैर्न दानैर्नच क्रियाभिर्न तपोभिरुग्रैः । एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर । भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते । पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यो मद्भक्तः स मे प्रियः । तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् । योगक्षेमं वहाम्यहम् । नारायणीये नरनारायणौ नारदं प्रति, नारदैतद्धि नौ सत्यं वचनं समुदाहृतम् । नास्य भक्तात् प्रियतरो लोके कश्चन विद्यते । यतः स्वयं दर्शितवान् स्वात्मानं च द्विजोत्तम । तत्र श्रीकृष्णोऽर्जुनं प्रति, चतुर्विधा मम जना भक्ता एवेति ये श्रुताः । तेषामेकान्तिनः श्रेष्ठा ये चैवाऽनन्यदेवताः । अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् । पुनस्तत्रैव सहोपनिषदान् वेदान् ये विप्राः सम्यगाश्रिताः । पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः । तेभ्यो विशिष्टां जानामि गतिं चैकान्तिनां नृणाम् । तत्रैव नरनारायणौ, धन्योऽस्यनुगृहीतोऽसि यत्ते दृष्टः स्वयं प्रभुः । न हि तं दृष्टवान् कश्चित् पद्मयोनिरपि स्वयम् । तत्रैव श्वेतद्वीपपतिर्नारदं प्रति, एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः । इदं मे समनुप्राप्ता मम दर्शनलालसाः । न च मां ते ददृशिरे न तु द्रक्ष्यति कश्चन । ऋते ह्येकान्तिकं चैषां त्वं चैवैकान्तिको ममेति । राजधर्मे भीष्मानुभवः । दाहो मोहः श्रमश्चैव क्लमो ग्लानिश्च माधव । तव प्रसादाद् वार्ष्णेय सद्यो व्यपगतानि मे । यच्च भूतं भविष्यं च भवच्च परमद्युते । तत् सर्वमनुपश्यामि पाणौ फलमिवाहितम् । उत्तरवाल्मीकीये सनत्कुमारो रावणं प्रति । न हि यज्ञफलैस्तात न तपोभिश्च सञ्चितैः । शक्यते भगवान् द्रष्टुं न दानेन न चेज्यया । तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैस्तत्परायणैः । शक्यते भगवान् द्रष्टुं ज्ञाननिर्धूतकल्मषैः । किञ्चानन्यभक्तानात्मानं ध्यायमानान्निरतिशयप्रीतियुक्तान् स्वयमपि ध्यायति भगवानिति स्वयमेवाह राजधर्मे युधिष्ठिरं प्रति । शरतल्पगतो भीष्मः शाम्य-

न्निव हुताशनः । मां ध्यायन् पुरुषव्याघ्र ततो मे तद्गतं मनः । एकीकृत्येन्द्रियग्रामं मनः संयम्य मेधया । शरणं मामुपागच्छत् ततो मे तद्गतं मनः । भीष्मं प्रति च, यतः खलु परा भक्तिर्मयि ते पुरुषर्षभ । ततो मया वपुर्दिव्यं तव भीष्म प्रदर्शितम् । न ह्यभक्ताय राजेन्द्र भक्तायाऽनृजवे न च । दर्शयाम्यहमात्मानं न चादान्ताय भारत । किञ्च वैष्णवे प्रह्लादं प्रति भगवद्वाक्यं, कुर्वतस्ते प्रसन्नोऽहं भक्तिमव्यभिचारिणीमिति । अथान्यान्यपि शतशो वाक्यान्यनुसन्धेयानि ।

अथ प्रपत्तिमाहात्म्यम् । अनेनैव प्रपन्नस्य भगवन्तं सनातनम् । तस्यानुबन्धाः पाप्मानः सर्वे नश्यन्ति तत्क्षणात् । कृतान्यनेन सर्वाणि तपांसि तपतां वर । सर्वतीर्थाः सर्वयज्ञाः सर्वदानानि तत्क्षणात् । कृतान्यनेन मोक्षश्च तस्य हस्ते न संशय इति । यद्येन कामकामेन संसाध्यं साधनान्तरैः । मुमुक्षुणा यत् सांख्येन योगेनापि च भक्तितः । प्राप्यते परमं धाम यतो नावर्त्तते यतिः । तेन तेनाप्यते तत्तन्न्यासेनैव महामुने । परमात्मा च तेनैव साध्यते पुरुषोत्तम इति । या वै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रय इत्यादि । ये च तद्भावितात्मानो ह्येकान्तित्वं समागताः । एतदभ्यधिकं तेषां यत्ते तं प्रविशन्त्युतेति नारायणीये भीष्मपर्वणि च । ये तु कृष्णं प्रपद्यन्ते न ते मुह्यन्ति मानवाः । भये महति मग्नानां त्राता नित्यं जनार्दनः । द्रौणे च ये प्रपन्ना हृषीकेशं न ते मुह्यन्ति कर्हिचित् । मात्स्ये पितरः । अपि स्यात् स कुलेऽस्माकं सर्वभावेन यो हरिम् । प्रयायाच्छरणं विष्णुं देवेशं मधुसूदनम् । कूर्मे, ब्रह्माणं च महादेवं देवाँश्चान्यान् स्वशक्तिभिः । मच्छक्तौ संस्थितान् बुद्ध्वा मामेव शरणं गत इति । एकान्तित्वं नाम एकस्मिन् श्रीभगवति विष्णौ अन्त उपायोपेय-

संबन्धरूपो निर्णयो विद्यते यस्य स एकान्ती तस्य भावस्तत्त्वम् । तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः। अहमेव गतिस्तेषांनिराशीः-कर्मकारिणामिति भगवद्वचनात् । सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषुदृश्यते । यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुरिति वैशम्पायनवचनात् । तसिद्धं ब्रह्मादीनां दुर्ल्लभत्वेऽपि अनन्याश्रयाणां सौलभ्यं श्रीपुरुषोत्तमस्य निरतिशयकारुण्यादियोगादिति । तच्चोक्तमधस्तात् । तथोक्तं नारायणीये । यद् ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् । शेषाश्च विबुधश्रेष्ठा दैत्यदानवराक्षसाः । नागाः सुपर्णा गन्धर्वाः सिद्धा राजर्षयश्च ये । हव्यं कव्यं च सततं विधियुक्तं प्रयुञ्जते । कृत्स्नं तु तस्य देवस्य चरणावुपतिष्ठते । या क्रिया संप्रयुक्ताश्च ह्येकान्तिगतिबुद्धिभिः । ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् । तत्रैव जनमेजयः । अहो ह्येकान्तिनः श्रेष्ठान् प्रीणाति भगवान् हरिः । विधिप्रयुक्तां पूजां च गृह्णाति भगवान् स्वयम् । एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदम् ।

ननु यद्येवं भूतं ह्येकान्तिनां माहात्म्यं तर्हि सर्वे एव किमिति एकान्तिनो न भवन्तीति चेन्न । जनानां राजसतामसबाहुल्येनाधर्मसंचितत्वात् । एकान्तित्वस्य च सात्त्विकाधिकारिकत्वेनात्यन्तदुर्ल्लभत्वाच्च । तथाहि नारायणीये वैशम्पायनः । एकान्तिनो हि पुरुषा दुर्ल्लभा बहवो नृप । यद्येकान्तिभिराकीर्णं जगत् स्यात् कुरुनन्दन । अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः । भवेत् कृतयुगप्राप्तिराशीःकर्मविवर्ज्जितैः । एष एकान्तधर्मस्ते कीर्तितो नृपसत्तम । मया गुरुप्रसादेन दुर्विज्ञेयोऽकृतात्मभिः । जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयो भवेन्मोक्षे च निश्चित इति । इतरे राजसैर्भावैस्तामसैश्च समावृताः । भविष्यन्ति द्विजश्रेष्ठ मच्छासनपराङ्मुखा इति भगवद्वचनम् । मनुष्याणां स-

ष्येषु कश्चिद् यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति च ।

ननु निरतिशयषाड्गुण्याद्यनन्तधर्माश्रयस्य किमिति भक्तपरतन्त्रत्वमितिचेन्न । को वा वेद, तदाशयस्यातिगूढत्वादित्याह । अविचिन्त्यसाशयादिति । आशयेन सह वर्त्तमानं साशयं तात्पर्यं ब्रह्मादिभिरप्यचिन्त्यम् अतर्क्यं साशयं तात्पर्यं यस्य सोऽविचिन्त्यसाशयस्तस्मात् । कोऽद्धा वेद यत आबभूव त्वं हि त्वां वेत्थ योऽसि सोऽसि, न ते विष्णोर्जायमानो न जातो देवस्य महिम्नः परमं तमाप । योऽस्याध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदि वा न वेद । न तस्य कश्चिद् पतिरस्ति लोके न वेदिता नैव च तस्य लिङ्गम् । न तं विदाथ य इमा जजान, यतो वाचो निवर्त्तन्ते, अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेत्यादिश्रुतिभ्यः । वेदाहं समतातीनि वर्त्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चनेति गीतायाम् । यं नायं भगवान् ब्रह्मा जानाति परमं पदम् । तं नताः स्म जगद्धाम सर्वं सर्वगताऽच्युतम् । यं न देवा न मुनयो न चाहं न च शङ्करः । जानाति परमेशस्य तद्विष्णोः परमं पदम् । तं नताः स्म जगद्धाम सर्वं सर्वगताच्युतम् । यं न देवा न मुनयो नचाहं नच शङ्करः । जानाति परमेशस्य तद्विष्णोः परमं पदम् । वाराहे च । प्रजापतिं च रुद्रं च सृजामि च हरामि च । केऽपि मां नैव जानन्ति मम मायाविमोहिता इति स्मृतेश्च । ननूदाहृतस्य शास्त्रस्य स्वरूपविषयकज्ञाननिषेधपरत्वात् कथमुक्तार्थे प्रामाण्यमितिचेन्न । कैमुत्यन्यायेन उक्तार्थेऽस्य सिद्धत्वात् । स्वरूपानुभवाभावे सुतरां तच्चेष्टितानुभव इति तात्पर्यात् । स्पष्टं चोक्तमेतन्नारायणीये, ब्रह्मादीनां सलोकानामृषीणां च महात्मनाम् । सांख्या-

नां योगिनां चापि यतीनामात्मवेदिनाम् । मनीषितं विजानाति केशवो न तु तस्य ते इति । उक्तशास्त्रस्य चेयत्तावच्छिन्नस्वरूपादिविषयकज्ञाननिषेधपरत्वं बोध्यम् । अन्यथा, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति विद्वत्तोक्तिविरोधः स्यादिति भावः । सोऽङ्ग वेद यदि वा न वेदेत्यत्र, यदि-वा-शब्दोऽवधारणार्थः । याथात्म्येन वेद जानात्येव सर्वज्ञत्वात् । यः सर्वज्ञः सर्ववित्तिदिति वाक्यान्तरात् । इयत्तावच्छेदेन तु न वेद । भगवत्स्वरूपगुणादीनामियत्ताशून्यत्वेनानन्तत्वात् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । स्पष्टार्थं चान्यत् । एवं पदारविन्दस्याङ्गत्वेऽप्यङ्गाङ्गिनोरभेदविवक्षयाऽचिन्त्यशक्त्यादिविशेषणोक्तिरविरुद्धानुसन्धेया । किञ्च । कृष्णपदारविन्दादित्यत्र पदशब्दग्रहो विग्रहयुक्तस्यैव भगवतः प्रपत्तव्यतां द्योतयति । अरविन्दशब्दश्च सौन्दर्य्यज्ञापकत्वेन तत्पदनखसौन्दर्य्यं ध्वनयति इति विवेकः ॥

अथ, न विना गुरुसम्बन्धं ज्ञानस्याधिगमः कृतः । गुरुः पारयिता तस्य ज्ञानं प्लवमिहोच्यते इति भारते शुकं प्रति जनकवाक्यात् सर्वस्यापि साधनजातस्य गुरूपसत्तिपूर्वकत्वाद् गुरूपसत्तिर्विधीयते । स गुरुमेवाभिगच्छेत् समित्पाणिः, आचार्य्यदेवो भव, यथा सौम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीयं तं ततो विजने विसृजेत् स यथा तत्र प्राङ् वोदङ् वाधराङ् वा विसृष्टस्तस्य यथाभिनहनं प्रमुच्य ब्रूयादेतां दिशं गन्धारा एनां दिशं व्रजेति, स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेव सम्पद्येतैवमेवेहाचार्य्यवान् पुरुषो वेदेत्यादिश्रुतिभ्यः । श्रीगुरुलक्षणं च श्रोत्रियं ब्रह्मनिष्ठं, त्रिषु वर्णेषु सम्भूतो मामेव शरणं गतः । नित्यनैमित्तिकपरो मदीयाराधने रतः । आत्मीयपरकीयेषु शमो देशिक उच्यते इति । आचार्य्यो वेदसम्पन्नो विष्णुभक्तो विमत्सर

मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयः शुचिः । गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्षणसम्पन्नो गुरुरित्यभिधीयते इति श्रुतिस्मृत्युक्तलक्षणमेव गुरुं समाश्रयेन्मुमुक्षुः । विपर्य्यये दोषस्मरणात् । भिन्ननावाश्रितः स्तब्धो यथा पारं न गच्छति । ज्ञानहीनं गुरुं प्राप्य कुतो मोक्षमवाप्नुयादित्यादिना ।

अथ शिष्यलक्षणम् । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः, परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तस्मै स विद्वान् उपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्वितायेति श्रुतिभ्यः। आस्तिको धर्मशीलश्च शीलवान् वैष्णवः शुचिः । गम्भीरश्चतुरो धीरः शिष्य इत्यभिधीयते इत्यादिस्मृतेः । तत्रादौ श्रीगुरुः शिष्यं जातिगुणादिना परीक्ष्य तस्मै गुरुपरम्परोपदेशपूर्वकं विद्यामुपदिशेत् । शिक्षायाः परीक्षापूर्वकत्वं विधीयते श्रीव्यासेन । नापरीक्षितचारित्रे विद्या देया कथञ्चन । यथा हि कनकं शुद्धं तापच्छेदनघर्षणैः । परीक्षेत तथा शिष्यानीक्षेत कुलगुणादिभिः । मोक्षधर्मे । परम्परोपदेशश्च स आचार्य्यवंशो ज्ञेयो भवति । आचार्य्याणामसावसौ येनाक्षरं परमं वेद सत्यं, प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्यादिश्रुतेः । परम्परामुपदिशेद् गुरूणां परमो गुरुः । अनुकाङ्क्षन् सदा शिष्यं गुरुरौरसपुत्रवत् । विद्यां समाहितो भूत्वा ग्राहयेदुपधिं विना । तथोपनिषदो विद्यां विश्वासज्ञानवर्द्धनीम् । अन्यामाध्यात्मिकीं विद्यां शिष्यावस्थानुरूपत इति स्मरणाच्च । अथ नमस्कारादिपूर्वकम् उक्तलक्षणाद् गुरोरुक्तलक्षणो मुमुक्षुः शास्त्रोक्तविधानेन शिक्षितां विद्यां गृह्णीयात् । नमस्कृत्य गुरुं दीर्घं प्रणामैस्त्रिभिरादृतः । तत्पादौ गृह्य मूर्ध्नि स्वे निधाय विधिनान्वितः । गृह्णीयान्मन्त्रराजं तं निधिकाङ्क्षीव निर्धनः । दत्वा तु दक्षिणां तस्मै यथाशक्ति यथाविधि । तमर्चयेद्

यथाकालं पाद्यं चास्य सदा चरेदिति स्मृतेः । अथोक्तेषु कर्मज्ञानादिषु साधनेषु असमर्थस्य यथा भगवदुपपत्तिरुक्ता तथोपपत्तेरज्ञानामनुष्ठानमत्यन्तदुष्करं ज्ञात्वा तत्राप्यसमर्थस्य श्रीगुर्वाज्ञानुवृत्तिर्विधीयते । यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः । आचार्यदेवो भवेत्यादिश्रुतिभिः । आचार्योपासनं शौचमित्यादि । अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणा इति भगवद्वचनाच्च गुर्वाज्ञानुवृत्तित्वं नाम देववच्छ्रीगुरोः शुश्रूषापरो भूत्वा तदाज्ञानुसारित्वम् । आत्मनः सर्वोपायानर्हतां मत्वा श्रीगुरुदेव एव ममोपायोपेयश्चेति व्यवसायदार्ढ्येन यथा बालः स्वहिताहितानभिज्ञो मातरमेव सर्वभावेनानुसरति, तन्माता च तं सर्वापद्भ्यो रक्षति, सर्वं योगक्षेमं वहति च तथैव स्वहिताहितं सर्वं त्यक्त्वा श्रीगुरुशुश्रूषारतो मुमुक्षुर्यदा भवेत् तदैव तस्य सर्वात्मना रक्षणं योगक्षेमं च करुणावरुणालयः श्रीगुरुः स्वयमेव करोतीति स्तनन्धयशिशुरोगनिवृत्त्यर्थं तन्मात्रौषधभक्षणादिवदित्यर्थः । तस्यानुवृत्तिप्रकारश्च, गुरुरेव परं ब्रह्म गुरुरेव परं धनम् । गुरुरेव परः कामो गुरुरेव परायणः । गुरुरेव परा विद्या गुरुरेव परा गतिः । अर्चनीयश्च वन्द्यश्च कीर्त्तनीयश्च सर्वदा । ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्चयेन्मुदा । उपायोपेयभावेन तमेव शरणं व्रजेत् । शरीरं चाऽसु विज्ञानं वासः कर्म गुणान् वमून् । गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृत इति जयदाख्यानसंहितायाम् । किञ्च । श्रीगुरुविमुखं पुरुषं श्रीपुरुषोत्तमोऽपि त्यजतीति तत्रैवोक्तम् । अतो गुर्वनुवृत्तिः सर्वात्मना कार्या । नारायणोऽपयाति गुरोः प्रच्युतस्य दुर्बुद्धेः । कमलं जलादपेतं शोषयति रविर्न तोषयति । श्रीविष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा । यो गुरौ

मानुषं भावमुभौ नरकपातिनौ । सामान्यतो विशेषांश्च तस्मै धर्मानशेषतः । आचिनोति स आचार्य्यस्तस्मै द्रुह्येन्न कर्हिचित् । गुशब्दस्त्वन्धकाराख्यो रुशब्दस्तन्निरोधकः । अन्धकारविरोधित्वाद् गुरुरित्यभिधीयते । गुरोश्च गुरवः सर्वे पूजनीया विशेषतः । गुरुदारासुतादौ च गुरुवद् वृत्तिमाचरेत् । किञ्चोक्तलक्षणो गुरुभक्तो मुमुक्षुः कदापि न त्याज्यः । शराणागतत्यागे दोषबाहुल्यस्मरणात् । परन्तु तस्य पूर्वोक्तानुवृत्तिमार्गभङ्गे सति तदर्थं भगवन्तं प्रार्थयेत् । तमपि पुनस्तस्यापराधं ज्ञापयेत् । स्वापराधज्ञाने यदि न बहु मन्येत तर्हि तस्य त्यागे न दोष इति विवेकः । यदि शिष्यः पतेन्मार्गात्तं प्रयत्नेन वारयेत् । श्रियः पत्युः पदाम्भोजे गुरुर्याचेत तद्धितम् । तेन सम्भाषणादीनि वर्जयेदनिवर्तने । न निःश्वासमपि व्यक्तं विसृजेद् गुरुसन्निधौ । गुरोर्यत्र परीवादो निन्दा चाऽपि प्रवर्त्तते । तत्र कर्णौ पिधातव्यौ गन्तव्यं वा ततोऽन्यतः । आचार्यस्य प्रसादेन मम सर्वमभीप्सितम् । प्राप्नुयामिति विश्वासो यस्याऽस्ति स सुखी भवेत् । येनैव गुरुणा यस्य न्यासविद्या प्रदीयते । तस्य वैकुण्ठदुग्धाब्धिद्वारका सर्व एव सः । ऐहिकामुष्मिकं सर्वं गुरुरष्टाक्षरप्रदः । इत्येवं ये न मन्यन्ते त्यक्तव्यास्ते मनीषिभिः । एकाक्षरप्रदातारमाचार्य्यं योऽवमन्यते । शुनो योनिशतं प्राप्य चाण्डालेष्वभिजायते इत्यादिभ्यः । एवं वृतस्य श्रीगुरुदेवताकस्य सनाथस्य पुरुषस्यैहिकामुष्मिकं सर्वं गुरुरेव करोति । श्रीगुर्वाज्ञापालकस्य कृत्यान्तरं नास्तीति भावः । तथाचाह वनपर्वणि सात्यकिः श्रीबलदेवं प्रति, ये नाथवन्तो हि भवन्ति लोके ते नात्मकर्माणि समारभन्ते । कार्येषु तेषां प्रभवन्ति नाथाः शैव्यादयो राम यथा ययातिरिति । किञ्च, गुर्वाज्ञानुवर्तनादेव सर्वेप्सितोपलब्धिर्भारते आद्यपर्वणि गुरुशिष्याख्याने श्रीभगवता सूत्र-

कृता व्यासेनैव निपुणं विस्तरेणैव वर्णिता तत्रैव द्रष्टव्या । पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् । आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेदित्यादिवाक्यानि अनुसन्धेयानि । किञ्च । सर्वेषामप्युपायानां श्रद्धापूर्वकत्वात् सात्त्विक्या श्रद्धया सर्वमनुष्ठेयम् । तथाचाम्नायते, श्रद्धया देयम् अश्रद्धयाऽदेयं श्रद्धयाऽग्निः समिन्धते इत्यादि । इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वित इति भीष्मोक्तेः । अश्रद्धया कृतस्याऽसुरभागित्वमप्युच्यते हरिवंशे श्रीकमनेन । अश्रोत्रियं श्राद्धमधीतमव्रतमदक्षिणं यज्ञमनृत्विजा हुतम् । अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्यसत्तमेति । गीयते चाऽश्रद्धया कृतस्य नैष्फल्यम् । अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत् प्रेत्य नो इहेति । श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरदित्यादि । अन्यान्यप्यनुसन्धेयानि ॥ ८ ॥

अथ भक्तियोगमाह

कृपाऽस्य दैन्यादियुजि प्रजायते
यया भवेत् प्रेमविशेषलक्षणा ॥
भक्तिर्ह्यनन्याधिपतेर्महात्मनः
सा चोत्तमा साधनरूपिका परा ॥ ९ ॥

कृपास्येति । अस्य निरतिशयस्वाभाविककारुण्यवात्सल्यक्षमासौहार्दसत्यप्रतिज्ञत्वादिगुणाब्धेः श्रीकृष्णस्य कृपा दैन्यादियुजि पुंसि प्रजायते इति योजना । उपाया नैव सिद्धयन्तीत्यपाया विविधास्तथा । इति या गर्वहानिस्तदैन्यं कार्पण्यमुच्यते इति वचनादैन्यं कार्पण्यमादि यस्यासौ दैन्यादिः । षडङ्गा पूर्वोक्ता शरणागतिस्तत्संपन्ने ह्यनन्यप्रपन्ने जने पूर्वोक्तोपायेषु प्रपत्तेरेव परा-

मर्शात्तस्याः प्राधान्योपायता सूचिता । प्रतिज्ञातं चैतत् स्वयमेव सत्यप्रतिज्ञेन भगवता । तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति । सत्यप्रतिज्ञत्वं च स्वस्य श्रीमुखेनैवोक्तं वनपर्वणि द्रौपदीं प्रति । पतेद् द्यौर्हिमवान् शीर्य्येत पृथिवी शकलीभवेत् । शुष्येत्तोयनिधिः कृष्णे ! न मे मोघं वचो भवेदिति । वाल्मीकीयारण्यकाण्डे च, अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः । तदवश्यं मया कार्य्यमृषीणां परिपालनम् । अनुक्तेनापि वैदेहि प्रतिज्ञायाऽथ किं पुनरिति । सत्यप्रतिज्ञत्वादिगुणाश्रयत्वेऽप्यशक्तस्य सर्वे गुणा ह्यकिञ्चित्करा इत्याशङ्क्याव्यावृत्तये विशिनष्टि अनन्याधिपतेरिति । अन्योऽधिपतिर्य्यस्य सोऽन्याधिपतिः । नान्याधिपतिरनन्याधिपतिरिति तस्य ।

तमीश्वराणां परमं महेश्वरं, तं देवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् । न तत्समोऽस्त्यभ्यधिकश्च दृश्यते । न तस्य कश्चित् पतिरस्ति लोके नचेशिता नैव च तस्य लिङ्गम् । न तस्य कश्चिज्जनिता नचाधिपः । स कारणं कारणाधिपाधिप इति । त्वं ब्रह्म परमं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् । आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे । एवमेतद्यथात्थ त्वमात्मानं परमेश्वर । भूतभावन भूतेश देवदेव जगत्पते । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः । यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जयेत्यादिश्रुतिस्मृतिभ्यः । अतिशयसाम्यानई-

स्वरूपगुणादिकस्येति यावत् । अत एव, महात्मन इति । महान् आत्मा स्वरूपं यस्येति यावत् । विश्वात्मत्वात् । अनेन सर्वजीवनिकायेङ्गितवेत्तृत्वमुक्तम् । अमौ माम् अमायया प्रपन्नो भजति, प्रपत्तिव्याजेन वा मां वञ्चयतीति प्रत्यक्षं पश्यतीति भावः । यद्वा महांश्चासावात्मा च तथा । तस्य महत्त्वं च, औदार्य्यक्षमावात्सल्यसौशील्यादिमहद्गुणाश्रयत्वम् । अनेन भक्तिप्रपत्त्यङ्गानुष्ठानानर्हाणां तद्व्याजमात्रेणाऽपि भजतां निरतिशयकारुण्यौदार्य्यक्षमादिगुणपरवशतया तेषां गुणदोषादीन् अनवकलय्य भक्तिप्रपत्तिफलप्रदातृत्वमुक्तं भवति । किञ्च । प्रपत्तियोगस्य संयोगपृथक्त्वन्यायेन स्वातन्त्र्योपायत्वं, भक्त्याद्युत्पादकत्वं चाऽविरुद्धम् । तत्र स्वतन्त्रोपायत्वं पूर्वमेवोक्तम् । भक्तिसाधनत्वं चेदानीमुच्यते । ययेति । यया प्रपत्त्युद्बोधितया भगवत्कृपया भक्तिर्भवेदिति सामान्योक्तिस्तल्लक्षणं च निष्कामतया भगवत्सेवनम् । तथाच श्रुतिः । भक्तिरस्य भजनमिति, तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमिति । व्याख्याता चेयं नारदपञ्चरात्रे, सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् । हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते इति । लिङ्गपुराणेऽपि । भज इत्येष वै धातुः सेवायां परिकीर्त्तितः । तस्मात् सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी । भजनं भक्तिरित्युक्तं वाङ्मनःकायकर्मभिरिति ।

प्रसङ्गाद्भक्तिविशेषा निरूप्यन्ते । सा च भक्तिर्द्विधा साधनरूपिका, फलरूपा चेति । अनेकजन्मानुष्ठितपुण्यपुञ्जोत्पन्नायाः साधनजन्यत्वात् साधनरूपिकेति विवेकः । तथाच जन्मान्तरसहस्रेषु तपोदानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते इति वचनात् । सा द्विधा, वैदिकपौराणिकादिभेदात् । तत्र वैदिकानुष्ठानरूपा मधुविद्याशाण्डिल्यविद्यासत्यविद्यादिः। तत्र

त्रैवर्णिकानामेवाधिकारस्तथोक्तमपशूद्राधिकरणे श्रीनिवासाचार्यचरणैः । पुराणोक्तरीत्या भगवदाराधनपरता द्वितीया । तत्र शूद्रोऽप्यधिक्रियते । यथा पाद्मे । सर्वेऽधिकारिणो ह्यत्र हरिभक्तौ यथा नृप इति । यद्वा पराभक्तेः साधनभूता साधनरूपिका । यथा पञ्चरात्रे सुरर्षे विहिता शास्त्रे हरिमुद्दिश्य या क्रिया। सैव भक्तिरिति प्रोक्ता यया भक्तिः परा भवेदिति । तत्र सामान्यक्रियाविधानात् सर्वेऽप्यधिक्रियन्ते । तथाच गीयते स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु । यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इत्यादि । अत्र, स्वे स्वे इति, मानव इति सामान्यपदप्रयोगादस्या अधिकारिणः सर्वसामान्यत्वं सूचितम् ।

अथ कर्मयोगाद्यनुष्ठानरूपाज्ञापालनव्याजप्रसन्नेन भगवतादीयमानात्वम्पदार्थविषयकात्मज्ञानोत्तरभाविनी भक्तिः फलरूपोच्यते । सैव परा प्रेमलक्षणा चेत्यादिशब्देनाभिधीयते । रूपादिविषयकेन्द्रियवृत्तिवदनवच्छिन्नस्वाभाविकभगवत्स्वरूपगुणादिविषयिका यावदात्मवृत्तिर्मनोवृत्तिः । २ । या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्नापसर्प्पतु इति । सैव ध्रुवा स्मृतिरुच्यते । अहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति । श्रूयते । सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते । मच्चिता मद्गतप्राणा बोधयन्तः परस्परम् । कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति चेति भगवदुक्तेः । तस्या ज्ञानोत्तरभावित्वं च स्वयं गीतं श्रीमुखेन । ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । सैव श्रीभगवत्स्वरूपादिविषयकप्रत्यक्षानु-

भवहेतुरपि तत्रैवोच्यते । भक्त्या मामभिजानाति यावान् यश्चाऽस्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् इति । प्रवेशोऽत्र स्वस्य चेतनाचेतनात्मकविश्वस्य च ब्रह्मात्मकानुभवपूर्वकविश्वरूपे भगवति तच्छक्त्यात्मनाऽवस्थानम् । तत्त्वं च श्रीपार्थसारथिना दर्शितम् अर्जुनाय । येन तथैवानुभूय विस्तरेणोक्तम् । पश्यामि देवाँस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगाँश्च दिव्यानित्यादिना । एतदुक्तं भवति । विश्वरूपब्रह्मणः श्रीपुरुषोत्तमस्य विश्वात्मत्वेन विश्वजगतोऽधिकरणत्वाद् विश्वं जगत् तत्राऽवतिष्ठते शक्त्यात्मना । विष्णुधर्मोत्तरे, ब्रह्मा शम्भुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः । एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा । जगत्कार्यावसाने तु वियुज्यन्ते स्वतेजसेति । परापरात्मकशक्तिरूपत्वाच्च विश्वस्येति निर्विवादः । तथाच गीयते । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगदिति । तथैव सर्वाधिकारिणामधिकाररूपाः शक्तयस्तस्यैव तत्रैव तिष्ठन्ति । सृष्टिसमये तत्तदधिकारार्हाणां ब्राह्मरौद्रादिपदारोहणयोग्यानां तत्तज्जगत्स्रष्टृत्वसंहर्तृत्वादिशक्तिभिर्युनक्ति । प्रलये च तान् विश्वाधिकारिणस्ताभिर्वियुनक्ति । परं तु सर्वावस्थानस्य सार्वादकत्वाविशेष एव । तथा मुक्तानामपि विश्वरूपे भगवति तदात्मकतयाऽवस्थानमविरुद्धम् । स एव भगवद्भावापत्तिलक्षणमोक्षः सायुज्यशब्देनाऽप्युच्यते । नच स्वरूपैक्यं सायुज्यमिति वाच्यम् । भेदस्यापि श्रवणात् । जुष्टं यदा पश्यत्यन्यमीशं तन्महिमानमिति वीतशोकः, पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेतीति भेदज्ञानान्मोक्षश्रवणान्मोक्षेऽपि भेद उक्तः, तन्महिमानमिति इत्यनेन । स्पष्टं चान्यत्र । निरञ्जनः परमं साम्यमुपैति । व्या-

ख्यातं श्रीमुखेनैतद्वाक्यं, मम साधर्म्यमागता इति । यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति । आह च श्रीपराशरः । निरस्तातिशयाह्लाद सुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तान्त्यन्तिकी मतेति । किञ्च सायुज्यशब्दस्य स्वरूपैकत्वेऽभ्युपगते, एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतामाप्नोतीति श्रुतिविरोधापत्तेः । न हि युगपत् क्रमेण वा अनेकदेवतासायुज्यसिद्धिः । एकेनैक्यापत्तौ पुनरन्यैः कथमैक्यमापद्यते । ऐक्यापन्नस्य पुनर्भेदासंभवात् । न च ब्रह्मविद् ब्रह्मैव भवतीति साधारणश्रुतेरैक्यविधानश्रवणादिति वाच्यम् । ब्रह्मात्मकत्वेन तत्त्वोपदेशस्याविरुद्धत्वात् । तच्चोक्तं पूर्वमेव अन्यथा ब्रह्मविदाप्नोति परमिति कर्मकर्तृव्यपदेशव्याकोपात् । अलं विस्तरेण । किञ्चोक्तलक्षणाया भक्तेः सत्सङ्गमूलत्वात् सत्सङ्गो नियतकर्मवद्यावन्मनोनैश्चल्यम् आवश्यकतयोक्तलक्षणभक्तीप्सुभिः कर्त्तव्यः । सतां लक्षणं च, भगवद्दिदृक्षातृणीकृतसर्वपुरुषार्थकत्वे सति भगवदाज्ञाविरुद्धाचारशून्यत्वं, तन्नियोगकैङ्कर्य्यपुरुषार्थपरत्वे सति अन्यपुरुषार्थेच्छाकालुष्याभावत्वं वा । यथा । पाद्मे कार्तिकमाहात्म्ये । वरं देव मोक्षं न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह । इदं ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरास्तां किमन्यैः । कुबेरात्मजौ बद्धमूर्त्यैव यद्वत् त्वया मोचितौ भक्तिभाजौ कृतौ च । तथा प्रेमभक्तिं स्वकां मे प्रयच्छ, न मोक्षे ग्रहो मेऽस्ति दामोदरेह । हयशीर्षीयनारायणव्यूहस्तवे, न धर्मं काममर्थं वा मोक्षं वा वरदेश्वर । प्रार्थये तव पादाब्जे दास्यमेवाभिकामये । पुनस्तत्रैव । पुनःपुनर्वरान् दित्सुर्विष्णुर्मुक्तिं न याचितः । भक्तिरेव वृता येन प्रह्लादं तं नमाम्यहम् । वैष्णवे प्रह्लादः । कृतकृत्योऽस्मि भगवन् वरेणानेन यत् त्वयि । भवत्री त्वत्प्रसादेन भ-

क्तिरव्यभिचारिणी । धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता । समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि । तत्रैव बालकान् प्रति । तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते । समाश्रिताद् ब्रह्मतरोरनन्तान्निःसंशयं यास्यथ वै महत्फलम् इत्युक्तिस्तु तेषां प्रवर्त्तनार्थिका, न स्वेच्छाविषयिकेति बोध्यम् । अन्यथा पूर्वापरवाक्यविरोधापत्तेः । पञ्चरात्रे च । धर्मार्थिकाममोक्षेषु नेच्छा मम कदाचन । त्वत्पादपङ्कजस्याधो जीवितं दीयतां मम । मोक्षं सालोक्यसामीप्यं प्रार्थये न धराधर । इच्छामीह महाभाग कारुण्यं तव सुव्रतेत्यादि । एतादृशानामेकान्तभक्तानां दर्शनादिनैव पुरुषार्थाप्तिः, किं पुनर्दीर्घकालसंगत्येति कैमुत्यन्यायमाह शास्त्रं तेषां दौर्लभ्यं द्योतयद् । यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रतिष्ठिता । तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः । पौष्करे । दुर्लभा भगवद्योगभाविनो भुवि मानवाः । तद्दर्शनात् तदालापात् सुलभं शाश्वतं पदमिति । नैतदाश्चर्यमत्र शङ्कनीयम् । तत्र पुरुषोत्तमस्य सदैव सान्निध्यश्रवणात् । सन्धिं च यागं सन्धत्ते ब्रह्मणेदृशो रमते तस्मिन् नु जीर्णे शयाने नैनं जहात्यहःसु पूर्वेष्विति तैत्तिरीयाः । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । न त्यजेयं कथञ्चन । यन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः । विषयत्यागिनस्तेषां विज्ञेयं च तदन्तिक इति । नारायणेति यस्याऽस्ये वर्त्तते नाममङ्गलम् । नारायणस्तमन्वास्ते वत्सं गौरिव वत्सलेति स्मृतयश्चेति । च्यवननहुषसंवादे च । संभाषो दर्शनस्पर्शः कीर्तनं स्मरणं तथा । पावनानि किलैतानि साधूनामिति शुश्रुम । सेव्याः श्रेयोर्थिभिः सन्तः पुण्यतीर्थफलोपमाः । क्षणोपासनयोगोऽपि न तेषां निष्फलो भवेत् । साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः । कालेन फलते तीर्थं सद्यः साधुसमागम इति । सद्भिरेव

सहासीत सद्भिः कुर्वीतसङ्गमम् । सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेदिति । अहन्यहनि धर्मस्य योनिः साधुसमागमः । मोहजालस्य योनिर्हि मूढैः सह समागम इत्यादयनुसन्धेयाः । किञ्चोक्तलक्षणा भागवता भगवतोऽप्याधिक्येन सेवनीयाः । मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत् । तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषत इति भगवदुक्तेः । तस्माद्विष्णुप्रसादाय वैष्णवान् परितोषयेत् । प्रसादसुमुखो विष्णुस्तेनैव स्यान्न संशय इति व्यासवचनात् । सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम् । न संशयस्तु तद्भक्तपरिचर्य्यारतात्मनाम् । केवलं भगवत्पादसेवया निर्मलं मनः । न जायते तथा नित्यतद्भक्तचरणार्चनादिति शाण्डिल्यस्मृतेश्च । किञ्च, अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहंकार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथेति । एतेषां सर्वसाधनौपयिकत्वात् पूर्वोक्तलक्षणमुमुक्षुणाऽभ्युपगन्तव्योऽमानित्वादिरिति ॥ ९ ॥

इति श्रीभगवत्पुरुषोत्तमाचार्य्यविरचितायां वेदान्तरत्नमञ्जूषायां
सिद्धान्तविष्टत्तौ साधनसंग्रहाधारो नाम
तृतीयकोष्ठिका समाप्ता ॥ ३ ॥

एवं तावत् पूर्वस्मिन् प्रकरणे साधनकदम्बः संग्रहेण निरूपितः । इदानीमत्र फलविवक्षया सर्वशास्त्रार्थं संगृह्णन् पूर्वप्रतिपादितमर्थं संग्रहेण संस्मारयति अल्पबुद्धीनामुपकारार्थं भगवान् ग्रन्थकारः—

उपास्यरूपं तदुपासकस्य च
कृपाफलं भक्तिरसस्ततः परम् ॥
विरोधिनो रूपमथैतदाप्ते-
र्ज्ञेया इमेऽर्था अपि पञ्चसाधुभिः ॥ १० ॥

उपास्यरूपमित्यादि । इमे पञ्चाप्यर्थाः साधुर्भिज्ञेया इत्यन्वयः । तत्रोपास्यस्य भगवतः श्रीपुरुषोत्तमस्य रूपं स्वाभाविकाचिन्त्यानन्तापरिसंख्येययावदात्मवृत्तिसार्वज्ञादिवात्सल्यकारुण्यसौशील्यादिकल्याणगुणाश्रयत्वं सर्वशरण्यत्वं जगज्जन्मादिकारणत्वं शास्त्रयोनित्वं मोक्षप्रदातृत्वं मुक्तप्राप्यत्वं सर्वोपास्यत्वं सर्वनियन्तृत्वं विश्वात्मत्वम् अतिशयसाम्यानर्हमाहिमैश्वर्य्यत्वम् अनन्तानवद्यप्रकाशात्मकनिरतिशयमार्दवयौवनसौन्दर्य्यादिदिव्यगुणनिलययोगिध्येयदिव्यमङ्गलविग्रहवत्त्वं चेति, स्वभावतोऽपास्तसमस्तदोषमित्यादिना प्रतिपादितम् । १ । तदुपासकस्येति । तस्य भगवत उपासको यो जीवात्मकदम्बस्तस्य रूपमिति शेषः । देहेन्द्रियमनःप्राणधीभ्यो विलक्षणत्वं, ज्ञानस्वरूपत्वे सति ज्ञानाश्रयत्वं, श्रीभगवदायत्तस्वरूस्थितिप्रवृत्तिकत्वं प्रतिक्षेत्रभिन्नत्वमणुपरिमाणकत्वं भगवत्प्रपन्नत्वादि । तदप्युक्तम्—ज्ञानस्वरूपमित्यादिना २ । कृपाफलमिति । भगवत्कृपायाः फलं मोक्षलक्षणं सर्वकर्मध्वंसाभावपूर्वकसमस्तनिःशेषाऽविद्यानिवृत्त्यात्मकपरिपूर्णयावदात्मभाविब्रह्मस्वरूपादिविषयकानुभूतिसन्ततिर्मुक्तिरिति तदेव भगवद्भावापत्तिसायुज्यसाम्यादिशब्दैरभिधीयते। आह चैवं

श्रीपराशरः । निरस्तातिशयाह्लादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मतेति । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति श्रुतेः । ३ । भक्तिरस इति । भक्ते रसः प्रेमानन्दः फलरूपा भक्तिरिति यावत् । तथा पञ्चरात्रे, मनोगतिरविच्छिन्ना हरिप्रेमपरिप्लुता । अभिसन्धिविनिर्मुक्ता भक्तिर्विष्णुवशंकरीति । यद्वा भक्तिरसः । भक्त्या रस्यतेऽनुभूयते इति श्रीभगवत्साक्षात्कारानुभवो भक्तिरेनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसीति श्रुतेः । भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनेति गानाच्च । उपलक्षणं चैतत् सर्वोपायानां कर्मज्ञानभक्तिप्रपत्त्यादिरूपणामिति यावत् । अनेन भगवद्भावापत्तिलक्षणमोक्षप्राप्तिक्रमो विवक्षितः । तथाहि प्रथमं जायमाने पुंसि भगवत्कृपाकटाक्षस्ततो जन्मनैव सात्त्विको भूत्वा मुमुक्षुः स्यात् । तथा च नारायणीये । जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः । पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसातमसाचैव मानसंसमभिप्लुतमिति । मुमुक्षायां च सत्यां तत्साधने यतते । ततः कर्मज्ञानादिसाधनेनाप्याराधितः पुरुषोत्तमः प्रसीदति । परभक्तिपरज्ञानयोरेकतरं व्याजीकृत्य आत्मानं दर्शयति तस्मै मुमुक्षवे । ततः श्रीभगवत्साक्षात्कारानुभवेन तद्भावापन्नो भवतीति संक्षेपः । ज्ञानभक्तिमतामेव भगवत्प्रेष्ठत्वेन तत्प्रसादजन्यसाक्षात्कारेण मोक्षभागित्वमिति भावः । तथा च गीयते भगवता, तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । ज्ञानी त्वात्मैव मे मतम् । सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रिय इति । शुभाशुभपरित्यागी भक्तिमान् मे प्रियो नर इत्यादि । यस्य देवे परा भक्तिरिति श्रुतेः । स एव भगवत्प्रसादविषयः । कुर्वतस्ते प्रसन्नोऽहं भक्ति-

मभिचारिणीमिति स्मरणात् । तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतमिति । सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययमिति। यमेवैष वृणुते तेन लभ्यः, तस्यैष आत्मा वृणुते तनुं स्वाम् । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीति श्रुतिस्मृतिभ्यः । एतच्च श्रीनिवासाचार्य्यचरणैः श्रीवेदान्तपारिजातसौरभभाष्ये निगदभाषितं, नात्र विस्तार्य्यते । ४ । अथैतदाप्तेर्विरोधिनो रूपमिति । एतस्य श्रीरमाकान्तस्य भगवतः प्राप्तेर्विरोधिनो रूपं, विरोधि द्विविधम् । सामान्यविशेषभेदात् । तत्र विशेषा उच्यन्ते । आत्मस्वरूपान्यथाभावदार्ढ्यहेतुत्वात् ।

तत्र तावत् स्वस्वरूपज्ञाने विरोधिनो ह्यात्मज्ञानद्वारा भगवत्प्राप्तिप्रतिबन्धको देहेन्द्रियमनोबुद्धिष्वनात्मस्वाऽऽत्माऽध्यवसायः। भगवन्तं गुरुं चेति ह्यात्मनोऽन्यपारतन्त्र्याभिमानः। आत्मनो भगवदीयत्वेऽसंभावनादि । श्रुतिस्मृत्यात्मकभगवदीयाज्ञोपेक्षा । अन्यदेवतार्चनवन्दननमस्कारादि। असच्छास्त्राभिलाषा। आत्मस्वान्त्र्यभावनम् । अहङ्काररममकारभावदार्ढ्यं चेत्येवमादयः । तथाच असुर्या नाम ते लोका अन्धेन तमसा वृताः । ताँस्ते प्रेत्याऽभिगच्छन्ति ये के चात्महनो जनाः । नचेदवेदीन्महती विनष्टिरित्यादिश्रुतेः । योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा इत्यादिस्मृतेश्च । १ । किञ्च भगवति देवतान्तरसाम्यभावः । ब्रह्मादिदेवतान्तरवर्गे परत्वबुद्धिः । श्रीभगवदवतारेषु मानुष्यति-

र्यस्कादिभावः। भगवदर्चाविग्रहेषु श्रीशालिग्रामादिषु पाषाण-लोहमयत्वानीशत्वाचेतनत्वादिभावः। भगवदीयमन्त्रादौ शब्दसा-मान्यभावः। भगवदीयगाथायां लौकिकाख्यानसादृश्यकल्पना। अनन्तानवद्यस्वाभाविकाचिन्त्ययावदात्मभाविकल्याणगुणाकरेपर-ब्रह्मणि श्रीवासुदेवे निर्गुणत्वमायिकगुणवत्त्वादिभावना चेत्यादयो भगवत्स्वरूपतिरोधानेन तत्प्राप्तिप्रतिबन्धकाः। यो वै स्वां देवता-मतियजति परस्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ इत्यादि-श्रुतेः। प्रजापतिस्मृतौ। नारायणं परित्यज्य हृदिस्थं प्रभुमीश्वरम्। योऽन्यमर्चयते देवं परबुद्ध्या स पापभाक्। भारते च सप्तर्षिसंवादे विष्णुं ब्रह्मण्यदेवेशं देवदेवं जनार्दनम्। त्रैलोक्यस्थितिसंहारसृष्टिहेतुं निरञ्जनम्। आधातारं विधातारं सन्धातारं जगद्गुरुम्। विहाय स भज-त्यन्यं विषस्तैन्यं करोति य इत्यादि। अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तो ममाव्ययमनुत्तमम्। मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इति। यो विष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा। यो गुरौ मानुषं भावमुभौ नरकपातिनाविति स्मृतेः। न तत्स-मश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। यः सर्वज्ञः सर्ववित्। अनन्तकल्याणगुणात्मको-ऽसावित्यादिप्रमाणानि क्रमेणात्रानुसन्धेयानि। २। किञ्च, स्वदो-षबाहुल्यानुसन्धानेन भगवति भारपातभिया तत्प्रपत्त्याद्युपाये लाघ-वकल्पना। प्रपत्तव्ये विश्वासाभावः। साधनान्तरनिष्ठा। मन्त्रा-न्तरपरिग्रहः। श्रीभगवन्मन्त्रजपपूजादिलक्षणकैङ्कर्यात्कामान्तरा-भिलाषा। भगवदाज्ञापालनरूपस्वधर्माचारलक्षणपरिचर्यायां स्व-पुरुषार्थसाधनत्वाभिमानः। श्रीभगवद्रूपे बहिर्यामिणि गुरौ मर्त्यबु-

द्धिः । तत्रैव गौरवखिलत्वादयश्चोपायहानिद्वारा तत्प्राप्तिप्रतिबन्धकाः । उपायनाशहेतुत्वात् । एतेषां च श्रीगुरौ गौरवविश्वासाद्यभावमूलकक्रुतघ्नताहेतुकत्वात् सर्वेषां गुरुशिक्षितत्वेन गुरुभक्तिनाशान्नाशः गुरुभक्तेरुपायस्य च व्याप्तेरव्यभिचारश्रवणात् । यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इत्यादिसावधारणश्रुतेः । तस्माद्गुरौ नान्यथाभाव आरोपणीयः । तथा च गुरुरेव परं ब्रह्म गुरुरेव परा गतिः । स हि विद्यां जनयति तच्छ्रेष्ठं जन्म तस्मै न द्रुह्येत्कदाचनेति श्रुतेः । एकाक्षरप्रदातारमाचार्य्यं योऽवमन्यते । शुनो योनिशतं प्राप्य चाण्डालेषु प्रजायते । यो विष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा । यो गुरौ मानुषं भावमुभौ नरकपानिनावित्यादिस्मृतेश्च । ३ । किञ्च धर्मादिवर्गे पुरुषार्थबुद्ध्या तत्प्राप्तीप्सा, भगवत्परिचर्य्यादिक्रियानुष्ठाने स्वस्वातन्त्र्यभावना । यथेष्टाचारेण शास्त्रविरुद्धतया प्रवृत्तिश्चेत्येते फलविरोधितया भगवत्प्राप्तिप्रतिबन्धकाः । अन्नं पानं धनं वस्त्रमायुरैश्वर्य्यमास्पदम् । आपद्यपि न याचेत पूजकः पुरुषोत्तमम् । नाप्रसन्नो ददाम्येतद् याचितोऽपि दिने दिने । अयाचितोऽपि तत्सर्वं प्रसन्नो विदधाम्यहम् । याचितोऽपि सदा भक्तैर्नाहितं कारयेद्धरिः । बालमग्नौ पतन्तं तु माता किं न निवारयेत् । तत्पादभक्तिज्ञानाभ्यां फलमन्यत्कदाचन । न याचेत् पुरुषो विष्णुं याचनान्नश्यति ध्रुवम् । अहममरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः । हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयने ममापि विष्णुः । वेदोक्तं ये परित्यज्य धर्ममन्यं प्रकुर्वते । तत्सर्वं तव दैत्येन्द्र मत्प्रसादाद् भविष्यति । यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् । तस्माच्छास्त्रं प्रमाणं ते कार्य्याकार्य्यव्यवस्थितौ । ज्ञात्वा शास्त्र-

विधानोक्तं कर्म कर्तुमिहार्हसीत्यादिवचनेभ्यः । ४ । किञ्च देहादौ बहुकालावस्थानेच्छा, श्रीभगवतो भागवतानां चाभिजात्याद्यभिमानेन बुद्धिपूर्वकावज्ञाद्यपराधाचरणं ह्यसतां सङ्गतिश्च सद्यः साक्षात् प्रतिबन्धका निरयप्राप्तिहेतवो महता प्रयत्नेन वर्जनीयाः । नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतिक्षेत निर्देशं भृतको यथा । प्रायशः पापकारित्वान्मृत्योरुद्विजते जनः । कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिमिति व्यासोक्तेः । न च मां योऽभ्यसूयति इति गीतायाम् । हरिवंशे श्रीवामनो बलिं प्रति, पुण्यं मद्द्वेषिणां यच्च मद्भक्तद्वेषिणां तथा । कथासु मम दैत्येश कथ्यमानासु तत्र वै । अश्रृण्वन् यो नरो गच्छेत् तस्य संवत्सरार्जितम् । यत्नेन महता तात तत्पुण्यं ते भविष्यतीति । वनपर्वणि दुर्वासाः शिष्यान् प्रति । वृथा पापेन राजर्षेरपराधः कृतो महान् । मास्मानक्षुधान् दृष्ट्वा पाण्डवाः क्षुरचक्षुषा । स्मृत्वाऽनुभावं राजर्षेरम्बरीषस्य धीमतः । बिभेमि सुतरां विप्रा हरिपादाश्रयाज्जनात् । पाण्डवाश्च महात्मानः सर्वे धर्मपरायणाः । सदाचारता नित्यं वासुदेवपरायणाः । क्रुद्धास्ते निर्दहेयुर्वै तूलराशिमिवानलः । तत एतानदृष्ट्वैव शिष्याः शीघ्रं पलायतेति । वैष्णवे प्रह्लादः । मयि दोषाऽनुबन्धोऽभूत्संस्तुतावुद्यते तव । मत्पितुस्तत्कृतं पापं देव तस्य विनश्यतु । त्वयि भक्तिमतो द्वेषादघं तत्संभवं च यत् । त्वत्प्रसादात् प्रभो सर्वं तेन मुच्येते मे पितेति । नेदंविद अनिदंविदान् समुदिशेन्न सह भुञ्जीत नावसथमाविश्यादिति बह्वृचां समाम्नायः । कात्यायनसंहितायाम् । वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसम् । विष्णुरहस्ये । आलिङ्गनं वरं मन्ये व्यालव्याघ्रजलौकसाम् । न सङ्गः शल्ययुक्तानां नानादेवोपसेविनाम् । अन्यत्रापि, शैवान् पाशुपतान् स्पृष्ट्वा लौकायतिक-

नास्तिकान् । अकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत् । शाण्डिल्यस्मृतौ च । मूढैः पापरतैः क्रूरैः सदागमपराङ्मुखैः । संबन्धं नाचरेद् भक्तो नश्यते तैस्तु संगमात् । पितृगीते च । मा जनिष्ट स नो वंशे जातो वा प्राग्विनश्यताम् । आजन्ममरणं यस्य वासुदेवो न दैवतमिति । विष्णुपुराणे च । पुसां जरामरणमौढ्यवतां वृथैव मोघाशिनामखिलशौचबहिष्कृतानाम् । तोयप्रदानपितृपिण्डनिराकृतानां संभाषणादपि नरा नरकं प्रयान्ति । पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् । धर्मध्वजी सदा लुब्धश्छाम्भिको लोकदाम्भिकः । वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः । अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकवृत्तिचरो द्विज इति । मूर्खाश्च पण्डितम्मन्या अधर्मा धार्मिका इव । धर्मयुक्तान् प्रबाधन्ते साधूनां लिङ्गमाश्रिता इति शाण्डिल्यवचनादित्याद्यन्यदपि शास्त्रमत्रानुसंधेयम् ॥

अथ सामान्यभूता उच्यन्ते । तत्र मर्यादोल्लङ्घनं, श्रुतिस्मृती मर्मवाङ्मे इति । स्वोचितधर्मत्यागो, वर्णान्तरोचितधर्माचारश्च । नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्तितः । ऋग्यजुःसामसंज्ञेयं त्रयीवर्णावृतिर्द्विज । एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः । ब्रह्मचारिगृहस्थश्च वानप्रस्थस्तथाऽऽश्रमी । परिव्राट् च चतुर्थोऽत्र पञ्चमो नोपपद्यते । संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत् कुरुते कर्म न तस्य फलभाग् भवेत् । नास्तिक्यपरमाश्चैव केचिद्धर्मविलोपकाः । भविष्यन्ति नरा मूढा मन्दाः पण्डितमानिनः । वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यत् तत्तोषकारणम् । वेदोक्तं ये परित्यज्य धर्म-

मन्यं प्रकुर्वते। तत्सर्वं तव दैत्येन्द्र मत्प्रसादाद् भविष्यतीत्यादिवाक्येभ्योऽन्वयव्यतिरेकगर्भितेभ्यः। कृतघ्नत्वं तथाह मनुः। गोघ्ने चैव सुरापे च चौरे भग्नव्रते तथा। निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः। सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये। तान् मृतानपि क्रव्यादाः कृतघ्नान् नोपभुञ्जते इत्यादि। मानुष्यं लब्ध्वा तस्य निरर्थकं शूकरादिवन्नाशनम्। मानुष्यं प्राप्य लोकेऽस्मिन् मूको वा बधिरोऽपि वा। नापक्रामति संसारात् स खलु ब्रह्महा भवेत्। वाराहे च। लब्ध्वाऽत्र मानुषं देहं पञ्चभूतसमन्वितम्। मामेव न प्रपद्यन्ते ततो दुःखतरं नु किम्। नारसिंहे च। शुभमिदमुपलभ्य मानुषत्वं सुकृतशतेन वृथेन्द्रियार्थहेतोः। रचयति कुरुते न मोक्षमार्गं स दहति चन्दनमाशु भस्महेतोरिति। स्ववीर्य्यविक्रयणं च। यथा स्ववान्तमश्नाति श्वा वै नित्यं स्वभूतये। एवं ते वान्तमश्नन्ति स्ववीर्य्यस्योपसेचनादिति सनत्सुजातवचनात्। तच्च द्विविधं बाह्याभ्यन्तरभेदात्। बाह्यं परस्त्रीगमनादि। कृष्णाजिनपरिग्राही रेतसश्चैव विक्रयी। गजच्छायानुभोक्ता च न भूयः पुरुषो भवेदित्यादि। द्वितीयं विद्यादिगुणविक्रयणम्। पण्डितैरर्थकार्पण्यात् पण्यस्त्रीभिरिव स्वयम्। आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृत इत्यादिस्मृतेः। विद्याबलेन जिगीषया ब्राह्मणाद्यपमानम्। वादेन ब्राह्मणं जित्वा हृष्टो भवति यो द्विजः। श्मशाने पादपः स स्याद् गृध्रकङ्कनिषेवितः। गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः। अरण्ये निर्जले स्थाने स भवेद् ब्रह्मराक्षस इति। भगवदाराधनात् प्राग्भक्षणपानादि। यो मोहादथवाऽऽलस्यादकृत्वा देवतार्चनम्। भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते। संन्यासादिविधिं विहाय वैराग्यहीनैः पुरुषद्वेषादिहेतुना मातृपितृपरित्यागः। पितरं मातरं वापि तथा

दत्ताभयं सुतम्।त्यजेच्च तरुणीं भार्यां तं विद्याद्ब्रह्मघातकम् ।किञ्च,विद्याचौरो गुरुद्रोही वेदेश्वरविदूषकः।तएते बहुपाप्मानः सद्यो दण्डया इति श्रुतिः । परद्रोहेष्वभिध्यानं मनसाऽनिष्टचिन्तनम् । वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम् । पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः । अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् । अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च शारीरं त्रिविधं स्मृतम् इत्यादीन्यन्यान्यप्यूहनीयानि विरोधिरूपाणि । तानि च प्रपत्तिचिन्तामणौ स्मृतानि । आसुरी संपच्च । तथा च गीयते, द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु । प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत् कामहैतुकम् । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः । काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः । मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः । चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः । कामोपभोगपरमा एतावदिति निश्चिताः । आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् । इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् । असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी । आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः । अनेकचित्तविभ्रान्ता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ । आत्मसंभाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् । अहंकारं बलं दर्पं कामं

क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् । त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् । एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः । आचारत्यात्मनः श्रेयस्ततो याति परां गतिमित्यादिना । अत्र च, दैवीसंपद्विमोक्षाय निबन्धायाऽऽसुरी मता इति फलसहितं संपद्द्वयमुक्रम्य, दैवीं संपदमनूद्यासुरीं संपदमभिजातानामासुराणां, प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा इत्यादिना लक्षणं निरूप्य, ईहन्ते कामभोगार्थमन्यायेनार्थसंचयानित्यादिना तेषां प्रवृत्तिं चोक्त्वा, तानहं द्विषतः क्रूरान् संसारेषु नराधमानित्यादिना नित्यसंसृतिरूपाधोगतिं तत्फलं च विधाय तस्मादेतत्त्रयं त्यजेदिति तत्त्रयमूलकत्वादासुरभावस्य तत्त्यागो विधीयते श्रीमुखेनैव । भूयश्च एतैर्विमुक्तः कौन्तेय इत्यनेन व्यतिरेकतया तदेव दृढीकृत्य तत्त्यागस्य श्रेयोऽर्थिनोऽधिकारित्वोपयोगिकत्वमुक्तं भवति । तस्मादत्यन्तश्रेयोविरोधित्वाच्छ्रेयोर्थिभिर्मुमुक्षुभिः प्रयत्नेन त्याज्येति षोडशाध्यायस्याभिप्रायः । अनेनैव प्रतिकूलस्य वर्जनमिति प्रपत्तेरङ्गं व्याख्यातं भवति ॥

अथ विरागो निरूप्यते । स च द्विविधः, सहेतुको निर्हेतुकश्चेति । तत्र स्वीयरागविषयीभूतानां निरतिशयेष्टत्वेनाभिमतानां पुत्रकलत्रवित्तैश्वर्य्यादिपदार्थानां वियोगेन तद्विपरीतत्वेनाभिमतानां दरिद्राणां लाभेन च हेतुना जातः सहेतुकः । स चाविवेकपूर्वकत्वाद् व्यभिचारयुक्तोऽपायशङ्काग्रस्तः । यदि श्रीभगवतो निर्हेतुकाऽपरिमितकरुणासागरस्य रमाकान्तस्य कृपाकटाक्षसहकृतश्चेत् तर्हि भगवत्परिपूर्णकृपापात्राणाम्-अनन्याश्चितयन्तो मां ये जनाः प-

र्य्युपासते । तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः । अहमेव गतिस्तेषां निराशीःकर्मकारिणामित्यादिश्रीमुखोक्तलक्षणसंपन्नानां महाभागवतानां ज्ञानवैराग्यभूषितानां भक्तिसागरनिमग्नमनस्कानां जातसंगस्तत्कृपाविषयो भूत्वा शास्त्रीयमार्गे प्रवृत्तस्तेन मार्गेण भगवन्तं भजँस्तदाढ्यर्थं भूयो भूयो यतते, ह्यनुतिष्ठते च तदानुकूल्यम् । अन्यथानैकान्तस्वभावत्वादसत्सङ्गेन भ्रश्यते मार्गात् । द्वितीयस्तु जन्मान्तरसहस्रार्जितपुण्यपुञ्जस्य मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये इति भगवद्वचनान्मनुष्याणां कोटिष्वपि कस्यचिदेकतमस्य जन्मसमये श्रीपुरुषोत्तमदयाकटाक्षावलोकितस्य पुरुषत्वे चाविस्तरामात्मा स हि विज्ञानेन संपन्नतमो विज्ञातं च वदति विज्ञातं पश्यति श्वस्तनं वेद लोकालोकौ मर्त्येनाऽमृतत्वमीप्सत्येव संपन्नोऽथेतरेषां पशूनामशनायापिपासा एवाभिज्ञानमिति ता एता देवताः स्रष्टा अस्मिन् महत्यर्णवे प्रापतंस्तमशनायापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिताऽन्नमदामेति । ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति । ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति । ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति । पुरुषो वा व सुकृतमिति । अत्र जन्मसहस्राणां सहस्रैरपि सत्तम । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् । गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे । स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मभूते । अवाप्य तां कर्ममहीमनन्ते तमालयं ते त्वमलाः प्रयान्तीत्यादिश्रुतिस्मृतिश्लाघ्यतमं मानुष्यं प्राप्तस्य पुंसो विक्षेपासहिष्णुतया शैशवादेव प्रवृत्तौ ग्लानिबुद्धेः श्रवणादिपरायणस्य सत्सङ्गलब्धकथाश्रवणतः कर्मफलानां दुःखात्मनां श्रुत्वा वर्तमानशरीरेऽपि प्राप्तानि दुः-

खानि स्वस्य परेषां च भूयो भूयो जगति कर्मवशीभूतानां क्षेत्रज्ञानां जन्ममरणादिरूपचक्रभ्रमणात्मकं दुःखमनुभूय जातवेपथुशरीरमनस्कस्य मुमुक्षोर्जायमानो विरागो निर्हेतुकः । स च विवेकजन्यत्वान्मोक्षौपायिकोऽभिचरितस्वभावः । तत्र दुःखं तावद् द्विविधम्—अवस्थारूपं, तापात्मकं चेति । आद्यं च प्रथमं हि पितृमूत्रद्वारान्निःसृत्य मातृयोनिप्रवेशः । ततो गर्भेऽनुदिनकललबुद्बुदपिण्डकाठिन्यादिव्यवस्थापत्तिः । ततः क्रमेणावयवेन्द्रियादियोगस्ततश्चेतनीभावः । ततः स्वकर्मवैषम्येण मातृपितृरजोरेतोवैषम्यानिरूपितस्त्रीपुरुषषण्ढभावापत्तिरर्वाक्शिरा ऊर्द्धपाज्जरायुवेष्टितो भूत्वा मलमूत्रागारे विष्ठाकृमिभिः सह वासः । प्रसवसमये योनिद्वारं प्राप्य यन्त्रेण पीड्यमान इव मूर्च्छितः पूतिव्रणात् कृमिवन्महता दुःखेन महीपतनम् । ततश्च कौमाराद्यवस्थानुभवपूर्वकमरणम् । यदि धार्मिकश्चेत्तर्हि स्वर्गं गत्वा स्वपुण्यार्जितं विषयसुखं, पापार्जितं मात्सर्य्यासूयादिदुःखं चानुभूय धूममार्गेण पुनरावृत्य व्रीह्यादिभावापत्तिः । ततः पेषणपाकभक्षणाद्यवस्थोद्भवक्लेशानुभवपूर्वकं पुनः पितृरेतोभावापत्तिर्भूयो भूय उक्तप्रकारेण मातृगर्भप्रवेशादि । तदेव संसारचक्रभ्रमणं शास्त्रमुखेनोच्यते । दुष्कर्मा चेन्नरकादिप्राप्तिः श्वशूकरसरीसृपस्थावरादियोनिप्राप्तिस्तद्दुःखानुभूतिश्चेति गर्भोपनिषदि निपुणं प्रोक्तम् ।

अथ द्वितीयं त्रिधा— आध्यात्मिकमाधिदैविकमाधिभौतिकं चेति । तत्राद्यं द्विविधं शारीरकमानसभेदात् । तत्र शिरोऽक्षिरोगज्वरादिकम् । शारीरकं कामक्रोधभयद्वेषलोभमोहविषादशोकाऽसूयावमानेर्ष्यादिजन्यं च मानसम् । शीतोष्णवातवर्षाजलविद्युदादिसमुद्भवमाधिदैविकम् । मृगपक्षिमनुष्यराक्षससर्पादिजन्यमाधिभौतिकमिति विवेकः । पुनश्च प्रकारान्तरेण त्रि-

रागो द्विधा, जिहासोद्भवः सद्योजातश्च। आद्यः सौभरिणा प्रोक्तः। पञ्च्यां गता यौवनिनश्च जाता दारैश्च संयोगगताः प्रसूताः । दृष्टाः सुतास्तत्तनयप्रसूतिं द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा । द्रक्ष्यामि तेषामपि चेत् प्रसूतिं मनोरथो मे भविता ततोऽन्यः । पूर्णोऽपि तत्राप्यपरस्य जन्म निवार्य्यते केन मनोरथस्येत्यारभ्य । यथा हि भूयः परिहीनदोषो जनस्य दुःखैर्भविता न दुःखी । सर्वस्य धातारमचिन्त्यरूपमणोरणीयांसमतिप्रमाणम् । सितासितं चेश्वरमीश्वराणामाराधयिष्ये तपसैव विष्णुमित्यन्तेन। द्वितीयो ययातिवत् सद्योजायमानः । तथा तेनैव गीतम् । न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते । या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः । तां तृष्णां संत्यजन् प्राज्ञः सुखेनैवाभिपूर्य्यते । जीर्यन्ति जीर्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः । धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्यति । पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः । तथाऽप्यनुदिनं तृष्णा ममैतेष्वनुजायते । तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् । निर्द्वन्द्वो निर्म्ममो भूत्वा चरिष्यामि मृगैः सहेत्यादिना । ननु वैराग्यादीनां साधनौपयिकानां प्रतिकूलवर्जनादीनां साधनाङ्गरूपाणां च दुष्करत्वात् कलिदूषितानामद्यतनानां सर्वसाधनयोगाभावेन कथं श्रेय इति चेत् । सत्यम् । साधनानामत्यन्तदुष्करत्वेऽपि तद्व्याजेन यथाशक्तिश्रद्धादिमत्तया भजतां निजाऽसाधारणस्वाभाविकाचिन्त्यकारुण्याद् दुराचारिणामप्यात्मानन्यसाधनानां स्वयमेवोक्तगुणपारवश्येनानुगृह्णात्येव श्रीपुरुषोत्तमो दीनानुकम्पिस्वभावादेव । अयं भावः । न तावत् साधनानां स्वस्वफलदाने स्वातन्त्र्यम्, अपि तु भगवदायत्तप्रवृत्तिकत्वेनैव सर्वेषामपि साधनानां भगवदनुग्रहसापेक्षत्वश्रवणात् । शृण्वन्तोऽपि

बहवो यं न विदुः । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामित्यन्वयव्यतिरेकश्रुतिभ्यः ।

किञ्च । न हि भगवतो ह्यनन्यभक्तानां पापादिकर्मनिराकरणस्य भारत्वेनाशक्यत्वम् । अनन्ताविचिन्त्यस्वाभाविकयावदात्मवृत्तिसर्वशक्तियोगात् । परास्य शक्तिर्विधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः । ब्रह्मा स्वयम्भूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा । इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् । पृथिव्यां राक्षसान् सर्वान् पिशाचांश्च सदानवान् । अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर इत्यन्वयव्यतिरेकवचनात् । कामक्रोधादीनामप्यासुरत्वाविशेषात् तद्धननेन को वा प्रयास इति भावः । तस्मादनन्यशरणानां स्वीयानां केनापि बलिष्ठेन कर्मणा दुराचारित्वेऽपि निरतिशयकारुण्यक्षमावात्सल्यादिगुणवशीभूतो गोविन्दस्तद्गुणानां पोषणार्थं मातृपितृमित्रपत्यादिवत् सर्वापराधकदम्बं सोढ्वा तान् वृणोत्येव । सर्वसम्बन्धयोगात् । त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव । पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देवसोढुमित्यादिवचनात् । दुराचारानुग्राह्यत्वं स्वयमेव गीतम् । अपि चेत् सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः । क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । अस्यार्थः । अपिचेदिति । अपि, अनन्यभक्तानां दुराचारत्वासम्भव एवेति सम्भावनापरोऽयम्—अपिचेच्छब्दः । चेद्यदि केन चिज्जन्मान्तरीयेण बलीयसा कर्मणा वैदिकाचारविरोधिनाऽन्त्यजादिसमुद्भवं शरीरं प्रापित

इत्तमाधिकाराईकुलजन्माऽपि दुःसङ्गादिबलिष्ठकर्मणा भगवदीयापचारात्मकपापेन सत्संप्रदायोक्ताचारप्रतिबन्धकेन वर्णाश्रमादिधर्मात्पातितो वा दुराचारशब्दवाच्यः । उभयथापि संप्राप्तवैदिकाचारानर्ह इति यावत् । न तु उत्तमाधिकाराहोंऽपि यथेष्टाचारेण वर्तमानोऽत्र विवक्षितः । तस्यासुरकोटिसन्निविष्टत्वात् । यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिमिति निषेधस्मरणात् । तथाप्यनन्यभाग् मां भजते इति । अन्यसाधनान्यप्रयोजनान्यसंबन्धशून्यः । मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेकं शरणं व्रज । तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते । तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता । अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते । ममैवांशो जीवलोके जीवभूतः सनातनः । मद्भक्त एतद् विज्ञाय मद्भावायोपपद्यते । यो मद्भक्तः स मे प्रियः ।

इति मत्वा भजन्ते मां बुधा भावसमन्विता इति मदुक्तप्रकारेण सर्वसाधनं सर्वयोगक्षेमकर्तारं मुक्तप्राप्यं तद्भोग्यं सर्वसंबन्धाश्रयं मुमुक्षुध्येयं मां निश्चित्य सर्वात्मना भजते सेवते स साधुरेव मन्तव्यः । एकान्तभक्त एव व्यवसितव्यः । तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः । अहमेव गतिस्तेषामिति भगवदुक्त्यैकान्तिलक्षणसंपन्नत्वात् । तत्र हेतुमाह । सम्यग्व्यवसितो हि स इति । यतः स सम्यग्व्यवसाययुक्तः । एतदुक्तं भवति । सर्वमुमुक्षुध्येयो जगज्जन्मादिहेतुर्वेदैकप्रमाणगम्यो वेदप्रतिपाद्यो मुक्तप्राप्यो भगवान्श्रीपुरुषोत्तमो रमानिवासो मदुपायोपेयसंबन्धरूपो, नान्यः कश्चि-

त् साध्यसाधनसंबन्धवत्त्वेन मया समाश्रयणीयोऽस्ति । यद्यपि मम पापरूपकर्मणा वैदिकाधिकारयोग्यता नाभूत्, प्रत्युताधःपाताऽर्हो ह्यभवं, तथापि तेन निरतिशयदयाकारुण्यातिक्षावात्सल्यादिगुणवरुणालयेन भगवता स्वाऽसाधारणगुणपारवश्यान्निर्हेतुककारुण्येनैव स्वानन्यभजनार्हमानुषभावं प्रापयित्वा स्वनियम्यभूतैर्मदीयात्मशरीरेन्द्रियादिभिरात्मानं भाजयित्वा स्वदीनानुकम्पितस्वभावप्रसिद्धये मां स्वानन्यभक्ततया ख्यापयति । तस्मात्तदुपकृतिं शिरसि निधाय स एवापारकारुण्यसिन्धुः सर्वात्मना मया भजनीय इति । किञ्च सर्वेषां साधनानां देवादीनां च लोके विघ्नकर्तृतया प्रसिद्धानां मदुपेक्षितत्वात् ते कोपिताः सन्तो यदि भगवत्प्राप्तिप्रतिबन्धकीभूतान् विघ्नान् करिष्यन्ति, कामं कुर्वन्तु सर्वाचिन्त्यशक्त्याश्रयेण विश्वात्मना सर्वान्तर्यामिणैव सर्वविघ्ननिवृत्तिपूर्वकं स्वप्राप्तिः कारयिष्यते एव । मदीयप्रबलपापकर्मवशाद् यदि कश्चित्कालमुपेक्षते चेत्, का क्षतिः । कालान्तरे मेरुतुल्यं मत्कर्म स्वप्राप्तिप्रतिबन्धकीभूतं परमाणुवत् कृत्वाऽवश्यमनुग्रहीष्यत्येवेति व्यवसाययुक्त इत्यर्थः । अनेन विश्वासात्मकेन दृढनिश्चयेन क्षिप्रमेव धर्मात्मा भवति । महाभागवतलक्षणसंपन्नो भवति । ततः शश्वच्छान्तिं मद्भावापत्तिलक्षणां मुक्तिं प्राप्नोति । मद्भावायोपपद्यते । मम साधर्म्यमागता इति भगवद्वचनात् । न तस्य कदापि नाशशङ्का कार्य्येत्याह । हे कौन्तेय त्वं प्रतिजानीहि । किं प्रतिजानीयामित्यपेक्षायामाह । न मे भक्तः प्रणश्यतीति । मम कारुण्यवात्सल्यसौहार्दक्षमादीनानुकम्पासौशील्यसर्वशरण्यत्वाद्यनन्तकल्याणगुणगणसागरस्य सत्यसंकल्पस्य निरतिशयसौन्दर्यमाधुर्य्यादिमूर्त्तेर्ज्ञानैश्वर्य्यादिषाड्गुण्यनिधेः श्रीपुरुषोत्तमस्य श्रीदामविप्रमित्रस्य गोपीजननयनोत्सवस्य पार्थसारथेर्भगवतो माधवस्य भक्तो

दुराचारसंपन्नोऽनन्यशरणः सर्वसाधनहीनोऽपि न प्रणश्यति । आत्मनोऽनन्यत्वान्न भ्रश्यते । अपि तु क्रमेण मुच्यते एवेति । तथैवोक्तं श्रीसात्वते । दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं हि यः । निर्दोषं विद्धि तं जन्तुं प्रभावात् परमात्मनः । वैष्णवधर्मे च । अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन । मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवाम्भसा । मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः । केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति । नारसिंहे च । भगवति हरावनन्यचेताः भृशमलिनोऽपि विराजते मनुष्यः । न हि शशकलुषच्छविः कदाचित्तिमिरपराभवतामुपैति चन्द्रः । पुण्डरीकाख्याने च । अश्वमेधशतैरिष्ट्वा वाजपेयशतैरपि । न प्राप्नुवन्ति सुगतिं नारायणपराङ्मुखाः । ये नृशंसा दुरात्मानः पापाचाररतास्तथा । तेऽपि यान्ति परं धाम नारायणपदाश्रया इत्यन्वयव्यतिरेकवचनात् । या वै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रय इत्यन्योऽपि वाक्यकदम्बोऽत्रानुसन्धेयः ॥ १० ॥

मन्दानामुपकाराय तुष्टये तत्त्वदर्शिनाम् ॥
श्रीकृष्णप्रीतयेऽयं मे कृतो वेदान्तसंग्रहः ॥ १ ॥
प्रसीदतु रमाकान्तो गोपीजनमनोहरः ।
करोतु जगतां श्रेयो मङ्गलायतनो हरिः ॥ २ ॥
यः श्रीनिवासोऽखिलवेदज्ञेयो
न यत्स्वरूपं प्रविशन्ति तर्काः ।
यो ध्यानयोगेन विशुद्धसत्त्वै-
र्दृष्टो मुकुन्दो ह्युपयामि तं गुरुम् ॥ ३ ॥

हरिः ॐ तत्सदिति श्रीभगवत्पुरुषोत्तमाचार्यविरचितायां वेदान्तरत्नमञ्जूषायां सिद्धान्तरत्नविवृत्तौ फलादिरत्नसंग्रहो नाम तुरीयकोष्ठः ॥ ४ ॥

समाप्तोऽयं वेदान्तरत्नमञ्जूषाख्यो ग्रन्थः ॥

श्रीराधाकृष्णाय नमः ।

श्रीमते भगवन्निम्बार्काय नमः ।

वेदान्ततत्त्वबोधः ।

पण्डितप्रवरश्रीमदनन्तरामविरचितः ।

यश्चिन्तितो हरति ध्वान्तमशेषमन्तर्बोधप्रदस्तरणिकोटिसमप्रभो वै ॥ योऽज्ञानवादविभवां हि ददाह काशीं तं श्रीसुदर्शनमहं हृदि चिन्तयामि ॥१॥ किं वेदान्ततत्त्वमिति प्रश्ने उच्यते। सार्वज्ञाद्यनन्तकल्याणगुणाब्धिरनन्तशक्तिर्जगतो जन्माद्यभिन्ननिमित्तोपादानकारणं चेतनाचेतनवस्तुस्वाभाविकभेदाभेदसम्बन्धाश्रयः परब्रह्म परमात्मा पुरुषोत्तमादिशब्दाभिधेयः श्रीकृष्ण एवेति सर्ववेदान्तार्थः। तथाच शास्त्रं— यः सर्वज्ञः सर्ववित्, सर्वस्य शरणं सुहृत्, एष एवाऽचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, सर्वाँल्लोकानीशत ईशनीभिः । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्याद्याः श्रुतयः, विवक्षितगुणोपपत्तेश्च, सर्वधर्मोपपत्तेश्च सर्वोपेता च, जन्माद्यस्य यतः, प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद् इत्यादिसूत्राणि । तेजोबलैश्वर्य्यमहाऽवबोधस्ववीर्यशक्त्यादिगुणैकराशिः * । कर्मक्लेशविपाकाद्यैरस्पृष्टस्याखिलेशितुः ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः * । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते * । वेदैश्च सर्वैरहमेव वेद्य इत्यादिस्मृतयश्च । तथा भोक्तृ भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् *

प्रधानक्षेत्रज्ञपतिर्गुणेशः, अथातो ब्रह्मजिज्ञासेत्यादिशास्त्राद्भोक्तृ-भोग्यनियन्तृरूपजिज्ञासुजिज्ञासाजिज्ञास्यरूपचिदचिदीश्वराऽऽत्मक-तत्त्वत्रयसिद्धिः । एवञ्च सत्यं ज्ञानमनन्तं ब्रह्म बृंहति बृंहयति तस्मा-दुच्यते परं ब्रह्म, एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूता-न्तरात्मा * कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुण-श्च, सूक्ष्माच्च यत्सूक्ष्मतरं विभाति * यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्, अणोरणीयान्महतो महीयान्, तस्मात् कृष्ण एव परो देवस्तं ध्यायेदित्यादि, यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन ए-व वाऽरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव, अणुर्ह्येष आत्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश, अणु-र्ह्येष आत्मा यं वा एते सिनीतः पुण्यं पापं च, बालाग्रशतभाग-स्य शतधा कल्पितस्य च * भागो जीवः स विज्ञेयः स चाऽनन्त्या-य कल्पते, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विद-धाति कामान्, गौरनाद्यन्तवती जनित्री भूतभाविनी, सितासिता च रक्ता च सर्वकामदुघा विभोः, अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं स्वरूपामित्यादिश्रुतिभ्यः । द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणी भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्राम-यन् सर्वभूतानि यन्त्रारूढानि मायया । तत्र यःपरमात्मा तु स नि-त्यो निर्गुणः स्मृतः । कर्मात्मा त्वपरो योऽसौ कर्मबन्धैः स युज्यते । स सप्तदशकेनापि राशिना युज्यते पुनः । अङ्गुलस्याष्टमो भागो न सोऽस्ति मुनिसत्तम । न सन्ति प्राणिनो यत्र निजकर्मनिबन्धनाः । न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्या-

ष्यामः सर्वे वयमतः परम् । दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते । त्रिगुणं तज्जगद्योनिरऽनादिप्रभावाप्ययम्।अचेतना परार्था च नित्या सततविक्रिया इत्यादिस्मृतिभ्यश्च चिदचिदीश्वराणां त्रयाणां स्वरूपस्वभाववैलक्षण्यसिद्धिः । पुनः, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, आत्मा वा इदमेक एवाग्र आसीद्, एको ह वै नारायण आसीत्, तत्त्वमसि अयमात्मा ब्रह्म, सर्वं खल्विदं ब्रह्म, त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते, तदात्मानमेवावेदाऽहं ब्रह्माऽस्मीत्यादिशास्त्रेण चिदचितोर्ब्रह्मतादात्म्यमुपदिश्यते । एवञ्चोभयविध–वाक्यानां परस्परं बाध्यबाधकभावो वक्तुं नैव शक्यः । तुल्यबलत्वात् । तस्मात् सर्वेषां वाक्यानां स्वार्थे प्रामाण्यसिद्धये स्वाभाविकभिन्नाऽभिन्नं ब्रह्म सूत्रकृद्भिर्निर्णीतम्। तेनाभिप्रायेण घटकसूत्राणि प्रणीतवान् अंशो नानाव्यपदेशादन्यथाचाऽपि दाशकितवादित्वमधीयते एके, उभयव्यपदेशात् त्वहिकुण्डलवत्, प्रकाशाश्रयवद्वा तेजस्त्वादित्यादीनि । तस्मात् स्वाभाविकभेदाभेद एव सूत्रकारसम्मतः । अत्यन्तभेदोऽत्यन्ताभेदश्च भ्रान्तिरिति निश्चीयते ॥

ननु यदुक्तं– चिदचितोर्ब्रह्मणा स्वाभाविकभेदाभेद एव सम्बन्धो, नान्य इति । तदाग्रहमात्रम। यतः केवलद्वैतस्य केवलाद्वैतस्य चापि शास्त्रे सत्त्वात् । तत्प्रवर्तकानां चाऽऽचार्यत्वाविशेषेण तन्निषेधायोगादिति चेन्न। द्वैतविषयकाणामद्वैतविषयकाणां चोभयविधवाक्यानां शास्त्रे सत्त्वेपि तेषामितरेतरबाध्यबाधकभावायोगादुभयेषां तुल्यबलत्वादित्युक्तमेव । एकतरबाधं विना एकतरस्याऽसिद्धेश्च । एवञ्च केवलद्वैतवादिभिस्तादृशभेदसिद्ध्यर्थं नैयायिकवद् ब्रह्मणो जगदुपादानत्वं नाङ्गीक्रियते, किन्तु निमित्तत्वमात्रमेवेति । तथा सति तन्मते, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय-

यं, तदैक्षत बहु स्यां प्रजोयय, नामरूपे व्याकरवाणि, त्रिवृतं त्रिवृतं करवाणि, तत्सृष्ट्वा तेदवानुप्राविशत्, सच्च त्यच्चाभवत्, आत्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत, अयमात्मा ब्रह्म, ऐतदात्म्यमिदं सर्वम् इत्यादिश्रुतीनां, प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, आत्मकृतेः परिणामात्, तदनन्यत्वमारम्भणशब्दादिभ्य इत्यादिसूत्राणाम् अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव, बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते, वासुदेवः सर्वमिति स महात्मा सुदुर्ल्लभः, सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः * इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः* वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च, क्षेत्रज्ञं चापि मां विद्धित्यादिस्मृतीनां च सर्वोपादानत्वसर्वात्मत्वप्रतिपादिकानां बाध एव जायते ॥

किञ्च ब्रह्मणो निमित्तमात्रत्वाङ्गीकारे श्रुत्युक्तयोः प्रतिज्ञादृष्टान्तयोरपि बाधो निश्चितो भवति । प्रतिज्ञादृष्टान्तौ यथा, येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति प्रतिज्ञा, यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्, यथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यादिति दृष्टान्तः । न हि निमित्तमात्रज्ञानेन कार्यजातं विज्ञातं भवतीति शक्यते वक्तुम् । कुलालादिज्ञानेन मृदादिविकारजातवत् सर्वानुभवविरोधात् । उपादानत्वे तु उपादानोपादेययोस्तादात्म्याद्युक्तं तज्ज्ञानेन तज्ज्ञानमिति ब्रह्मण उपादानत्वाऽङ्गीकारे च मृद्घटवत् सुवर्णकुण्डलादिवच्च जगद्ब्रह्मणोरभेदोऽप्यवर्ज्जनीयः । नच तथात्वे विकारित्वपत्तिरिति वाच्यम् । शक्तिविक्षेपलक्षणपरिणामाऽङ्गीकारात्, स्वरूपे परिणामाऽनभ्युपगमाच्च । यथोर्णनाभिः सृजते गृह्णते च, यथा सतः पुरुषात् केशलोमानि, यथा पृथिव्या ओषधयः सम्भवन्ति तथाऽक्षरात् सम्भवतीह

विश्वमिति श्रुतेः। प्रसार्य्य च यथाङ्गानि कूर्मः संहरते पुनः। तद्वदभूतानि भूतात्मा सृष्टानि ग्रसते पुनरिति भीष्मवाक्याच्च। अपिचात्यन्तभिन्नयोरभेदासम्भवाच्चिदचितोर्ब्रह्मतादात्म्यप्रतिपादकमुक्तशास्त्रं विरोधादेव परित्यक्तं स्यात्॥

किञ्च, सर्वं तं पराद्याोऽन्यत्रात्मनः सर्वं वेदेत्यादिना ब्रह्मणोऽन्यपदार्थस्यात्यन्तभिन्नज्ञातुर्निन्दाश्रवणादतः केवलद्वैतवादिमतमसङ्गतमिति निश्चीयते॥

तथैव केवलाद्वैतवादिमतमसङ्गतम्। तथाहि सजातीयविजातीयस्वगतभेदशून्यं सर्वधर्मविनिर्मुक्तं शुद्धं मुक्तस्वरूपं चिन्मात्रं वस्तु परमार्थं नान्यदिति तेषां मतम्। तदनुपपन्नम्। विकल्पाऽसहत्वात्। तद्यथा। उक्ताऽद्वितीयनिर्विशेषवस्तुनः सत्त्वे किञ्चित्प्रमाणमस्ति न वेति वक्तव्यम्। नाद्यो वक्तुम् शक्यः। तत्र न तावत् प्रत्यक्षम्। अन्तीद्रियत्वात्तस्य। नाप्यनुमानं लिङ्गशून्यत्वात्। नेन्द्रियाणि, नानुमानमितिश्रुतेः। नापि शब्दः शब्दवृत्त्यविषयत्वात्। तत्र न तावच्छक्तिविषयत्वं, जातिगुणाकारप्रकृतिप्रत्ययाद्यर्थत्वाभावात्। नापि लक्षणाविषयत्वं, सम्बन्धशून्यत्वात्। असङ्गो ह्ययं पुरुष इति श्रुतेः। ननु सत्यसम्बन्धाभावेऽपि शाखाचन्द्रवत् कल्पितसम्बन्धस्य सत्त्वान्न दोष इति चेन्न। दृष्टान्तवैषम्यात्। तथाहि। शाखाचन्द्रयोरुभयोरपि साऽवयवत्वात् प्रत्यक्षविषयत्वात् किरणद्वारा सम्बन्धस्यापि सत्त्वात्, दार्ष्टान्तेऽत्यन्तवैपरीत्यान्नोक्तार्थासिद्धिः। नापि गौण्या विषयत्वं, निर्गुणत्वात्। विषयत्वाङ्गीकारे च मिथ्यात्वप्रसङ्गः। द्वैतापत्तिश्च। तथा प्रयोगः—ब्रह्म मिथ्या, प्रमाणविषयत्वात्। तव मते प्रपञ्चवदिति। नापि द्वितीयः। सर्वप्रमाणहीनत्वेन शशशृङ्गतुल्यत्वापत्तेः। निर्विशेषं ब्रह्म अवस्तु, सर्वप्रमाणशून्यत्वात्। शशशृङ्गाद्यवस्तुजातवदित्यनुमानात्। ननु तस्य

स्वयम्प्रकाशत्वात् प्रमाणान्तरानपेक्षतया स्वानुभूत्येकमानत्वान्नोक्तदोषयोग इतिचेन्न । शास्त्रवैयर्थ्यप्रसङ्गात् । तथाहि । निर्विशेषाऽद्वितीयस्य दोषस्पर्शाभावाद्बन्धाभावस्तदभावान्मोक्षाऽभावस्तदभावे मोक्षतत्साधनप्रतिपादकशास्त्रस्य सुतरां वैयर्थ्यम् ।

किञ्च तत्र धर्म्ममात्रानङ्गीकारे तदितरवस्तुमात्रानङ्गीकारे च तदैक्षत बहु स्यां प्रजायेय, ब्रह्मैवेदमग्र आसीत्, स चात्मानं वेदाऽहं ब्रह्मास्मीति, सोऽकामयत बहु स्यां प्रजायेय, नामरूपे व्याकरवाणि, यतो वा इमानि भूतानि जायन्त इत्यादि, यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयन्तपः, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, सर्वे वेदा यत्पदमामनन्ति, तं त्वौपनिषदं पुरुषं पृच्छामि, जन्माद्यस्य यतः, विवक्षितगुणोपपत्तेश्च, सर्वोपेता च, शास्त्रयोनित्वादित्यादीनाम्, अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते वेदैश्च सर्वैरहमेव वेद्य इत्यादीनामीक्षणकर्तृत्वबहुभवनसङ्कल्पाद्याश्रयत्व-जगज्जन्मादिकारणत्व-गुणशक्त्यादिमत्त्व-शास्त्रवेद्यत्वादिप्रतिपादकानाम्, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते, तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति, ज्ञाऽज्ञौ द्वावजावीशानीशौ, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, अक्षरात् परतः परः, प्रधानक्षेत्रज्ञपतिर्गुणेशः, पृथगात्मानं प्रेरितारं च मत्वा, गौरनाद्यन्तवती जनित्री भूतभाविनी, अजामेकां लोहितशुक्लकृष्णां, शारीरश्चोभयेऽपि भेदेनैनमधीयते, भेदव्यपदेशाच्चान्यः, अधिकं तु भेदनिर्देशात्, न त्वेवाऽहं जातु नासं न त्वं नेमे जनाधिपाः, न चैव न भविष्यामः सर्वे वयमतः परम्, भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च, अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा, अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे

पराम्, जीवभूतां महाबाहो ययेदं धार्य्यते जगत्, ममैवांशो जीव-लोके जीवभूतः सनातनः, प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि तत्र यः परमात्मा तु स नित्यो निर्गुणः स्मृतः, न लिप्यते फलैश्चापि पद्मपत्रमिवाऽम्भसा, कर्मात्मा त्वपरो यो ऽसौ कर्मबन्धैः स युज्यते, स सप्त दशकेनाऽपि राशिना युज्यते पुनः, त्रिगुणं तज्जगद्योनिरना-दिप्रभवाप्ययम्, अचेतना परार्था च नित्या सततविक्रिया, दैवी ह्येषा गुणमयी मम माया दुरत्यया, मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यादीनां च ब्रह्मभिन्नत्वेन क्षेत्रक्षेत्रज्ञप्रधानपुरुषप्रकृति-पुरुषजीवमायादिशब्दाभिधेययोर्वस्तुनोरऽजत्वमायावश्यत्वतन्मुक्त-त्वेश्वरसाक्षित्वकर्मफलभोक्तृत्वनित्यत्वनानात्वशक्तिरूपांशत्वकर्मब-न्धार्हत्वतन्मोक्षार्हत्वानाद्यनन्तत्वगुणत्रयाश्रयत्वजडत्वपरिणामित्व-दुरत्ययत्वादिप्रतिपादकानां श्रुतिस्मृतिसूत्राणां बाधाच्छास्त्रबहिर्भू-तत्वप्रसङ्गो दुर्वारः ॥

ननु व्यवहारकाले सर्वस्योक्तद्वैतस्यास्माकमङ्गीकारात्तद्विषय-त्वेन भेदशास्त्रस्य नैराकाङ्क्ष्यान्न बाधः । तथाचोक्तं– जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा *अविद्या तच्चितोर्योगः षडस्माक-मनादय इति । नच तर्हि द्वैतापत्त्याऽद्वैतसिद्धान्तभङ्ग इति वाच्य-म् । अनादिसान्तत्वाभ्युपगमात् । नचैवं विशुद्धचितोऽपि सान्त-त्वापत्तिरिति वाच्यम् । तस्याऽज्ञानबाध्यत्वाऽभावात् । नचाऽना-दित्वाऽविशेषाद् बाध्यत्वाबाध्यत्वयोर्नियामकाभाव इति वाच्यम् । आरोपितत्वानारोपितत्वयोरेव बाध्यत्वाबाध्यत्वयोर्नियामकत्वात् । एतदुक्तं भवति । बन्धस्य सत्यत्वाङ्गीकारे तस्य निवृत्त्ययोगान्मोक्ष-शास्त्रवैयर्थ्यं प्रसज्ज्येत । ज्ञानमात्रनिवर्त्यस्य क्वाऽपि सत्यत्वाऽद-र्शनात् । सत्यस्य चात्मनो निवृत्त्यदर्शनाच्च । अतोऽध्यस्तत्वमङ्गी-कर्त्तव्यम् । एवञ्चाऽविद्याकार्य्याहङ्काराध्यासाज्जीवेश्वरादिव्यवहार-

सिद्ध्या तदनुवादपरत्वाद्भेदशास्त्रस्य नैराकाङ्क्ष्यात् । यथेदं रजतमिति- प्रतीतिविषयशुक्तावारोपितरजतस्य शुक्तिस्वरूपसाक्षात्कारान्नेदं रजतं, किन्तु शुक्तिका हि रजतवदवभासते इति बाधो जायते। तथाऽनाद्यविद्यया शुद्धात्मस्वरूपाज्ञानात्तस्मिन्नधिष्ठानभूतेऽध्यस्तं द्वैतजातप्रपञ्चं मिथ्याभूतं, तस्य पुनरात्मैकत्वविज्ञानेन निवृत्त्या, नाद्वैतसिद्धान्ते कोऽपि विरोधः॥ तथाचाऽऽहभाष्यकारः॥ तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि । एवमयमनादिरनन्तो नैसर्गिको मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्त्तकः सर्वलोकप्रत्यक्षः । अस्याऽनर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते इति । अन्यथा, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं, तत्त्वमसि, अयमात्मा ब्रह्म, सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येदित्यादीनामद्वैतप्रतिपादकानां भेदप्रतिषेधकानां च व्याकोपः स्यादितिचेन्न ॥ सर्वथानुपपन्नत्वात। तथाहि। यदुक्तं बन्धस्य सत्यत्वे तस्य निवृत्त्ययोगान्मोक्षशास्त्रवैयर्थ्यं प्रसज्ज्येतेति। तन्मन्दम्। प्रमाणज्ञानाभावात्। भूयश्चान्ते विश्वमायानिवृत्तिरिति शास्त्रप्रामाण्यात् सत्यस्यैव बन्धस्य निवृत्त्या मोक्षशास्त्रस्य सार्थक्यात् सत्यस्य निवृत्ति र्न भवतीति दुराग्रहमात्रम् । सत्यस्यैव धनवस्त्रादेर्दानादिना निवृत्तिदर्शनात्। सत्यस्यैव मलपङ्कादेः प्रक्षालनादिना निवृत्तिदर्शनात्। नच ज्ञानमात्रनिवर्त्यस्यकापि सत्यत्वादर्शनादित्युक्तमेवेति वाच्यम्, सेतुदर्शनेन सत्यस्यैव पापस्यनाशदर्शनात् ॥

ननु तस्य श्रद्धानियमादिसापेक्षज्ञाननाश्यत्वाद् बन्धस्य च, नान्यः पन्था विद्यतेऽयनाय इति श्रुत्या ज्ञानमात्रान्निवृत्तिप्रतीतेः । अतः श्रुतज्ञाननिवर्त्यत्वनिर्वाहार्थमध्यस्तत्वं वर्णनीयमितिचेन्न । त्वयापि विवेकादीनां ब्रह्मज्ञानसाधारणकारणतयाऽधिकारिविशेषणत्वेनापेक्षितत्वात् । अन्यथा सर्वेषां संसारिणां साधनं विनैव ज्ञानापत्त्या सर्वमोक्षप्रसङ्गात् ।

नाऽपि निर्विशेषाद्वितीयचेतनमात्रस्य वस्तुनोऽधिष्ठानत्वं सम्भवति सामान्यविशेषधर्मवत्त्वस्याधिष्ठानत्वप्रयोजकत्वात् सामान्येन ज्ञातं विशेषेणाज्ञातमेवाधिष्ठानं लोके प्रसिद्धम्। यथेदं रजतमित्यत्रेदन्तासामान्यधर्म्मो रजतस्य साधकः शुक्तौ वर्तते। शुक्तित्वं च विशेषधर्मस्तस्य बाधकः सर्वानुभवप्रसिद्धः।न तथानिर्धर्म्मके चिन्मात्रे उभयधर्मवत्त्वं वक्तुं शक्यं, सिद्धान्तभङ्गात् । कथञ्चित् सामान्यधर्म्माङ्गीकारेऽपि विशेषधर्म्माऽनङ्गीकारेण तद्बाधायोगाच्च ।

ननु बुद्धिवृत्त्यभिव्यक्तं चैतन्यं ज्ञानं विषयाभेदेनाभिव्यक्तं स्फुरणं शुभकर्मजन्यवृत्तिव्यक्तमानन्द इत्येवं वृत्त्युपाधिकृतभेदाज्ज्ञानादीनामात्मधर्मत्वव्यपदेशः। तदुक्तं टीकायाम्—आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्म्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवाभासन्त इतीति चेन्न। तुच्छोक्तेः। बुद्ध्यादीनां तद्वृत्तीनां च सत्यत्वे सिद्धान्तभङ्गः। असत्त्वे उक्तर्थासिद्धेः। नच तेषां कल्पितत्वमिति वाच्यम्। अधिष्ठानकल्पकादेरेवाभावात् कल्पितत्वस्य का वार्त्ता। ग्रामाऽभावे सीमावत् ॥

किंचाज्ञानस्याश्रयविषयप्रयोजकाभावादप्यध्यासाभावः।तत्राऽज्ञानस्याश्रयो ज्ञानमात्रं ब्रह्मैव जीवो वाऽन्यद्वा। नाद्यः । ज्ञानमात्रस्वयंज्योतिषो वस्तुनोऽज्ञानाश्रयत्वानर्हत्वात्। सूर्यस्यान्धकाराश्रयत्वमनुन्मत्तः को ब्रवीतीति भावः । नाऽपि जीवः। तस्याध्यासका-

र्यत्वेन तदुत्तरभावित्वात् । न तृतीयः । उभयभिन्नचेतनस्यादृष्टश्रुत-
त्वात् । तथा को वाऽज्ञानविषयः- शुद्धानुभवमात्रम्, उत तद्भिन्नम्
नाद्यः । तस्य भवन्मते ज्ञानाविषयत्वेनाज्ञानविषयत्वानर्हत्वात्
अज्ञानतन्निवर्तकज्ञानयोरेकाधिकरण्यवदेकविषयस्यापि नियमात्
न द्वितीयः । ज्ञानाज्ञानोभयभिन्नस्य तदानीमभावात् । तद्भिन्नस्य
सर्वस्याऽपि तत्कार्यत्वेन तद्विषयत्वायोगात् । ननु गृहोदरवृत्तितम-
सो यथा गृहमेवाश्रयो विषयश्चेति प्रत्यक्षसिद्धं, तथाऽत्राऽपि शुद्ध
ब्रह्मैवाज्ञानस्याश्रयो विषयश्चेति चेन्न । दृष्टान्तवैषम्यात् । गृह-
तमसोरज्ञानरूपत्वेनेतरेतराविरोधित्वात् । दार्ष्टान्तिके तु ज्ञानाज्ञान-
योरत्यन्तविजातीयत्वेनेतरेतरविरोधित्वात् । न हि सूर्यस्यान्धकारा-
श्रयत्वं तद्विषयत्वं वा कोटिचतुर्मुखैरपि संभावयितुं शक्यम् । किञ्चा-
ऽध्यासोपादानं ब्रह्मणि यदज्ञानमङ्गीकृतं तत्स्वप्रयुक्तं ब्रह्मप्रयुक्त-
मन्यप्रयुक्तं वेति विवेचनीयम् । नाद्यः । आत्माश्रयदोषप्रसङ्गात्
जडस्य प्रयोक्तृत्वासम्भवाच्च । अन्यथा घटादावपि प्रयोक्तृत्वा-
पत्तेः । न द्वितीयः । प्रयोक्तृत्वस्य कर्तृत्वविशेषधर्मत्वात् तस्य
त्वन्मतेऽध्यासवत्पुरुषाश्रयत्वाच्छुद्धे तदसम्भवात् ।
अपिच देवतिर्यङ्मनुष्यनारक्यादियोनिप्राप्तिरूपानर्थहेतोरविद्याय
स्वरूपं शुद्धं ब्रह्म जानाति न वा । जानाति चेत्तथा ज्ञात्वा को
वा अकर्मवश्यः स्वतन्त्रस्तामात्मनि प्रयुञ्ज्यात् । ज्ञातृत्वापत्त्या भव
न्मते शुद्धत्वहानेश्च । न जानाति चेदज्ञतापत्त्या ब्रह्मत्वाऽसिद्धेः
शुद्धं चिन्मात्रं न ब्रह्म, असत्त्वात् संसारिजीववदित्यनुमानात्
नाऽपि तृतीयः । उभयेतरवस्त्वनङ्गीकारात् । अङ्गीकारे च तत्रा
प्युक्तयुक्त्या प्रयोजकान्तरं, तस्याऽप्यन्यदित्यनवस्थापत्तेः ॥

किंचाऽज्ञानस्य सत्त्वमसत्त्वं वा । नाद्यः । भवतामनङ्गीकारात्
न द्वितीयः । असत आवरकत्वासम्भवात् । अधिष्ठानाऽऽवरणा

ऽभावे अध्यासाभावः। न हि शुक्तिस्वरूपे भासमाने रजताऽऽरोपो भवतीति भावः॥

किंच स्वप्रकाशे आवरणासम्भवेऽपि अध्यासार्थं दुराग्रहेण तदङ्गीकारे च किं तद् ब्रह्मस्वरूपावरकं तद्धर्मविशेषावरकं वेति वाच्यम्। नाद्यः। जगदान्ध्यप्रसङ्गात्। न द्वितीयः। स्वरूपेतरधर्माऽनङ्गीकारात्। अन्यथा सिद्धान्तभङ्गप्रसङ्गात्। ननु निर्विशेषश्रुतिबाधभयाद्भिन्नधर्मानङ्गीकारेऽपि स्वरूपस्यैवानन्दांशमात्रस्याऽज्ञानावृतत्वेऽपि सत्तांशस्यानावृतत्वान्नोक्तदोषयोग इति चेन्न। असम्भवात्। निरवयवे वस्तुन्यंशादिकल्पनाया अन्याय्यत्वात्। सांशत्वापत्त्या मिथ्यात्वापत्तेश्च। ब्रह्म मिथ्या, सांशत्वात्। घटादिवदित्यनुमानात्। निरवयवशब्दव्याकोपात्। निर्विशेषवादभङ्गाच्च॥

ननु यदुक्तं स्वयंप्रकाशस्वरूपस्यात्मनोऽज्ञानाश्रयत्वानर्हत्वादिति। तत् सत्यम्, तथापि अज्ञानस्य मिथ्यात्वाङ्गीकारेणोक्तदोषस्पर्शविकाशः। तथाचोक्तं भाष्यकृद्भिः। मिथ्याज्ञाननिमित्त इति प्रचण्डमार्त्तण्डमण्डले पेचकानुभवसिद्धान्धकारवद् अहमज्ञ इत्यनुभवसिद्धमज्ञानं दुरपह्नवम्। कल्पितस्याधिष्ठानास्पर्शित्वात्। नित्यस्वरूपज्ञानस्याविरोधित्वाच्चेतिचेत्सत्यम्। प्रचण्डमार्त्तण्डमण्डले पेचकानुभवसिद्धान्धकारवदिति दृष्टान्तस्य तथा स्वप्रकाशे परब्रह्मण्यपि अज्ञानकल्पका उलूकसदृशा एव ज्ञेया इति दार्ष्टान्तिकस्य वक्तव्यत्वात्। अस्मदिष्टत्वाच्च। यच्चोक्तम्– अहमज्ञ इत्यनुभवसिद्धमज्ञानं दुरपह्नवमिति। तत्र पृच्छ्यते पण्डितमानी। अहमज्ञ इति प्रत्यये, को वाऽहंपदार्थः। शुद्धं ज्ञानमात्रम्, अहंकारो वा, तदन्यो वेति वक्तव्यम्। नाद्यः। ज्ञानमज्ञं ब्रह्माज्ञम् आत्माऽज्ञ इत्युक्तं स्यात्। न द्वितीयः। अहंकारोऽज्ञ इति प्रत्ययः स्यात्। ब्रह्माज्ञा-

ने प्रमाणाभावाच्च । अहमर्थस्य शुद्धात्मस्वरूपत्वाङ्गीकारे च त-
स्य मुक्तप्राप्यत्वापत्त्याऽस्मदिष्टापत्तेस्तव सिद्धान्तभङ्गात् । न
तृतीयः । उभयेतरस्याध्यासकार्यत्वेन तदानीमभावात् । यदुक्तं
कल्पितस्याधिष्ठानास्पर्शित्वमिति । तदनुपपन्नम् । अज्ञानस्य कल्प-
काभावेन कल्पितत्वासिद्धेः । तथाहि । को वा अज्ञानस्य कल्पकः
स्वयमेव वा चिन्मात्रं वा उभयेतरो वा । नाद्यः । आत्माश्रयदो-
षात् कल्पनायाश्चेतनधर्मत्वेन जडे तदसम्भवात् । अन्यथा घटा-
देरपि कल्पनाश्रयत्वापत्तेः । न द्वितीयः । निर्विशेषस्य कल्पकत्वा-
सम्भवात् । न तृतीयः । उभयेतरस्याध्यासोत्तरभावित्वात् वास्त-
वत्वानङ्गीकाराच्च । यत्पुनरुक्तं नित्यस्वरूपज्ञानस्याविरोधित्वाच्चे-
ति । तत्तुच्छम् । अज्ञोक्तिवद् विद्वदुपेक्षितत्वात् । यतस्तयोः पर-
स्परं विरुद्धस्वभावत्वेनैव स्वरूपसिद्धिर्नान्यथा । यज्ज्ञानमज्ञानाविरो-
धि तज्ज्ञानमेव नास्ति, यज्ज्ञानाविरोधि तदज्ञानमेव नास्तीति लो-
के शास्त्रे च प्रसिद्धेः । अज्ञानं ज्ञानाविरोधीति अनुन्मत्तः को ब्र-
वीतीति भावः । तस्मादहमज्ञ इति प्रतीत्याश्रयो भवतां मते न
कोऽपि सिद्ध्यति । तदभावेऽध्यासाभाव इति सिद्धम् । ननु भ-
वतां मते कस्तदाश्रय इति चेच्छृणु । परमात्मभिन्नोऽल्पशक्तिस्त-
दधीनः सनातनस्तदंशभूतोऽनादिकर्म्मात्मिकाऽविद्यावृतधर्मभू-
ताज्ञानो जीवक्षेत्रज्ञादिशब्दाभिधेयस्तत्प्रत्ययाश्रय इति । द्वाऽज्ञौ
द्वावजावीशानीशौ, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि-
षस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति
आत्मा हि परमः स्वतन्त्रोऽधिगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः ।
अस्ति खल्वन्योऽपरो भूतात्मा योऽयं सितासितैः कर्मफलैरभिभूय-
मानः सदसद्योनिना यस्य संमूढत्वादात्मस्थं प्रभुं भगवन्तं कारयि-
तारं नापश्यद् गुणौघैः सूय्यमानः कलुषीकृतश्चेत्यादिश्रुतिभ्यः ।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः * तत्र यः परमात्मा तु स नित्यो निर्गुणः स्मृतः * न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा कर्मात्मा त्वपरोयोऽसौ कर्मबन्धैः स युज्यते * स सप्तदशकेनाऽपि राशिना युज्यते पुनः * अविद्याकर्मसञ्ज्ञान्या तृतीयाशक्तिरिष्यते यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा * संसारतापानखिलान-ऽवाप्नोत्यतिसन्ततान् * तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता * सर्वभूतेषु भूपाल तारतम्येन वर्तते * ममैवांऽशो जीवलोके जीवभूतः सनातनः * क्षेत्रज्ञं चाऽपि मां विद्धीत्यादिस्मृतिभ्यश्च। अतो ब्रह्मण्यध्यासोऽयुक्त एवेति सिद्धम्। नन्वध्यासस्यासङ्गस्वप्रकाशात्मनि अयुक्तत्वमलङ्कार इति चेन्न। पुनस्तत्र युक्त्युपपादनस्य जलताडनादेरिव वैयर्थ्यात्। एवञ्चाध्यासाऽयुक्तत्वमलङ्कारत्वेनाऽङ्गीकुर्वतां निरपत्रपाणां शास्त्रसिद्धान्तयोर्बाधस्याप्यलङ्कारत्वेनाङ्गीकारे को दोषः !!। ननु तमःप्रकाशयोरिवाऽत्यन्तविरुद्धस्वभावयोश्चिज्जडयोस्तद्धर्माणां चेतरेतरैक्यानुपपत्तिरुक्ता इति ? सत्यम्। तथापि अत्यन्तविविक्तयोरपीतरेतराविवेकेनान्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्म्मांश्चाऽध्यस्य, मनुष्योऽहं, ममेदमिति लोकव्यवहारः अनादिकालप्रवृत्तः। अतोऽध्यासो वर्णनीय इति चेन्न। अविवेकाश्रयाभावात्। तथाहि। को वाऽविवेकाश्रयः—जडो विषयः, शुद्धात्मा वा, तदन्यो वा? नाद्यः। तस्याविवेक स्वरूपत्वात्। न द्वितीयः। अविवेकपर्यायाऽज्ञानाऽऽश्रयत्वस्य पूर्वमेव निरस्तत्वात्। न तृतीयः। उभयान्यस्याध्यासकार्यत्वेन अध्यासस्याद्याप्यऽसिद्धेः। किञ्च, अत्यन्तविविक्तयोरित्युक्त्वा पुनरितरेतराऽविवेकेनेतिस्वोक्तिविरोधाच्च। न हि सूर्यान्धकारयोर्दीपघटयोर्वाऽविवेकः कस्यापि जायते। सर्वानुभवविरुद्धत्वादिति भावः। किञ्चात्मनो भवतां मतेऽविषयत्वाङ्गीकारादप्यधिष्ठानत्वासिद्धिः।

नच, नाऽयमेकान्तेनाऽविषयोऽस्मत्प्रत्ययविषयत्वादपरोक्षत्वाच्चेति वाच्यम् । विकल्पासहत्वात् । को वा तद्विषयः—शुद्धात्माऽध्यस्तो वा । नाद्यः । अहमर्थस्वरूपत्वेन मुक्तस्वरूपत्वापत्त्या सिद्धान्तभङ्गादस्मदिष्टत्वाच्च । नन्वस्मदर्थः=चिदात्मा प्रतिबिंम्बितत्वेन अत्र प्रतीयते सोऽस्मत्प्रत्ययोऽहङ्कारस्तत्र भासमानत्वं तद्विषयत्वमित्यर्थ इतिचेन्न चिन्मात्रस्यास्मदर्थत्वे मिथ्यात्वापत्तेः । अध्यस्तत्वे तु अध्यासे सति भासमानत्वं, तस्मिन् सति स इत्यन्योन्याश्रयदोषः । नचानादित्वात् पूर्वाध्यासे भासमानात्मन उत्तराध्यासाधिष्ठानत्वेन सम्भवाद् नोक्तदोष इतिं वाच्यम् । अध्यासमात्रस्यानादित्वायोगात् । अध्यासो नानादिः, पूर्वप्रमाहितसंस्कारजन्यत्वात् । शुक्तिकारजतवादित्यनुमानात् । किञ्च । समसत्ताके उपाधौ प्रतिबिम्बदर्शनात् । न हि सतोऽसति तत्त्वम् । तथाचाऽहङ्कारस्य सत्यत्वेऽनिवृत्तिप्रसङ्गात् । कल्पितत्वे तत्र चेतनप्रतिबिम्बनानुपपत्तेः । अन्यथा मरीचिकाजलेऽपि सूर्यादिप्रतिबिम्बापत्तेः । अपि च भ्रमसामग्रीविरहादपि अध्यासाभावः । तथाहिं भ्रममात्रे सावयवत्वमिन्द्रियसंयुक्ततया ग्राह्यत्वं सादृश्यं पूर्वप्रमाजन्यं संस्कारो दोषश्चेत्यपेक्षितम् । तत्राद्यं त्रयमधिष्ठाने दोषसंस्कारौ ज्ञातृपुरुषनिष्ठौ । यथेदं रजमित्यत्रेन्द्रियसंयुक्ततया ग्राह्यत्वं, सावयवत्वं परमार्थरजतसादृश्यं शुक्तौ प्रत्यक्षप्रमाणसिद्धम् । तत्संस्कारदोषौ च पुरुषनिष्ठौ न तथादार्ष्टान्तिके निरवयनिर्गुणपरोक्षात्मनि गुणावयवसादृश्यादीनामयोगात् । केवलो निर्गुणश्च, निष्कलं, निरवद्यमित्यादिश्रुतेः । नाऽपि दोषसंस्कारौ सम्भवतः । तदाश्रयस्य ज्ञात्रन्तरस्याऽभावात् । अधिष्ठानमात्रस्यैव तदा सत्त्वात् । जीवस्य भ्रमकार्यत्वेन तदुत्तरभावित्वात् । ननु नैतदुपपन्नम् । यतः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति नियमाभावात् ।

अप्रत्यक्षे निरवयवेऽप्याकाशे बालास्तलमालिनताद्यध्यस्यन्ति । नील-नभसोः सादृश्याभावेप्यध्यासदर्शनादिति भावः । एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः । नाऽपि संस्काररूपकारणाभावः । प्रत्यगात्मनि हेतुहेतुमद्भावेनाध्यासप्रवाहस्यानादित्वात् ।
तथाच पूर्वाध्यासस्योत्तराध्यासं प्रति संस्कारद्वारा कारणत्वात् । नच पूर्वप्रमाजन्य एव संस्कारो हेतुरिति वाच्यम् । लाघवेन पूर्वानुभवजन्यसंस्कारस्य हेतुत्वात् । अतः पूर्वाऽध्यासजन्यसंस्कारोऽस्तीत्यनेन कारणाभावान्नाध्यास इत्यपास्तामिति चेन्न । दृष्टान्ताभासात् । तथाहि । आकाशस्य पञ्चीकृतत्वेन सावयवत्वात् । पञ्चीकृतत्वादेव पृथिव्यादिभूतानां तत्र सत्त्वेन तदाश्रयभूत-नीलादिरूपाणामपि तत्र सत्त्वादप्रत्यक्षत्वाभावात् । नीलादिप्रत्ययानां प्रमात्वादिति यावत् । नच दूरदेश एव तत्प्रत्ययो न तु सन्निहितदेशे, कथं प्रमात्वमिति वाच्यम् । तवाऽपि तुल्यत्वात् । यत्रोभयोः समो दोषः परिहारोऽपि वा समः । नैकः पर्य्यनुयोक्तव्यस्तादृगर्थविचारणे इति न्यायात् । एतेन एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यास इति निरस्तम् । यत्पुनरुक्तं, हेतुहेतुमद्भावेनाध्यासप्रवाहस्यानादित्वात् पूर्वाध्यासस्योत्तराध्यासं प्रति संस्कारद्वारा कारणत्वादध्यासासिद्धिरिति । तदपि युक्त्याभासम् । हेतोरेव वक्तुमशक्यत्वात् । तथाहि । हेतुत्वेनाङ्गीक्रियते यः प्रथमाऽध्यासः स सहेतुको, निर्हेतुको वा ? नाद्यः । प्राथम्यासिद्धेस्तस्याऽप्यन्यस्तस्याप्यन्य इत्यनवस्थापत्तेश्च । प्रमाजन्यसंस्कारस्यैव पूर्वकारणत्वनियमात् । तदनङ्गीकारेऽध्यासस्य वक्तुमशक्यत्वात् । नच लाघवेन संस्कारमात्रस्यैव तत्रापेक्षितत्वान्न विषयसत्त्वमपीत्युक्तमेवेति वाच्यम् । असतः संस्कारस्यैवासम्भवात् । नच मास्तु संस्कारस्यापि कारणत्वं, प्रतीतिमात्रस्यैव सुवचत्वादिति वाच्यम् ।

असतो विषयस्य प्रतीतेरेव सर्वाऽनुभवविरुद्धत्वात् । अन्यथा खपुष्पशशशृंगादेरपि प्रतीत्यापत्तेरसत्त्वाविशेषात् । ननु खपुष्पादेरसत्त्वात् प्रतीत्यभावःप्रतीतिविषयस्यानिर्वचनीयत्वाङ्गीकारान्नोक्तविरोध इतिचेन्न । सदसदुभयभिन्नपदार्थस्याभावाददृष्टश्रुतत्वाच्च। नच शुक्तिरजतस्यैवासत्त्वे प्रतीतिर्न स्यात्,सत्त्वे बाधो न स्यादतः प्रतीतिबाधाभ्यामनिर्वचनीयत्वं निश्चीयते । केनापि विदुषा तस्यान्यथा वक्तुमशक्यत्वादनीर्वचनीयत्वासिद्धिरिति वाच्यम्। सत्ख्यातिवादिनां वैदिकानां सर्वेषां ज्ञानानां सत्यत्वाभ्युपगमात् । कथं तर्हि तस्य बाधो, बाधे च कथं सत्त्वमिति चेत् । उच्यते । सतोऽपि प्रमाणबलेन निवृत्तिर्जायते, न त्वत्यन्ताभावः । पुण्येन पापस्य, सदौषधिभी रोगस्योत्तरज्ञानेन पूर्वज्ञानस्य च निवृत्तेर्दृष्टश्रुतत्वात् । पुण्येन पापमपनुदतीति श्रुतेः।एवमिदं रजतमित्यत्राऽपि रजतज्ञानस्य दोषसंस्कारसादृश्यात्मकसद्धेतुकत्वात् सत्त्वमेव । तस्य पुनः शुक्तिचक्षुःसन्निकर्षेण शुक्तिस्वरूपावरणानिवृत्त्या निवृत्तेः सम्भवात् । तस्मादज्ञानस्यैव सत्त्वाद्विषयस्य सत्त्वाऽनियमात् सत्ख्यातिवादसिद्धिः॥

ननु विषयस्याऽसत्त्वेपि प्रतीत्यङ्गीकारश्चेत्तर्ह्यागता यूयमस्मन्मार्गे। अस्माभिस्तथाभ्युपगमादितिचेन्न । सद्धेतुका ख्यातिः सत्ख्यातिरित्यर्थाभ्युपगमात् । त्वया तु द्वैतापत्तिभयादोषसंस्कारादिकारणस्य सत्त्वं वक्तुमशक्यत्वात् । अतो महद्वैलक्षण्यमिति भावः। एतेनैव प्रथमाध्यासो निर्हेतुक इत्यपि निरस्तः । कारणाभावे कार्याभावनियमात् । असतः कुत्रापि कारणत्वादर्शनाच्च । अन्यथाऽनिवृत्तिप्रसङ्गात्। नचासतोऽपि रज्जुसर्पस्य भयकम्पादिजनकत्वदर्शनात् कार्यकारणसत्तापेक्षितत्वनियमभङ्ग इति वाच्यम् ।
स्वरूपेणाऽसतः कार्योत्पत्त्यनुकूलशक्तिमत्त्वकारणलक्षणत्वाऽसं-

भवात्।सर्पभ्रमस्थलेऽपि सर्पविषयकज्ञानस्यैव भयादिहेतुत्वं,नारोपि-
तसर्पस्य। अन्यथा सर्पविषयकज्ञानात्यन्ताभाववतो बालस्यापि भ्रमो
भयकम्पादिश्च भवेन्न तु तदस्ति, प्रत्युत सत्यसर्पोऽपि बालैर्गृह्यते। त-
स्माद्ब्रह्मण्यध्यासस्य भानाभावात्कारणाभावात्प्रमाणाभावाच्च तद्-
वक्तॄणां भ्रान्तिमत्त्वमिति सिद्धम् । एतेनैव—तमेतमविद्याख्यमा-
ऽऽत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा
लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेध-
मोक्षपराणीत्यपास्तम् ॥

ननु, कर्त्ता द्रष्टा श्रोता ऽनुमन्ताऽहमिति प्रत्यक्षस्य देवदत्त-
कर्तृको व्यवहारः, तदीयदेहादिष्वहंममाऽध्यासमूलकः । तदन्वय-
व्यतिरेकानुसारित्वात् । यदित्थं तत् तथा । यथा मृन्मूलो घट
इत्यनुमानस्य, तत्र जाग्रत्स्वप्नयोरध्यासे सति व्यवहार इत्यन्वयः,
सुषुप्तावध्यासाभावे व्यवहाराभाव इति व्यतिरेकः। यदि प्रमाता-
ऽध्यासवान् न स्यात् तर्हि प्रमाणादिव्यवहारो न स्यादित्यर्थापत्ते-
श्चात्र मानत्वात् । तथाचाह भाष्यकारः। "कथं पुनरविद्यावद्विषया-
णिं प्रत्यक्षादिप्रमाणानि शास्त्राणि चेति । उच्यते—
देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्य-
ऽनुपपत्तेः । न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भव-
ति । न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः सम्भवति । न चा-
ऽनध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते।न चैतस्मिन् सर्वस्मिन्न-
ऽसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण
प्रमाणप्रवृत्तिरस्ति।तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि
शास्त्राणि चे"ति कथं प्रमाणाभाव इति चेन्न । उक्तप्रत्यक्षानुमाना-
देराभासमात्रत्वात् । तथाहि । उक्तप्रत्यक्षानुमानादीनां देहेन्द्रिया-
दियुक्तात्मपरत्वेन अध्यस्तविषयकत्वाभावात् । आत्मेन्द्रियमनो-

युक्तम्भोक्तेत्याहुर्मनीषिण इति श्रुतेः । कर्तुरेव भोक्तृत्वनियमा-
त् । अन्यथा 'युक्त'स्थानेऽध्यस्तमिति श्रुतौ प्रयोगः स्याद् । नच
तथात्वेऽसङ्गो हीति श्रुतिविरोधापत्तिरुक्तैवेति वाच्यम् । तस्या-
श्रुतेः परमात्मपरत्वाद् । जीवात्मनः प्रमातृत्वे, योऽयं वेद जिघ्रा-
णाति स आत्मा कतम इत्युपक्रम्य पुरुष एव द्रष्टा श्रोता रस-
यिता घ्राता मन्ता बोद्धा विज्ञानात्मा पुरुष इति श्रुतिरपि मानम्
परमात्मनस्त्विन्द्रियाद्यन्तरेणैव कर्तृत्वप्रमातृत्वाद्युपपत्तेर्न तत्राध्यास
गन्धोऽपि । तथाच श्रुतिः– अपाणिपादो जवनो ग्रहीता पश्य-
त्यचक्षुः स शृणोत्यकर्णः । यस्मादन्तीन्द्रियोऽपि सर्वतः पश्यति
सर्वतः शृणोति सर्वतो गच्छति सर्वत आदत्त इत्यादिः । नाऽप्यनु-
मानसिद्धिः । अध्यासस्याद्याप्यऽसिद्ध्या साध्याभावेन व्याप्य-
ऽग्रहाद् । अत एव हेतोः स्वरूपाऽसिद्धत्वाद् अध्यासाऽसिद्ध्या
तदन्वयव्यतिरेकस्य सुतरामसिद्धेः । घटादीनां मृत्पारिणामरूपत्वेन
दृष्टान्तवैषम्याच्च । तथैव व्यवहारस्य देहादियुक्तात्मकर्तृकत्वेना-
ऽन्यथासिद्धत्वादर्थापत्तेरपि निर्मूलत्वादाभासमात्रत्वसिद्धिः ।
नच सुषुप्तावध्यासाभावे व्यवहाराभावाद्व्यतिरेकसिद्धिस्तयैवान्वय-
सिद्धिरतो हेतोः स्वरूपासिद्ध्यभाव इति वाच्यम् । तत्र करणोपरमा-
न्नोक्तानुपपत्त्युद्धारः। ननु प्रमाश्रयत्वं हि प्रमातृत्वम् । प्रमा यदि
नित्यचिन्मात्रं तर्ह्याश्रयत्वायोगः, करणवैयर्थ्यञ्च। यदि वृत्तिमात्रं
जगदान्ध्यप्रसङ्गः । वृत्तेर्जडत्वाद् । अतो वृत्तीद्धो बोधः प्रमा ।
तदाश्रयत्वम् असङ्गस्यात्मनो वृत्तिमन्मनस्तादात्म्याध्यासं विना
न सम्भवतीति भाव इति चेन्न । अनुपपन्नत्वाद् । तथाहि । य-
दुक्तं वृत्तीद्धो बोधः प्रमेति। स बोधः किमात्मस्वरूपं? वृत्तिरेव वा
आत्मधर्म्मो वेति ? विवेचनीयम् । नाद्यौ वक्तुं शक्यौ । तयो-
स्त्वयैव दूषितत्वाद् । किञ्च, तस्य चिन्मात्रत्वे वृत्त्याराधनाऽयो-

गात् परिशेषादकामेनाऽपि आत्मधर्मभूतगुण एव वक्तव्यः। स चा-ऽस्मदिष्ट एव। तस्य तु वृत्तिमन्मनोऽध्यासं विनैव प्रमात्वसम्भवात्। परन्तु, अज्ञानेनाऽऽवृतं ज्ञानमित्यादिपूर्वोक्तप्रमाणादनादिकर्मात्मकाज्ञानावृतत्वात् तस्य बद्धावस्थायां करणद्वारा बहिः प्रसरणात् तदाश्रयत्वादात्मनोऽपि करणाधीनप्रमातृत्वात् करणानां च सुषुप्तौ लयात्तदभानं न विरुद्ध्यते। एतेन, तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेत्युक्तमपास्तमित्यलं विस्तरेण। तस्मात् द्रष्टृत्वकर्तृत्वादयः प्रत्यया यथार्था एव, नाध्यासविषया इति सिद्धम्। ननु तथापि न ते यथार्थाः। अपौरुषेयतया निर्दोषेणोपक्रमादिलिङ्गावधृततात्पर्येण च तत्त्वमस्यादिवाक्येन अकर्तृब्रह्मबोधनेन तेषां भ्रमत्वनिश्चयादिति चेन्न। वाक्यार्थज्ञानाभावात्। तथाहि। अपौरुषेयतया निर्दोषेण लिङ्गावधृततात्पर्येण च तत्त्वमस्यादिवाक्येन प्रतिपाद्यमानस्य, सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयमिति सच्छब्दवाच्यस्याऽतिशयसाम्यशून्यस्य, तदैक्षत बहु स्यां प्रजायेय, तत् तेजोऽसृजतेति ईक्षणबहुभवनसङ्कल्पवतस्तेजःप्रभृतिजगत्स्रष्टुरैतदात्म्यमिदं सर्वं, तत् सत्यं, स आत्मा, तत्त्वमसि श्वेतकेतो इति तादात्म्योपदेशोऽस्मदिष्टतमः; परन्तु तस्मिन् वाक्ये अकर्तृब्रह्मोपदेशस्य केनाऽपि पदेनोपदिष्टत्वाभावात्। प्रत्युतेक्षणबहुभवनसङ्कल्पकर्तृत्वपूर्वकतेजःप्रभृतिजगत्कर्तृत्वश्रवणाच्चोक्तप्रत्ययानां भ्रमत्वासिद्धेः।

किञ्च, लिङ्गोपेततत्त्वमस्यादिवाक्येन भवदभिप्रेतनिर्विशेषाकर्तृब्रह्मबोधनस्यैवासम्भवः। वाच्यत्वानभ्युपगमात्। वाक्यमात्रस्य किञ्चिद्धर्मावच्छिन्नवस्तुबोधकत्वनियमात्। एतेन एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्त्तकः सर्वलोकप्रत्यक्ष इति निरस्तम्। युक्तिभानकारणप्रमाणाभावात्। मे माता

वन्ध्येति वाक्याभासवदप्रामाण्यादिति यावत् । यत्पुनरुक्तम्– अस्य
ऽनर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आ
रभ्यन्त इति । तदत्यन्तानुपपन्नम् । तमेतमेवंलक्षणमध्यासं पण्डित
अविद्येति मन्यन्ते, तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः
तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि
न सम्बध्यते इति स्वोक्तिविरोधात् । किञ्चाध्यासस्यानर्थहेतुत्वम
स्ति नवेति निश्चेतव्यम् । नाद्यः । दोषादिसंबन्धापत्त्याऽसङ्गत्व
श्रुतिविरोधात् । न द्वितीयः । अनर्थहेतुत्वाभावात्तन्निवृत्त्यर्थं शास्त्रा
रम्भस्य वैयर्थ्यात् । शास्त्रारम्भो व्यर्थः । प्रयोजनाभावात् । दिव
दीपवदित्यनुमानात् । किञ्च, कर्तृत्वाद्यनर्थहेतोरध्यासस्यात्मैक
त्वविद्याप्रतिपत्त्या प्रहाणं भवति । सा च वेदान्तविचारेणेति सि
द्धान्तं प्रतिपद्यमानाः विद्वद्भिः प्रष्टव्याः । किमात्मैकत्वविद्या
प्रतिपत्त्या उक्ताध्यासमात्रस्यैव प्रहाणिर्न तु तत्कारणाविद्यायाः
उत समूलस्यात्यन्तिकनाश इति विवेचनीयमिति । नाद्यः । मूल
कारणस्य सत्त्वेन पुनस्तदुत्पत्त्यापातात् । अविद्यानिवर्त्तकाभावे
विद्यास्वरूपहानेश्च । अविद्यानिवर्त्तकाऽन्तराभावेनाऽनिवृत्तिप्रस
ङ्गाच्च । न द्वितीयः । शुक्तिज्ञानाद्रजतबाधवद् आत्मैकत्वविद्या
ज्ञानादध्यस्तसर्वप्रपञ्चस्य बाधाऽदर्शनात् । आत्मैकत्वविज्ञानेन
सर्वबाधस्वीकारे च अद्वैतसिद्धान्तसम्प्रदायोच्छेदप्रसङ्गः स्यात् ।
तथाहि । अद्वैतसिद्धान्तप्रवर्त्तकाचार्याः अज्ञाः ? आत्मैकत्वविद्या
वन्तो वा ?। नाद्यः । अज्ञत्वादेवाऽऽचार्यत्वभङ्गात् । अज्ञोपदिष्ट
स्य अप्रामाण्याच्च । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति
भगवदुक्तेः । अन्यथाऽन्धपरम्परान्यायापत्तेः । अन्धैर्नीयमाना य
थान्धा इति श्रुतेः । न द्वितीयः । अद्वैततत्त्वसाक्षात्कारवतां द्वैत
दर्शनाभावेन स्वमतपरमतोद्देशपूर्वकदूषणभूषणोपपादनात्मकशास्त्र

प्रणयनरूपभेदज्ञानाऽसम्भवात् । गुरुशिष्योपदेशरूपभेददर्शनाऽसम्भवाच्च को वा गुरुः कस्मै शिष्याय किं वा तत्त्वमुपदिशेत् । तस्य सर्वस्य बाधितत्वात् । अन्यथा भेददर्शनस्यैव भवन्मतेऽज्ञानमूलकत्वात् । कार्यदर्शनस्य कारणसत्तापूर्वकत्वनियमेन विद्यावत्त्वस्याऽवश्यम्भावात् । तदयोगादनाप्तत्वप्रसङ्गस्य दुर्वारत्वात् । ननु जीवन्मुक्तत्वात्तेषां दग्धपटन्यायेनानुवर्त्तमानबाधितभेददर्शनान्नोक्तदोषयोग इति चेन्न । दृष्टान्तवैषम्यात् । दग्धपटस्य किमपि कार्यकारित्वाभावात् । तेषां तु पूर्ववदेव सर्वक्रियाकारित्वं प्रत्यक्षप्रमाणसिद्धमेवेति भावः । न चाऽन्यदृष्ट्यैव तेषां क्रियाकारित्वमिति वाच्यम् । नियामकाऽभावाच्छास्त्रप्रमाणशून्यत्वाच्च । नच प्रारब्धमात्रशेषत्वात् तत्कृतकार्यकारित्वं न दोषावहमिति वाच्यम् । सुखदुःखादिभोगात्मकप्रारब्धकर्मणि तत्कार्यभूतकामक्रोधादौ च विद्यमाने मुक्ताभिधानस्य, मुक्ता वयमित्यज्ञजनतावञ्चकतामात्रत्वात् । एवञ्च सञ्ज्ञामात्रजीवन्मुक्तेर्जन्मान्धस्य पुंसः कमलनयनसंज्ञावदुपहासमात्रत्वात् । जीवन्मुक्तौ प्रमाणाभावाच्च ॥

ननु तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य इति श्रुतिसिद्धा जीवन्मुक्तिः किमिति निन्द्यते इति चेत् सत्यम् । गतत्रपाणां किमप्यशोभनं नास्तीति भावात् । श्रुतौ, तावदेव चिरं न विमोक्ष्ये अथ सम्पत्स्ये इति पदैः प्रारब्धभोगप्रतिबन्धकं वर्त्तमानकाले मोक्षाभावं भाविमोक्षञ्च साक्षादुच्यमानं ज्ञात्वाऽज्ञात्वा वा येथष्ट्वादित्वादत एव यथाकामचारिणां सिद्धान्ते किमपि दूषणं नाऽस्तीतिभावः । एवञ्च वेदान्तशास्त्रस्याप्रयोजकत्वेन वैयर्थ्यात् केवलाद्वैतवादिमतमसङ्गतमेवेति सिद्धम् । अध्यासाज्ञानलक्षणतन्निवर्त्तकादिविशेषनिरासस्तु परमतगिरिवज्राख्ये ग्रन्थे विस्तृतस्तत्रैव द्रष्टव्य इत्यलं विस्तरेण ॥

ननु द्वैतस्याध्यस्तत्वानङ्गीकारे परमार्थतो भिन्नानां पदार्थानां ब्रह्मैक्यासम्भवात् स्वमुखेन भवद्भिरपि निरस्तत्वाच्च । पूर्वोक्तश्रुतीनां ब्रह्मैकत्वप्रतिपादिकानां भेदप्रतिषेधिकानां च विरोधातिसिद्धान्ताभावप्रसङ्गः स्यादितिचेन्न । सच्छास्त्रसिद्धान्तरक्षणार्थं भगवत्परब्रह्मपुरुषोत्तमाज्ञयावनितलावतीर्णानां श्रीसनत्कुमारसम्प्रदायप्रवर्त्तकाऽऽचार्य्याणां सिद्धान्ते श्रुतिविरोधगन्धस्याऽप्यऽभावात् । तथाहि । न तावत्सदेवेति श्रुतिविरोधः । अग्रे सृष्टेरादौ इदंशब्दवाच्यस्य कार्यस्य जगतः सच्छब्दवाच्ये कारणे अतिसूक्ष्मरूपत्वेन सत्त्वेऽपि नामरूपविभागाभावेन पृथग्ग्रहणानर्हत्वात् सदेवेति कारणेनैक्यनिर्देशः सूपन्नः । अन्यथा सच्छब्दवाच्यस्य कारणस्य ब्रह्मण इदमित्यङ्गुल्यानिर्देशायोगात् कार्यस्य कारणे सूक्ष्मरूपेण सत्त्वानङ्गीकारे च असत्कार्यवादाभ्युपगमापत्त्या तत् सदासीत्, सत्त्वाच्चाऽवरस्य, असद्व्यपदेशादितिचेन्न धर्म्मान्तरेण वाक्यशेषात्, युक्तेः शब्दान्तराच्च, पटवच्च इत्यादिशास्त्रावगतसूत्रकारमतबहिर्भूतत्वप्रसङ्गः स्यात् । किञ्च इदमा निर्दिष्टस्य कार्यस्य पूर्वमभावाङ्गीकारे आसीदीति पूर्वकालसम्बन्धो न स्यात् । श्रुत्यर्थश्च तत्र सच्छब्दः स्वतन्त्रवाचकः । सत्त्वंस्वातन्त्र्यमुद्दिष्टमिति वाक्यात् । एकशब्दश्च कारणैकत्वं विदधाति । एवकारश्चान्ययोगव्यवच्छेदार्थकस्तत्समं निषेधति । अद्वितीयशब्दश्च तदाधिक्यं निषेधतीति, न तत्समश्चाभ्यधिकश्च दृश्यते इति श्रुत्येकार्थत्वात् ॥ अन्यथा एकपदेनैव अद्वैतसिद्धौ अन्यपदयोर्वैयर्थ्यापत्तेः । अथ, तत्त्वमसि, अयमात्मा ब्रह्म, सर्वं खल्विदं ब्रह्मेत्यादिश्रुतीनां चिदचिदात्मनोर्ब्रह्मात्मकत्वेन, तदायत्तस्थितिप्रवृत्तिकत्वेन तद्व्याप्यत्वेन च ब्रह्मतादात्म्यप्रतिपादनेन स्वार्थे एव प्रामाण्यात् सर्वं समञ्जसम् । तत्र ब्रह्मात्मकत्वं नाम- ब्रह्म आत्मा यस्य

चेतनाचेतनरूपवस्तुजातस्य तद् ब्रह्मात्मकं, तस्य भावस्तत्त्वम्। तेन,एष मेआत्मान्तर्यामी एष ते आत्मान्तर्यामी एष सर्वभूतान्तरात्मा सर्वव्यापी सर्वभूतान्तरात्मा,पतिं विश्वस्यात्मेश्वरमआत्मेतिउपगच्छन्ति ग्राहयन्ति च,अहमात्मा गुडाकेश सर्वभूताशयस्थितः,सर्वस्य चाहं हृदि सन्निविष्टः, यदाह वसुधा सर्वं सत्यमेतद्विवौकसः,अहं भवो भवन्तश्च सर्वे नारायणात्मकाः,क्षेत्रज्ञं चापि मां विद्धि,इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं, धृतिः वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव चेत्यादिश्रुतिस्मृतिसूत्रेभ्यः। यो यदात्मकः स तदभेदव्यपदेशार्हः सुवर्णकुण्डलादिवदितिव्याप्तेश्चातिप्रसिद्धत्वात्। तदायत्तस्थितिप्रवृत्तिकत्वेन, तत्तस्य ब्रह्मण आयत्ता अधीना स्थितिः प्रवृत्तिश्च यस्य वस्तुमात्रस्य तत्तथा, तस्य भावस्तत्त्वम्। तेन सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा, एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, भीषास्माद्वातः पवते भीषोदेति सूर्य्यः, भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः, किमनेन जगन्नाथ सर्वं त्वद्वशगं जगत्, विश्वं चेदं यद्वशे विश्वयोने, नमोऽस्तु ते शार्ङ्गचक्रासिपाणे, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति * भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया, ससुरासुरगन्धर्वं सयक्षोरगराक्षसं, जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरमित्यादिश्रुतिस्मृतिभ्यः। तथाच यद्यदायत्तस्थितिप्रवृत्तिकं वस्तु तत्तदभेदव्यपदेशार्हमिति व्याप्तिराम्नायते छन्दोगैः प्राणसंवादे, न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राण इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवतीत्यादिना। किञ्च तद्व्याप्यत्वेन तत्तस्य ब्रह्मणो व्याप्यं यत्तद्व्याप्यं तस्य भावस्तत्त्वम्। तेन,यच्च किंचिज्जगत्यास्मिन् दृश्यते श्रूयतेऽपि वा,अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः, द्यावापृथिव्योरिदमन्तरं हि व्या-

मं त्वयैकेन दिशश्च सर्वा इत्यादिशास्त्रात् । यो यद्याप्यः स तद्रूप इत्यत्र, योऽयं तवागतो देव समीपं देवातागणः, स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान्, सर्वं समाप्नोषि ततोऽसि सर्वः, सर्वगत्वादनन्तस्य स एवाहमवस्थित इत्याद्याः स्मृतयः प्रमाणत्वेन बोध्याः ॥

एतदुक्तं भवति । सत्ता तावद् द्विविधा-स्वतन्त्रपरतन्त्रभेदात् । तत्र स्वतन्त्रसत्ता नाम आत्माश्रितत्वे सति स्वायत्तस्थितिप्रवृत्तिकता । सा परब्रह्मविश्वात्मनिष्ठा । सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयम् । एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, भीषास्माद् वातः पवते, आत्मा, हि परमस्वतन्त्रोऽधिगुणः, एष सर्वेश्वरः सर्वाधिपतिः, स कारणं कारणाधिपाधिपः न तस्य कश्चिज्जनिता न चाधिप इत्यादिश्रुतिभ्यः । सर्वस्य चाऽहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च, शास्ता विष्णुरशेषस्येत्यादिस्मृतिभ्यश्च । एवं स्वतन्त्रसत्ताश्रयो निरस्तसाम्यातिशयो विश्वात्मा परब्रह्म भगवान् श्रीपुरुषोत्तम इति सिद्धम् । परतन्त्रसत्त्वं च परायत्तस्थितिप्रवृत्तिकत्वम् । तच्च चेतनाचेतनात्मकनियम्यवर्गवृत्ति । यदासीत्तदधीनमासीत्, जीवोऽल्पशक्तिरस्वतन्त्रोऽवर इत्यादिश्रुतिभ्यः । मत्तः सर्वं प्रवर्त्तते, सत्त्वं स्वातन्त्र्यमुदिष्टं तच्च कृष्णे नचाऽपरे, अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारतेत्यादिस्मृतिभ्यः । परतन्त्रसत्त्वं द्विविधं, कूटस्थत्वं विकारशीलं चेति । तत्र कौटस्थ्यं नाम जन्मादिविकारशून्यत्वे सति नित्यत्वम् । तच्च जीवात्मवर्गाश्रितम् । तदाश्रयो जीवः प्रत्यगक्षरपुरुषक्षेत्रज्ञादिशब्दाभिधेयः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, न जायतेम्रियते वा विपश्चित्, अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीर इत्यादिवाक्येभ्यः । द्वितीयं च विक्रियायुक्तत्वे सत्यनाद्यन-

न्तत्वम् । तत्तु प्रकृतिवर्गाश्रितम् । तदाश्रयं च कार्यकारणात्मकं प्रधानप्रकृत्यादिशब्दवाच्यम् । गौरनाद्यन्तवती जनित्री भूतभाविनी सितासिता च रक्ता च सर्वकामदुघा विभोरित्यादिश्रुतेः । त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम्, अचेतना परार्था च नित्या सततविक्रिया, तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्, आविर्भावतिरोभावजन्मनाशविकल्पवदित्यादिवैष्णवचनाच्च । तथाच स्वतन्त्रसत्त्वविषयकाभेदवाक्यप्रवृत्तिस्तस्यैक्यात् । तेनैव तेषां नैराकाङ्क्ष्यम् । तथैव भेदनिषेधपराणां चाऽपि चेतनाचेतनवस्तुवृत्तिस्वतन्त्रसत्त्वनिषेधपरत्वेन स्वार्थे एव प्रामाण्यात् । भेदवाक्यानां तु परतन्त्रसत्त्वविषयकत्वेनैव स्वार्थविधायकत्वात्सर्वं समञ्जसम् । एवञ्च स्वतन्त्रसत्त्वं परतन्त्रसत्त्वाभावं चाश्रित्य तत्त्वमस्यादिवाक्यानि भेदाभेदवाक्यानां परस्परविरुद्धानामविरोधेनान्वेतुकामानि जगद्भिन्नाभिन्नं ब्रह्म प्रतिपादयन्ति । तथाच विश्वात्मा पुरुषोत्तमः स्वाश्रितात्मसत्तया विश्वस्मादभिन्नः । तथैवात्मीयचेतनाऽचेतननियम्यवर्गवृत्तिपरतन्त्रसत्त्वाभावरूपेण विश्वविलक्षणत्वाऽपरपर्यायेण सार्वज्ञादिवद्भावरूपेणात्मासाधारणेन धर्मेणाऽस्थूलादिवाक्यप्रतिपाद्येन विश्वस्माद्भिन्न इति स्वभावतो विश्वभिन्नाभिन्नः श्रीपुरुषोत्तमः परब्रह्मभूतो भगवान् रमाकान्तः सर्ववेदान्तार्थ इति सिद्धान्तः । उभयविध-वाक्यानि तु पूर्वमेवोदाहृतानि उक्तार्थघटकवाक्यानि कानिचिदुदाहियन्ते । एकः सन् बहुधा विचचार, एको देवो बहुधा संनिविष्टः, त्वमेकोऽसि बहुधा बहून् प्रविष्ट इत्याद्याः श्रुतयः । एकत्वे सति नानात्वं नानात्वे सति चैकता, अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हतीति भगवान्मनुः । ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते, एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति भगवद्वाक्यम् । ॐ नमो वासुदेवाय तस्मै भगवते सदा, व्यतिरिक्तं न

यस्यास्ति व्यतिरिक्तोऽखिलस्य यः, नित्यानित्यप्रपञ्चात्मन् निष्प्रपञ्चाऽमलाश्रित, एकानेक नमस्तुभ्यं वासुदेवादिकारण, यः स्थूलसूक्ष्मः प्रकटप्रकाशो यः सर्वभूतो न च सर्वभूतः, विश्वं यतश्चैतदविश्वहेतो नमोऽस्तु तस्मै पुरुषोत्तमाय इति विष्णुपुराणे प्रह्लादवाक्यानि । तत्रैव ध्रुवस्तुतौ– पृथग्भूतैकभूताय भूतभूतात्मने नम इति । हरिवंशे घण्टाकर्णः श्रीकृष्णं प्रति, केचिद्भ्रुत्वेन वदन्ति देवमेकात्मना केचिदिमं पुरातनम्, वेदान्तसंस्थापितसत्त्वयुक्तं द्रष्टुं तमीशं वयमुद्यता स्मः, अनेकमेकं बहुधा वदन्ति श्रुतिस्मृतिन्याय-निविष्टचित्ताः, आहुर्यमात्मानजं पुराणं द्रष्टुं तमीशं वयमुद्यताः स्म इत्याद्याः स्मृतयश्च चिदचिद्भिन्नाभिन्नब्रह्माभिधायिका अनुसन्धेयाः । अलं विस्तरेण ॥

नाऽपि नानात्वनिषेधकवाक्यविरोधः । तस्य कारणे नानात्वनिषेधपरत्वात् । इह जगत्कारणे ब्रह्मणि नानात्वं नास्ति । कारणस्य सर्वशास्त्रे एकत्वप्रतिपादनात् । नानात्वदर्शनं तु तिष्ठतु, नानेव दर्शनस्यैतावत् फलं, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति मृत्योरनन्तरं मृत्युमाप्नोति । पुनः पुनर्जन्ममरणादिरूपसंसारभाग् भवतीत्यर्थः । अतो न हि जगत्स्वरूपप्रतिषेधकमिदं वाक्यम् । विकल्पासहत्वात् । तथाहि । किमिदं वाक्यं ब्रह्मेतरं वस्तुप्राप्तं प्रतिषेधति, अप्राप्तं वा । आद्ये सत्यम्, असत्यं वा । नाद्यः । सत्यस्य निषेधायोगात् । अन्यथा ब्रह्मणोऽपि निषेधापत्तेः । न द्वितीयः । असत्यस्य प्राप्तेरेवासम्भवात् । न चाऽध्यस्तं मिथ्याभूतं प्रतिषेधतीति वाच्यम् । वेदस्य पूर्वं भ्रान्त्यभावात् ।
यथा लोके दोषवतः पुरुषस्य भ्रान्त्या शुक्तौ प्रतीतं रजतं पुनः शुक्तिस्वरूपसाक्षात्कारान्नेदं रजतमिति स एव प्रतिषेधति । तथा वेदस्य भ्रान्तिकारणाभावात् 'प्रतीत्यभावस्तदभावात् प्रतिषेधा-

ऽसम्भवात्। अन्यथा वेदे दोषाङ्गीकारे बाह्यमतप्रवेशापत्तेः। न द्वितीयः। अप्राप्तस्य निषेधायोगात्। तस्मादुक्तार्थस्यैव वरीयस्त्वम्। किञ्च, नानात्वदर्शनोक्तो दोषस्तु अज्ञानकारणवादिमत एव समन्वितः। यतस्तैः शुद्धस्य सर्वधर्मशून्यस्य द्वैतापत्तिभयात् कारणत्वमनभ्युपगम्य ब्रह्मणः कारणत्वप्रतिपादकशास्त्रबाधानिवृत्त्यर्थं तत्र मायावच्छिन्नस्य सर्वज्ञत्वसर्वशक्त्याश्रयस्येश्वराख्यस्य कल्पनात्। वैदिकसम्प्रदायनिष्ठानां तु एकस्यैव परब्रह्मणः शुद्धत्वाऽनन्तगुणशक्त्याद्याऽऽश्रयत्वेश्वरत्वकारणत्वाद्यङ्गीकारान्नोक्तदोषगन्धस्पृष्टवातस्पर्शावकाशः। तथैव, यत्र हि द्वैतमिव भवतीति श्रुतेरपि स्वतन्त्रद्वैतनिषेधपरत्वेन नैराकाङ्क्ष्याद् न कोऽपि विरोधः। तत्सिद्धं केवलाद्वैतवादिमते शास्त्रानर्थक्यमिति। तथैव केवलभेदवादिनां वेदैकदेशबाधस्योक्तत्वात्। न हि शास्त्रबाधनार्थमाचार्याऽऽविर्भावो भवति। अपि तु तत्प्रवर्तनार्थमिति भावः। यदि भेदवादिभिरभेदवादिभिश्च स्वाभाविकोऽभेदो भेदोऽप्यङ्गीक्रियते चेत्तर्हि सर्वोऽपि वेदः सार्थकः स्यात्। परन्तु ते स्वसिद्धान्तं त्यक्त्वा आगता अस्मन्मार्गे। अन्यथोक्तदोषाणामवर्जनीयत्वादलं विस्तरेण॥

चिदचिद्विशिष्टाद्वैतवादिमते तु नोक्तशास्त्रविरोधः। यद्यपि चेतनाऽचेतनयोर्ब्रह्मविशेषणत्वेनाङ्गीकृतयोरितरव्यावर्तकत्वविशेषणलक्षणत्वानुपपत्त्या ब्रह्मणस्तद्विशिष्टत्वासम्भवस्तथापि तयोर्ब्रह्मणा स्वाभाविकभेदाभेदस्यैवाऽङ्गीकारात्। ननु यः पृथिव्यन्तरोयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयती त्यारभ्य, य आत्मनि तिष्ठन् यश्चात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यऽमृत इत्यादिश्रुतिभिश्चिदचितोः परमात्मशरीरत्वाभिधानात्। श-

रीरस्य च आत्मविशेषणत्वेन प्रसिद्धत्वात् । एवं सर्वावस्थाव-स्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुषः कार्यावस्थ-कारणावस्थजगद्रूपेणावस्थित इति कथं विशिष्टत्वासम्भव इति चेत्सत्यम् । श्रुतिभिश्चिदचितोः परमात्मशरीरत्वं प्रतिपाद्यते इ-त्यत्र न कश्चिद्विवादः, परं तु तयोर्विशेषणत्वस्य वक्तुमशक्यत्वा-त् । तथाहि । यत्र यत्र शरीरत्वं तत्र तत्र विशेषणत्वमिति ना-स्ति नियमः । प्रकृते तदभावात् । न हि व्यावर्त्तकत्वमन्तरेण विशेषणत्वङ्कस्याऽपि दृष्टं श्रुतं वा । तस्माद्व्यावर्त्यसत्त्वे एव शरी-रस्य विशेषणत्वम् । अन्यत्र व्यावर्त्यानां सत्त्वेन शरीरस्य विशेषण-त्वासम्भवात् प्रकृते चिदचितोर्विशेषणत्वे चिदचिद् ब्रह्मेति तत्त्व-त्रयादन्यस्याभावाद्, भवद्भिरप्यनङ्गीकाराच्च । तस्माद् व्यावर्त्या-ऽभावाद् व्यावर्त्तकत्वविशेषणलक्षणत्वाभावस्तदभावे च ब्रह्मणो विशिष्टत्वाभावः सुतरां सिद्धः । माऽस्तु विशेषणत्वम् । एतावन्मात्र-न्यूनत्वे न कापि क्षतिः । तयोर्ब्रह्मणा स्वाभाविकभेदाभेदाङ्गीका-रेण सर्वेषां वाक्यानां स्वार्थे प्रामाण्यात् । तथाच तेषां ब्रह्मसूत्रभाष्ये । अत्रेदं तत्त्वम् । अचिद्वस्तुनश्चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः । अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः, मा-यां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । अमृताक्षरं हर इति भोक्ता निर्दिश्यते । प्रधानमात्मनो भोग्यत्वेन हरतीति हरः । स कारणं कारणाधिपाधिपः न तस्य कश्चिज्जनिता न चाऽधिपः । प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिं विश्वस्यात्मेश्वरं, शाश्वतं शिवमच्युतं, ज्ञाऽज्ञौ द्वावजा-वीशानीशौ, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । भोक्ता भोग्यं प्रेरितारं च मत्वा तयो-

रन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति । पृथगात्मानं प्रेरितारं च मत्वा, जुष्टस्ततस्तेनाऽमृतत्वमेति, अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजां जनयन्तीं सरूपाम्, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इत्यादीनि बहुशः श्रुतिस्मृतिवाक्यानि पठित्वा, अग्रे, एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कारणावस्थं कार्यावस्थं जगत् स एवेत्याहुः । सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयं, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजतेत्यारभ्य, सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः, ऐतदात्म्यमिदं सर्वं तत्सत्यं, स आत्मा तत्त्वमसि श्वेतकेतो इति । तथा सोऽकामयत बहु स्यां प्रजायेयेति, स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेत्यारभ्य, सत्यं चानृतं च सत्यमभवदित्याद्या इत्युक्ता कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात् कार्यस्यानन्यत्वेन कार्यस्य विज्ञाततया एकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम् । हंताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तिस्रो देवता इति सर्वमचिद्वस्तु निर्देश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम् । अतः स्थूलसूक्ष्मचिदचिद्वस्तुप्रकारं ब्रह्मैव कारणं, कारणञ्चेति ब्रह्मोपादानं जगदिति प्रतिपादितम् । नचैवमद्वैतमागतमिति वाच्यम् । तस्य तत्रैव दूषितत्वात् । तद्यथा निर्विशेषवस्त्वैक्यवादिनः सर्वे ब्रह्मात्मभावोपदेशाः परित्यक्ताः स्युः । एकस्मिन् वस्तुनि कस्य ता-

दात्म्यमुपदिश्यते । तस्यैवेति चेत् स्ववाक्येनैवावगतमिति न तादात्म्योपदेशावसेयमस्ति किञ्चित् । कल्पितभेदनिरसनमिति चेत् । तत्तु न सामानाधिकरण्यं तादात्म्योपदेशावसेयम् । सामानाधिकरण्यं तु ब्रह्मणि प्रकारद्वयप्रतिपादनेन विरोधमेवावहेत् इत्यादिना ॥ भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात्तत्प्रयुक्ता जीवावगता दोषा ब्रह्मण्येव प्रादुःष्युरिति निरस्तनिखिलदोषकल्याणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्ताः स्युरित्यादिना चौपाधिकभेदाभेदस्यापि निरस्तत्वात् । वेदार्थसङ्ग्रहेऽपि एकविज्ञानेन सर्वविज्ञानं, सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न सेत्स्यति, सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वा इत्यादिना वेदान्तदीपे च ।

अत्रेयं वेदविदां प्रक्रिया । अचिद्वस्तुनः स्वरूपतः स्वभावतश्चात्यन्तविलक्षणस्तदात्मभूतश्चेतनः प्रत्यगात्मा । तस्माद्बद्धान्मुक्तान्नित्याच्च निखिलहेयप्रत्यनीकतया कल्याणैकतानतया सर्वावस्थचिदचिद्व्यापकतया नियन्तृतया शेषितया चात्यन्तविलक्षणः परमात्मा । तदुक्तं भगवता– द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति । श्रुतिश्च, प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिं विश्वस्यात्मेश्वरम्, अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणः स्थित इत्यादिका । सूत्रकारश्चैवं वदति, नेतरोनुपपत्तेः, भेदव्यपदेशाच्च, अनुपपत्तेस्तु न शारीरः, कर्तृकर्म्मव्यपदेशाच्च, पत्यादिशब्देभ्यः, अधिकं तु भेदनिर्देशात्, अधिकोपदेशात्तु बादरायणस्यैवं तदर्शनादित्यादिभिः । नचाविद्याकृतमुपाधिकृतं वा भेदमाश्रित्यैते निर्देशाः । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति

च । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, मुक्तोपसृप्यव्यपदेशाच्च, उत्तराच्चेदाविर्भूतस्वरूपस्तु, संपद्याविर्भावः स्वेन शब्दात्, जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च, भोगमात्रसाम्यलिंगाच्चेति सर्वाविद्योपाधिविनिर्मुक्तस्यैव भेदोपपादनात् । श्रुतिस्मृतिसूत्रेषु सर्वत्र भेदनिर्देशे चिदचिदीश्वरभेदः स्वाभाविको विवक्षित इति निश्रीयते इति प्रतिपादितं गीताभाष्येऽपि, न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपा इत्यस्य श्लोकस्य भाष्ये । औपाधिकभेदात्मवादे ह्यात्मभेदस्यातात्त्विकत्वेन तत्त्वोपदेशसमये भेदनिर्देशो न संगच्छते । भगवदुक्तात्मभेदः स्वाभाविक इति श्रुतिरप्याह । नित्यो नित्यानां चेतनश्चेतनानामेको बहूनामितीत्यादिनाऽद्वैतस्य निरस्तत्वात् ।

नन्वेवं चेत्तर्हि कथं विशिष्टाद्वैतमिति सिद्धान्तसिद्धिरद्वैतस्य निरस्तत्वादितिचेन्न सूक्ष्मचिदचिद्विशिष्टस्थूलचिदचिद्विशिष्टयोर्ब्रह्मणोरेवाऽद्वैताभ्युपगमान्न तु विशेषणविशेष्ययोरपीति भावः । नच तर्हि केवलभेद आगत इति वाच्यम् । तस्याऽपि सूत्रभाष्ये एव निरस्तत्वात् । तथाहि । केवलभेदवादिनां चात्यन्तभिन्नयोरेकेनापि प्रकारेणैक्यासम्भवादेव ब्रह्मात्मभावोपदेशो न सम्भवतीति सर्ववेदान्तपरित्यागः स्यादित्यनेन परिशेषात् स्वाभाविकभेदाभेद एव तयोः सम्बन्धः सिद्धः । तथा चोक्तं स्वयमेव । विशेषणस्य विशिष्टत्वस्यैकदेशत्वेनाभेदव्यवहारो मुख्यः । विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन भेदव्यवहारो मुख्य इति । तथैव लघुवेदार्थसंग्रहेऽपि अणुगीतासु ऽद्वाविमौ पक्षिणौ नित्यं संज्ञेयौ चाप्यचेतनौ । एताभ्यां तु परो योऽन्यश्चेतनावान् स उच्यते इति सत्त्वपुरुषवैलक्षण्यं परमात्मनः प्रतिपाद्य, अनुमानाद्विजानीयात् पुरुषं सत्त्वसंश्रयमिति पुरुषस्य सत्त्वाश्रयत्वमुक्त्वा, सत्त्वं च पुरुषश्चैकस्तत्र सत्त्वविचारणेत्याश्र-

याश्रयिणोः सत्त्वपुरुषयोरैक्यं वा भेदो वेति विचारणीयमित्युक्ता, क्षेत्रक्षेत्रज्ञयोरैक्यमित्येतन्नोपपद्यते, पृथग्भूतंततः सत्त्वमित्येतद्विचारितमिति सत्त्वक्षेत्रज्ञयोः केवलैक्यवादवत्केवलभेदवादोऽप्यविचारणीयइतिव्युत्पाद्य, तथैवैकत्वनानात्वमित्येव विदुषां नयः। मशकस्योदुम्बरे चैक्यं पृथक्त्वमपि दृश्यते।मत्स्यो यथाऽन्यः स्यादप्सु संयोगस्तु तथा तयोरित्युदुम्बरफलजलाश्रययोर्मशकमत्स्ययोरिव यथा स्वाश्रयापेक्षया भेदाभेदव्यपदेशावुभावपि न्याय्यौ तथा सत्त्वपुरुषयोरपीत्युपसंहृतम्। अनेन मोक्षशास्त्रे चिदचिदीश्वराणां भेदव्यपदेशस्तेषां स्वरूपवैलक्षण्यान्मुख्यः । अभेदव्यपदेशोऽप्याश्रयाश्रयिभावेन मुख्य एवेत्युक्तं भवति । तथाच विष्णुपुराणे, विष्णुः शास्त्रेषु युष्मासु मयि चासौ यथा स्थितः । सर्वगत्वादनन्तस्य स एवाऽहमवस्थितः चिन्तयन् सर्वभूतस्थमात्मन्यपि च केशवम् । मय्यन्यत्र तथा शेषभूतेषु भुवनेषु च, तथैव व्याप्तिरैश्वर्यगुणसंसूचिकी प्रभोरिति भगवतः सर्वत्रावस्थितिरेव सर्वाभेदव्यदेशहेतुरित्युक्तम् । अतो न भेदाभेदव्यपदेशयोर्विरोध इति प्रतिपादितम् । एवञ्च केवलभेदकेवलाभेदयोः शास्त्रविरुद्धत्वेन निरस्तत्वाच्चिदचितोर्ब्रह्मणा सह स्वाभाविकभेदाभेदस्यैवाङ्गीकारो निश्चितो भवति। अन्यथा शास्त्रे सम्बधान्तराभावेन पूर्वोक्तेष्वेकतराङ्गीकारे तत्र स्वमुखोक्तदूषणानां स्वसिद्धान्त एवापातादतो नान्यः पक्षः परिग्रहीतुं शक्यते। तस्मादकामैरपि चिदचिदीश्वराणां स्वाभाविकभेदाभेदमेव सम्बन्धमङ्गीकृत्य पुनर्विशिष्टत्वाङ्गीकारो गौरवावहोऽप्यनुपपन्नोऽपि स्वसंप्रदायस्य स्वातन्त्र्यसिद्ध्यर्थ इति सिद्धम् । अलं विस्तरेण ॥

इति श्रीसनत्कुमारनारदसंप्रदायप्रवर्त्तकाद्याचार्य-
श्रीभगवन्नियमानन्दानुयायिना अनन्तरामेण
विरचितो वेदान्ततत्त्वबोधः समाप्तः ॥

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 94 & 99.

ब्रह्मसूत्रम् ।

द्वैताद्वैतदर्शनम् ।

श्रीमद्वैष्णवसंप्रदायचतुष्टयान्यतमपूज्यपादश्रीहंसनकादिपथाश्रित
श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाभिधटीकया समुद्भासितेन
निर्दिष्टपथावलम्बिश्री१०८भगवद्वासुदेवपाणिस्थपद्मावतारश्रीदेवा-
चार्यप्रणीतसिद्धान्तजान्हव्याख्यव्याख्यानेन समुल्लासितम् ।

कलियुगजनपावनावतारपरपुमर्थप्रेमवितरणपरायणश्री१०८भगवत्कृष्णचैतन्यचरणोप-
दिष्टैकवीथीमात्रपथिकेन श्रीमध्वसंप्रदाचार्य्येण साहित्यदर्शनाचार्येण श्रीगोस्वा
मिदामोदरलाल शर्मणा तथा रत्नगोपालभट्टेन संशोधितम् ।

BRAHMASUTRA,

WITH A GLOSS CALLED

SIDDHANTAJÂHNAVI BY

SHREE DEVÂCHÂRYA

And a commentary called DWAITADWAITASIDDHÂNTASETUKÂ

BY SREE SUNDARA BHATTA

EDITED BY

Sâhityâchârya Pandit Dâmodar Lal Goswâmi

And Ratna Gopâl Bhatta.

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES.

AGENTS:—OTTO HARRASSOWITZ LEIPZIG:

PANDIT JYESHTHÂRÂMA MUKUNDJI, BOMBAY.

Printed by Hari Dâs Gupta, Proprietor,

AT THE VIDYÂ-VILÂSA PRESS,

BENARES.

Price Rupee One.

1906.

Registered According to Act XXV. of 1867.

५५।
शस्ते-

श्रीहरिः शरणम्

नमो भगवते श्रीनियमानन्दाय

विदितमस्तु सङ्घावताम् ।

श्रीमतो भगवतः परमपुरुषस्येक्षणमात्रसमुत्थितेऽस्मिञ्जगति श्री॰ भगवल्लीलापरिकरीभूता अनन्ता जीवसङ्घाः । तानशरीरणः सञ्चरतोऽचिद्विशेषान् अनादिकर्मरूपाविद्याग्रस्तान् नैस्सुखानुभूतिरहितान् स्वांशभूतानपि दुःखितान् दृष्ट्वा परमकारुणिको भगवाननन्तकोटिब्रह्माण्डशरीरी जगदुदयविभवलयलीलो निरतिशयलावण्यसौन्दर्यमहोदधिरनन्तापरिच्छिन्नमहागुणगणसागर इच्छागृहीताभिमतोरुदेहत्वेऽपि निजस्वेच्छास्वीकृतानन्ताश्चर्यावहदिव्यदेहः सर्वेश्वरः श्रीकृष्णः स्वमपि स्ववशे नयन्त्या अपारकरुणया तानुद्धर्त्तुकामः स्वप्राप्तिसाधनोपयुक्तानि करणकलेवरादीनि पर्य्यग्राहयत । तादृशशरीरपरिग्रहवत्स्वपि चतुरशितिलक्षभेदभिन्नेषु मानवमेकं देहमपावृतं मुक्तिद्वारं सन्तो वदन्ति। तत्रापि कर्त्तव्यतयोपदिष्टेष्वनन्तकार्य्येषु कस्मिन् प्रयतितव्यमितीच्छायां श्रीभगवान्नारदः श्रीवेदव्यासोपदेशव्याजेनसमशिक्षयत् । तद्यथा—

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद् भ्रमतामुपर्य्यधः॥
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥१॥

एतादृशपरमदुर्लभमोक्षस्यापि न हि वेदान्तविद्यामन्तरा कोऽपि साधनान्तरं ब्रवीति । तदिह समायातं मुमुक्षूणां वेदान्तविचारणेति । तत्र च वेदस्यान्तो वेदान्त इति उपनिषद्भागो

गृह्यते। तन्मीमांसारूपश्रीबादरायणशारीरकसूत्राणि खलु वेदान्तार्थं निश्चिन्वन्ति । तेषां सूत्राणामिदं सरससरलपरिपाट्या निबद्धं परमोत्कृष्टं व्याख्यानं श्रीमत्सनकसम्प्रदायकूटस्थश्री ६ श्रीभगवन्निम्बार्कसिद्धान्तनिर्वाहकाचार्य्यवासुदेवपाणिपद्मावतारश्रीमद्देवाचार्यप्रणीतासिद्धान्तजाह्नव्याख्यव्याख्यानं तत्सिद्धान्तानुगामिश्रीमत्सुन्दरभट्टविरचितासिद्धान्तसेतुकाभिधया टीकाया समुद्भासितं, काशीचौखम्बासंस्कृतग्रन्थमालायां मुद्रितमस्ति।

ते चाचार्य्यमौलिमणयो ब्रह्मसूत्रवृत्तिकाराः श्रीभगवद्वासुदेवकरस्थकञ्जावताराः श्रीश्रीदेवाचार्य्याः कं ग्रामं स्वजन्मनाऽलंचक्रुरिति तु न निश्चेतुं शक्यं, परञ्च वेदान्तकेसरिश्रीमदनन्तरामकृतगद्यात्मकाचार्यचरितादेवमवगम्यते—यत्किलैते तैलङ्गजनपदे वैक्रमे युगरुद्रेन्दु (११११२) वत्सरे प्रादुरासन्। ततश्च श्रीश्रीकृपाचार्यसन्निधौ अखिलवेदान्तशास्त्रमधिजगिरे। ततश्च

चक्रुर्वेदान्तसूत्राणां वृत्तिं वेदान्तजाह्नवीम् ॥
भक्तिरत्नाञ्जलिञ्चैव मुमुक्षूणां हिताय ते ॥ १ ॥

परन्तु खेदोऽस्तीदानीं यदेतौ रत्नभूतग्रन्थौ पूर्णौ नोपलभ्येते, तत्रापि ससेतुकेयं जाह्नवी तु प्रथमाध्यायपर्य्यन्तमपि नोपलभ्यते। मुमुक्षुजनप्राणजीवनस्य समयप्रभावादेतद्ग्रन्थस्य भाविनं मूलोच्छेदमालोचयता एतद्ग्रन्थप्रकाशनेच्छया मया काशीस्थचौखंम्बासंस्कृतग्रन्थमालाया अधिष्ठातुः परमोदारश्रीहरिदासगुप्तस्य करकञ्जे यथोपलब्धं ससेतुकेयं जाह्नवी समर्पिता। तेन च नरमणिना भगीरथेन सर्वजनस्नानपानतर्पणादिसौलभ्यार्थं विष्णुपादसम्बन्धिनी जाह्नवीव ससेतुकेयं विष्णुस्वरूपसम्बन्धिनीयं जाह्नवी मुद्रापयित्वा वेदान्तरसतृषार्त्तानां

मस्माकञ्चापरोक्षतां नीता। अयमस्याः सेतुरपि श्रीश्रीदेवाचार्य-शिष्यश्रीसुन्दरभट्टपादकृतोऽस्ति। तेन सहैव मुद्रितेयमतः स्नातु-कामाः सेतुना गच्छन्तु यथेच्छम्।

अस्मिन् भारते वर्षे ससेतुरयं जाह्नवीग्रन्थोऽस्माभिरन्वे-षितोऽपि समग्रो नोपलब्धः, तस्मादितः परम्—

मान्यान् प्रणम्य सनयं विनिवेदयामि
चेदस्ति सेतुसहिताऽखिलजाह्नवी वः।
तर्ह्युत्तर सपदि देयमलौकिकेऽर्थे
स्याद्वः श्रमः सफल एव न तापहेतुः॥ १॥

ये महाशयाः सम्पूर्णं ससेतुकां जाह्नवीं निवेदयेयुस्तेषामहं जीवितावधि कृतज्ञतामावहेयम्। उपहारञ्च तेभ्यो भाष्यत्रयोपेतं श्रीश्रीनिम्बार्कदर्शनं समर्पयेयम्।

कोटिशो धन्यवादांश्च वर्द्धमानस्यश्रीमत्स्वभूदेवाचार्यपाद-समाश्रितश्रीश्रीनरहरिदेवाचार्यपादपीठाधिकृत "श्रीश्रीमन्मधु-सूदनशरणदेवेभ्यो" ददामि। यैर्विद्याभिवृद्धये सत्सम्प्रदायसंर-क्षणार्थं च स्वीयपुस्तकप्रदानेन साहाय्यं कृतमिति शम्।

निवेदको विद्वज्जनपरिचर्योत्सुको
वृन्दाटवीवास्तव्यः पं—किशोरदासः।

द्वैताद्वैतोपपादनपरया ससिद्धान्त,सतुकाख्यव्याख्यया
सिद्धान्तजाह्नव्या वृत्त्या सनाथं

ब्रह्मसूत्रम् ।

श्री १०८ नन्दनन्दनाय नमः ।
द्वैताद्वैतपथप्रदर्शकेभ्यः पूर्वाचार्य्येभ्यः
श्री ६ सनकादिचरणेभ्यो नमः ।

शास्ता बुद्धेर्यश्च विश्वस्य हेतुः
कर्माध्यक्षः सर्वभूतान्तरात्मा ॥
देवाचार्य्यस्तस्य देवस्य रूपं
भर्गं नित्यं चिन्तयेऽहं वरेण्यम् ॥ १ ॥

इह खल्वनादिवेदान्तसम्प्रदायं प्रवर्त्तयितुं सकलविश्वजन्मादिकारणमोक्षदातृमुक्तोपसृप्यवेदान्तवेद्याखिलशक्तिकल्याणगुणाब्धिभगवत्पुरुषोत्तमश्रीवासुदेवाज्ञापरिपालनाय तदाचिन्त्यशक्त्युपबृंहितानन्तशक्तिर्भगवान्सुदर्शनो नियमानन्दाभिधाचार्य्यरूपेणावनितलावतीर्णः सकलवेदार्थवेदान्तपारिजातसौरभाख्यादिग्रन्थविरचनव्याजेन वाक्यार्थसंग्रहं निभालयामास, तश्च भगवान् शङ्खावतारोऽचिन्त्यशक्तिस्तच्छिष्यप्रवरः श्रीश्रीनिवासाचार्य्यो निगदं बभाषे, तस्यातिगम्भीराशयत्वेन मन्दमतीनां निखिलशास्त्रार्थजिज्ञासूनामलसानां प्रवेशानर्हत्वं निश्चिन्वानस्तेभ्यः पूर्वाचार्य्यप्रणीताखिलशास्त्रार्थं जि-

ग्राहयिषुर्भगवत्करस्थपद्मावतारो भगवान्करुणासागरः श्रीदेवाचार्य्यरूपेणाविर्भूत्वा विस्तृतं सर्ववेदान्तशास्त्रार्थं संक्षेपेण प्रकाशयितुं समस्तवेदान्तसारभूतां मितव्याख्यां जान्हव्याख्यां शारीरकमीमांसासूत्रवृत्तिं प्रणीतवान्, तस्याश्च यथामति पदयोजनामात्रं व्याख्यानं मिताक्षरं सिद्धान्तसेतुकाभिधमञ्जसा तदर्थोपलब्धये समारभ्यते श्रीगोविन्दप्रसादकामेन।

तत्र तावच्चिकीर्षितग्रन्थनिर्विघ्नसमाप्त्यर्थं श्रीभगवदाचार्य्यवन्दनरूपं मङ्गलमाचरति।

नियमेन यदानन्दो जगद्भासयतेऽखिलम्।
तमहं नियमानन्दं वन्दे कृष्णं जगद्गुरुम्॥१॥

नियमेनेति। तस्य व्याख्या द्विविधा परमेश्वरविषयिकाऽऽचार्यविषयिका चेति। तत्र परमेश्वरपरत्वेनादौ व्याक्रियते—तं कृष्णमहं वन्द इत्यन्वयः। कृष्णशब्दस्य निरुक्तिं पर्यायेणाह—**नियमानन्दमिति**। नियमो देशकालवस्त्वपरिच्छिन्नं सद्वस्तु स चासावानन्दश्च नियमानन्दः समस्तदेशकालवस्तुव्यापकसदानन्दरूपः।

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत," इत्यादिवचनात्।

एतेन "सत्यं ज्ञानमनन्तं ब्रह्मे"ति लक्षणवाक्यं व्याख्यातम्। अथ लक्षणान्तरमाह—**नियमेनेति**। यदानन्दो यश्चासावानन्दश्चेति कर्मधारयसमासः। यच्छब्दः "सर्वे वेदा यत्पदमामनन्ति" "नामानि सर्वाणि यमाविशन्ति," "यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः," "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती," त्यादिसमस्तवेदान्तप्रसिद्धश्रीपुरुषोत्तमपरामर्शपरः। आनन्द आनन्दस्वरूपः "विज्ञान-

मानन्दं ब्रह्मे"ति श्रुतेः। जगद्भासयतेऽखिलमिति। अखिलं जगद्भासयते तमित्यन्वयः। अखिलं चेतनाचेतनरूपेणानन्तविचित्रविशेषसम्पन्नं जगद् वियदादिभोग्यभोक्तृरूपं भासयते प्रलये सूक्ष्मावस्थाऽऽपन्नमव्यक्तनामरूपकं व्यक्तनामरूपावस्थं कृत्वा दर्शयतीति यावद् "आनन्दाद्धेव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ती"ति श्रुतेः। यद्वा, यस्यानन्दो यदानन्द इति षष्ठीतत्पुरुषोऽयं समासः। एते"नानन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने"ति श्रुत्यर्थो व्याख्यातः। तथा हि, यस्य परब्रह्मणो गुणरूप आनन्दोऽखिलं जगद् दुःखादिसम्पन्नतया बन्धकारणत्वेन भासयते, दर्शयित्वा ततो मोचयतीति भावः। एतेनानन्दमात्रमेव ब्रह्म नानन्दगुणकमिति पक्षो निरस्तः। आनन्दरूपगुणमात्रज्ञानादेव मोक्षश्रवणात् तच्चानन्दमयाधिकरणे वक्ष्यते। अथ विश्वहितोपदेष्टाऽपि स एवेत्याह—जगद्गुरुमिति। जगतो ब्रह्मादिस्थावरान्तस्य हितोपदेष्टा सर्वसुहृत्त्वात् "सर्वस्य शरणं सुहृदि"ति श्रुतेः। "निवासः शरणं सुहृदि"ति भगवद्वचनाच्च। यद्वा ब्रह्मादीनामाचार्यत्वेन प्रसिद्धानामपि विद्योपदेष्टा वेदप्रवर्त्तकत्वाद् "यो ब्रह्माणं विदधादि पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये," "यो ब्रह्माणं विदधाति पूर्वं यो वै विद्यास्तस्मै गोपायति स्म कृष्णं तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणं व्रजेदि"ति मन्त्राभ्याम्। यद्वा जगद्गुरुमिति जगद्विषयकान्धकारनाशकमित्यर्थः। "तस्य भासा

---

१ गुशब्दस्त्वन्धकाराख्यः रुशब्दस्तन्निरोधकः।
अन्धकारविरोधित्वाद् गुरुरित्यभिधीयते॥
इति निरुक्तेश्च।

सर्वमिदं भाती"ति श्रुतेः। तस्य पुरुषोत्तमस्य ब्रह्मणो भगवतः स्वरूपगुणादिविषयकज्ञानं सर्वं जगत्प्रकाशयतीति भावः। "येनाश्रुतं श्रुतं भवति" "आत्मन्परे दृष्टे श्रुते सर्वं विज्ञातं यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि"त्यादिश्रुतेः। **तमहं वन्द** इति। एकवचनं चात्र जात्यभिप्रायकम्, अहमर्थत्वावच्छैर्जीवात्मभिर्देवपदार्थाभिन्नकृष्णपदार्थः सततं वन्दनार्चनाऽऽद्युपासनाविषयत्वेन भावनीयः। अस्मदर्थानां तदात्मकत्वात् तन्नियम्यत्वात् तद्व्याप्यत्वाच्च, तस्य च सर्वात्मत्वात् सर्वनियन्तृत्वात् सर्वव्यापकत्वाच्च "पतिं विश्वस्यात्मेश्वर एष सर्वभूतान्तरात्मा अन्तः प्रविष्टः शास्ता जनानां,"

यच्च किं चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित,इत्यादिस्मृतेः।

अथाचार्यपक्षे व्याख्यानमुच्यते—**नियमेनेति**। **तं नियमानन्दमहं वन्द** इत्यन्वयो वक्तव्यः। तमेव व्युत्पत्तिमुखेन विवृणोति—नियमेनेति। नियमोऽत्र व्यभिचाराभाव ऐकान्त्यमिति यावत्। **यदानन्द** इति। यस्योपादिष्टो ब्रह्मविषयभूत आनन्द ऐकान्त्येनाखिलं जगद्भासयते तं वन्द इति योजना, यत्तदोर्नित्यसम्बन्धात्। अखिलं भोक्तृभोग्यनियन्तृरूपं तत्त्वमित्यर्थः। "जगदिति"चतुर्थ्यर्थे द्वितीया,णिजन्तमिदं,भास इत्यस्य धातो रूपं जगते विश्वस्मै सर्वं तत्त्वं प्रकाशयत इत्यर्थः। जगच्छब्दश्चात्र चेतनविशेषमुमुक्षुवाचकः, अचेतनस्य ज्ञानाश्रयत्वाभावेनोपदेशानर्हत्वात्। तथा च श्रुतिः "तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय समन्विताय येनाक्षरं परमं वेदसत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमुपानीय तं ततो तिविजने विसृजेत्, स यथा तत्र प्राग्वोदग्वा-

ऽधरं वा विसृष्टस्तस्य यथाऽभिनहनं प्रमुच्य ब्रूयादेतां दिशं गन्धारा एनां दिशं व्रजेति स ग्रामाद् ग्रामं पृच्छन्पाण्डितो मेधावी गन्धारानेव सम्पद्यते एवमेवेहा"चार्य्यवान्पुरुषो वेदे"त्यादि, तस्यैव भगवद्भावं विधत्ते। कृष्णमिति। आचार्य्यावताररूपं भगवन्तमित्यर्थः। आचार्यस्यापि भगवच्छक्त्युपबृंहिताचिन्त्यशक्तित्वेन तत्त्वाभिधानस्याविरुद्धत्वात्।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

"आचार्य्यदेवो भवेत्या"दि श्रुतेः। अहं वन्द इति। अहमित्युपलक्षणं श्रेयोऽर्थिभिर्मुमुक्षुभिराचार्य्यचरणावेवोपायत्वेनोपेयत्वेन वरणीयावित्यर्थः॥ १॥

एवं मङ्गलश्लोको व्याख्यात, इदानीं ग्रन्थव्याख्योपक्रमः। तत्र स्वप्रणीतग्रन्थस्य प्रयोजनं वदन्नाचार्यावतारादिप्रयोजनमुपक्षिपति—इह खल्वित्यादिना।

इह खलु सकलविश्वहेतुर्निरवधिकरुणावरुणालयो निरतिशयाचिन्त्यानन्तस्वरूपगुणशक्तिवैभवो भगवान्वासुदेवोऽखिललोकपुरुषार्थसिद्धये पाराशर्यरूपेणावतीर्य स्वनिःश्वसितान्वेदाननेकशाखाऽऽत्मना विभज्य तेषां स्त्रीशूद्रानाधिकारित्वं निश्चिन्वानस्तद्धितचिकीर्षया भारतादीन्विधाय साधारणयात् श्रीभगवद्भावापत्तिलक्षणमोक्षेप्सूनां

वेदसरोजातोपनिषत्पद्ममकरन्दभृङ्गाणां विधिप्रा-
प्तोपनयनसंस्कारादिसम्पन्नानां गुरूपसत्तिपूर्वक-
मधीतषडङ्गवेदानां जिज्ञासितधर्ममीमांसानिर-
स्तकर्मफलादिविषयकसंशयानामैहिकामुष्मिक-
भोगवासनाशून्यानां भगवत्प्रसादैकैषणानां तद्दि-
दृक्षातृणीकृतसर्वपुरुषार्थानां गुरुभक्तिपूर्णमनस्का-
नां तत्र प्रवृत्त्यनर्हतां विचिन्त्य तेषामनन्ताचि-
न्त्यनिरतिशयस्वरूपगुणशक्तिवैभवपरब्रह्मपुरुषो-
त्तमश्रीवासुदेवविषयकजिज्ञासावतां शास्त्रविचा-
रसमर्थानां मुमुक्षूणां तद्भावापत्तिरूपमोक्षोपल-
ब्धये सर्ववेदार्थमध्यायचतुष्टयात्मकशारीरक-
मीमांसाऽऽख्यं वेदान्तशास्त्रं सूत्रयामास । तच्च
मुमुक्षजनोद्विधीर्षया श्रीपुरुषोत्तमाज्ञयाऽनादिवे
दान्तसन्ततिं सनातनीमपि कलौ नष्टामुद्धर्त्तुम-
वनीतलावतीर्णो भगवान्सुदर्शनावतारो नियमा-
नन्दाख्य आचार्यो वेदान्तपारिजातसौरभाख्य-
ग्रन्थरचनया वाक्यार्थरूपेण व्याचकार । तद-
पि भगवाञ्छ्रीनिवासाचार्यो निगदं बभाषे ।
तस्यातिगम्भीराशयत्वेनोक्तलक्षणाधिकारिकत्वेन
च मन्दमतीना निखिलवेदान्तार्थजिज्ञासूनां शि-

थिलप्रयत्नानामवगाहनानर्हत्वेन प्रवृत्त्यनर्हत्वात् तेषामुपकारार्थं मिताक्षररूपां सिद्धान्तजाह्नव्याख्यां सूत्रवृत्तिं समारभते ।

अथातो ब्रह्मजिज्ञासा।१।१।१॥

सकलविश्वहेतुर्भगवान्वासुदेवः पाराशर्यरूपेणावतीर्य वेदान्विभज्य तेषां स्त्रीशूद्रानधिकारित्वं निश्चिन्वानस्तद्धितचिकीर्षया भारतादीन्विधाय साधारण्यात्तत्र मुमुक्षूणां प्रवृत्त्यनर्हतां विचिन्त्य तेषां मोक्षोपलब्धये वेदान्तशास्त्रं सूत्रयामासेसन्वयः । तत्र भगवन्तं विशिनष्टि—**सकलविश्वहेतुरिति** । सकलविश्वस्य जन्माद्यभिन्ननिमित्तोपादानकारणं चतुर्मुखादीनामपि विश्वैकदेशकारणत्वात्तत्रातिप्रसङ्गवारणाय सकलपदसंग्रहः । एतेन वक्ष्यमाणं ब्रह्मलक्षणमुक्तं "यतो वा इमानि भूतानि जायन्ते" "जन्माद्यस्य यत" इत्यादिवक्ष्यमाणशास्त्रात् । अथ तस्यावतारे हेतुमाह । **निरवधिकरुणावरुणालय इति** । स्वाभाविककरुणागुणवशीभूतत्वादित्यर्थः । तत्स्वरूपं सङ्गृह्णाति—**निरतिशयेति** । अतिशयसाम्यरहिता अचिन्त्या इयत्ताऽवच्छेदेन चिन्तयितुमनर्हा अनन्ताः परिच्छेदशून्याः सर्वगताः स्वरूपगुणशक्तिवैभवा यस्य सः ।

"न तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते" ।

"स्वाभाविकी ज्ञानबलक्रिया चे"ति श्रुतेः । **भगवानिति** । षड्गुणसम्पन्नः ।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥

इति पराशरोक्तषड्गुणाश्रय इत्यर्थः । अवतारप्रयोजनमाह । **स्वनिःश्वसितान् वेदान्विभज्येति** । वेदविभाग एवावतारप्रयोजनमित्यर्थः । अन्यस्य तद्विभागानर्हत्वं दर्शयितुं स्वनिःश्वसितानितिविशेषणसंग्रहः । परमेश्वरश्वासरूपत्वेनेतरैस्तत्तात्पर्यस्य निर्णेतुमशक्यत्त्वादिति भावः । अथ वेदविभागप्रयोजनमाह । **अखिललोकपुरुषार्थसिद्धये** । अर्थधर्मकाममोक्षप्राप्त्यर्थमिति यावत् । सर्वजीवानां स्वेष्टपुरुषार्थसिद्धिरेवास्य प्रयोजनं बोध्यम् । **तेषां**, वेदानां शाखाऽऽत्मना विभक्तानाम् । **स्त्रीशूद्रानधिकारिकत्वं निश्चिन्वान इति** । वेदाध्ययनस्योपनयनसंस्कारतन्त्रत्वात् । "तं होपनिन्ये अधीहि भगव"इति श्रुतेः, शूद्रस्य वेदाध्ययननिषेधाच्च । "यद्युह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रस्य समीपे नाध्येतव्यं तस्माच्छूद्रो बहुपशुरयज्ञिय"इति श्रुतेः । श्रवणाभावेऽध्ययनाभावः सुतरां सिद्धो भवति, अनुश्रवणपूर्वकत्वादध्ययनस्येति भावः ।

"न शूद्रे पातकं किंचिन्न च संस्कारमर्हति ।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेदि"त्यादिस्मृतेश्च ॥

शूद्रश्चतुर्थो वर्ण एकजातिः, अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपूरणम्, उदाहरणे जिह्वाच्छेदः, धारणे शरीरभेदः । धर्मश्चात्र वैदिको विवक्षितः, पुराणादौ तस्याधिकारित्वात् तच्च शूद्राधिकरणे निपुणं वक्ष्यते । भारतादिविधानप्रयोजनमाह । **तद्धितचिकीर्षया** । शूद्रादीनां पुरुषार्थसिद्धय इत्यर्थः । एवं प्रासङ्गिकं श्रीपाराशर्यावतारादिप्रयोजनं निरूप्य प्रकृतमनुसरति मुमुक्षुविशेषनिर्धारणमुखेन । **तेषां**-**मुमुक्षूणां तत्र भारतादौ प्रवृत्यनर्हतां विचिन्त्येति** ।

अप्रवृत्तौ हेतुमाह–साधारण्यादिति। भिन्नशास्त्रप्रणयने हेतु-
र्बोध्यः। सकामनिष्कामसाधारणाधिकारित्वेन साधारणप्रयोज-
नवत्त्वेन चेति विवक्षितोऽर्थः,व्यवहारविषयत्वाच्चेत्यपि ज्ञेयं, व्यव-
हारविशिष्टाख्याने विक्षेपहेतुत्वेन मुमुक्षुप्रवृत्त्यभावस्य प्रत्यक्षसि-
द्धत्वात्। मुमुक्षून्विशिनष्टि–भगवद्भावापत्तिलक्षणमोक्षका-
मानामिति। अनेन मुमुक्षुपदनिर्वचनमुक्तं भवति। तेषां ज्ञानेच्छा-
लम्पटत्वं दर्शयन्नाह-वेदसरोजातेत्यादि। वेद एव सरस्तत्र जातं
यदुपनिषद्रूपं पद्मं तस्य मकरन्द इव मकरन्दस्तदासिद्धान्तरसस्त-
स्य भृङ्गा इव भृङ्गास्तद्रसातिलुब्धास्तेषामित्यर्थः। तेषां शास्त्राधिका-
रस्य योग्यतामाह-विधिप्राप्तेति। संस्कारवत्तायाः प्रयोजनमाह–
गुरूपसत्तिपूर्वकेति। सामान्यवेदाध्ययनस्य संशयनिवर्त्तक-
त्वाभावात्। तत्र संशयनिवृत्तौ हेतुविशेषं दर्शयन्नाह–जिज्ञासि-
तेति। जिज्ञासिता या धर्ममीमांसा तया निरस्तो विनष्टः कर्म-
फलनित्यत्वादिसंशयो येषां तेषाम्। संशयहानेः फलं दर्शयति-
ऐहिकामुष्मिकेति। वेदे सामान्यतः कर्मफलानां नित्यानित्य-
रूपोभयप्रकारतां दृष्ट्वा कर्मफलं नित्यं वाऽनित्यं वेति जातो यः
संशयस्तस्य च कर्ममीमांसाशास्त्रविचारेण कर्मफलानामनित्यत्व-
निश्चयात्तेन निरस्तो भोगवासनाविषयकसंशयो येषां तेषामि-
त्यर्थः। निर्वेदो घटत एव तस्यैव संशयनाशफलकत्वादित्यर्थः। दुर्वा-
सनानिवृत्तेः फलं दर्शयति–भगवत्प्रसादेति। एकशब्दोऽत्रान्य-
योगव्यवच्छेदपरः। स चैषणाऽन्तरं व्यावर्त्तयति। तद्व्यावर्त्त्यं व्य-
नक्त्याह-तदिदृक्षेति। दर्शनव्यतिरिक्तपुरुषार्थेच्छाशून्यानां,सर्व-
शब्दोऽत्र त्रिवर्गपरत्वेन व्याख्येयोऽन्यथा मुमुक्षुत्वहानिप्रसङ्गात्।
यद्वा, तद्दर्शनं तद्भावापत्तिलक्षणमेव विवक्षितं, तेन मुमुक्षुत्वनिवृ-
त्तेरप्यविरुद्धत्वात्। तत्र कारणमाह–गुरुभक्तिपूर्णमनस्काना-

मिति । स्पष्टमन्यत् । एतेनास्य शास्त्रस्याधिकारिविषयप्रयोजन-संबन्धरूपानुबन्धचतुष्टयं निरूपितं,सर्वस्यापि शास्त्रस्यानुबन्धापेक्षितत्वात् । यद्यपि "भगवद्भावे"त्यारभ्य "मुमुक्षूणामि"त्यन्तेन संदर्भेणाधिकारिविशेषणमुक्तं तथाऽप्यर्थबलाच्चतुर्णां रूपं बोध्यते । तथा हि । भगवद्भावेत्यादिना मुमुक्षुस्वरूपमुक्त"मर्थी समर्थो विद्वानधिकारी"ति शास्त्रोक्तलक्षणस्यात्र व्याप्तिदर्शनात्, तत्र भगवद्भावेत्यादिद्वयेन तस्यार्थित्वं बोध्यते भगवद्भावापत्तिरूपमोक्षार्थवत्त्वात् । शास्त्रविचारसमर्थानामितिविशेषणेन समर्थत्वं विचारकौशल्यसामर्थ्ययोगात् । जिज्ञासितधर्मेत्यादिद्वयेन च विद्वत्त्वं नित्यानित्यवस्तुविषयकविवेकवत्त्वात् । भगवत्प्रसादेत्यनेन सर्वसाधनानां भगवदनुग्रहकिंकरत्वं सर्वेषां तत्सापेक्षत्वात् । तद्दिदृक्षेत्यनेन तद्दर्शनस्य तदनुग्रहैकलभ्यत्वं मोक्षासाधारणकारणत्वं चोक्तं भवति । गुरुभक्तीति । गुरुभक्तेर्भगवत्प्रसादकारणत्वं वेदान्ततत्त्वप्रकाशकत्वं चोक्तम् । विधिप्राप्तेतिद्वयेन वेदाध्ययनयोग्यताविधानेन तस्य त्रैवर्णिकत्वं, व्यतिरेकेण शूद्रादिनिषेधश्चेत्यधिकारिनिर्णयः । अनन्ताचिन्त्येत्यादिनाऽस्य विषयो व्याख्यात उक्तस्वरूपस्य श्रीवासुदेवस्यैव वेदान्तशास्त्रविषयत्त्वात् । तद्भावेति प्रयोजनोक्तिः । प्रतिपाद्यप्रतिपादकसम्बन्धोऽर्थसिद्धः, इति विवेकः । तथा च शास्त्रं " स्वाध्यायोऽध्येतव्यः " "स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" "तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "परीक्ष्य लोकान्कर्मजितान्ब्राह्मणो निर्वेदमायात्" "नास्त्यकृतः कृतेन" "अन्तवदेवास्य तद्भवति" "न ह्यध्रुवैः प्राप्यते ध्रुवं" "प्लवो ह्येत अदृढा यज्ञरूपाः" "जुष्टं यदा पश्यत्यन्यमीशं तन्महिमानमिति वीतशोकः" ।

यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
तमक्रतुं पश्यति वीतशोकः धातुः प्रसादान्महिमानमात्मनः ।
यमेवैष वृणुते तेन लभ्यः सर्वे वेदा यत्पदमामनन्ति ॥
तं त्वौपनिषदं पुरुष पृच्छामि, नामानि सर्वाणि यमाविशन्ति, शास्त्रयोनित्वात्, वेदैश्चसर्वैरहमेव वेद्यः, निरञ्जनः परमं साम्यमुपैति, तन्महिमानमिति वीतशोकः, न स पुनरावर्त्तते, तन्निष्ठस्य मोक्षेपदेशात्,
बहवो ज्ञानतपसा पूता मद्भावमागताः ।
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति ते, ।

तच्च समन्वयात्, नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती,स्मादि। एवं वेदान्तशास्त्रस्यानुबन्धचतुष्टयं निरूपितमिदानीमाचार्याणां सहेतुकमवतारप्रयोजनं दर्शयंस्तस्य प्रवृत्तिप्रकारं व्यनक्ति,तच्चेत्यादिना। तच्च भगवानाद्याचार्य्यो व्याचकारेत्यन्वयः । तत्स्वरूपं दर्शयति—तच्छक्तिज्ञापनाय सुदर्शनावतार इति । अवतारे हेतुमाह-श्रीपुरुषोत्तमाज्ञयेति । भगवतीयाऽऽज्ञैवावतारहेतुरित्यर्थः । तत्र प्रयोजनमाह। वेदान्तसन्ततिमिति । ननु वेदान्तसम्प्रदायस्यानादित्वात् प्रयोजनासिद्धिरिति चेत्तत्राह—सनातनीमपि कलौ नष्टामिति । छिन्नसम्प्रदायत्वात्तदुद्धरणरूपप्रयोजनसिद्धिरित्यर्थः । तस्य मङ्गलरूपं नामधेयमाह—नियमानन्दाख्य इति । तन्निरुक्तिश्च पूर्वमेवोक्ता । वेदान्तसन्ततेरुद्धार एव किमर्थ इत्याशङ्क्याह—मुमुक्षुजनोद्दिधी-

र्षयेति । कथं व्याचरेत्याशङ्क्याह—वेदान्तपारिजातेति । वेदान्तपारिजातसौरभाख्यं ग्रन्थं सन्दर्भयित्वा तत्र सर्ववेदान्त शास्त्राधिकरणार्थं वाक्यार्थमुखेन संगृहीतवानित्यर्थः। ननु संक्षेपेण कथं संशयनिवृत्तिरित्याशङ्क्याह—तदपीति। उक्तसंज्ञकं ग्रन्थम्। भगवच्छ्रीनिवास इति । शङ्कावतारत्वाद्भभाषे, भाष्यमुखेन विशदीचकारेत्यर्थः । नन्वेवं तर्हि मोक्षरूपप्रयोजनस्य पूर्वाचार्यप्रणीतशास्त्रसिद्धत्वान्नवीनग्रन्थरचनारूपस्य प्रयासस्य निष्प्रयोजनत्वेन वैयर्थ्यादित्याशङ्क्य प्रयोजनविशेषं दर्शयन्नाह—तस्यातिगम्भीराशयत्वेनेति । अर्थतो विश्वतो मुखत्वाद् दुरवगाहत्वं,शब्दतश्चातिविस्तृतत्वादपारत्वमित्यर्थः । तत्रैव हेत्वन्तरमाह—उक्तलक्षणेति । उक्तं भगवद्भावापत्तीत्यादिविशेषणैर्लक्षणं येषां तथाभूता अधिकारिणो यस्य तस्य भावस्तत्त्वम् । तेन मन्दमतीनामल्पबुद्धीनां मन्दबुद्धित्वेऽप्युच्चार्थित्वं दर्शयति—निखिलवेदान्तार्थजिज्ञासूनामिति । ननु मन्दमतित्वेऽप्यभ्यासश्रमेण कालविशेषे सिध्यत्येव पुरुषार्थ इत्याशङ्क्याह—शिथिलप्रयत्नामिति। प्रयत्नशैथिल्यादवगाहनानर्हत्वमिति भावः। मन्दमतित्वशिथिलप्रयत्नत्वयोः सतोः सर्ववेदान्तार्थविषयकज्ञानेच्छूनामुपकारः सर्वशास्त्रार्थज्ञानप्राप्तिरेवास्य प्रयोजनमित्यर्थः । ग्रन्थसंज्ञां दर्शयति—सिद्धान्तजान्हव्याख्यामिति । तस्य सौलभ्यगुणयोगमाह—मिताक्षररूपामिति । "समारभत" इति प्रथमपुरुषप्रयोगेण मदन्तर्गतः श्रीनिवासाचार्य एव स्वकृतभाष्योक्तार्थं संक्षेपेण ग्राहयितुं सूत्रवृत्तिं समारभत इति श्रीदेवाचार्यपादैः स्वदैन्यं सूचितम् ।

एवं चिकीर्षितस्य ग्रन्थस्य प्रयोजनादिकं निर्धार्य्य शास्त्रं व्याख्यातुमुपक्रमते । अथातो ब्रह्मजिज्ञासेति ।

प्रथमं तावदुद्देशमुखेन पदार्थान्विभजते ।

अत्रा"थ"शब्द आनन्तर्य्यार्थक एव, "अत" इति शब्दो हेतुवाचकः, अथानन्तरमतो हेतोर्ब्रह्मजिसज्ञा कर्त्तव्येत्यध्याहृतेन विध्यर्थकपदेनान्वयः ।

अत्रेति । अस्मिन्सूत्रे । अथशब्द इति । अत्रैवकारोऽन्ययोगव्यवच्छेदार्थकस्तेनान्येऽर्था व्यावर्त्तन्ते । तथा हि, अनेकार्थकोऽयमथशब्दः, अर्थान्तरमङ्गलाधिकारारम्भानन्तर्यभेदात् । तत्र न तावदर्थान्तरपरः, उपक्रमवाक्यत्वात् पूर्वनिर्वचनाद् व्याख्यानान्तरकथनमर्थान्तरं, यथा माया रमाया धवः स्वामी माधवः, अथ वा मधुवंशे भवो माधव इति । स चात्र न सम्भवति पूर्वनिर्वचनाभावादित्यर्थः । नापि

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभाविति—

स्मृत्युक्तमङ्गलार्थकः, वेदान्तानां भगवत्स्वरूपगुणादिप्रतिपादनपरतया सर्वेषामपि वाक्यपदवर्णमात्राणां मङ्गलरूपत्वेन मङ्गलान्तरनिरपेक्षत्वात् । नाप्यधिकारवाचकः, शब्दादिवद् ब्रह्मणोऽधिकार्य्यत्वासम्भवात् । नाप्यारम्भपरः, वेदान्तस्यानादित्वाभ्युपगमात् । अन्यथौपचारिकादिमत्त्वाङ्गीकारेऽप्रधानताऽऽपत्तेः । अतः परिशेषादानन्तर्यार्थवाचक एवेतितात्पर्य्येणोक्तमानन्तर्य्यार्थक एवेति । नान्यार्थक इति यावत् ।

द्वितीयादिपदार्थावुद्दिश्येते—अत इति । विधिरर्थो यस्य तेन तव्यप्रत्ययान्तेन, न योग्यार्थकोऽत्रायं तव्यप्रत्यय

इति भावः । नन्वध्याहारस्य पूर्ववाक्योपजीवित्वादस्य तु प्रथमवाक्यत्वात् कथमत्राध्याहार इति चेद्। मैवम्। सूत्राणां विषयवाक्योपजीवित्वं सर्वमतेऽविरुद्धं तदभावे न वाक्यार्थ-सिद्धिरिति नियमस्याव्यभिचरितत्वात् । एवं च आत्मा वा रे द्रष्टव्य इति विषयवाक्येऽध्याहरणीयपदस्य विधि-वाचकस्य तव्यप्रत्ययान्तस्य विद्यमानत्वात् तस्यैव विषय-वाक्यस्थस्यात्र योजनामात्रत्वान्नोक्तशङ्काऽवकाशः ।

एवमुद्देशविवरणयोर्व्याख्याभूषणादिति व्याख्याऽलङ्का-रोक्तरीत्योद्दिष्टस्यैवार्थस्य विवरणमाह ।

तत्राथानन्तरमिति। धर्मजिज्ञासाविषयभूतधर्म-स्वरूपतत्साधनतदनुष्ठानप्रकारतत्फलविषयकज्ञा-नानन्तरं "स्वाध्यायोऽध्येतव्य"इति विधीयमान-संस्कारादिपूर्वकं साङ्गवेदमधीत्य तत्र कर्मफलस्य क्षयाक्षयविधायकानि "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" "अपाम सोममभूता अभूम" "यत्र नोष्मा न च शीतं स्यान्न ग्लानिर्नाप्यरातय" इत्यादीनि"तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत" "अन्तवदेवास्य तद्भवति" "न ह्यध्रुवैः प्राप्यते ध्रुवं" "नास्त्यकृतः कृतेन" "प्लवा ह्येते अदृढा यज्ञरूपा" इत्यादीनि, च परस्परविरुद्धप्रकारकाणि वाक्यानि सामान्यतो दृष्ट्वा विशेषतो निर्णेतुमनीश्वरस्तन्निवृत्तये धर्मजिज्ञा-

सायां प्रवृत्तस्तया सम्यङ्निर्णीतकर्मस्वरूपतदनुष्ठानप्रकारतत्फलकस्तथाभूतज्ञानमापद्यते तदनन्तरमित्यर्थः । विवेकादेः साधनचतुष्टयस्यात्रैवान्तर्भावान्न पृथग्ग्रहणापेक्षाऽपीति भावः।

तत्रेत्यादिना । तत्रानन्तर्यार्थकपदस्य विवृतिमाह । "धर्मजिज्ञासे"त्यारभ्य "न पृथग्ग्रहणापेक्षे"त्यन्तेन ग्रन्थेन। धर्मजिज्ञासाविषयभूतो यो धर्मस्तत्स्वरूपं च नित्यनैमित्तिककाम्यादिभेदादनेकविधं, तत्साधनानि च यागादीनि साङ्गानि, तस्यानुष्ठानप्रकारश्च हस्तक्रियाऽऽदयस्त,त्फलानि च स्वर्गादीनि, एतानि विषयो यस्य तथाभूतज्ञानस्यानन्तरमिति । तदेव प्रतिपादयति–विधिप्राप्तं साङ्गं वेदं संस्कारादिपूर्वकं यथा स्यात्तथाऽधीत्य जातसंशयस्तन्निवृत्तये धर्मजिज्ञासायां प्रवृत्तस्तया सम्यङ्निर्णीतकर्मस्वरूपादिकस्तथाभूतज्ञानमापद्यत इत्यन्वयः। स्वाध्यायशब्दोऽत्रार्थोपलक्षणपरः, संस्कारश्चोपनयनादिरूपः, साङ्गमङ्गैः सहितम्, अङ्गानि च—

छन्दः पादौ, शब्दशास्त्रं च वक्त्रं,
कल्पः पाणी, ज्यौतिषञ्चक्षुषी, च ॥
शिक्षा घ्राणं, श्रोत्रमुक्तं निरुक्तं,
वेदस्याङ्गान्याहुरेतानि षट् चेति–

वचनात्। जातसंशय इत्युक्तं, तत्र बीजमाह । कर्मफलस्य क्षयाक्षयविधायकानि वाक्यानि, अत एव परस्परविरुद्धान्वयानर्हरूपः प्रकारोऽर्थो येषां तानि वाक्यान्येव कानि चित्पठ्यन्ते "अक्षय्यं ह वै चातुर्मास्ययाजिन" इत्यादीन्यक्षयफलत्वप्रतिपादकानि, यथेह "कर्मचितो लोकः क्षीयते" इत्यादीनि च क्षयप्रति-

पादकानीति विवेकः। सामान्यत इति। आद्यन्ततः। ननु ज्ञातवेदार्थश्चेत्कथं न निश्चिनुयादित्याशङ्क्याह—विशेषतो निर्णेतुमनीश्वर इति। विचाराकुशलः, अध्ययनमात्रं न तात्पर्यनिर्णये नियामकं, किं तु षड्लिङ्गोपेतवाक्यविचार इति भावः। लिङ्गानि चोपक्रमादीनि वक्ष्यन्त उपरिष्टात्। तया धर्मजिज्ञासया सम्यगुपक्रमादिभिर्निर्णीतं कर्मस्वरूपादिकं येन सः, तथा च ज्ञानं कर्मस्वरूपादिविषयकनिर्णयात्मकं, कर्मफलविषयकसंशयनिवृत्तिफलिकैव कर्मस्वरूपादिविषयकज्ञानापेक्षेति भावः।

केचित्तु विद्याकर्मसमुच्चय एव भगवतः सूत्रकारस्याभिप्रेतः, वक्ष्यते च "सर्वापेक्षा यज्ञादिश्रुतेरश्ववदि"ति, तथा च कर्मण्यज्ञाते केन सह विद्यया समुच्चयः केन च विभाग इति विवेचयितुं न शक्यते हेयोपादेयप्रतिपत्त्यभावात्, पूर्ववृत्ते तु कर्मज्ञाने काम्यं निषिद्धं च हेयं, नित्येन च कर्मणा समुच्चय इति प्रतिपत्तुं शक्यते, एतदर्थमेव धर्मविषयकं ज्ञानमपेक्षितमित्याहुः।

न चैतद् युक्तं "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"त्यादिना कर्मणां विविदिषायामेवोपयोगोक्ते,र्न फलोत्पत्तौ तत्प्रतिपादनेनैव तेषां नैराकाङ्क्ष्यात् तस्मादुक्तसिद्धान्त एव गरीयान्। अत्रेदमाकूतम्। अत्र वेदान्तशास्त्रे श्रीभगवद्भावापत्तिलक्षणमोक्ष एव पुरुषार्थः आत्मत्वेन शाश्वतत्वेन च "निरञ्जनः परमं साम्यमुपैति" "पुष्टस्ततस्तेनामृतत्वमेति" "न स पुनरावर्त्तते" इत्यादिश्रुतिभ्यः। स च भगवत्प्रसादलभ्यस्तत्साक्षात्कारैकलभ्यः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यः"।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति" ॥

इत्यादिश्रुतिभ्यः । तत्रापि भगवत्प्रसादे तत्स्वरूपगुणादि-विषयकज्ञानवानेवाधिक्रियते ज्ञानिनोऽनन्यभागवतस्य भगव-न्निरतिशयप्रीतिविषयत्वात् ।

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" ।

इतिभगवद्वचनात् । तथाभूतस्य ज्ञानस्य श्रवणमननात्मक-शास्त्रविचारजन्यत्वात् तदर्थकोऽयं शास्त्रविचारारम्भस्तस्माच्छ्र-वणादिपूर्ववृत्तं कर्मस्वरूपादिज्ञानमेवापेक्षितम्, अतो धर्ममीमांसा-विचारजातनिश्चयो मुमुक्षुः काम्यादिकर्मणां हेयतां, नित्यनैमि-त्तिकानां च भगवदाज्ञारूपाणां तत्प्रसादहेतुतया विविदिषा-द्वारेणोक्तज्ञानकारणत्वं च निश्चित्य श्रवणादौ प्रवर्तते, तत्रैव कर्मविषयकज्ञानोपयोगात्तस्यैव श्रवणादिपूर्ववृत्तत्वं निश्चायत इति, एतच्चाग्रे ध्वनयिष्यते ग्रन्थकृद्भिरिति ।

ननु श्रवणादौ साधनचतुष्टयस्यान्तरङ्गत्वादवश्यापेक्षितं-त्वात्तस्यैव पूर्ववृत्तं निश्चेतव्यं,कर्मणस्तु विविदिषोत्पत्तौ विनियो-गेन तयैव नैराकाङ्क्ष्याद् "विविदिषन्ती"तिश्रुतेः । साधनचतुष्टयं च नित्यानित्यवस्तुविवेकः,शमदमादिसाधनषट्कसंपद्, इहामुत्र-फलभोगविरागः, मुमुक्षुत्वमिति, चेत्तत्राह—विवेकादेरिति । कर्मस्वरूपफलादिज्ञानेन जातनिर्वेदस्य विवेकादीनां स्वतः संप-द्यमानत्वादिति भावः । एतावताऽऽनन्तर्यार्थकाथशब्दविवरण-मुक्तम् ।

इदानीं पदान्तरे विव्रियेते ।
अत इत्यादिना ।

अतो हेतोरिति कर्मफलस्य सान्तत्वसातिशयत्वनिश्चयात् "तद्यथेह कर्मचितो लोकः क्षीयते" इति श्रुतेः, "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोर्जुने"ति स्मृतेश्च । ब्रह्मज्ञानस्य च निरतिशयानन्तफलकत्वनिश्चयात् । "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" ।

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तं निगच्छति ॥

इत्याद्यन्वयव्यतिरेकवाक्येभ्यः "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण" इतिश्रुतेरनात्मज्ञस्य कार्पण्यवत्त्वादियोगरूपनिन्दाश्रवणाच्च ब्रह्मजिज्ञासा कर्त्तव्येति यावत् । केनेत्यपेक्षायाम्, एभ्यो हेतुभ्यः कर्मफलादौ जातनिर्वेदेन श्रीभगवद्दर्शनस्य मोक्षासाधारणकारणत्वं श्रुत्वा तज्जन्यव्यवसायजन्यदिदृक्षाग्रहगृहीतेन श्रीपुरुषोत्तमप्रसादैकेप्सुनाऽऽचार्यैकदेवेन गुरूपसन्नेन गुरुभक्त्येकहार्दैन मुमुक्षुणेत्यन्वे-

ति परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायाद्" ।

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥
जुष्टं यदा पश्यत्यन्यमीशं
तन्महिमानमिति वीतशोकः ।
पृथगात्मानं प्रेरितारं च मत्वा
पुष्टस्ततस्तेनामृतत्वमेति ॥
भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

यमेवैष वृणुते तेन लभ्य—
स्तस्यैष आत्मा वृणुते तनुं स्वाम् ।
तमक्रतुं पश्यति वीतशोकः
धातुः प्रसादान्महिमानमीशम् ॥

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं," "तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय समन्विताय येना-

क्षरं परमं पुरुषं वेद सत्यं प्रोवाचतां तत्त्वतो ब्रह्मविद्याम् आचार्यदेवो भव,

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।

इत्यादिश्रुतिभ्यः ।

हेतोरित्यत्रैकवचनं जात्यभिप्रायकम्, अन्यथा एभ्यो हेतुभ्य इत्युत्तरोक्तिविरोधात् । सान्तत्वं नाम ध्वंसाभावप्रतियोगित्वं, सातिशयत्वं चातिशयेन ज्ञानफलेन साहित्यं ज्ञानफलान्मोक्षादत्यन्तन्यूनमिति यावत् तयोर्निश्चयादिति समासः । तत्र प्रमाणमाह—तद्यथेति । ननूक्तवाक्यस्याक्षयत्वप्रतिपादकवाक्यान्तरेण सत्प्रतिपक्षताग्रस्तत्वाद्धेत्वाभासानुमानवत्प्रमाणाभासत्वात्कथं प्रामाण्यं, कथं वा निश्चायकत्वं, स्थाणुर्वा पुरुषो वेति वाक्यवदप्रमाणत्वमेवेति चेन्न । क्षयित्वप्रतिपादकवाक्यस्य न्यायसहकृतत्वेन प्राबल्यात्तेनाक्षयित्ववाक्यं सङ्कुच्यते, तथा चात्र प्रयोगः—दिव्यभोगाः सलोकाः, क्षयिष्णवः, कर्मजन्यत्वात्, मानुषभोगवत् । तस्मान्न सत्प्रतिपक्षलक्षणप्रमाणाभासत्वं नतरां निश्चायकत्वहानिरित्यर्थः । ननु तथाप्यक्षयवाक्यस्य निर्विषयत्वापत्त्या व्याकोपप्रसङ्गो दुर्वार इति चेन्न । तस्य कालभूयस्त्वविधानपरत्वात्सविषयत्वसिद्धिः । उक्तसातिशयत्वं व्याख्यास्यन् हेत्वन्तरमाह—ब्रह्मज्ञानस्य चेति । उक्तार्थे श्रुतिं प्रमाणयति—तमेवेति । अन्ययोगव्यवच्छेदार्थकैवकारं विवृण्वञ्छ्रुतिमन्तरमाह—यदेति । आदिना "न स पुनरावर्त्तते," "निरञ्जनः परमं साम्यमुपैति," "नान्यः पन्थाः विद्यतेऽयनाये" त्यादिवाक्यसं-

ग्रहः । अविदुषः केवलकर्मानिष्ठस्य दोषवत्त्वद्योतकहेत्वन्तरमा-
ह-अनात्मज्ञस्येति । स्वपरस्वरूपादिज्ञानाभाववतः । कार्पा-
ण्यादीत्यत्रादिपदेन जन्मादिचक्रात्मकसंसारित्वग्रहः । तथा च
श्रुतिः-"मृत्वा पुनर्मृत्युमापद्यतेऽर्यमानः स्वकर्मभि"रिति । हेत्व-
न्तरश्रुत्या द्रढयति-यो वा इति । अस्माल्लोकान्मनुष्यदेहात् ।
उक्तहेतून्समुच्चिनोति, वाक्यार्थं निरूपयिष्यमाणः-एभ्यो हे-
तुभ्य इति । ब्रह्मजिज्ञासा कर्त्तव्येति पूर्वोक्तमत्र सम्बध्यते ।
जिज्ञासोर्विशेषं विवक्षुः स्वयमेवाशङ्कते-केनेति । अत्र किं-
शब्दप्रयोगस्य विशेषविवक्षाबीजत्वात्तेन शङ्कोत्थानमिति भा-
वः । अत्रोत्तरमाह-मुमुक्षुणेति । तमेव विशिनष्टि-कर्मफला-
दाविति । आदिना तदनुष्ठानादिग्रहः । निर्वेदो द्विविधः । सहे-
तुको, निर्हेतुकश्चेति । तत्र स्वरागविषयीभूतपुत्रकलत्रवित्तैश्वर्यादि-
ध्वंसात्मकवियोगेन प्रतिकूलदारिद्र्यादिसंयोगेन हेतुना जातः
सहेतुकः, स चाविवेकपूर्वकत्वाद्व्यभिचरितस्वभावः । यदि श्री-
भगवतो निर्हेतुकापरिमितकरुणावरुणालयस्य माधवस्य कृपा-
कटाक्षावलोकितश्चेत्तर्हि तत्कृपाभाजनानाम्

तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः ।
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

इत्युक्तलक्षणसम्पन्नानन्यभागवतानां, कृपापात्रं भूत्वा शा-
स्त्रीयमार्गे प्रवृत्तो भगवन्तं भजन् तदाढर्यार्थं भूयो भूयो यतते
ऽनुतिष्ठति च, अन्यथा पुनर्भ्रश्येदपि, अनैकान्त्यस्वभावादेव ।
तृतीयश्च, जन्मान्तरसहस्रार्जितपुण्यपुञ्जस्य "पुरुषत्वे चाविस्तरा-
त्मा स हि विज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति

श्वस्तनं वेद लोकालोकौ मर्त्येनामृतत्वमीप्सतेवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं लोकालोकाविति ता एता देवताः सृष्टाः, अस्मिन् महत्यर्णवे प्रापतस्तमशनापिपासाभ्यामन्ववार्जत्, ता एनमब्रुव"न्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति,"ताभ्यो गामानयत्ता अब्रुवन्"न वै नोऽयमलमिति" ताभ्योऽश्वमानयत्ता अब्रुवन् "न वै नोऽयमलमिति," ताभ्यः पुरुषमानयत्ता अब्रुवन् "सुकृतं बतेति पुरुषो वाव सुकृतमिति"।

अत्र जन्मसहस्राणां सहस्रैरपि सत्तमम् ।
कदा चिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदभागभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्ममहीमनन्ते
तमालयं ते त्वमलाः प्रयान्ति ॥

इत्यादिश्रुतिस्मृतिश्लाघितमनुष्यभावं श्रीहरिकृपाभूषणभूषितस्य विक्षेपासहिष्णुतया बाल्यादेव प्रवृत्तौ ग्लानिमतः श्रवणपरायणस्य श्रवणलभ्यसत्प्रसङ्गलभ्यकथाश्रवणात् जीवस्य कर्मफलानि दुःखात्मकानि श्रुत्वा वर्तमानशरीरोपलब्धानि दुःखानि स्वस्मिन्परस्मिंश्च भूयो भूयो जन्ममरणादिलक्षणचक्रभ्रमणात्मकं दुःखमनुभूय जातवैपथोर्जायमानो निर्हेतुकः। स च विवेकजन्यत्वान्मोक्षौपयिकाव्यभिचरितस्वभावः।

दुःखं द्विविधम्। गर्भाद्यवस्थारूपम्, आध्यात्मिकादिभेदभिन्नं च। तत्राद्यं यथा—पितृमूत्रद्वारा निःसृत्य मातृयोनिप्रवेश,स्ततो गर्भेऽनुदिनं कललबुद्बुदपिण्डकाठिन्याद्यवस्थाप्राप्ति,स्ततः क्रमेणावयवेन्द्रियादियोग,स्ततश्चेतनीभाव,स्ततो मातापितृरेतोवैषम्यनिरूपितस्त्रीपुरुषषण्डभावप्राप्ति,रर्वाक्शिरा ऊर्द्धपाज्जरायुवेष्टितो भूत्वा मलमूत्रागारे विष्ठाकृमिभिः सह वासः, प्रसवकाले योनिद्वारं प्राप्य यन्त्रेण पीड्यमान इव मूर्छितस्य पूतिव्रणात्कृमिक इव महता दुःखेन महीपतनं, कौमाराद्यवस्थाजन्यदुःखानुभवपूर्वकं मरणं, ततो धार्मिकश्चेत्तर्हि स्वर्गं गत्वा स्वपुण्यार्जितं सुखम्, असूयेर्ष्याऽऽदिजन्यं दुःखं चानुभूय धूममार्गेण पुनरावृत्त्य व्रीह्यादिभावप्राप्ति,स्ततः पेषणपाकभक्षाद्यवस्थोद्भवक्लेशानुभवपूर्वकं पितृरेतोभावप्राप्तिः,पुनर्मातृयोनिप्रवेशादिभिश्चक्रीभावेन संसारभ्रमणं, दुष्कर्मा चेन्नरकादिप्राप्तिः श्वसूकरसरीसृपस्थावरादिगतिश्चेति, गर्भोपनिषदि निपुणं प्रोक्तम्। द्वितीयं त्रिविधम्। आध्यात्मिकमाधिदैविकमाधिभौतिकं चेति। आद्यं द्विविधम्। शारीरमानसभेदात्। शिरोऽक्षिरोगादिज्वरादिकं शारीरं, कामक्रोधभयद्वेषलोभमोहविशादशोकासूयाऽपमानेर्ष्याऽऽदिजातं मानसम्। शीतोष्मवातवर्षाजलविद्युदादिसमुद्भवमाधिदैविकम्। मृगपक्षिमनुष्यराक्षससर्पादिभ्यो जातमाधिभौतिकमिति विवेकः। पुनश्च प्रकारान्तरेण निर्वेदो द्विविधः। जिहासाद्वारोद्भवविचारजातः, सद्योजातश्च। आद्यः सौभरिणा वैष्णवेन प्रोक्तः।

पद्भ्यां गता यौवनिनश्च जाता
दारैश्च संयोगगताः प्रसूताः।
दृष्टाः सुतास्तत्तनयप्रसूतिं
द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा॥

द्रक्ष्यामि तेषामपि चेत्प्रसूतिं
मनोरथो मे भविता ततोऽन्यः ।
पूर्णोऽपि तत्राप्यवरस्य जन्म
निवार्यते केन मनोरथस्य, ॥

इत्यारभ्य,

यथा हि भूयः परिहाणदोषो
जनस्य दुःखैर्भविता न दुःखी ।
सर्वस्य धातारमचिन्त्यरूप-
मणोरणीयांसमतिप्रमाणम् ॥
सितासितं चेश्वरमीश्वराणा-
माराधयिष्ये तपसैव विष्णुम्, ॥

इत्यन्तेन । द्वितीयो ययातिवद् सद्योजायमानस्तथा च तेनैव गीतम् ।

न जातुकामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
तां तृष्णां सन्त्यज्यन् प्राज्ञः सुखेनैवाभिपूर्यते ॥
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यति ॥
पूर्वं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाऽप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥

इत्यादि । तत्र सहेतुकस्य व्यभिचरितस्वभावेन न मोक्षोपयोगोऽनियतत्वात् । निर्हेतुक एव "जातनिर्वेद" इत्यत्र विवक्षितः ।

उक्तदुःखानां कर्मफलत्वाविशेषात्तद्दर्शनजात उक्तलक्षणो निर्वेदो यस्य तेनेत्यर्थः । निर्वेदफलं निर्दिशन्विशिनष्टि—श्रीभगवद्दर्शनस्येत्यादि । तद्दर्शनसाधनमाह—श्रीपुरुषोत्तमप्रसादैकेप्सुनेति । तद्दर्शनस्य तत्प्रसादैकलभ्यत्वात् । अनेन पूर्णनिष्कामत्वं द्योत्यते । आत्मानुभवमात्रलक्षणे कैवल्येऽपि निर्वेदवानित्यर्थः । तत्रापि कारणमाह—आचार्यैकदेवेनेति । आचार्य एवैको मुख्योऽद्वितीयो वा देव उपास्यो, भगवत्स्वरूपादिद्योतको वा यस्य तेन । एतेन देवानां भक्तिर्भगवत्प्रसादहेतुरिति पक्षो निरस्तः । "यो वै स्वां देवतामतियजति परस्वायै देवतायै व्यवते न परां प्राप्नोति पापीयान्भवती"त्यादिश्रुतेः । अन्यदेवोपासकानां दुर्बुद्धित्वं स्वयमेव गीतं श्रीमुखेन—

"अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥

यान्ति मद्याजिनोऽपि माम्"इत्यादिना । अत्रापि कारणमभिधत्ते—गुरूपसन्नेनेति । आचार्य्यैकदेवत्वस्य गुरूपसत्तिलभ्यत्वात् । गुरूपसन्नस्य लक्षणगर्भितकृत्यमाह—गुरुभक्त्येकहार्देनेति । गुरुभक्तावेवैकं मुख्यं हार्दन्तात्पर्यं यस्य तेन गुरुभक्तिपूर्णहृदयेनेति यावत् । तत्र यथाक्रमं श्रुतिप्रमाणं पठ्यते—"परीक्ष्ये"त्यादिना—लोकानां कर्मजन्यत्वेन हेतुना क्षयिष्णुत्वं व्यवस्येत्यर्थः । यदा पश्यः द्रष्टा पुरुषं पश्यते तदैव पुण्यपापे विधूय साम्यमुपैतीत्यन्वयः । निरञ्जनः पुण्यादिलक्षणाञ्जनस्य नष्टत्वात् । पुरुषं विशिनष्टि—रुक्मवर्णमिति । प्रकाशात्मकं वर्णरूपं यस्य त "मादित्यवर्णंन्तमसः परस्तादि"ति वाक्यान्तरात् । अनेन "नीरूपस्यैव ब्रह्मणो दर्शनं मोक्षहेतुरि"ति मन्यमानो निरस्तः । जीवेऽतिप्रसक्तिं वारयन्नाह—कर्त्तारमिति । विश्वस्येति शेषः ।

तत्र हेतुः-ईशमिति । चतुर्मुखस्यापि विश्वकर्तृत्वेशत्वयोः सत्त्वाद्व्यावृत्त्यर्थमाह-ब्रह्मयोनिमिति । चतुर्मुखस्यापि कारणं "यो ब्रह्माणं विदधाति पूर्वमि"तिश्रुतेः । यद्वा वेदस्यापि विधिद्वारेणेशनशीलत्वाज्जगन्निमित्तत्वाच्च, तत्रातिव्याप्तिवारणार्थमाह-ब्रह्मयोनिम् । वेदस्यापि कारणमित्यर्थः । साम्यं विशिनष्टि-परमामिति । स्वरूपेण सार्वज्ञ्यादिगुणेन च साम्यात्परमत्वम् । ननु रूपाकृतिमद्ब्रह्मदर्शनं भवतु नाम मोक्षकारणं, तथाऽपि प्रत्यगभिन्नमेवेत्याशङ्कोपशमार्थं वाक्यान्तरमाह-जुष्टमिति । स्वस्मादन्यं सर्वनियन्तारं यदा पश्यति तदा तन्माहिमानमिति एति, गुणाभावश्छान्दसः । वैलक्षण्यं द्योतयति-जुष्टम् । ब्रह्मादिसेव्यम् । यद्वा ईशत्वेऽपि दयालुत्वं व्यनक्ति-जुष्टम् । भक्तैः प्रीतं स्वीयानां प्रीतिविषयमिति यावत् । नन्वन्यशब्दस्य देहादिभेदपरत्वाभ्युपगमे क्षत्रभावान्न प्रत्यग्भेदपरत्वमुदाहृतवाक्यस्येति चेत्तत्राह-पृथगित्यादि । आत्मानं प्रेरितारं प्रेरयितारं च पृथक्त्वा, तेन जुष्टो भगवता प्रीतः सन्नमृतत्वं मृत्युरूपसंसारनिवृत्तिलक्षणं मोक्षमेति प्राप्नोति । तदुपोद्बलनार्थं वाक्यान्तरमाह-भिद्यत इति । तस्मिन्सर्वज्ञे सर्वेश्वरे ब्रह्मणि दृष्टे सति । सर्वज्ञत्वं व्यनक्ति-परावरे अस्मदादिभ्य परे ऐश्वर्यज्ञानादिनोत्कृष्टा अपि ब्रह्मादयोऽवरे निकृष्टा यस्मात्तस्मिन् । हृदयग्रन्थिर्देहे तत्सम्बन्धिषु ह्यहंताममताऽऽत्मिका स्वयमेव भिद्यते, तन्निमित्तकाः संशयाश्च भगवद्दर्शनानुग्रहेण स्वयमेव च्छिद्यन्ते । अस्य कर्माणीति । अस्य विदुषो भगवत्साक्षात्कारवतः कर्माणि सञ्चितक्रियमाणप्रारब्धरूपाणि सर्वाण्यपि क्षीयन्ते नश्यन्तीत्यर्थः । "यमेवैष" इत्यादेर्व्याख्यानमुपरिष्टाद्वक्ष्यते । तद्विज्ञानार्थम् । तस्य वेदान्तवेद्यस्य ब्रह्मणः स्वरूपगुणादिविषयकविज्ञानार्थं साक्षात्कारानुभवार्थम् । स मुमुक्षुः । रिक्तहस्तत्ववा-

गायाह-समित्पाणिरिति। उपलक्षणमेतत् पूजोपकरणस्य, यथाशक्ति पूजोपकरणहस्त इत्यर्थः। गुरोर्लक्षणमाह विशेषणद्वयेन-श्रोत्रियमिति। वेदान्तार्थावगाहिनम्। श्रोत्रियमिति विशेषणस्य सर्वसंशयच्छेदनार्थं संग्रहः, व्यतिरेके निन्दास्मरणात्।

भिन्ननावं श्रितः स्तब्धो यथा पारं न गच्छति।
ज्ञानहीनं गुरुं प्राप्य कुतो मोक्षमवाप्नुयादिति॥

न केवलं शास्त्रज्ञमात्रं, किं तु ब्रह्मनिष्ठं ब्रह्मस्वरूपगुणाद्यनुभवपरिपूर्णमनस्कम्। मुमुक्षोः शिष्यस्य लक्षणमाह-सम्यगुपसन्नाय। मायादम्भादित्यागपूर्वकाचार्यानन्याश्रिताय। तत्र हेतुः-प्रशान्तचित्ताय। प्रशान्तं वित्तलोकाद्येषणाशून्यं चित्तं यस्य तस्मा अत एव-शमान्विताय। विक्षेपादिशून्याय। कामादीनां विक्षेपहेतूनां नष्टत्वात्। कारणाभावे कार्य्याभाव इति न्यायात्। स विद्वानुक्तलक्षणो गुरुस्तस्मै उक्तलक्षणाय मुमुक्षवे शिष्याय तां ब्रह्मविद्यां प्रोवाच प्रकर्षेणोपदिशेत्। उपदेशप्रकर्षं व्यञ्जनाह। येन तत्त्वतः पुरुषं वेद। अनुभवतीति। तल्लक्षणं द्योतयन् विशिनष्टि-सत्यम्। उपलणमेतज्ज्ञानादीनाम्, "सत्यं ज्ञानमनन्तं ब्रह्मे"तिलक्षणलक्षितमित्यर्थः। येनेति। यच्छब्दो ब्रह्मविद्यापरामर्शपरः। यत्तदोर्नित्यसम्बन्धात्। लिङ्गव्यत्ययोऽत्र च्छान्दसः। यद्वा येनोपदेशेन। स्पष्टार्थकानि चान्यानि वाक्यानि।

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति, ब्रह्मण इति कर्मणि षष्ठी "कर्तृकर्मणोः कृती"ति शास्त्राद्।

औपनिषदाभिमतं ब्रह्मपदार्थमाह—

ब्रह्म चाचिन्त्यानन्तनिरतिशयस्वाभाविकबृहत्तमस्वरूपगुणाद्याश्रयभूतो रमाकान्तः श्री-

पुरुषोत्तम एव "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः, तमीश्वराणां परमं महेश्वरं तन्देवतानां परमं च दैवतं, न तस्य कार्यं करणं च विद्यते पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञान-बलक्रिया चे"त्यादिश्रुतिभ्यः। तद्विषयकमेव ज्ञानं तथाभूतेष्यमाणज्ञानविषयिकैवेच्छेत्यर्थः । तथा च श्रुतिः—"आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्त-व्यो निदिध्यासितव्यः" "सोऽन्वेष्टव्यः स विजि-ज्ञासितव्य इत्याद्या।

ब्रह्म चेति। तत्रेयत्ताव च्छेदेन चिन्ताविषयत्वं चिन्त्यत्वन्त-द्भिन्नत्वमचिन्त्यत्वम्। न च सर्वप्रमाणाविषयत्वमिति वाच्यम्। गगनकुसुमायमानत्वापत्तेः। देशकालवस्तुपरिच्छेदशून्यत्वमन-न्तत्वम्। तत्र सर्वगतत्वं, देशपरिच्छेदशून्यत्वम्।

यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥
इति श्रुतेः।
मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति, स्मृतेश्च॥

सर्वकालवृत्तित्वेनाद्यन्तशून्यत्वं, कालपरिच्छेदशून्यत्वम्।

अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते।
इति श्रुतेः।

नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर! विश्वरूपमि-ति भगवद्गीतावचनाच्च । परिच्छिन्नवस्तुविलक्षणत्वं वस्तुपरि-

च्छेदशून्यत्वम् "अस्थूलमनणु" इति श्रुतेः । विश्वात्मकत्वेन सर्वसामानाधिकरण्यार्हत्वाच्च । अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा पतिं विश्वस्यात्तमेश्वरमि"तिश्रुतेः । सर्वसामानाधिकरण्यार्हत्वादेव ।

नारायणः परो ध्याता ध्यानं नारायणः परः ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराड् ॥
इत्यादिसामानाधिकरण्यश्रुतेः ।
अहमात्मा गुडाकेशः सर्वभूताशयस्थितः ।

इति विश्वात्मतामुक्त्वा; स्वस्य सर्वसामानाधिकरण्यार्हत्वं यावदध्यायसमाप्ति श्रीमुखेनैव गीतम् । न च वस्तुमात्राभावत्वं वस्त्वपरिच्छिन्नत्वमिति वाच्यम् । तथात्वे च देशकालयोरपि वस्तुत्वाविशेषेण वस्तुपदार्थ एवान्तःपातित्वाद् वस्तुपरिच्छेदेनैव परिच्छेदमात्रोपस्थित्याऽनन्तत्वसिद्धेस्तयोः पृथक्त्वेनाभ्युपगमस्य वैयर्थ्यात् । तस्मादुक्तस्यैवार्थस्य वरीयस्त्वम् । निरतिशयत्वं,निर्गतोऽतिशयो यस्मात्तत्त्वम् । स्वाभाविकत्वं, स्वरूपवद्यावदात्मवृत्तित्वम्, अचिन्त्यानन्तनिरातिशयस्वाभाविकबृहत्तमस्वरूपगुणादिकमित्यर्थः । तत्र प्रमाणमाह–यः सर्वज्ञ इत्यादिना । तद्विषयकमिति । उक्तलक्षणब्रह्मविषयकमिति । तदेवात्रेष्यमाणं, तद्विषयिकैवेच्छा सम्पादनीयेति सिद्धान्तः । उक्तार्थे प्रमाणमाह–तथा चेति । सैव पठ्यते–"आत्मा वा रे" इत्यादिना ।

तदेव तत्त्वं वादिविवादपूर्वकं निर्णीयते ।

अथ किं प्रकारकं तत् ब्रह्मेति ।

अथ किंप्रकारकं तद् ब्रह्मेत्यपेक्षायाम् ।

किंशब्दोऽत्र संशयपरः । औपाधिकभेदाभेदाश्रयो, वा

जगदसन्ताभिन्नं, वा तदसन्ताभिन्नं, वा चेतनाचेतनशरीरकत्वेन तद्विशिष्टं, वा स्वाभाविकभेदाभेदाधिकरणं, वेति यावत् ।

तत्राद्यं मायावादिमुखेनानूद्य दूषयितुमाह । अत्राहुः के चिदिति ।

अत्राहुः के चि"त्सदेव सोम्येदमग्र आसीदे" "कमेवाद्वितीयम्" "आत्मा वा इदमेक एवाग्र आसीत्" "एको ह वै नारायण आसीदि"त्यादिश्रुतिभ्यः, स्वरूपत एकमेव ब्रह्माभेदाश्रयभूतम्,, अनाद्युपाधिना च भेदः, तत्त्वमस्यादिवाक्यजन्यज्ञानात्तन्निवृत्तिरिति चेत् ।

औपाधिकभेदाभेदवादिनो भास्करभट्टादयः । तमेव पक्षं विवृणोति–सदेव सोम्येत्यादिना तदनुवादः ।

एतन्मतं मायावादिमुखेन निराकरोति ।

तत्राहुरन्य इति ।

तत्राहुरन्ये । नैतद्युक्तिमद्, विकल्पासहत्वात् ।

मायावादिन इत्यर्थः ।

किं तदित्यपेक्षायामाह–नैतद्युक्तिमदिति । तत्र हेतुमाह–विकल्पासहत्वादिति ।

तमेव पञ्चधा विकल्प्याद्यं दूषयति ।

तथा हि । न तावदुपाधिना छिन्नो ब्रह्मखण्डो जीवात्मा, ब्रह्मणोऽच्छेद्यत्वाद्, जीवस्य साद्यत्वापत्तेश्च

नाप्यच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषो जीवः। ब्रह्मैकप्रदेश उपाधिसम्बन्धापत्त्या सर्वे दोषाः तस्यैव स्युः। उपाधौ गच्छति सति उपाधिना ब्रह्मप्रदेशाकर्षणानर्हत्वेनानुक्षणमुपहितब्रह्मप्रदेशभेदेन क्षणे क्षणे बन्धमोक्षौ च भवेताम्। आकर्षणपक्षाभ्युपगमे चाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मण आकर्षणं स्यात्। तदसम्भवाभ्युपगमे पूर्वोक्तदोषतादवस्थ्यम्। अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गेण सर्वजीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसन्धानं स्यात्। प्रदेशभेदादप्रतिसन्धाने चैकस्यापि स्वोपाधौ गच्छति सति प्रतिसन्धानं न स्यात्।

नाप्युपाधिसंयुक्तं ब्रह्मस्वरूपमेव जीवः। ब्रह्मस्वरूपस्यैवोपाधिसम्बन्धेन जीवत्वापत्तेः, तदतिरिक्तानुपहितब्रह्मासिद्धेः।

न चोतोपाधिसंवलितश्चेतनान्तरमेव जीव इति चेतनान्तरानभ्युपगमात्। अभ्युपगमे च भेदस्यौपाधिकत्वसिद्धान्तभङ्गात्, परपक्षपातित्वापत्तेश्च।

नाप्युपाधिरेव जीवो बाह्यमतप्रसङ्गात्।

तथा हीति। अच्छेद्यत्वाच्छेतुमनर्हत्वात्। "निष्कलं निष्क्रियमि"त्यादिवाक्यात्। तत्रैव दोषान्तरमाह–जीवस्येति। तथात्वे तु "अजो ह्येको जुषमाणोऽनुशेते" "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"त्यजत्वानादित्वनियमभङ्गप्रसङ्गादित्यर्थः।

द्वितीयं कल्पं दूषयति–नाप्यच्छिन्न एवेति। ब्रह्मण एव जीवत्वात्तत्रैव सर्वदोषयोग इति यावत्। दोषान्तरमाह–विकल्पमुखेन। उपाधिना स्वगमनादौ स्वावच्छिन्नं ब्रह्माकृष्यते, न वेति। अन्त्ये दूषणमाह–उपाधाविति। नित्यमुक्तप्रदेशोऽकस्माद्बध्येत, अनादिबद्धश्च स्वयमेवाकस्मान्मुच्येतेति भावः। आद्यमप्याह–आकर्षणपक्षाभ्युपगम इति। कृत्स्नस्येति। मुक्तप्राप्यब्रह्माभावप्रसङ्गादिति भावः। ननु ब्रह्मण आकर्षणानर्हत्वादेव तदभाव इति चेत्तत्राहुः–अच्छिन्नब्रह्मदेशाश्चेति। एकत्वप्रतिसन्धानं सर्वेषां जीवानां परस्परैकत्वज्ञानं भवेत्। भिन्ना इति चेत्तत्राहुः–प्रदेशभेदादिति। एकस्यापि स्वस्यापि।

तृतीयं निराकरोति। नाप्युपाधिसंयुक्तं ब्रह्मस्वरूपमेवेति। निषेधे हेतुः-ब्रह्मस्वरूपस्यैवेति। तत्रापि हेतुमाहुः-तदतिरिक्तेति। स्वरूपैकत्वस्य निर्विवादत्वात्। किं च ब्रह्मस्वरूपस्यैवोपाधिसम्बन्धः सहेतुको, निर्हेतुको वा। नाद्यो वक्तुं शक्यः, अप्रसिद्धत्वात्। अन्यथा कल्पनायामनवस्थाऽऽपत्तेः। नाप्यन्त्यः। मुक्तस्यापि पुनराकस्मिकबन्धापत्तिप्रसङ्गात्। आकस्मिकत्वाविशेषात्। न चानादिकर्मसम्बन्ध एवात्र कारणमिति वाच्यम्। ब्रह्मणः कर्मसम्बन्धाभ्युपगतौ कदाचिदपि निवृत्तिर्न स्यात्। तन्निवर्त्तकान्तराभावात्। अविद्यानिवर्त्तकस्यैव बन्धवत्त्वाभ्युपगमाच्चेति।

चतुर्थं प्रत्याहुः। संवलितं चेतनान्तरमेवेति। उतेति पक्षान्तरे। तत्र हेतवः, चेतनान्तरेत्यादयः। एभिस्त्रिभिर्दूषण-

त्रयमुक्तं भवति। चेतनान्तराङ्गीकारे नियमभङ्गः, औपाधिकभेदाभ्युपगमनियमभङ्गः परपक्षप्रवेशापत्तिश्चेति तच्चास्मदिष्टापन्नमिति भावः।

चरमन्निराकरोति—नाप्युपाधिरेवेति। तत्र हेतुः। बाह्येति। सर्वशास्त्रासम्मतत्वादित्यर्थः।

एवं तन्मतं निराकृत्य स्वमतं स्थापयन्ति मायावादिनः, तस्मादित्यादिना—

तस्मात् क्षराक्षरात्यन्ताभिन्नं सजातीयविजातीयस्वगतभेदत्रयशून्यं सर्वविशेषविनिर्मुक्तमनुभूतिमात्रं ब्रह्म सर्ववेदान्तप्रतिपाद्यम्।

क्षराक्षरसकलप्रपञ्चविवर्त्ताधिष्ठानमिति भावः। त्रिविधभेदशून्यं, तत्र घटाद् घटान्तरस्य भेदः सजातीयः, घटात् पटादीनां भेदो विजातीयः, एकस्मिन् शरीरे करचरणाद्यवयवभेदः स्वगतभेद इति विवेकः। तस्य त्रिविधस्यापि ब्रह्मण्यभावः। तत्र न तावत्सजातीयः, चेतनान्तराभावात्। नापि विजातीयः, अचेतनवस्त्वन्तराभावात्। तत्प्रतीतेर्भ्रान्तिकल्पितत्वेन तन्मिथ्यात्वाभ्युपगमात्। नापि स्वगतभेदः, ब्रह्मणः सावयवत्वसविशेषत्वाद्यनभ्युपगमादित्यर्थः।

एवं मायावादिमतमनूद्य; भेदवादिमुखेन निराकरोति, अयुक्तं चैतदिति।

इति प्राप्ते प्राहुरन्ये।

अयुक्तं चैतद्, भेदविषयकवाक्यसहस्रविरोधात्।

ननु वेदान्तशास्त्रे भेदाभेदविषयकाणामुभयविधवाक्यानां श्रूयमाणत्वेऽपि जीवेश्वरभेदस्य प्रत्यक्षसिद्धत्वेन भेदप्रतिपादकवाक्यकदम्बस्य भेदानुवादपरत्वेन दौर्बल्याद्, अभेदपराणां तु वाक्यानामन्यविषयाभावेन स्वार्थ एव प्रामाण्यात् प्राबल्यम्, उपक्रमादिषड्लिङ्गोपेतत्वाच्च, तस्मादस्यन्ताभिन्नं ब्रह्म सर्ववेदान्तार्थभूतामिति चेद् न ।

इत्युक्तप्रकारेण मायावादिनिर्णये प्राप्ते सति एतदयुक्तं चेत्सन्ये भेदवादिनो माध्वाः प्राहुरित्यन्वयः। अयुक्तं च, अनुपपन्नम्। अनुपपत्तौ हेतुमाहुः—भेदविषयकेति । वाक्यानि तु—भोक्ताभोग्यं प्रेरितारञ्च मत्वा पृथगात्मानं प्रेरितारञ्च मत्वा, जुष्टं यदा पश्यत्यन्यमीशं, सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्, प्रधानक्षेत्रज्ञपतिर्गुणेशः, संसारबन्धस्थितिमोक्षहेतुः, नित्यो नित्यानां चेतनश्चेतानामेको बहूनां यो विदधाति कामान्, ज्ञाज्ञौ द्वावजावीशानीशौ, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते, ऋतं पिबन्तौ सुकृतस्य लोके, गौरनाद्यवती, अजामेकां लोहितशुक्लकृष्णामि, ति। भेदव्यपदेशाच्च, अधिकन्तु भेदव्यपदेशात्, शारीरश्चोभयथाऽपि हि भेदेनैनमधीयते, भेदव्यपदेशाच्चान्य इति ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षरमेव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षरमुच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इत्यादीनि बहुशोऽनुसंधेयानि । स्यादेतत् । तथाऽपि भेदवाक्यानां निर्बलत्वात्कल्पितभेदविषयकत्वेन नैराकाङ्क्ष्याच्च तद्बाधो न दोषावह इत्याशयेन भूयोऽप्युत्थायाशङ्क्यते ।

ननु वेदान्तशास्त्र इति । वेदान्तशास्त्रे उभयविधवाक्यानां श्रूयमाणत्वेऽपि तयोर्मध्येऽभेदपराणां वाक्यानां प्राबल्यमिस्यन्वयः । तदर्थं हेतुमाहुः—भेदप्रतिपादकवाच्यकदम्बस्य दौर्बल्याद् दुर्बलत्वं हेतुना द्रढयति । जीवेश्वरभेदस्य प्रत्यक्षसिद्धत्वेन न स्वार्थपरत्वमिति शेषः । ननु स्वार्थबाधे कथं तेषां नैराकाङ्क्षयमिति चेत्तत्राहुः—भेदानुवादपरत्वेनेति । कल्पितभेदप्रतिपादनेन नैराकाङ्क्षयमित्यर्थः । वाक्यानामुभयविधत्वं विशेषणमुखेन विव्रियते—भेदाभेदविषयकाणामिति । भेदाभेदौ विषयौ येषां तेषामिति समासः । भेदविषयकाणि वाक्यानि न स्वार्थवन्ति, तद्विषयस्य जीवेश्वरभेदरूपस्य प्रत्यक्षसिद्धत्वात् । यद्वाक्यं प्रमाणान्तरासिद्धविषयकं, तन्न स्वार्थपरम्, अग्निर्हिमस्य भेषजमित्यादिवदिति प्रयोगोऽप्यत्र सूचितो भवति । हेत्वन्तरमाहुः—अभेदपराणां तु वाक्यानां स्वार्थ एव प्रामाण्यादिति । तुशब्दोऽत्रन्तवैलक्षण्यपरो भेदाभेदवाक्ययोर्दौर्बल्यप्राबल्यरूपं महद्वैलक्षण्यं द्योतयति । तत्र हेतुमाहुः—अन्यविषयाभावेनेति । अनन्यविषयकत्वेनेत्यर्थः । अत्र प्रयोगः—अभेदविषयकवाक्यानि, स्वार्थपराणि, अनन्यविषयकत्वाद्, विधिवाक्यवदिति, यद्यद्वाक्यमनन्यविषयकं तत्तत्स्वार्थपरम् । तत्रैव हेत्वन्तरमाहुः—उपक्रमादीति । तथा हि ।

उपक्रमोपसंहारावभ्यासोऽपूर्वताफले ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इति—

वचनात् । अत्रामनन्तिच्छन्दोगाः । सदेव सोम्येदमग्र-आसीदे,कमेवाद्वितीयमित्युपक्रमः । ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसी,त्युपसंहारः। तत्त्वमसीति नवकृत्वोऽभ्यासः । अभेदस्य प्रमाणान्तरानवगतत्वादपूर्वता । येनाश्रुतं श्रुतं भवती-त्यादिरर्थवादः । मृल्लोहतन्नपरशुग्रहणादिदृष्टान्त उपपत्तयः । आचार्यवान्पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये, इति फलम् । उपसंहरते–तस्मादिति । उक्तहेतुसमुदा-यादिति शङ्काग्रन्थार्थः ।

अथैतन्निराकरोति–नेत्यादिना । भवदुक्तो राद्धान्तोऽनुपपन्न इत्यर्थः । प्रतिज्ञाऽर्थं हेतुमाह–उभयविधेति ।

उभयविधवाक्यानामपि तुल्ययोगक्षेमत्वात् । तथा हि । न तावत्प्रत्यक्षगोचरो जीवेश्वरभेदः तयोर-तीन्द्रियत्वेन प्रत्यक्षाविषयत्वात् । "नेन्द्रियाणि नानु मानमि"ति श्रुतेः। अनुयोगिप्रत्यक्षनिरूप्यत्वाद्भेदप्र त्यक्षस्य । एवं भेदस्य प्रत्यक्षगोचरत्वासिद्धया तद्वि-षयकवाक्यानामनुवादपरत्वानर्हतया स्वार्थ एव सुप्रमाणत्वात् । नापि तात्पर्य्यनिर्णायौपायिकषड्-लिङ्गोपेताभेदवाक्यप्रतिपाद्यं ब्रह्म, सर्वधर्मविनिर्मु-क्तस्य निर्विशेषस्य ब्रह्मणो वाच्यत्वानभ्युपगमाद्, वाक्यजातस्य किंचिद्धर्मावच्छिन्नवस्तुप्रतिपादनप-रत्वनियमात् । एवं सर्वप्रमाणाविषयत्वेन गगनकु-

सुमायमानत्वप्रसङ्गाच्च। वाच्यत्वे चास्य प्रत्यक्षा-
भ्युपगमप्रसङ्गाद्, अस्मन्मतप्रवेशाच्च।नापि षड्लि-
ङ्गोपेतत्वेनाभेदवाक्यानां प्राबल्यं वक्तुं शक्यते, भेद-
वाक्यानामपि तथात्वश्रवणात्। तथा ह्याम्नायते ऽ
न्तर्यामिब्राह्मणे भेदस्य षड्लिङ्गोपेतवाक्यवाच्य-
त्वं बृहदारण्यके-वेत्थ त्वं काप्यन्तर्यामिणमित्युपक्र-
मः। एष ते आत्मा ऽन्तर्यामीत्युपसंहारः। एष ते
आत्मेत्येकविंशतिकृतो ऽभ्यासः। अन्तर्यामिताया
अप्राप्तत्वादपूर्वता। स वै ब्रह्मविदित्यादि फलम्। तच्च
त्वं याज्ञवल्क्य सूत्रमविद्वांस्तवान्तर्यामिणं ब्रह्म ग-
वीरुद्रजसे मूर्द्धा ते पतिष्यतीति निन्दारूपो ऽर्थवादः।
यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्याद्युपपत्ति-
रिति। तथैवान्यत्राप्यूह्यम्। तस्मादभेदवाक्यानां
साम्यप्रतिपादकता ऽभ्युपगमेन सार्थक्याद् भेद-
वाक्यानामपि प्राबल्यादत्यन्तभेदविषयकमेव वेदा-
न्तशास्त्रं तत्सिद्धं चेतनाचेतनात्यन्तभिन्नं ब्रह्म।

तदेव विवृणोति–तथा हीति। यदुक्तो भेदवाक्यानामनुवाद-
परत्वेन दुर्बलत्वादभेदवाक्यानां प्राबल्यमिति दौर्बल्यरूपान् हेतू-
स्तावन्निर्मूलयन्ति–न तावदिति। तत्र प्रमाणमाह–नेन्द्रियाणि
नानुमानमिति श्रुतेः। भेदप्रत्यक्षस्येति। भेदश्चात्र

जीवेश्वरविषयको विवक्षितो,न भेदमात्रं, स च भेदोऽन्योन्याभाव-रूपस्तत्प्रत्यक्षस्यानुयोगिप्रत्यक्षतन्त्रत्वात् । उपसंहरति–एवमिति । भेदस्य प्रत्यक्षविषयताऽसिद्धौ सत्यां तद्विषयकवाक्यानां च सुतरां निर्विषयकत्वापत्तौ, सुतमां च तेषां स्वार्थपरत्वं, तस्मात्स्वरूपासिद्धोऽयं हेतुर्न प्रमाणपदारोहणार्ह इत्यर्थः। एतेनैव भेद-वाक्यानां स्वार्थपरत्वप्रतिपादनेन द्वितीयस्याभेदपराणां स्वार्थ एव प्रामाण्यादित्यस्यापि हेतोरनैकान्तिकत्वेन हेत्वाभासत्वं व्याख्यातं, स्वार्थेप्रमाणत्वस्योभयत्राविशेषात् । किं च स्यादे-तदभेदवाक्यानां षड्लिङ्गोपेतत्वं, तथाऽपि नैतावता भवतामिष्ट-सिद्धिरित्याशयेनोपसंहरन्नाह । नापि तात्पर्येत्यादिना । सजातीयादिभेदशून्यं सर्वविशेषरहितं तत्त्वं षड्लिङ्गोपेतवाक्यानां वाच्यतयाऽभ्युपगतं न वेति विवेचनीयम् । नाद्यो वक्तुं शक्यत इत्याह । नापीति । उक्तप्रकारं ब्रह्म तात्पर्यनिर्णयोपयिकषड्-लिङ्गोपेताभेदवाक्यप्रतिपाद्यं न भवतीति । तत्र हेतुः–ब्रह्मणो वाच्यत्वानभ्युपगमाद् । एतत्प्रपञ्चयन्विशिनष्टि–सर्वधर्म-विनिर्मुक्तस्य। सर्वे धर्माः शक्तिगुणादयस्तैः शून्यस्य । अत एव निर्विशेषस्येति । किं च तथात्वे द्वैतापत्तिर्दुर्वारेत्याह। वाक्य-जातस्येति । नाप्यन्य इत्याह । एवं सर्वप्रमाणाविषयत्वेने-ति । अप्रामाण्ये फलं दर्शयन्हेतुमाह। गगनकुसुमायमानत्वे-ति । व्यतिरेके दोषमाह । वाच्यत्वे चेति । अस्मादिति । अपसिद्धान्तापत्तेरित्यर्थः । वाच्यत्वे द्वैतापत्तिरवाच्यत्वेऽप्रमाण-त्वमित्युभयतःपाशा रज्जुरिति भावः ।

अथ तृतीयस्यापि हेत्वाभासतां प्रपञ्चयंस्तन्निराकरो-ति–नापीत्यादिना । तथात्वश्रवणादिति । षड्लिङ्गो-पेतत्वश्रवणात् । तदेव प्रपञ्चयति–तथा हीत्यादिना । अ-

न्यत्राप्यूह्यम्। उपनिषदन्तरेष्वपि चिन्तनीयमित्यर्थः। उक्तस्य हेतोर्भेदवाक्येष्वप्यव्यभिचारादनैकान्तिकत्वेन हेत्वाभासत्वं ध्रुव्यक्तमित्यर्थमुपसंहरन् स्वसिद्धान्तमाह । तस्मादिति । अत्यन्तभेदविषयकमेव वेदान्तशास्त्रमिति विज्ञायते। कुतः भेदवाक्यानामपि प्राबल्यादिति । नन्वेवमभेदवाक्यसमुदायबाधोऽत्रापि तुल्य इति चेत्तत्राहुः। अभेदवाक्यानां साम्यप्रतिपादकताऽभ्युपगमेन नैराकाङ्क्ष्यादित्यर्थः। ननु द्वैतापत्तिदोषाद् ब्रह्मणो वाच्यत्वानभ्युपगमेऽपि नोक्तदोषप्रसरस्तस्य लक्षणविषयत्वाभ्युपगमात्–तथा चैष वाक्यार्थः। सर्वज्ञसर्वशक्त्याश्रयविश्वनियन्तृजगज्जन्मादिकारणं ब्रह्म तत्पदार्थः। बुद्ध्याद्यवच्छिन्नश्चेतनांशोऽल्पशक्त्याद्याश्रयो जीवक्षेत्रज्ञादिशब्दाभिधेयस्त्वंपदार्थः। उभयत्रस्यूताऽभिन्ना सत्ताऽसिपदार्थः। एवं तत्त्वंपदार्थयोः परस्परविरुद्धधर्मावच्छिन्नतयाऽभेदान्वयोऽनुपपन्नो, यथा सोऽयं देवदत्त इत्यत्र तदेशकालवैशिष्ट्यैतदेशकालवैशिष्ट्ययोरितरेतरात्यन्तविरोधात्तत्पिण्डमात्रशक्त्यैकदेशभूतं भागलक्षणया पदाभ्यामुपस्थाप्यते उभयपदार्थाश्रितानां परस्परविरोधहेतूनां शक्त्यैकदेशानां सार्वज्ञ्यादीनामल्पशक्त्यादीनां च त्यागेनोभयत्रानुगताखण्डत्वेनोभयपदार्थाभेदान्वय इति चेद्। मैवम्। यः सर्वज्ञः सर्ववित्सत्यकामः सत्यसङ्कल्पः, स्वाभाविकी ज्ञानबलक्रिया च, सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वकामः सर्वधर्मः सर्वरूप, इति अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वाद्,न हि श्रोतुः श्रुतेः, न हि मन्तुर्मतेः न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वादि,त्यादिश्रुतिभिः स्वाभाविकत्वेनोद्घोषितानां यावदात्मवृत्तीनामुभयपदार्थनिष्ठधर्माणां त्यक्तुमशक्यत्वात् । त्यागे प्रमाणाभावाच्च। तत्र न तावच्छब्दः,अप्रसिद्धत्वात्।न च नहे नानाऽस्ति किं चन,

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती,त्यादीनां सत्त्वान्ना-
प्रामाण्यमिति वाच्यम् । तेषां निरतिशयबृहत्स्वरूपगुणशक्त्याश्रय-
स्य ब्रह्मपदार्थस्य भगवत एकत्वप्रतिपादनपरत्वात्। तस्य चास्मद-
भीष्टतमत्वात्। न च ब्रह्मवृत्तिधर्मनिषेधविषयिकेयं श्रुतिः, केवलो
निर्गुणश्चेतिश्रुत्यैक्यार्थादिति वाच्यम् । महाऽनुपपत्तिमत्त्वात् ।
न हि महाऽऽदरेण स्वाभाविकयावदात्मवृत्तिधर्मान्स्वयमेव प्रतिपाद्य
भूयस्तन्निषेधे प्रवर्त्तेत सर्वज्ञा भगवती श्रुतिः। तथात्वे चोन्मत्तप्रज-
ल्पितमिव श्रुतिवचनस्यानाप्तत्वप्रसङ्गात् । न चैवं निर्गुणवाक्य-
विरोधापत्तिरिति वाच्यम्। तस्य प्राकृतगुणनिषेधेन कृतार्थत्वात्।
किं चैषाऽऽनन्दस्य मीमांसेत्युपक्रम्य मनुष्यानन्दप्रभृति चतुर्मुखा-
नन्दावसानमुत्तरोतरशतगुणानन्दान् प्रपञ्च्य; सर्वेषां परिच्छिन्ना-
नन्दाश्रयत्वं च निर्णीय; यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह,
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने,ति मन्त्रेण ब्रह्मण आन
न्दलक्षणगुणस्यापरिच्छिन्नत्वेन तस्य सर्वभयनिवृत्तिरूपमोक्षप्रदान-
शक्तियोग उक्तस्तैत्तिरीये, तथाभूतगुणस्य तुच्छत्वे मोक्षविधा-
यकश्रुतेः सुतरां बाधो नालोच्यते देवानांप्रियैः पण्डितमानिभिः ।
तत्सिद्धं ब्रह्मणः स्वाभाविकगुणनिषेधे शब्दस्थामानत्वमिति ।
नापि तर्कः। नैषा मतिस्तर्केणापनेयेतिश्रुतेः। अचिन्त्या खलु ये भा-
वा न तांस्तर्केण योजयेदितिमनुस्मृतेश्च निश्चयात्। तर्काप्रतिष्ठा-
नादितिन्यायाच्चेति । अश्रुतिमूलकतर्कस्याप्रामाण्यकथनात् ।
न हि वायोः स्पर्शोऽग्नेरौष्ण्यं जलस्य शैत्यमिति केनाप्यनुन्मत्तेन त-
र्ककुशलेन पुरुषेण निषेद्धुं शक्यते, स्वाभाविकत्वात्। तथैव ब्रह्म-
धर्मा अपि निषेधगन्धसम्बन्धानर्हा इति। किं च तत्त्वमादिपदल-
क्ष्यं वस्तु पदान्तरवाच्यं न वेति विवेचनीयम्।नाद्यः। पूर्वोक्तद्वैताप-
त्तिदोषस्य तादवस्थ्यात्। नान्त्यः। अप्रमाणकत्वेन तुच्छत्वात्। न च

तस्यापि लक्षयत्वान्नोक्तदोष इति वाच्यम्। लक्ष्यस्य लक्ष्यत्वेऽनवस्थाऽऽपत्तिप्रसङ्गात्। किं च सोऽयं देवदत्त इतिदृष्टान्ते देशकालयोरनित्यसम्बन्धत्वाद्धेयत्वं, पिण्डस्य च शक्यैकभागस्य रूपाद्यनेकविशेषवत्त्वात् पिण्डशब्दवाच्यत्वाच्चोपादेयत्वम्। एवं हेयत्वोपादेयत्वयोः सम्भवात् भागत्यागलक्षणा कल्पते ब्रह्मणि, प्रकृते तु धर्मधर्मिणोः स्वाभाविकसम्बन्धश्रवणान्न हेयता, लक्षयभागस्य च निर्विशेषत्वादवाच्यत्वाच्च नोपादेयत्वम्। एवं हेयोपादेययोरभावान्न भागलक्षणासम्भवः, विषमदृष्टान्तत्वात्। वाच्यत्वलक्षयत्वयोः सामानाधिकरण्यनियमाच्च। अपि चोक्तन्यायः सत्यादिवाक्ये तुल्यो द्रष्टव्यः। तथा हि। सत्यादिवाक्यार्थेऽपि वाच्यत्वे पूर्वदोषव्याप्तेर्लक्षणैवाकामेनापि त्वयाऽङ्गीकर्त्तव्या। एवं तर्हि सत्यादिवाक्ये का वा लक्षणेति विवेचनीयं, जहत्स्वार्थाऽजहत्स्वार्था, जहदजहत्स्वार्था,वेति। नाद्यः पक्षः। गङ्गायां घोष इत्यत्र शक्यस्य प्रवाहस्य त्यागात्तीरस्याशक्यस्य कल्पनावत् सत्यज्ञानानन्दानां पदार्थानां शक्यभूतानान्त्यागादसत्यमज्ञानं दुःखमित्येतद्वाक्यार्थोऽभ्युपगतः स्यात्। नापि द्वितीयः। द्वैतापत्तेः, परमतप्रवेशाच्च। नापि तृतीयः। उक्तप्रकारेण हेयोपादेयभागासंभवात्। किं च, निर्धर्मके सम्बन्धाभावात्। तदभावे सुतरां लक्षणाऽभाव इत्यर्थः। न च शाखाचन्द्रन्यायेन कल्पितसम्बन्धेनापीष्टार्थसिद्धिरिति वाच्यम्। विषमदृष्टान्तत्वात्। तथा हि। शाखाचन्द्रयोः सम्बन्धिनोः प्रत्यक्षप्रमाणगोचरत्वेनानेकधर्मवत्त्वेन च सम्बन्धित्वकल्पनायोग्यत्वात्। दार्ष्टान्तिके तु सर्वविशेषशून्यतया सर्वप्रमाणाविषयत्वाद् न शशशृङ्गकल्पे वस्तुनि सम्बन्धित्वकल्पनाऽवकाश इति। किं बहुना,वाच्यत्वानभ्युपगमे सर्वथा-लक्षणोपपत्तिरेव, वाच्यस्यैव लक्ष्यत्वनियमादिति पूर्वमेवोक्तम्।

तथाऽत्र प्रयोगः। लक्ष्यं, न निर्वाच्यं, शब्दार्थत्वात्, कुसुमितद्रुमा गङ्गेत्यादिवदित्यलं विस्तरेण।

एवं परमतं निराकृत्य स्वसिद्धान्तमाहुः। तत्सिद्धमित्यादिना। किं च तत्त्वमसीत्यत्र षष्ठ्यन्तात्तत्पदात् सुपां सुलुगितिसूत्रेण षष्ठीविभक्तेर्लुकि कृते तत्त्वमसीति वाक्यस्यापि भेदपरत्वं सुव्यक्तमिति विवक्षितार्थः।

एतन्मतं विशिष्टाद्वैतवादिमुखेन निराकरिष्यन्नाह-आहुरेक इति।

इतिप्राप्ते प्राहुरेके नैतद्रमणीयम्। अभेदश्रुतीनां सर्वस्वार्थत्यागेनात्यन्तबाधप्रसङ्गाद्, अपि तु चेतनाचेतनवस्तुजातस्य ब्रह्मविशेषणत्वात्तद्विशिष्टं चैकं सर्वज्ञं सर्वशक्ति अनवधिकातिशयानन्तकल्याणगुणगणाकरं ब्रह्म वेदान्तशास्त्रप्रतिपाद्यम्। एवं चेतचेतनयोर्ब्रह्मविशेषणत्वेऽपि तद्भिन्नत्वान्न तद्गुणसांकर्यशङ्कागन्धोऽपीति।

इति प्राप्ते नैतद्रमणीयमित्येके प्राहुरित्यन्वयः। एतत्पूर्वोपन्यस्तं न रमणीयम्, अङ्गीकारार्हन्न भवतीत्येके विशिष्टाद्वैतं ब्रह्माभ्युपगच्छन्तो वदन्तीत्यर्थः। तत्रहेतुः-अभेदश्रुतीनां बाधप्रसङ्गादिति। स्वार्थत्यागादित्यर्थः। उपलक्षणार्थोऽयं हेतुर्भेदनिन्दाश्रवणाच्च। तत्सर्वं परादाद्य आत्मनोऽन्यत्र सर्वं वेदेत्यादिश्रुतेः। किं तावद्रमणीयं भवतामित्यपेक्षायां स्वसिद्धान्तमाहुः-अपि त्विति। एवं सिद्धान्त इत्यर्थः। तदेवोपन्यासमुखेनाहुः-चेतनाचेतनेत्यादिना। तथा चैवं वाक्यार्थः। तत्त्वमिति सामानाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैवाभि-

हितम्। एवमभिहिते सत्ययमर्थो ज्ञायते त्वमिति यः पूर्वं देहाधिष्ठातृतया प्रतीतः स परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः पृथक्स्थितिप्रवृत्त्यनर्हः। अतस्त्वमिति। त्वत्प्रकारविशिष्टन्त्वदन्तर्यामिणमेवाचष्ट इति। अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, ब्रह्मात्मकतयैव यस्य जीवस्य शरीरिणः स्वनामभाक्त्वात्। तत्त्वमिति सामानाधिकरण्यप्रवृत्तयोर्द्वयोरपि पदयोर्ब्रह्मैव वाच्यं, तत्र तत्पदं जगत्कारणभूतं सकलकल्याणगुणगणाकरं निर्विकारमाचष्टे, त्वमिति च तदेव ब्रह्म जीवान्तर्यामिरूपेण स्वशरीरं जीवमाचष्ट इत्यादि।

एवं तन्मतमनूद्य तन्निरसितुमुपक्रमते।

अत्र ब्रूम इति।

अत्र ब्रूमः नैतच्चारुतरं स्वारस्याभावात्। तथा हि। व्यावर्त्तकत्वं तावद्विशेषणत्वमिति सर्वपक्षसामान्यम्। एवं चिदचिद्वस्तुनोर्ब्रह्मविशेषणत्वाभ्युपगमे किं वा वस्तु ताभ्यां व्यावर्त्तकाभ्यां व्यावृत्तं विवक्षितमिति विवेचनीयम्। न च तावच्चेतनाचेतनभूतावेव ताभ्यामेव व्यावर्तेतेति वाच्यम्। अत्यन्तासम्भवाद्। एकस्यैव वस्तुनः कर्मकर्त्तृवद्व्यावर्त्यव्यावर्त्तकत्वादृष्टश्रुतत्वाद्। नापि वस्त्वन्तरं व्यावर्त्यमिति वाच्यम्। तत्त्वत्रयाभिन्नपदार्थान्तराभावाद् अनभ्युपगमाच्च। अपि च चेतनाचेतनविशिष्टब्रह्माद्वैताभ्युपगमेऽपि ब्रह्मणश्चेतनाचेतनाभ्यां

भेदस्तयोश्च परस्परभेदः स्वाभाविकोऽभ्युपगम्यत एव भवद्भिः। अन्यथा स्वभावसाङ्कर्यप्रसक्तेः। एवं भेदमप्यङ्गीकृत्य पुनर्विशिष्टाङ्गीकारात्मकगौरवाद्वरीयस्त्वं स्वाभाविकभेदाभेदमतस्यैव लाघवात्। तस्माच्चेतनाचेतानात्मजगद्भिन्नाभिन्नस्वभावं ब्रह्म सर्ववेदान्तप्रतिपाद्यं तदेवन्न जिज्ञासाविषयतया सूत्रितं श्रीभगवता बादरायणेनेति। तदेव ह्यौपनिषदानां तत्त्वम्।

ननु स्वाभाविकभेदाभेदवादेऽपि ब्रह्मण स्वत एव जीवभावाभ्युपगमाद् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एवेति चेन्न। स्वरूपतो जीवेशयोरैक्यानभ्युपगमात्। तथा हि। ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण भेदः, इतरेतरात्यन्तविलक्षणत्वात्। अस्थूलमनण्वित्यादिश्रुतेः। तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम्, अचेतनस्य च स्थूलत्वेन ब्रह्मणस्तयोर्वैलक्षण्येनेति विवेकः। एवमेव तस्य तयोश्च सर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्त्वसर्वाधारत्वादियोगेन ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रसत्त्वपराधेयत्वादियोगेन चा-

भेद इति एष सर्वभूतान्तरात्मा अन्तःप्रविष्टः शास्ता जनानाम् ।

अत्रैवंप्राप्ते नैतच्चारुतरमिति ब्रूमः प्रतिजानीमः । तरप्प्रत्ययान्तशब्दप्रयोगात्पूर्वोक्तानां पक्षाणामसन्ततुच्छत्वं सूचितं प्रतिज्ञातेऽर्थे हेतुमाहुः—स्वारस्याभावादिति । अस्वारस्यं व्यनक्ति । तथा हीत्यादिना । उक्तविशेषणलक्षणेऽन्यमंमतत्वमाहुः—सर्वपक्षसामान्यमिति । किं च विशेषणस्य व्यावर्त्यभावे साफल्यमिति प्रसिद्धे तस्य चात्राभाव इति विकल्पमुखेनाह—एवमित्यादि । तत्राद्यं दूषयति—न च तावदिति । तत्र हेतुः—असंभवादिति । असम्भवत्वमपि हेतुना द्रढयति—एकस्येत्यादि । प्रत्यक्षश्रुत्यादिप्रमाणशून्यत्वादित्यर्थः । द्वितीयं निर्मूलयति—नापीति । तच्च हेतुभ्यां दृढीकरोति—तत्त्वत्रयभिन्नपदार्थान्तराभावादिति । उपायफलविरोध्यादेरत्रैवान्तर्भावादित्यर्थः । नापि तार्किकादिवत्पदार्थान्तराभ्युपगमः शक्यते वक्तुमपसिद्धान्तापत्तेरिति तात्पर्येण द्वितीयहेतुकथनम्—अनभ्युपगमाच्चेति। ननु चेतनविशिष्टस्याचेतनविशिष्टं व्यावर्त्यं, तद्विशिष्टस्य च चेतनविशिष्टं व्यावर्त्यमतो व्यावर्त्याभावाभावान्नोक्तदोष इति चेन्न। विशिष्टस्यैकत्वाभ्युपगमात्। अन्यथा विशिष्टाद्वैतसिद्धान्तस्य भङ्गप्रसङ्गात् । अपि च चेतनाचेतनविशिष्टाभ्यामितरेतरद् व्यवच्छिद्यतेऽतस्तयोः साफल्यमिति। सत्यं नात्र विवादावकाशः, तथाऽप्युभयविशिष्टस्य व्यावर्त्याभावतादवस्थ्यमेवेति दोषान्तरमाह—अपि चेति । भेदः स्वाभाविकोऽभ्युपगम्यत एव भोक्तृभोग्यनियन्त्रात्मकविभागो निरुपाधिकः स्वरूपकृतः । एवकारोऽत्रायोगव्यवच्छेदपरः । भोक्तादिविभागो न

स्वाभाविक इति वक्तुं न शक्यत इत्यर्थः। भवद्भिरिति। स्वपक्षासम्भवमालोकयद्भिरकामैरपि। तथा च विशिष्टस्याभेदो-भोक्तृभोग्यनियन्तृणामितरेतरस्वाभाविको भेदश्च तव श्रीमुखेनैव प्रतिपाद्यते। स्वाभाविकभेदाभेदाश्रयं ब्रह्मेत्यस्मत्पक्षः सुतरां सिद्धः। विशिष्टाङ्गीकारस्तु केवलो भवतां गौरवावह एवेति भावः। स्वाभाविकभेदानङ्गीकारे दोषमाह—अन्यथेति। साङ्कर्यं च, भोक्तरि भोग्यत्वनियन्तृत्वयोः समावेशः, भोग्ये भोक्तृत्वनियन्तृत्वयोः, नियन्तरि भोक्तृत्वभोग्येत्वयोः समावेशोऽनुसन्धेयः। जीवगता गुणा ज्ञातृत्वादयो भोग्यवर्गेऽचेतनभूते ब्रह्मणि च प्राप्नुयुः, तद्गुणाः सत्त्वादयो दोषाः परिणामादयश्च जीवे ब्रह्मणि च प्राप्नुयुः, ब्रह्मधर्माः सार्वज्ञ्यनियन्तृत्वशास्त्रयोनित्वादयो जीवात्मनि भोग्यवस्तुनि चेति महादूषणकदम्बापात इति निर्गलितार्थः। किं च, "गौरवं च परित्यज्य लाघवं तु समाश्रयेदि"ति लौकिकन्यायमाश्रित्य गौरवलाघवयोर्विवेकमाह—एवं भेदमपीति। स्वाभाविकमिति भेदविशेषणमत्र योज्यम्, अन्यथाऽतिप्रसङ्गात्। अथ स्वसिद्धान्तमाह—तस्मादिति। गौरवलाघवयोर्विवेकालोचनादित्यर्थः। चेतनश्चाचेतनश्चात्मा स्वरूपं यस्य तथाभूतं यज्जगत्तेन भिन्नाभिन्नः स्वभावो यस्य तथाभूतं ब्रह्म सर्वशाखाऽर्थभूतमित्यर्थः। तदेव सूत्रकृताभिप्रेतमित्याह—तदेवात्रेति। अत्रास्मिन्नुपक्रमपठितसूत्रे। तत्रैवात्मनिष्ठार्हतां द्योतयति—तदेव हीति। श्रीबादरायणसूत्रनिर्णीतमेवौपनिषदानामुपनिषत्प्रतिपाद्यतत्त्वनिष्ठानां तत्त्वमिति सिद्धान्त इत्यर्थः। एतदुक्तं भवति। शास्त्रे तावत् सदेव सोम्येदमग्र आसीदे,कमेवाद्वितीयम्,आत्मा वा इदमेक एवाग्र आसीद्, एको ह वै नारायण आसीत्, तत्त्वमस्ययमात्मा, ब्रह्म आत्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्म,त्वं वा अहमिस्म भगवो देवते

अहं वै त्वमसि देवते, तदात्मानमेवावेदा,हं ब्रह्मास्मी,ति तदनन्य-त्वमारम्भणशब्दादिभ्य, इत्यादीनामभेदवाक्यानां",नित्यो नित्या-नां चेतनश्चेतनामेको बहूनां यो विदधाति कामान्, ज्ञाज्ञौद्वावजा-वीशनीशौ, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगा-मजोऽन्यः,जुष्टं यदा पश्यत्यन्यमीशं तन्महिमानमिति वीतशोकः, पृथगात्मानं प्रेरितारं च मत्वा, जुष्टस्तत्तस्तेनामृतत्वमेति,प्रधान-क्षेत्रज्ञपतिर्गुणेशः, अक्षरात्परतःपरः, तस्मिल्लोकाः श्रिताः सर्वे, तद्दुनात्येति कश्चन, भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः, यद्भूतयोनिं प्रवदन्ति-धीराः, एष योनिः सर्वस्य स्थावरस्य चरस्य च सर्वाल्लोकानीशते ईशिनीभिः सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्, तमीश्वराणां परमं महेश्वरं, न तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्वि-विधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च, सर्वस्य वशी सर्व-स्येशानः, विवक्षितगुणोपपत्तेश्च, सर्वधर्मोपपत्तेश्च, सर्वोपेता च, भेदव्यपदेशाच्चान्य, अधिकं तु भेदनिर्देशादि"त्यादिभेदपराणां सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिभेदनिषेधपराणां अथात आदेशो नेति नेति, अन्यत्र धर्मादन्यत्राधर्माद्, अस्थूलम-नणुइ,त्यादिनिषेधविषयकाणां" च श्रवणाद् न तेषामितरेतरबा-धकभावो वक्तुं शक्यः। तुल्यबलत्वात् तच्चोभयेषां भेदाभेदवि-षयकाणां षड्लिङ्गोपेतत्वप्रतिपादनेन पूर्वमेव साम्यं निर्णीतम्। एवं सर्वेषामपि स्वार्थे प्रामाण्यसिद्धये भिन्नाभिन्नब्रह्मसूत्रकृद्भि-र्निर्णीतं तेनाभिप्रायेण तद्घटकसूत्राणि प्रणीतवान् अंशो नानाव्यपदेशात्, अन्यथा चापि दासकितवादित्वमधीयते एके, उभयव्यपदेशात्त्वहिकुण्डलवत्,शारीरश्चोभयेऽपि हि भेदनैनमधी-यते, इत्यादीनि। अतश्चैवं वाक्यार्थः,तत्त्वमसि,सर्वं खल्विदं ब्रह्मे,-

सादिभ्यश्चिदचिदात्मनोर्ब्रह्मतादात्म्योपदेशस्य तयोर्ब्रह्मात्मकत्वेन ब्रह्मायत्तस्थितिप्रवृत्तिकत्वेन ब्रह्मव्याप्यत्वेन च स्वार्थपरत्वं समञ्जसं तत्र ब्रह्मात्मकत्व नाम ब्रह्मात्मा यस्य चेतनाचेतनवस्तुजातस्य तद्ब्रह्मात्मकं तस्य भावस्तत्वं, तेन एष मे आत्माऽन्तर्यामी एष सर्वभूतान्तरात्मा सर्वव्यापी सर्वभूतान्तरात्मा पतिं विश्वस्यात्मेश्वरम्, आत्मेति तूपगच्छन्ति ग्राहयन्ति च, अहमात्मागुडाकेश सर्वभूताशयस्थितः, क्षेत्रज्ञं चापि मां विद्धि, अहं भवो भवन्तश्च सर्वे नारायणात्मकाः, ।

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च, ॥

इत्यादिश्रुतिस्मृतिसूत्रेभ्यः सर्वात्मा स्वतन्त्रसत्ताऽऽश्रयः परब्रह्म श्रीपुरुषोत्तम इति सिद्धय ।

स्वतन्त्रसत्त्वं च आत्मतन्त्रत्वे सति स्वायत्तस्थितिप्रवृत्तिकत्वं नियन्तृत्वादिवदसाधारणधर्मविशेषस्तस्य च भगवद्ब्रह्मात्मसन्नारायणादिशब्दवाच्ये श्रीकृष्ण एवान्वयः । तस्यैव सर्वनियन्तृत्वात् नियतृत्वस्वतन्त्रसत्त्वयोः सामानाधिकरण्यनियमात्, सदेव सोम्येदमग्र आसीद्, एतदक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, भीषास्माद्वातः पवते, आत्मा हि परमस्वतन्त्रोऽधिगुणः, न तत्समश्चाभ्यधिकश्च दृश्यते, न चेशिता नैव च तस्य लिङ्गं, सकारणं कारणाधिपाधिपः, न तस्य कश्चिज्जनिता न चाधिपः, सर्वस्य चाहं हृदि मन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च, ।

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः, ॥

इत्याद्यन्वयव्यतिरेकसावधारणवाक्येभ्यः तदेव सर्वात्मत्वं

पुरस्कृत्य तद्विषयकत्वेनाभेदविषयकवाक्यजातस्य प्रवृत्तिः। एवं तस्य सर्वात्मनो भगवतः श्रीकृष्णस्यात्मीयनियम्यपरतन्त्रसत्त्वाश्रयं चिदचिद्रूपं विश्वमिति फलितम्। परतन्त्रसत्त्वं च परायत्तस्थितिप्रवृत्तिकत्वम्। तच्च नियम्यवर्गाश्रितं,तदसाधारणधर्मत्वात्। यदासीत्तदधीनमासीदि,ति तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती,त्यादिश्रवणात् ।

ससुरासुरगन्धर्वसयक्षोरगराक्षसम् ।
जगद्वशे वर्त्ततेऽदः कृष्णस्य सचराचरम् ॥

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ।

इत्यादिस्मरणाच्च। परतन्त्रसत्त्वं द्विविधं, कूटस्थविकारिभेदात् । कौटस्थ्यं नाम जन्मादिविकारशून्यत्वे सति शाश्वतत्वं, तदधिकरणं जीवक्षेत्रज्ञपुरुषादिशब्दवाच्यं चेतनवस्तु, अजो ह्येको जुषमाणो ऽनुशेते, न जायते म्रियते वा विपश्चित्,

न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतो ऽयं पुराणो-
न हन्यते हन्यमाने शरीरे ॥

इत्यादिवचनेभ्यः। विकारवत्त्वे सति नित्यत्वं द्वितीयं, तदधिकरणं चाचेतनं प्रधानमायाऽऽदिशब्दाभिधेयम्, अजामेकां लोहितशुक्लकृष्णां, गौरनाद्यन्तवती,

त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ।
अचेतना परार्था च नित्या सततविक्रिया ॥
तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवादि-

त्यादिवचनात्। तथा च परतन्त्रसत्त्वविषयकत्वेन भेद-

शास्त्रस्य प्रवृत्तिः, तयैव तेषां नैराकाङ्क्ष्यं च। एवमेव भेदानिषेधपराणां चेतनाचेतनवृत्तिस्वतन्त्रसत्त्वनिषेधविषयकत्वेन नेतिनेतीत्यादिनिषेधपराणां ब्रह्मणः सर्ववैलक्षण्यप्रतिपादनेन च तथात्वमिति निरवद्यम्। इत्थं विश्वात्मपरब्रह्मसर्वज्ञसर्वशक्तिस्वतन्त्रसत्त्वावच्छिन्नतत्पदार्थाभिन्नतदात्मकपरतन्त्रसत्ताऽऽश्रयचेतनत्वंपदार्थावच्छिन्नसर्वान्तरात्मा वासुदेवस्त्वंपदार्थोऽसीति वाक्यार्थः। स च शक्यत्वान्मुख्य एव, ब्रह्मणः सर्वात्मत्वेन स्वतन्त्रसत्त्वाश्रयत्वेन च सर्वशब्दवाच्यत्वात्।

ननु परब्रह्मणः श्रीपुरुषोत्तमस्य नारायणादिपदार्थस्य सर्वात्मनस्तत्पदार्थत्वे न कश्चिद्विवादावकाशः, श्रौतत्वात्। परं तु जीवान्तर्यामिणस्त्वंपदार्थत्वं कथमिति वक्तव्यं, त्वंपदस्य जीवविषयकत्वातिप्रसिद्धत्वादिति चेन्न। विश्वात्मत्वेन सर्वशब्दवाच्यत्वादेवेति ब्रूमः। यथाऽग्नेर्ढगित्यत्राग्निशब्दोऽकारगकाराद्यवच्छिन्नानुपूर्वीकाग्निशब्दपरः, अग्नौ जुहोतीत्यत्र च स एवाग्निशब्दो दहनप्रकाशनादिधर्मावच्छिन्नपदार्थोपस्थापनपरः। एवमुभयार्थप्रतिपादकत्वं शक्यत्वात्तयोर्मुख्यमेवेति शाब्दिकानां राद्धान्तः। तथैवात्रापि सर्वेषां चेतनाचेतनवस्तुजातवाचकानां तत्तत्पदार्थवाचकत्वेऽपि तत्पदार्थान्तरात्मभूतब्रह्मपरत्वमविरुद्धं, सर्वात्मत्वात्। यथा चतुर्मुखादिशरीराणि तत्तदवच्छिन्नाः तत्तच्चेतयितारश्च चतुर्मुखादिशब्दवाच्यास्तेषां शक्या एव तैरभिधीयन्ते स्वशक्तिभिरेव, तथैव तेषां चतुर्मुखादिपिण्डतत्तदवच्छिन्नक्षेत्रज्ञाभिधानपरत्वेऽपि तस्य तत्तदन्तरात्मत्वाद् ब्रह्माभिधानपरत्वं प्रधानमेवेति सुशकं वक्तुमिति भावः। एतदभिप्रायमाश्रित्य वस्तुजातस्य ब्रह्मतादात्म्यमुद्घोषयन्ति श्रुतयः, ऐतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म, भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं

त्रिविधं ब्रह्ममेतत्, नारायणः परो ध्याता ध्यानं नारायणः परः इत्याद्याः ।

ननु पूर्वदृष्टान्तोक्ताग्निशब्दस्योभयाभिधानपरत्वं पाणिन्यादिस्मृतिविधेयत्वाद् उक्तार्थे प्रमाणत्वं सुशकं, न तथोक्तार्थः प्रमाणपदवीमारोहति, प्रमाणशून्यत्वात् । न चोक्तोपमानमेवात्र प्रमाणमिति वाच्यम्। अश्रौतस्योपमानस्यातिदुर्बलत्वादिति चेन्न । नामानि सर्वाणि यमाविशन्ति, सर्वे वेदा यत्पदमामनन्ति, नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती,त्यादिशास्त्रस्यैवात्र प्रमाणत्वात् । तत्सिद्धं भगवतः सर्वात्मत्वेन, विश्वस्य च तदात्मकत्वेन तत्तादात्म्योपदेशार्हत्वमिति। तथा चोक्तं श्रीभगवद्भिराद्याचार्य्यचरणैः–

सर्वं हि विज्ञानमतो यथार्थकं
श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः ।
ब्रह्मात्मकत्वादिति वेदविन्मतं
त्रिरूपताऽपि श्रुतिसूत्रसाधितेति ॥

एष श्लोको वेदान्तरत्नमञ्जूषायां निपुणं व्याख्यातः श्रीपुरुषोत्तमाचार्यचरणै,र्विस्तरभिया नात्र व्याख्यायते । किं च ब्रह्मायत्तस्थितिप्रवृत्तिकत्वेनापि जगतो ब्रह्मतादात्म्योपदेशः सुशकः। यद्यदायत्तस्थितिप्रवृत्तिकं तत्तदभेदव्यपदेशार्हमिति व्याप्तिमामनन्तिच्छन्दोगाः प्राणसंवादे, न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते, प्राण एवैतानि सर्वाणि भवतीत्यादिना । ब्रह्मव्याप्यत्वेनापि वस्तुजातस्य ब्रह्मतादात्म्यं सुघटितमेव ।

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

द्यावा पृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वा इति शास्त्रवचनात् ।

योऽयं तवागतो देव ! समीपं देवतागणः ।
स त्त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥

सर्वं समाप्नोषि ततोऽसि सर्व इतिघटकस्मृत्या व्याप्यस्य व्यापकाभिन्नत्वनिर्देशार्हत्वं प्रतिपादितम् ।

इत्थं सामान्येनोक्तं तत्त्वं श्रुत्वा; विशेषतो वाक्यार्थं श्रोतुकामा निर्णीतार्थं शङ्कामुद्भावयन्ति—नन्वित्यादिना ।

यथा ब्रह्मणो गुणाः स्वाभाविकाश्च श्रूयन्ते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिना, तथा जीवगतदोषा ब्रह्मण्येव स्वाभाविकाः स्युस्तयोरेकत्वादित्यर्थः। उक्तदोषं परिहरन्समाधत्ते—नेति । नोक्तशङ्काऽवकाश इति प्रतिजानाति। प्रतिज्ञातार्थे हेतुमाह—स्वरूपत इत्यादि । स्यादेतद्यदि जीवेशस्वरूपैक्याङ्गीकारो, न तु सोऽस्ति, अपि तु तद्विलक्षणमेवेत्याशयेन व्यञ्जन् वाक्यार्थमाह—तथा हीत्यादिना । प्रतिज्ञातं विवृणोति—ब्रह्मण इत्यादि । उक्तार्थे हेतुमाह—इतरेतरेति । तत्र चेतनः स्वरूपेण परिच्छिन्नः, अणुपरिमाणकत्वात् । अचेतनोऽपि तथैव स्थूलाद्यनेकरूपवत्त्वाद् । ब्रह्म तूभयविलक्षणं त्रिविधपरिच्छेदशून्यत्वात् । तच्चोक्तं पूर्वमेवानन्तपदव्याख्याने तदेवात्र श्रुतिमुखेन द्रढयति—अस्थूलेति । स्थूलादिविलक्षणमित्यर्थः । श्रुत्युक्तवैलक्षण्यं विभजते तत्रेति । तत्र तेषु त्रिषु मध्ये । ब्रह्मणस्तयोरिति । तत्पदार्थस्य भोक्तृभोग्यवृत्त्यणुत्वस्थूलत्वधर्मावच्छिन्नपरिमाणाधिकरणयोश्चेतनाचेतनयोरित्यर्थः । एतेन भोक्तृभोग्यनियन्तृवृत्तिस्वाभाविकभेदनिरूपणेन चेतनानामपीतरेतरभेदोऽर्थात्सिद्धो भवति "अजो-ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति श्रुतेः।

एवं भेदप्रकारो निरूपितः। इदानीमभेदप्रकारमाह–एवमेवेति। एवमेवाभेद इत्यन्वयः। यथा स्वाभाविको भेदस्तथैवाभेद इत्यर्थः। तमेवाभेद दर्शयति–तस्येत्यादिना। तस्य सर्वात्मत्वादियोगेन तयोश्च ब्रह्मात्मकत्वादियोगेनेति क्रमेणान्वयः। तत्र शास्त्रं प्रमाणयति–एष सर्वभूतान्तरात्मेत्यादि। एतानि च क्रमतः सर्वात्मत्वादिविशेषणेषु प्रमाणतया योज्यानि, तान्येव च व्यतिरेकमुखेन ब्रह्मात्मकत्वादिविशेषणेष्वपि प्रमाणत्वेनानुसन्धेयानि।

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥

आत्मा हि परमः स्वतन्त्रोऽधिगुणः, तस्मिंल्लोकाः श्रिताः सर्वे, इत्यादिश्रुतिभ्यः। यद्यदात्मकं यन्नियम्यं यद्व्याप्यं यत्तन्त्रसत्ताकं यदाधेयं च तत्तदभिन्नत्वनिर्देशार्हं पृथिवीघटादिवद्, अग्निधूमवत्, प्राणेन्द्रियवद्, भूतभौतिकवच्च। किं च। यथा घटो द्रव्यं पृथिवी द्रव्यमित्यत्र द्रव्यत्वावच्छिन्नस्य घटत्वावच्छिन्नपृथिवीत्वावच्छिन्नयोश्च सामानाधिकरण्यं मुख्यं, विशेषस्य सामान्याभिन्नत्वनियमात्। तथैव सार्वज्ञाद्यनन्तगुणावच्छिन्नस्यापरिच्छिन्नशक्तिवैभवस्य ब्रह्मणः स्वात्मकचेतनाचेतनवस्त्ववच्छिन्नतदन्तरात्माभिन्नत्वमपि सुव्यक्तम्। एतदर्थकानि तत्त्वमस्यादिवाक्यानी-

ति तात्पर्यार्थः । तस्मात्स्वभावतोऽपास्तसमस्त-दोषोऽनन्ताचिन्त्यविचित्रयावदात्मवृत्तिस्वाभावि-ककल्याणगुणशक्तिवैभवाश्रयो जगज्जन्मादिहे-तुराखिलशास्त्रैकवेद्यो मुक्तप्राप्यः परब्रह्मभगवदा-दिशब्दाभिधेयश्चिदचित्पदार्थभिन्नाभिन्नसम्बन्धा-श्रयः श्रीपुरुषोत्तमो रमानिवासोऽत्र जिज्ञास्यो मुमुक्षुभिरिति निर्गलितोऽर्थः ।

एवमुक्तसिद्धान्ते तत्पदार्थो निरूपितः ।

तत्रैव व्याप्तिं दर्शयन्ननुमानमाह—यद्यदात्मकमित्यादि । तथा हि । जग, ब्रह्माभिन्नं भवितुमर्हति, तदात्मकत्वाद्, यो यदात्मकः स तदभिन्नो दृष्टो यथा मृदात्मको घटो मृदभिन्ननिर्देशार्हस्तद्वत् । तन्नियम्यत्वाद् । यो यन्नियम्यः स तदभिन्ननिर्देशार्हः यथा जीव-नियम्यं शरीरं जीवाभिन्नं प्रतीयते तद्वत् । तद्व्याप्यत्वाद्, यो यद्व्या-प्यः स तदभिन्ननिर्देशार्हः, यथा वन्हिव्याप्यो धूमस्तदभिन्नस्तद्वत् । तदधीनत्वाद्, यद्यदधीनं तत्तदभिन्ननिर्देशार्हं यथा प्राणायत्त इ-न्द्रियगणस्तदभिन्ननिर्देशार्हस्तद्वत् । तदाधेयत्वाद्, यो यदाधेयः स तदभिन्ननिर्देशार्हः यथा भौतिकं स्वकारणरूपाधिकरणमहाभूता-भिन्ननिर्देशार्हं तद्वदित्यादि । अत्राभिन्नत्वं च पृथक्स्थितिप्रवृत्त्य-योग्यत्वं विवक्षितं, तथा च नोक्तार्थे व्यभिचारशङ्केत्यर्थः । एवं सा-मान्येनाभेदप्रकार उक्तः । इदानीं स्वस्य हार्दं दर्शयन्नाह-किं चेति । घटो द्रव्यमित्यत्र घटस्य द्रव्यतादात्म्यं शक्यत्वान्मुख्यमेव घट-त्वावच्छिन्नस्य द्रव्यत्वावच्छिन्नं विना पृथक्स्थितिप्रवृत्त्यनर्हत्वाद्, द्रव्यात्मकत्वात् । एवं विश्वं ब्रह्मेत्यत्रापि चेतनाचेतनरूपविश्वस्य

ब्रह्मतादात्म्योपदेशो मुख्य एव शक्यत्वसाम्यात्। ब्रह्मविरहेण विश्वस्य पृथगवस्थानप्रवर्त्तनार्हत्वायोगाद् ब्रह्मात्मकत्वादिति भावः। विशदार्थत्वाद्व्याख्यातप्रायोऽयं ग्रन्थः। अपरिच्छिन्नेति। अपरिच्छिन्नौ शक्तिवैभवौ यस्य। स्वात्मकेति। स्वं ब्रह्मैवात्मा यस्य तत्स्वात्मकं च तच्चेतनाचेतनवस्तु च तदवच्छिन्नश्चेतनाचेतनान्तरात्मन्तर्यामी तदभिन्नत्वमित्यर्थः। एतदर्थकानीति। एष उक्तार्थस्तादात्म्यप्रकारो येषां तानि तत्त्वमस्यादिवाक्यानीत्यादिपदेन ऐतदात्म्यमिदं सर्वम्, अयमात्मा ब्रह्म, आत्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्म, त्वं वा अहमस्मि भगवदेवते, अहं वै त्वमसि देवते तदात्मानमेवावेदाहं, ब्रह्मास्मी,ति।

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
क्षेत्रज्ञं चापि मां सिद्धि सदसच्चाहमर्ज्जुनः॥

मत्तः सर्वमहं सर्वं मयि सर्वं सनातने—
त्यादीनां श्रुतिस्मृतीनां संग्रहः।

उपसंहरति—तस्मात्सर्वभावतइत्यादिना। स्वत एवापास्ता निरस्ताः समस्तदोषाः क्लेशकर्मविपाकादयो यस्मात्स तथा। तत्र क्लेशः पञ्चविधः, अविद्याऽऽदिभेदात्। कर्म द्विविधम्, पुण्यापुण्यभेदात्। द्विविधमपि प्रकारान्तरेण त्रिविधं, सञ्चितक्रियमाणप्रारब्धभेदात्। विपाकस्तु सुखदुःखात्मकस्वर्गनरकादिभेदादनेकविध इति बोध्यम्। तत्र हेतुमाह—अनन्तेत्यादि। वक्ष्यमाणलक्षणलक्षितजगत्कारणत्वयोगं विधत्ते—जगज्जन्मादिहेतुरिति। उक्तार्थे प्रमाणमाह। अखिलशास्त्रैकवेद्य इति। तस्यैव फलरूपतां दर्शयन् विशिनष्टि—मुक्तप्राप्य इति। तस्य सर्वशास्त्रवाच्यत्वं व्यञ्जनाह—परब्रह्मेत्यादि। औपनिषदार्थं संगृह्णन् विशिनष्टि-चिदचिदित्यादि। तस्यैव सर्वोत्कृ-

ष्टत्वं दर्शयन्नाह–पुरुषोत्तम इति। विशेष्यं दर्शयति–रमानिवासेति। अत्रास्मिञ्च्छास्त्रे जिज्ञास्यो जिज्ञासासूत्रोक्तेष्यमाणज्ञानस्य विषय इति तत्पदार्थो वेदमातृमन्त्राभिहितदेवपदवाच्य इति यावत्। इदानीमुक्तवाक्यार्थमनूद्य पदार्थान् व्याख्यास्यन्नाह–एवमित्यादिना।

वक्ष्यमाणमुपक्रमते–अथ प्रसङ्गादिति।

अथ प्रसङ्गात् त्वंपदार्थादिचिदचित्स्वरूपं निरूप्यते। तत्र देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणो ज्ञानस्वरूपो ज्ञाताऽहमर्थरूपः परमेश्वरायत्तस्वरूपस्थितिप्रवृत्तिकोऽणुपरिमाणकः प्रतिशरीरभिन्नोऽनन्तव्यक्तिर्बन्धमोक्षार्हश्चेतनपदार्थः। तथा चोक्तं भगवद्भिराद्याचार्यचरणैः।

ज्ञानस्वरूपं च हरेरधीनं
शरीरसंयोगवियोगयोग्यम्।
अणुं हि जीवं प्रतिदेहभिन्नं–
ज्ञातृत्ववन्तं यदनन्तमाहु–

रित्यादिना। व्याख्यातश्चायं श्लोकः श्रीपुरुषोत्तमाचार्यचरणैर्वेदान्तरत्नमञ्जूषायां तत्रैव द्रष्टव्यम्। तथा च श्रुतयो न्यायाश्च, तस्माद्वा एतस्मान्मनोमयादन्योऽन्तरात्मा विज्ञानमय इति। यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन

एवं य आत्माऽनन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एवा,त्रायं पुरुषः स्वयंज्योतिर्भवति, अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा, अथ योऽयं वेद जिघ्राणीति स आत्मा, कतम आत्मा योऽयं विज्ञानमयः प्राणः सुहृदन्तर्ज्योतिः पुरुष एव द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा विज्ञानात्मा पुरुषः, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वाद्, न हि श्रोतुः श्रुतेः, न हि मन्तुर्मतेः, न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वाद्, विज्ञातारमरे केन विजानीयाद्, जानात्येवायं पुरुषः, न पश्यो मृत्युं पश्यति न रोगं नो तद्दुःखतां स उत्तमः पुरुषो नोपजनं स्मरन्निदं शरीरम्, एवमेव परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति ज्ञोऽत एव कर्ता शास्त्रार्थत्वाद्, अहं वै त्वमसि देवते, सोऽहं ब्रह्मास्मीति, मृत्युमृत्युं नमाम्यहं, तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति, एष एव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, स एवासाधुकर्म कारयति तं यमेभ्यो लोकेभ्योऽधो नि-

नीषते, स कारयेत्पुण्यमथापि पापं, न तावता दोषवानीशिताऽपि जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः, अणुर्ह्येष आत्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा शं विवेश अणुर्ह्येष आत्माऽयं वा एते सि नीताः पुण्यं पापं,

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्ताय कल्पते ॥

बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः ।

उत्क्रान्तिगत्यागतीनां नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्, तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवत्, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, अंशो नानाव्यपदेशात्, अस्ति खल्वन्योऽपरो भूतात्मा योऽयं सितासितैः कर्मफलैरविभूयमानः सदसद्योनिना यस्य संमूढत्वादात्मस्थम्प्रभुं भगवन्तं कारयितारं नापश्यद् गुणै रूप्यमाणः कलुषीकृतश्चेति, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, निरञ्जनः परमं साम्यमुपैति, न स पुनरावर्त्तते, अनावृत्तिः श्रवणादित्याद्याः ।

तत्रेति। तयोश्चेतनाचेतनयोर्मध्ये। अत्र भूतचतुष्टयमेवात्मेति लोकायतिका आहुः। तस्य घटौदनादावतिव्याप्तत्वेन दुष्टत्वाद् देह एव आत्मेति चार्वाकाः। देहे मृते चैतन्यादर्शनाद् देहातिरिक्तस्तत्परिमाणकश्चेतन इति दिगम्बराः। तस्य प्रत्यक्षप्रमाणागोचरत्वात् सत्त्वेपीन्द्रियैर्विना रूपादिविषयज्ञानासिद्धेरिन्द्रियाण्येवात्मतत्त्वमित्येके तदनुयायिनः। सुषुप्तौ तेषां देहवल्लयदर्शनाद् य एवाहं रूपमद्राक्षं स एवाहं शब्दं शृणोमि गन्धं जिघ्रामीत्यादिप्रत्यभिज्ञाबाधाद् रूपाद्यनुभवस्य यौगपद्योपपतेः तत्क्रमभङ्गाच्चेत्यादिहेतुभिर्नेन्द्रियाणामात्मत्वं, किं तु चक्षुरादिनियामकं शरीराश्रयं मन एवात्मेति केचित्। क्षणिकविज्ञानव्यतिरिक्तवस्त्वन्तराभावाद् क्षणिकविज्ञानमेव चेतन आत्मेति योगाचाराः। ज्ञानाकारानुमेयः क्षणिकबाह्यार्थ एव तत्त्वमिति सौत्रान्तिकाः। क्षणिकबाह्यार्थ एवात्मेति वैभाषिकाः। क्षणत्रयेऽपि स एवायमित्यादिप्रत्यभिज्ञाऽसम्भवात् सुषुप्तौ तेषामभावदर्शनाच्चासम्भवः। न च प्रत्यभिज्ञाया ज्वालाया इव संततविज्ञानोदयसादृश्यादुपपत्तिरिति वाच्यम्। सुषुप्तौ विज्ञानवत्तत्प्रवाहस्याप्यभावात्। तत्र तत्प्रवाहस्य भावाभ्युपगमे विषयावभासप्रसक्तेः निरन्तरनिरालम्बनज्ञानासम्भवात्तस्माच्छून्यमेवात्मतत्त्वमिति माध्यमिकाः। तदेतत्सर्वं व्यवहारलोपप्रसङ्गादित्यादिविवादबाहुल्यस्य तन्त्रान्तरसिद्धत्वान्नात्र विस्तरापेक्षा, किं तु ग्रन्थकृदभिप्रायद्योतनार्थमनुवादत उदिष्ट इति। एतदभिप्रायेणाह—देहेन्द्रियमनोबुद्धिप्राणादिविलक्षण इति। तथा च प्रयोगाः-भूतचतुष्टयं नात्मा कार्यत्वाद् घटादिवद्। देहो नात्मा भौतिकत्वाद् घटवत्। इन्द्रियाण्यात्मा न भवन्ति करणत्वाद्वास्यादिवत्। मन आत्मा न

भवति करणत्वादिन्द्रियवत् । बुद्धिरात्मा न भवति अन्तःकरणत्वान्मनोवद्, जन्यत्वाद् देहादिवच्च । प्राण आत्मा न भवति वायुत्वाद् व्यजनजन्यवायुवदित्यादयः। आदिशब्दः पूर्वोक्तपक्षसंग्रहार्थः । पूर्वोक्तपक्षविलक्षण इति यावत्। किं च, देहेन्द्रियादिविलक्षणस्य ज्ञानेच्छाऽऽदिचतुर्दशगुणाश्रयस्य विभुपरिमाणकद्रव्यविशेषस्य तार्किकैरप्यात्मत्वेनाभ्युपगमात्तत्राऽतिव्याप्तिवारणायाह-ज्ञानस्वरूप इति । ज्ञानं चैतन्यं स्वरूपमस्येति तथा सः। ज्ञानस्वरूपनित्यशुद्धमुक्तसत्तामात्रैकाद्वितीयसजातीयादिभेदशून्यसर्वविशेषविनिर्मुक्तं ब्रह्मैव जीवात्मत्वेनाभ्युपगच्छतां प्रच्छन्नबाह्यानां मायावादिनां पक्षेऽतिप्रसक्तिं वारयति—ज्ञानेति । ज्ञानाश्रय इत्यर्थः । ज्ञानत्वे सति ज्ञानाश्रयत्वमिति जीवेश्वरसाधारणलक्षणं बोध्यम् । एतेनैव निरञ्जनः परमं साम्यमुपैति, मम साधर्म्यमागताः, पूता मद्भावमागता, इत्यादिवाक्यानि व्याख्यातानि भवन्ति, उभयत्रोक्तलक्षणसमन्वयात् ।

ननु ज्ञानस्वरूपस्य स्वप्रकाशस्यात्मनो ज्ञानाश्रयत्वं कथं ज्ञानत्वाविशेषाद्,न हि जले जलं भिन्नमवतिष्ठते,ज्योतिषि ज्योतिर्वा ऽतो बुद्धिवृत्तिप्रतिबिम्बितस्य चेतनस्वरूपस्य ज्ञानत्वोपचार इति चेन्न। न हि धर्मिधर्मयोरत्यन्तसाजात्यमभेदे नियामकं, किं तु भेदाग्रहमात्रमेव,तयोर्ज्ञानत्वाविशेषेऽपि धर्मित्वधर्मत्वावच्छेदेन विजातीयत्वाद् दृष्टान्तासिद्धिः, द्युमणितत्प्रभावयोस्तेजस्त्वसाम्येऽपि द्युमणित्वप्रभावत्वावच्छिन्नतया धर्मिधर्म्मभावस्य दृष्टचरत्वान्नानुपपत्तिः । वस्तुतस्तु जले ज्योतिषि चात्यन्तसाजात्येन भेदाग्रहेऽपि भेदस्य सत्त्वमेव, सावयवद्रव्यत्वेनानुमानाद् । अन्यथा घटादौ पार्थिवावयवानामप्यभेदः कथं न वक्तुं शक्यते त्वया। तथाऽत्र प्रयोगः—जले निक्षिप्तं जलं भिन्नमेव सावयवद्रव्यत्वात् पार्थिवरजःसमुदाये नि-

क्षिप्तपार्थिवरजोवत्, तिलराशौ निक्षिप्ततिलान्तरवच्च। किं च, न हि बुद्धिवृत्तिप्रतिबिम्बिते चेतने ज्ञानत्वोपचाराभ्युपगमे ज्ञानजन्यत्वव्यवहारः सम्भवति, तथात्वे च सूर्यप्रतिबिम्बेनापि सूर्यप्रकाश्यभूतदेशीयतमःशीतयोर्निवृत्तिः स्यान्न च दृष्टचरा युक्ता वा, किं चास्तां बुद्धिवृत्तिप्रतिबिम्बितचेतनस्य ज्ञानत्वव्यवहारः,प्रतिबिम्बस्यैवासिद्धत्वादुभयोश्चेतनवृत्त्योर्बिम्बोपाध्योर्निरवयवत्वान्नीरूपत्वाच्च, निरवयवस्य नीरूपस्य तथाभूतस्यापि प्रतिबिम्बभावाभ्युगमे रूपरसादीनामपि शब्दादौ कालादौ च, कालादीनामपि रसादौ प्रतिबिम्बत्वापत्तेः। एतेनैव ब्रह्मप्रतिबिम्ब एव जीव इति पक्षोऽप्यपास्तः, तुल्यदोषवत्त्वात् ब्रह्मभूतबिम्बस्याविद्यारूपोपाधेश्च निरवयवत्वादिसाम्यात्।

ननु नीरूपनिरवयवस्यापि रूपस्य गगनादेश्च प्रतिबिम्बदर्शनान्नोक्त विरोध इति चेन्न। सावयवद्रव्याश्रितस्यैव रूपस्य सूर्यनक्षत्रादिप्रभायुक्तस्यैव चाकाशस्य तथात्वदर्शनात् पूर्वोक्तदोषस्य तादवस्थ्यमेव। किं च बिम्बरूपस्य गगनादेः कथं चिन्नीरूपत्वनिरवयत्वयोः सतोरपि जलादिरूपस्योपाधेः सावयवत्वादेः सत्त्वान्नोक्तानुपपत्तेरुद्धारः।

वस्तुतस्तु गगनं रूप्येव पञ्चीकृतद्रव्यत्वात् पृथिव्यादिवत्। अत एव सावयवत्वपरिच्छिन्नत्वयोरपि तत्र सत्त्वान्न प्रतिबिम्बरूपत्वानुपपत्तिः। एतेनैवाकाशे नीलत्वादिप्रत्ययो भ्रम इत्यपि निरस्तः। रूपादेस्तत्र सत्त्वेन भ्रमत्वकल्पनायास्तुच्छत्वात्। न च

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवदि—

त्यादिप्रतिबिम्बप्रतिपादकश्रुतिबाध इति शङ्कनीयम्। तस्या

अन्तर्यामिनिर्लेपत्वस्वतन्त्रत्वप्रतिपादनेन नैराकाङ्क्ष्यात् । व्याख्याता चैषा श्रुतिः सिद्धान्तरत्नमञ्जूषां श्रीपुरुषोत्तमाचार्यचरणैः । वक्ष्यते चोपमा सूर्यकाशादिवदित्यस्मिन्नधिकरणे ।

ननु स्यादेतदविद्याब्रह्मणोरुपाधिबिम्बयोर्निरवयवत्वादिना प्रतिबिम्बानुपपत्तिः।किं त्वविद्याऽवच्छिन्नमन्तःकरणावच्छिन्नं वा ब्रह्म जीवात्मशब्दाभिधेयं, यथा घटावच्छिन्नाकाशस्य मठाकाशेनाभेदस्तस्य चानवच्छिन्नेन महाकाशेनाभेदस्तथाऽन्तःकरणावच्छिन्नस्य व्यष्टिरूपजीवस्याविद्याऽवच्छिन्नेन समष्टिरूपेणाभेदस्तस्य हि शुद्धेन नित्यमुक्तेनानवच्छिन्नेन ब्रह्मणाऽभेदोऽविद्याकल्पितोपाधिकृद्भेदश्चेति चेन्न ।

विकल्पासहिष्णुतया तुच्छतरत्वात्। तथा हि। अविद्यारूपोऽन्तःकरणाख्यो वोपाधिः शुद्धबुद्धनित्यमुक्तनिर्विशेषस्वरूपं चेतनं ब्रह्म कुठारः काष्ठानीव च्छित्वाऽवच्छिनत्ति, यथाऽवस्थितस्य सर्वगतस्यैवैकदेशे स्थित्वा तद्देशमात्रं वेति विचेचनीयम्। नाद्यः,सर्वगतस्य निरवयवनिर्विशेषवस्तुनश्छेदनक्रियाफलाश्रयत्वापत्त्यनर्हत्वात्। निष्कलं निष्क्रियं शान्तमिति श्रुतेः। प्रत्यगात्मनोऽजत्वानादित्वादिभङ्गात्तद्विषयकशास्त्रबाधाच्च । द्वितीयेऽप्युपाधेः सर्वगतत्वमभीष्टं परिच्छिन्नत्वं वेति वक्तव्यम्। प्रथमे उत्क्रान्तिगत्याद्यनुपपत्तेस्तद्विषयकश्रुतिव्याकोपाच्च । किं च ब्रह्मवदुपाधेरपि विभुत्वेन सर्वस्यापि चेतनस्यावृतत्त्वेन शुद्धस्य मुक्तप्राप्यस्याभावप्रसङ्गात् प्रकाशकाभावाज्जगदान्ध्यापत्तेः मुक्तिप्रतिपादकशास्त्रव्याकोपाच्च । चरमे, उत्क्रान्त्यादिव्यवस्थासिद्धावपि उपाधौ गच्छति सति ब्रह्मणो विभोर्गमनानर्हत्वेन पूर्वदेशावच्छिन्नचेतनस्य क्षेत्रज्ञाख्यस्याकस्मान्निर्हेतुको मोक्षः, तथैव शुद्धस्य नित्यमुक्तस्य चेतनप्रदेशविशेषस्याकस्माद्बन्धश्चेति पदे पदे बन्धमोक्षौ स्यातां कृतना-

शाकृताभ्यागमप्रसङ्गाच्चेति पूर्वमेवोक्तम् औपाधिकभेदाभेदखण्डनप्रकरणे। स चाहमर्थाभिन्न इत्याह-अहमर्थरूप इति। अहमर्थ एव रूपं स्वरूपं यस्य स, अहं जानामीच्छामिकरोमीत्यादिप्रत्ययेभ्यः।

ननु स्यादेतदस्मदर्थस्यात्मत्वं यदि सर्वावस्थाऽनुगतत्वमिति, तदेव तु न तस्य सुषुप्त्यादौ व्यभिचारदर्शनाद् अतः प्रकृतिकार्यरूप एवायमहं जानामीत्यादिप्रतीतिविषयोऽहमर्थः, "अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधेति भगवदुक्तेरि"ति चेन्न।

उक्तहेतोः स्वरूपासिद्धत्वेन हेत्वभावरूपत्वाद्। तथा हि। सुषुप्त्यादावहमर्थस्यावगमो मानसिद्धः, एतावन्तं कालं सुखमहमस्वाप्स्सं न किंचिदवेदिषम्, एतावन्तं कालं मूर्छित एवासमित्यादिप्रत्यभिज्ञाया एव मानत्वाद्। तस्मात्सुषुप्त्यादावपि सुखाज्ञानविषयकज्ञानाश्रयाभिन्नोऽहमर्थोऽनुगत एव विशेषविषयाभावेन विशेषविषयकप्रत्यक्षस्यानुत्थानाद्।

नन्वेतावन्तं कालं मामप्यहं नावेदिषमिति प्रत्यभिज्ञानस्यास्मदर्थाभावविषयकस्यापन्होतुमशक्यत्वाद् व्यभिचारस्य तादवस्थ्याद्धेत्वसिद्धिरिति चेन्न।

भवदुक्तप्रत्यभिज्ञानेऽपि तस्यानुगतत्वेन सत्त्वात् तत्र मामिति कर्मभूतद्वितीयाऽन्तस्यास्मदर्थस्यजाग्रदाद्यवस्थाऽनुभूतानादिकर्मसंस्कारनिरूपितात्मत्वाभिमतदेहादियुक्तो विषयः, अहमित्यस्य प्रथमाऽन्तस्य कर्तुरस्मदर्थस्य देहेन्द्रियभिन्नशुद्धभगवदात्मकप्रत्ययरूपदार्थो ज्ञाता विषयः,तथा च मामितिजाग्रदवस्थाऽनुभूतस्य देहादियुक्तस्यात्मत्वेनाभिमतस्य तत्राभावान्निषेधविषयत्वं सूपपन्नं, तथैव चाहमितिदेहादिविलक्षणस्य शुद्धास्मदर्थस्य तत्र सत्त्वेन विशिष्टाभावविषयकानुभवाश्रयस्य तत्रापि सत्त्वात्तस्य ज्ञातृतया भानमपि सूपपन्नतरम्। एवमहमर्थस्य सर्वावस्थाऽनुगत-

त्वाद् अनुभवस्मृत्योरेकाधिकरणनियमाच्च उक्तहेतोरसिद्धितादवस्थ्यमेव,अन्यथा एतावन्तं कालं नाहमासम् इदानीं जातोऽहम्। एतावन्तं कालं नाहमभवं किं तु किं चिन्मद्विलक्षणानुभूतिमात्रमासीदिदानीं तदन्योऽहमस्मीत्यादिप्रत्यभिज्ञानं स्यात्,तस्य तु कुत्राप्यदृष्टश्रुतत्वाद् अनुपपन्नत्वाच्च। तस्मादुक्तप्रत्ययप्रमाणसिद्धज्ञात्रभिन्नाहमर्थ एवात्मतत्त्वमिति सिद्धम्। किं च सर्वश्रुतिमूलभूतस्य सर्वमन्त्रशिरोमणिरूपस्याप्यस्मच्छब्दप्रयोगदर्शनाद् गायत्र्याख्यस्य मन्त्रस्याप्ययमेवार्थः। ज्ञात्रभिन्नास्मदर्थ एवात्मेति यावत्।

ननु आत्मबुद्धोरन्योन्याध्यासाभिप्रायकोऽयमस्मत्प्रयोगो-नात्मस्वरूप इति चेन्न।

धीशब्दस्य पृथक्प्रयुक्तत्वाद् यो देवो नो धियः प्रचोदयादित्र यो देवपदार्थः सार्वज्ञ्याद्यनन्ताचिन्त्ययावदात्मवृत्तिस्वाभाविकगुणशक्तिवैभवाश्रयः परमेश्वरो विश्वात्मा स नोऽस्मदर्थभूतानां जीवात्मनां सम्बन्धिधीर्बुद्धिर्विषयप्रवणा तस्या धिय इति कर्मणि षष्ठी,धियमित्यर्थः। यद्वा द्वितीयाऽन्तबहुवचनमिदं बोध्यम्। तथा च या विषयप्रवणाः ताः प्रचोदयात् स्वविषयिका ब्रह्मस्वरूपविषयिकाः कुर्यादिति ब्रह्मणो नियन्तृत्वेन स्वतन्त्रसत्त्वयोगोऽस्मदर्थभूतानां च प्रत्यगात्मनां धीशब्दोपलक्षितः चेतनवर्गस्य च नियम्यत्वेन परतन्त्रसत्तायोगश्च स्पष्टं मन्त्रित इति यावत्। किं च गायत्र्याख्यमन्त्रदेवता सर्वज्ञा न वेति विचनीयम्। सर्वज्ञत्वे तयाऽस्मच्छब्दोयस्यात्मपरत्वेन प्रयोक्तुं न घट्यते अध्यस्तविषयकत्वात्तस्या।अन्यथा मातापित्रादेरपि वत्सलतरस्यास्तस्या एवमध्यस्तात्मोपदेशे सर्ववञ्चकतयाऽनाप्तत्वापत्तेः। द्वितीयेऽज्ञत्वादेवाप्रमाणकत्वापत्तेः। तथात्वे च तन्मूलकस्य सर्वस्यापि वेदस्याप्रामाण्यतरत्वापत्तेश्च तथा च बाह्यमताविशेषापत्तेश्च। किं चास्तां तावदहमर्थस्य सुषु-

प्यादौ व्यभिचारशङ्का मोक्षावस्थायामपि तस्यानुगतत्वनात्मस्वरूपत्वनिश्चयात्। तथा हि। विश्वलयात्मके महाप्रलयेऽवशिष्टस्यैकाद्वितीयस्य ब्रह्मणो नित्यमुक्तत्वं तावन्निर्विवादं, तथा च तस्यापि ज्ञात्रभिन्नाहमर्थस्वरूपत्वं प्रतिपादयन्त्यस्तत्साम्यापन्नानां मुक्तानां जीवानामपि तथात्वं निश्चिन्वन्ति श्रुतयः, ब्रह्मैवेदमग्र आसी,त्स चात्मानं वेदा,हं ब्रह्मास्मीति,बहु स्यां प्रजायेय, नामरूपे व्याकरवाणि, त्रिवृतं करवाणी,त्यादयः। न केवलमुपमानश्रुतिरत्र प्रमाणं, किं तु मुक्तानां वामदेवादीनामनुभवश्रवणमपि तद्धयैतत् पश्य ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति। किं च "वेदाहं समतीतानि वर्त्तमानानि चार्ज्जुने"त्यस्मदर्थस्यैव सर्वज्ञत्वयोगः।"अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा""मत्तः सर्वं प्रवर्तत" इति तस्यैव जगज्जन्मादिकारणब्रह्मलक्षणलक्षितत्वम्। "इति मत्वा भजन्ते मां बुधा भावसमन्विता" इति सर्वज्ञानवद्भजनीयत्वं तद्भजतां ज्ञानित्वं च। "तेषामहं समुद्धर्त्ते"ति संसारानिवारकत्वम्।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति—

अनुकम्पाऽऽदिगुणाश्रयत्वमज्ञाननाशकत्वं ज्ञानदातृत्वादि।

भोक्तारं यज्ञतपसां सर्वभूतमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छती—

ति सर्वमहेश्वरत्वं तद्विषयकज्ञानस्य मोक्षान्तरङ्गहेतुत्वम्।

मामुपेत्य तु कौन्तेय! पुनर्जन्म न विद्यते।
मामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥

मम साधर्म्यमागता इति मुक्तोपसृप्यत्वम्। मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिमिति तदप्राप्तेः संसारकारणत्वम्। अतोऽस्य

लोक वेदे च प्रथितः पुरुषोत्तम इति,मत्तः परतरं नान्यत्किं चिदस्ती-त्यन्वयव्यतिरकाभ्यां सर्वोत्कृष्टत्वम्। अहमात्मा गुडाकेश!, क्षेत्रज्ञं-चापि मां विद्धी,ति विश्वान्तरात्मत्वम्।विष्टभ्याहमिदं कृत्स्नमिति-सर्वाधारत्वम्। न तदस्ति विना यत्स्यान्मया भूतं चराचरमिति सर्व-व्यापकत्वम्। वेदैश्च सर्वैरहमेव वेद्य इति शास्त्रयोनित्वम्। प्रकृतिं विद्धि मे परामिति चेतनाचेतनप्रकृत्यधिष्ठातृत्वम्। अवजानन्ति मां मूढा इति तदवज्ञाया मूढत्वराक्षसत्वासुरत्वप्राप्तिहेतुत्वम्। मामेकं शरणंव्रजेति सर्वशरण्यत्वम्। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति सर्वपापनाशकत्वं, तच्छरणागतस्य शोकाभाव,श्चे-त्यादीनां स्वयमेव श्रीमुखेन गीतत्वात् सर्वशास्त्रमयरूपाया गीताया अस्मदर्थाभिन्नसर्वज्ञानन्तविचित्रशक्त्याश्रयः श्रीभगवान् पुरुषो-त्तमो रमानिवासः श्रीकृष्ण एव विषय इति निश्चीयते उदाहृतहे-तुगर्भितवाक्येभ्यः।तस्मादस्मदर्थाभिन्न एव परब्रह्मभूतो विश्वात्म भगवान्वासुदेवः। तथैवास्मदर्थाभिन्ना उक्तवक्ष्यमाणलक्षणलक्षणा जीवात्मान इति सिद्धम्। एतेन कर्तृत्वमपि निरूपितं, तथा हि विज्ञानं यज्ञं तनुते इति, कर्त्ता शास्त्रार्थत्वादिति शास्त्रात्।

ननु मन एव कर्त्रिति तस्यात्माध्यासेनात्मनि कर्तृत्वभानात् तद्विषयकमिदमुदाहृतशास्त्र,मन्यथाऽकर्त्रात्मप्रतिपादकशास्त्रव्या-कोपादिति चेन्न। तुच्छमेव तत्। मनसः कर्तृत्वाभ्युपगमे घटादा-वपि कर्तृत्वापत्तेरचेतनत्वसाम्यात्। किं च तन्मनोऽकुरुतेत्यादौ मनसः कर्मत्वं शृण्वन्तः श्रोत्रेण विद्वांसो मनसेति तस्यैव करणत्वं-मन उक्रामन्मीलित इवाश्नन् पिबन्नास्ते इत्यादौ मनस उक्रम-णेऽपि, आत्मनः कर्तृत्वं परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्प-द्यते जक्षत् क्रीडन् रममाणः सह ब्रह्मणा विपश्चितेति मोक्षदा-शायां भगवद्भावापत्त्यनन्तरमपि क्रियाऽऽश्रयत्वं श्रूयते उक्तवा

क्येभ्यः । नैतेषु कापि मनसः कर्तृत्वं दृष्टचरमनुपपन्नं च । न हि कर्मणः करणस्य वा कर्तृत्वं सम्भवति कुठारादेः काष्ठादेश्चापि कर्तृत्वापतेः । न च सुषुप्त्यादौ तदभावादुक्तसिद्धान्तासम्भव इति वाच्यम् । ज्ञातृत्ववत्तस्याप्यनुगतत्वात् ज्ञातृत्वकर्तृत्वयोः सामानाधिकरण्यनियमात् । किं च बद्धावस्थायां ज्ञानादिसंकोचात् करणनिमित्तकत्वाद्विशेषकर्तृत्वस्य सुषुप्त्यादौ करणानां लयात् कर्तृत्वभानाभावोऽविरुद्धः । न चैवं जाग्रदवस्थायां कदा चिदपि तदुपरमो न स्यात् करणवर्गस्य तत्र सत्त्वादिति वाच्यम् । विशेषविषयककर्तृत्वे क्रियाया अपि तत्सहकारित्वात् । तस्या अभावे तदनाविर्भावोऽविरुद्धः ।

ननु करणक्रियाऽऽदिनिमित्तकात्मकर्तृत्वकल्पने महद् गौरवं, तस्मादुपाधेरेव कर्तृत्वाभ्युपगमो वरीयान् लाघवादिति चेन्न । उपाधेर्जडस्य कर्तृत्वेऽतिप्रसङ्गस्योक्तत्वात् । न च नोपाधिमात्रस्य कर्तृत्वाभ्युपगमो,ऽपि तु तत्सम्बन्धादकर्त्तुरपि कर्तृत्वं सम्भाव्यत इति वाच्यम् । तर्हि नपुंसकस्यापि स्त्रीसंपर्कात्प्रजोत्पत्तिः स्याद् । न चैवं कापि दृष्टं श्रुतमुपन्नं चेति । तस्मात्स्वाभाविककर्तृत्वाश्रयस्यैवात्मनः स्वाभाविकदहनशक्त्याश्रयाग्नेः काष्ठादिसम्बन्धेन तदाविर्भाववत् करणादिसम्बन्धनिमित्तकस्तदाविर्भाव उपपन्नतरः । न चैवं कर्तृत्वनिषेधविषयकशास्त्रबाध इति वाच्यम् । तस्य स्वतन्त्रकर्तृत्वनिषेधेन नैराकाङ्क्ष्यात् । अन्यथा कर्तृत्वप्रतिपादकशास्त्रबाधशङ्कोत्थानस्यापि सावकाशत्वात् । तस्माज्ज्ञातृत्ववत्कर्तृत्वस्यापि प्रत्यगात्मनां स्वाभाविकधर्मविशेषत्वं स्वरूपनिरूपितमेवेति सिद्धम् । एवं भोक्तृत्वादयोऽप्यूहनीयाः । तथा हि । सुषुप्त्यादौ सुखादिभोक्तृत्वे प्रत्यभिज्ञाया मोक्षापत्तौ भगवत्स्वरूपगुणादिविषयकानुभवानन्दभोक्तृत्वे च जक्षत्क्रीडन्निसादिश्रुतेश्च मानत्वात् कर्तृत्वभोक्तृत्वयोरेकाधिकरणत्वनियमाच्च ।

ननु स्यादेतदुक्तलक्षणस्य परब्रह्मणि पुरुषोत्तमाख्येऽपि समन्वयात्तत्रातिव्याप्तेः। न च तस्यापि लक्ष्यत्वादिष्टापत्तिरिति वाच्यम्। सिद्धान्तभङ्गादिति चेत्तद्व्यावर्त्तयन्नाह-परमेश्वरायत्त-स्वरूपस्थितिप्रवृत्तिक इति। अस्मदर्थाभिन्नसर्वनियामकविश्वात्मनो वासुदेवस्यायत्तं तन्त्रं स्वरूपस्थितिप्रवृत्ति यस्य सः। स्वरूपं च स्थितिश्च प्रवृतिश्चेति समाहारः स्वरूपसम्बन्धिन्यौ स्थितिप्रवृती इतिं वा सर्वदेशकालीनवस्तुविषयकज्ञानादौ क्रियाप्रवृत्त्यादौ च स्वातन्त्र्यशून्य इत्यर्थः। तथा च देहादिविलक्षणज्ञानात्मत्वेऽस्मदर्थाभिन्नज्ञानाश्रयत्वे च सति परमेश्वराधीनस्वरूपस्थितिप्रवृत्तिकत्वमिति त्रिविधानामपि प्रत्यगात्मनां साधारणलक्षणमिति, तथात्वे च पूर्वदलयोः परमेश्वरसाधारणत्वेऽपि उत्तरदलस्यासाधारणत्वान्नोक्तदोषयोगः।

नन्वेवं परमेश्वरे वैषम्यनैर्घृण्यप्रसक्तिस्तस्यैव प्रयोजककर्तृत्वाभ्युपगमात् पुण्यापुण्ययोगस्यापि तत्रैव प्रसङ्गापत्तेश्चेति चेन्न। वैषम्यादीनां कर्मसापेक्षत्वाद् न तत्र योग इति भगवान्सूत्रकारो वक्ष्यते "वैषम्यनैर्घृण्ये न सापेक्षत्वादि"ति।

न च तर्हि कर्मण एव प्रयोजकत्वात् किमीश्वरेण गौरवमात्रत्वात्तदग्रहस्येति वाच्यम्। कर्माणि जडत्वेन चेतननियन्तृत्वाद्यसम्भवात्प्रयोजकत्वासम्भव इत्यर्थः। अन्यथा घटादावपि तत्प्रसङ्गस्य व्याप्तिसम्भवात्, जडत्वसाम्यात्। कर्मणश्चैतन्ययोगाभ्युपगमे संज्ञाभेदोऽवशिष्यते न वस्तुभेदस्तस्यैवेश्वरत्वसंभवात्।

न च प्रलये कर्मणोऽप्यभावात्कथमिव तत्सापेक्षत्वं परमात्मनः सम्भवतीति वाच्यम्। कर्मणामनादित्वात्। इतरथा सृष्ट्यभावप्रसङ्गात्, कृतनाशाकृताभ्यागमप्रसङ्गाच्च। तथा च वक्ष्यते

"न कर्माविभागादिति चेन्नानादित्वादि"ति, तस्मात्कर्मसापेक्षत्वात्पुण्यापुण्यकर्तृत्वादिप्रयोजकस्य नोक्तदोषसम्बन्धावकाशः ।

न च मुक्तौ कर्माभावादीश्वरतन्त्रत्वस्याभाव इति वाच्यम् । नियन्तृत्वनियम्यत्वयोः तत्त्वंपदार्थनिष्ठासाधारणस्वाभाविकयावदात्मवृत्तिस्वरूपधर्मत्वात्, तयोर्नाशे स्वरूपनाशस्याऽपि सम्भवितुं शक्यत्वात् स्वरूपनाश एव मोक्षः स्यात् ।

अयं भावः । न वयं परमेश्वरनियन्तृत्वस्य कर्मसापेक्षत्वं वदामः, किन्तु अनादिकर्मसापेक्षपुण्यापुण्यादिकर्मप्रवाहकारयितृत्वे तत्फलदातृत्वे च, मुक्तौ तयोरभावेऽपि स्वरूपस्थितिप्रवृत्त्यादौ नियन्तृत्वस्य सत्त्वान्नोक्तदोषः ।

ननु स्यादेतत्तथाऽपि शास्त्राचार्य्योपदेशस्य तदुक्तसाधनानुष्ठानस्य वैयर्थ्यापत्तिः, जीवानां स्वतन्त्रकर्तृत्वानभ्युपगमादिति-चेन्न । भगवदायत्तस्वरूपस्थित्यादिविषयकाज्ञानवन्मुमुक्षवधिकारिकत्वाद्, उपदेशशास्त्रादेः भगवदायत्तस्वरूपादिका वयमिति ज्ञानाभाववद्विषयकत्वेनोपदेशस्य नैराकाङ्क्ष्यादित्यर्थः ।

ननु नैवमुक्तलक्षणेऽतिव्याप्तिदोषनिवृत्तिः, परमेश्वरस्यापि स्वातन्त्र्यस्य परमेश्वरायत्तस्वरूपस्थितिप्रवृत्तिकत्वसम्भवात् सर्वपक्षेषु ब्रह्मणः स्वातन्त्र्यासाधारण्यस्य निर्विवादत्वादुक्तातिव्याप्तेस्तादवस्थ्यमेवेत्याशङ्क्य तन्निवृत्तये विशेषं वदन् परिमाणविवादं निराकरोति-अणुपरिमाणक इति । अणुमात्रं परिमाणं यस्य सो,ऽअणुपरिमाणलक्षणगुणाश्रय इत्यर्थः ।

नन्वात्मनोऽणुपरिमाणत्वे सर्वशरीरावयवगतदुःखाद्यनुसन्धातृत्वं प्रकाशकत्वं सर्वशरीराधारत्वं न स्यात् तस्य मेरुगिरौ सर्षपस्येव देहातिसूक्ष्मतमाल्पतरैकदेशे स्थितत्वादिति चेन्न ।

धर्मिभूतस्यात्मनोऽणुत्वेपि तद्धर्मभूतज्ञानस्य विभुत्वेन सर्वसमञ्जसत्वाद् "गुणाद्वा लोकवदि"ति न्यायात् ।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारतेति—

सदृष्टान्तोपपत्तिमद्भगवद्वचनाच्च । एतेनैव विभुपरिमाणविषयकशास्त्रस्यापि नैराकाङ्क्ष्यं व्याख्यातं भवति ।

ननूपाधिकृतमेवेदमणुपरिमाणकत्वमात्मनो न स्वरूपतः "बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट"इति श्रवणाद् विभुत्वमेव तस्येति चेन्न । अहो विवेककौशल्यं भवतो देवानांहितकारिणः, स्वहस्तेनैव स्वभवनं दह्यते, उक्तवाक्यस्याणुत्वपरत्वेनास्मत्पक्षपातित्वाद् ।

तथा हि—बुद्धेरुपाधेः परिमाणात्मकगुणेन तथाऽऽत्मनः स्वरूपवृत्तिपरिमाणभूतेन गुणेन चोभयथाऽपि अवरो जीवात्मा आराग्रमात्रो दृष्टः शास्त्रेषु योगिभिरनुभूतो वेति "दृश्यते त्वग्रया बुद्ध्या सूक्ष्मैः सूक्ष्मात्मदर्शिभिरितिश्रुत्यन्तराद् । आराग्रमात्रोऽतिसूक्ष्मोऽणुरित्यर्थः । अवरकथनादीश्वरस्य परत्वसिद्ध्या तयोर्भेदस्यापि स्वाभाविकत्वमुक्तं भवति, परावरशब्दयोरन्योन्यसापेक्षत्वनियमाद् । परिमाणवद् भेदस्यापि स्वरूपनिबन्धनत्वं बुद्धिनिबन्धनत्वं चोभयथा संभवतीति, उभयोरपि भेदनिरूपकत्वाद्,अस्ति खल्वन्योऽपरो भूतात्मा योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिना, यस्य संमूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यद् गुणौघैरूप्यमाणः कलुषीकृतश्चेति मैत्रेयोपनिषच्छ्रुतेरलं प्रासङ्गिकेन । किं चात्मगुणेन चैवेत्यवधारणमत्रान्ययोगव्यवच्छेदपरम् । स च मध्यमविभुपरिमाणव्यावर्त्तकः । मध्यमपरिमाणको विभुपरिमाणको वा नायं, किं तु

आराग्रमात्रोपलक्षितोऽणुपरिमाणक एवेत्यर्थः । अणुर्ह्येष आत्मा चेतसा वेदितव्यः,

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पत—

इतिश्रुत्यन्तरात्। उत्क्रान्तिगत्यागतीनां नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्, तद्गुणसारत्वात्, तद्व्यपदेशः प्राज्ञवदिति वक्ष्यमाणन्यायाच्च । तत्र न तावन्मध्यमपरिमाणकः, सावयवत्वाद् देहवन्नश्वरत्वापत्तेः कृतनाशकृताभ्यागमप्रसङ्गाच्चेति पूर्वमेव निराकृतम्। नापि विभुपरिमाणकः,असंभवात्। तत्रात्मनो बहुत्वमेकत्वं वेति विवेचनीयं, बहुत्वे मनसो विभुत्वेऽणुत्वे चोभयथाऽपि सर्वेषां विभूनां जीवात्मनां सर्वमूर्त्तसंयोगित्वाविशेषात् सर्वैर्मनोभिर्नित्यसंयुक्ततया सर्वान्तर्वर्त्तिसुखादिज्ञातृत्वापत्तेः, ब्रह्मण्यतिप्रसङ्गाच्च । अहंत्वमयमितिप्रत्ययानां नियामके विनिगमनाविरहेण विभागाभावापत्तेश्च । आत्मत्वेन मनःसंयोगवत्त्वेन च विशेषाभावात् । न चात्मत्वसाम्येऽपि तत्तत्कर्मजन्यसंस्कारविशिष्टवतो वैलक्षण्यादीनां परस्परभिन्नत्वेन नियामकत्वान्नोक्तदोषप्रसङ्ग इति वाच्यम्। तत्तत्कर्माद्यदृष्टादीनामपि नियामकत्वेन कल्पितानां सर्वेष्वात्मसु सम्बन्धसामान्यात् तत्राप्यन्यकल्पनेऽनवस्थाऽऽपत्तेश्च । द्वितीये तु एकस्यैव विभोरात्मनः सर्वान्तःकरणैरुपाधिभूतैरवच्छेदाभ्युपगमात् सर्वेषामुपहितानां सर्वज्ञातृत्वमप्रमाणम्। अन्यथा स्वस्यैवैकस्मिन्देशे वर्त्तमानानामन्तःकरणानां सम्बन्धेन तत्कृतदुःखाद्यननुभवत्वाभ्युपगमे देवदत्तस्य स्वशिरःपाण्याद्यवयवनिष्ठवेदनाऽनुसन्धानाभावापत्तेः,जडत्वापत्तेश्च । ज्ञातृत्वादेरुपाधिधर्मत्वाङ्गीकारे उपाधेश्चेतनत्वापत्तेश्च उपाधेश्चाणुत्वस्वीकारेण शिरःपाण्याद्यवयवैर्युगपदसम्बद्धतया

तद्गतसुखादीनां युगपदनुसन्धानाभावापत्तेश्च। उपाधेर्मध्यमपरिमाणाङ्गीकारे तदवच्छिन्नस्यापि तथात्वापत्त्या बौद्धपक्षस्वीकारापत्तेश्च, उपाध्यणुत्वनिरूपितजीवाणुत्वाङ्गीकृतसिद्धान्तभङ्गाच्च। उपाधेर्विभुत्वाङ्गीकारे च सर्वस्याप्युपहितत्वेन मुक्तप्राप्याभावो जगदान्ध्यापत्तिश्च स्यातां, तच्च पूर्वमेव निराकृतमुक्तहेतुभ्यो-महापापीयानयं पक्षः श्रेयोर्थिऽभिः सुदूराद्धेयः।

नन्वणुत्वे निरवयवत्वमप्यवश्यं भाव्यं, तथात्वे चेश्वरस्य तत्राव्यापनात्तदन्तर्यामित्वभङ्ग इति चेन्न। तुच्छत्वाच्छङ्कायाः, जीवस्याणुत्वनिरवयवत्वयोः सतोरपि परमेश्वरस्य व्यापनशीलत्वेन सर्वत्र व्यापकत्वात्। अथ कस्मादुच्यते महाविष्णुरिति यस्मात्सर्वाल्लोकान्सर्वान्देवान्सर्वात्मनः सर्वभूतानि व्याप्नोति स्नेहो यथा कलमपललपिण्डओतप्रोत्तमनुव्याप्तमिति प्रश्नोतराभ्यां निर्णीतत्वात् श्रुतिभिः। न हि नियम्यनियन्तृत्वयोर्व्याप्यव्यापकत्वयोश्च भावे सावयवत्वं निरवयवत्वं च प्रयोजकं, तथात्वे सति कालशब्दस्पर्शादीनां निरवयवाणां भगवन्नियम्यत्वाद्यभावप्रसंङ्गात्। किं तु वस्तुवृत्तिव्याप्यत्वव्यापकत्वनिमित्तभूता शक्तिरेव तत्र प्रयोजिका। एवं च सर्वगतस्य परमात्मनः सर्वव्यापकताशक्तियोगश्रवणात्सर्वमनवद्यम्।

इत्थं परिमाणविवादं निराकृत्य संख्याविवादं निराकरोति-प्रतिशरीरं भिन्न इति। ब्रह्मादिस्थावरान्तेषु प्रत्येकमेकैको विलक्षणस्वरूप इत्यर्थः। एतेन परमात्मनो जीवानां महद्वैलक्षण्यमुक्तं सर्वगतस्य ब्रह्मणः सर्वैक्यत्वात् तथा च "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती"तिश्रुत्या जीवपरयोर्विभागश्रवणाद्, अनेनैव जीवानामितरेतरस्वरूपभेदश्च स्पष्ट एव दर्शितः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति श्रुतेः।

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परमिति—

भगवद्वचनाच्च। एतेनैकजीववादपक्षो निरस्तो भवति। अन्यथैकस्मिन्नपि जीवात्मनि सुप्ते मूर्च्छिते मृते वा निखिलजीवनिकायस्याप्रतीत्यापत्तेः । अनेनैवात्मनामितरेतरसुखादिगुणसाङ्कर्यशङ्काऽपि दूरतो निरस्ता ।

ननु स्यादेतत्क्षेत्रज्ञानां प्रतिशरीरं स्वरूपभेदस्तथाऽपि तत्रैकैकस्य साधनसंपत्त्या क्रमेण मोक्षापत्तौ सत्यां कदा चित्सर्वेष्वपि मुक्तेषु सृष्ट्यत्यन्ताभावोऽपि सम्भाव्य इति शङ्कां परिहर्त्तुकामो भगवान्ग्रन्थकारो विशिनष्टि—अनन्तव्यक्तिरिति । सङ्ख्यानिरूपितावसानशून्यः । तथा चाह भगवान्पराशरः ।

स्थूलैः सूक्ष्मैस्तथा सूक्ष्मसूक्ष्मैः सूक्ष्मतरैस्तथा ।
स्थूलैः स्थूलतरैश्चैव तत्सर्वं प्राणिभिर्वृतम् ॥
अङ्गुलस्याष्टमो भागो न सोऽस्ति मुनिसत्तम! ।
न सन्ति प्राणिनो यत्र निजकर्मनिबन्धनाः ॥
सर्वे चैते वशं यान्ति यमस्य भगवन्किल ।
आयुषोऽन्ते, ततो यान्ति यातनास्तत्प्रचोदिताः ॥
यातनाभ्यः परिभ्रष्टा देवाद्यास्वथ योनिषु ।
जन्तवः परिवर्त्तन्ते शास्त्राणामेष निर्णय—

इत्यादिना बद्धानामसङ्ख्यातत्वं निरूपितम् । शास्त्राणामेषनिर्णय इति निर्णयपदप्रयोगाच्छङ्काऽवकाशो दूरतोऽपास्तो-भवति । बद्धो नामानादिकर्मवासनाकार्यदेवतिर्यगाद्यनेकविधशरीरेषु तत्सम्बन्धिषु चात्मीयाभिमानकः। सोऽपि द्विविधो मुमुक्ष्वमुमुक्षुभेदात्। आद्यः, आध्यात्मिकादिविविधविचित्रदुःखानुभवजातनिर्वेदो निःशेषदुःखनिवृत्त्यात्मकमोक्षमिच्छुः। सोऽपि द्वि-

धो, भगवद्भावापत्तिकामो निजस्वरूपोपलब्धिकामश्चेति। तस्याप्यसङ्ख्यातत्वमाह भगवान् यमः।

परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानामिति।

द्वितीयस्यानुसन्धेयं भगवद्वाक्यं—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसामिति।

अमुमुक्षुश्च वैषयिकभोगकामः। सोऽपि द्विविधः। भाविश्रेयस्को नित्यसंसारी च। तेषामनन्तत्वं पराशरवाक्याद्बोध्यम्। नित्यसंसारिणां विशेषश्च श्रीमुखेन गीतः।

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्वि—

त्यादिना। किं च मुक्तो द्विविधः। नित्यमुक्तो बद्धमुक्तश्चेति। तत्र नित्यमुक्तो गर्भजन्मजरामरणादिप्रकृतिसम्बन्धतत्कार्यदुःखविषयकानुभवशून्यत्वे सति नित्यनिरतिशयभगवतीयदर्शनादिभजनानन्दैकरसो विश्वक्सेनगरुडादिगणः। तस्याप्यसङ्ख्यातत्वं "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय" इत्यादिश्रुतिनिर्णीतं बोध्यम्। बद्धमुक्तश्चानादिकर्मात्मकाविद्यानिरूपितप्रकृतितत्कार्यसम्बन्धविनिर्मुक्तः।

बहवो ज्ञानतपसा पूता मद्भावमागताः।
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः॥

सर्गेपि नोपजायन्ते प्रलये न व्यथन्त चेति—

भगवदुक्तेः। भगवद्भावापन्नस्य च तदिच्छाऽनुरूपया निजेच्छयाऽनन्तविग्रहयोगश्च भगवदवतारवच्छ्रुतिनिर्णीत एव स एकधा भवति त्रिधा भवति पञ्चधा भवति सहस्रधा भवत्यपरिमितो भवतीत्यादिश्रवणात्। तत्सिद्धं बद्धमुक्तभेदबहुलकानामपि सर्वेषामनन्तव्यक्तिकत्वमित्यलं विस्तरेण।

एवमेतावता विशेषसन्दर्भेण नित्यमुक्तादीनां जीवात्मनां स्वरूपगुणपरिमाणसंख्यादिभिः साधारणत्वं निरूपितमिदानीं बद्धानां विशेषं विवेक्तुं विशिनष्टि—बन्धमोक्षार्ह इति ।

अनादिकर्मात्मकाविद्याऽवच्छिन्नो देवातिर्यङ्मनुष्यादिदेहरूपसंसारचक्रमनुभवन् श्रीभगवन्निर्हेतुककृपाकटाक्षावलोकित आचार्यदेवो भूत्वा तन्मुखनिर्झरितसच्छास्त्रार्थसुधासंप्लावितो निरस्तसंशयादिरोगो भगवत्स्वरूपगुणवैभवादिविषयकध्यानसंततिपरिपाकजन्यसाक्षात्कारनिरस्तकर्मबन्धो भगवद्भावापत्तिरूपमोक्षयोग्य इत्यर्थः ॥

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम् ।
तमक्रतुं पश्यति वीतशोकः धातुः प्रसादान्महिमानमात्मनः ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥
यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैतीत्यादि—

श्रुतिभ्यः । परमेश्वरानुग्रहोऽयं विभुरपि श्रवणादिसाधनसम्पन्ने भगवदाचार्यभक्तिसंपृक्त एवाविर्भवति नान्यत्र, ततो न साधनविषयकशास्त्रबाधस्तदुक्तसाधनवैयर्थ्यं च ।

एतेन भगवदनुग्रहस्य सर्वगतत्वे सर्वमोक्षप्रसङ्गः, परिच्छिन्नत्वे च तुच्छत्वमित्यादिशङ्का दूरतो निरस्ता । यथा तार्किकमते व्यापकस्यापि गोत्वादेः सास्नाऽऽदिमत्त्वेव सम्बन्धः ॥ यथौपनिषदानां पक्षे ब्रह्मस्वरूपस्य सर्वगतत्वेऽपि क्वचिदेव तदधिकारिविशेष आसन्नमोक्षक एव साक्षात्कारो नान्यत्र,

तद्वत्। एतेनैव सर्वेषामपि भगवतीयगुणानां वात्सल्यसौशील्यकारुण्यतितिक्षाज्ञानशक्तिबलैश्वर्यतेजोवीर्यादीनां स्वरूपवद् व्यापकत्वं मोक्षादिदानहेतुत्वं स्वाभाविकत्वं यावदात्मवृत्तित्वं मुमुक्षूपास्यत्वं चोक्तं भवति।

ननु भगवतीयानुग्रहः साधनान्तरापेक्षः स्वतन्त्रो वा। नाद्यः, अन्योन्याश्रयदोषप्रसङ्गात्। नान्त्यः। सर्वत्र व्याप्तिप्रसङ्गात्, सुखदुःखाद्युच्छेदापत्तेश्चेति चेन्न।

तस्य निरपेक्षत्वेऽपि नैर्घृण्यादिदोषनिवृत्तय उपायान्तरस्य तत्प्रतिपादकशास्त्रस्य च बाधानिवृत्तये चान्येषां साधनानां व्याजमात्रत्वेनाभ्युपगमान्नोक्तविकल्पावकाशः। एतदुक्तं भवति। यद्यपि "न तत्समश्चाभ्यधिकश्च दृश्यत" इत्यादिश्रुतेर्निरतिशयसाम्यस्य विश्वात्मनः पुरुषोत्तमस्यानुग्रहादीनां स्वातन्त्र्यमेव, तथाऽपि साधनान्तरप्रतिपादकशास्त्रस्यापि स्वप्रतिज्ञारूपत्वात् स्वसत्प्रतिज्ञत्वरक्षणत्वाच्च तस्मिन्बाधे स्वप्रतिज्ञाहानिप्रसङ्गात् साधनान्तरमपि व्याजीभावेनावश्यङ्गृह्यते। सर्वथा निर्व्याजत्वाभ्युपगमे नैर्घृण्यादिप्रसक्तेः। तस्मात्साधनान्तरं व्याजीकृत्य स्वतन्त्रमेव फलदातृत्वं भगदनुग्रहस्य, न हि व्याजमात्रस्य वस्तुस्वातन्त्र्यहननशक्तिः। अतिप्रसङ्गात्। तथात्वे न काश्चिद्विरोधः। अन्यथा "यमेवैष वृणुते" इत्यादिसावधारणशास्त्रबाधात्। उक्तहेतुभ्य उक्तराद्धान्त एव श्रेयान्। उक्तं चैतद्भगवद्भिराद्याचार्य्यचरणैः "कृपाऽस्य दैन्यादियुजि प्रजायत" इति। तच्च विस्तरेण व्याख्यातं श्रीपुरुषोत्तमाचार्यचरणैरतोऽत्रालं बुद्धिराश्रितेति त्वंपदार्थनिर्णयसंक्षेपः।

उक्तार्थे सम्प्रदायनिरूपितप्रमाणमाह।

तथा चोक्तमित्यादि—तदेव प्रमाणावाक्यमाह। ज्ञान-

स्वरूपमित्यादि । ननूदाहृतश्चेद् व्याक्रियतामयं श्लोक इति शङ्कां निराकुर्वन्नाह । व्याख्यातश्चायमित्यादि । सम्प्रदायोक्तसिद्धान्तश्रुतिं प्रमाणयति—तथा च श्रूयत इति । ता एव दर्शयति "तस्माद्वा" इत्यारभ्य; न स पुनरावर्त्तत इति क्रमशोऽत्र पठनीयाः । ताश्च तत्र व्याख्यास्यन्ते ।

एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।
अङ्गुलस्याष्टमो भागो न सोऽस्ति मुनिसत्तम! ।
न सन्ति प्राणिनो यत्र निजकर्मनिबन्धनाः ॥
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो भावो भयं चाभयमेव च ॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्ज्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
जगद्वशे वर्त्ततेऽदः कृष्णस्य सचराचरमित्या—
दिस्मृतयोऽप्यत्रानुसन्धेयाः ।

अथाचेतनं संगृह्णाति—अचेतनपदार्थस्त्रिविध इति ।

अचेतनपदार्थस्त्रिविधः । प्राकृताप्राकृतकालभेदात् । गुणत्रयाश्रयभूतं द्रव्यं प्राकृतं, तच्च नित्यं परिमाणादिविकारि च ।

गौरनाद्यन्तवती जनित्री भूतभाविनी ।
सिताऽसिता च रक्ता च सर्वकामदुधा विभोरिति श्रुतेः ।

निर्गुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ॥
अचेतनपदार्थश्च नित्या सततविक्रिया ॥
त्रिगुणं कर्मणां क्षेत्रं प्रकृते रूपमुच्यते ॥

इत्यादिस्मृतेश्च। गुणाश्च सत्त्वरजस्तमांसि ॥ तदेव हि स्वगुणैः क्षेत्रज्ञानां देहेन्द्रियमनोबुद्ध्यादिरूपेण परिणतं सज्जीवबन्धनहेतुर्मोक्षप्रतिबन्धकतया चोच्यते महदादिब्रह्माण्डस्य जगतः कारणीभूतं च, तत्कार्यं चानित्यं बोध्यम् ।

त्रैविध्यं व्यनक्ति। प्राकृताप्राकृतकालभेदादिति। तत्र तेषु त्रिविधेषु मध्ये। प्राकृतं लक्षयति—गुणत्रयाश्रयभूतमिति। गुणत्रयाश्रयत्वे सति द्रव्यत्वं प्राकृतत्वमिति लक्षणं बोध्यम्। अजामेकां लोहितशुक्लकृष्णामिति श्रुतेः। तुच्छत्वपक्षं निराकुर्वन्नाह। तच्च नित्यमिति। आद्यन्तशून्यमित्यर्थः।

ननु सदेव सोम्येदमग्र आसीत्, तदेवर्त्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामित्यादिश्रुतौ ब्रह्मणः सत्यताऽवधारणादन्ययोगव्यवच्छेदार्थकेनैवकारेण ब्रह्मव्यातिरिक्तस्यासत्यत्वावधारणाद् मिथ्यैवेदं ब्रह्मण्यज्ञानारोपितं भाति शुक्तिरजतवादिति चेन्न।

असत आरोपासम्भवात् । एकत्र सत एवान्यत्रारोपनियमात् । न हि स्वरूपेणासतः शशशृङ्गादेः क्वचिदारोपो दृष्टः श्रुतो वा। अन्यथा तिलेभ्य इव सिकताभ्योऽपि तैलोत्पत्तेरभ्युपगमः स्यात् । न चारोपे तद्विषयकप्रतीतिमात्रम-

पेक्षितं न विषयसद्भावोऽपीति वाच्यम् । असतः प्रतीतेरेवासम्भवात् । असतः सम्भवः कुत इति वचनात् ।

ननु शुक्तौ रजतप्रतीतिवत्प्रपञ्चप्रतीतेरपि दोषमात्रमेव कारणमपेक्षितं न विषयसद्भाव इति चेन्न ।

दोषात्मककारणस्यापि तुच्छत्वाविशेषेण भवन्मते प्रतीतिलक्षणकार्य्योत्पत्तेरसम्भवात् । कार्य्यस्य कारणसत्ताऽपेक्षित्वनियमात् । कुत्राप्यसतः कारणत्वादर्शनाच्च । न चासत्यस्याप्यारोपेऽपि सर्पस्य भयादिजनत्वदर्शनात्कार्यस्य कारणसत्ताऽपेक्षित्वनियमभङ्गो दृश्यत इति वाच्यम् । स्वरूपेणासतः कार्योत्पत्त्यनुकूलशक्तिमत्त्वलक्षणकारणत्वासंभवात् । सर्पभ्रमस्थलेऽपि सर्पविषयकज्ञानस्यैव भयादिहेतुत्वं, नारोपितसर्पस्य । अन्यथा बालस्य सर्पविषयकज्ञानात्यन्ताभाववतोऽपि भ्रमो भयकम्पादिश्च भवेद् न तु तदस्ति, प्रत्युत सत्यस्यापि सर्पस्य बालैः स्वहस्तसंस्पर्शदर्शनात् । किं च कारणमात्रस्याप्यसत्त्वाङ्गीकारे कार्योत्पत्तिकथनस्यैवानुपपन्नत्वात् । न चासतोऽपि रज्जुसर्पादेर्ज्ञानकारणत्वोपपत्तिवद्भयादिकारणत्वोपपत्तिरपि कथं न स्यादिति वाच्यम् । तत्रापि दोषस्यैवासद्विषयकज्ञानकारणत्वान्न, विषयस्य । अन्यथाऽसत्यपि तमोरूपे दोषे रज्जौ सर्पज्ञानं केन वार्यते तवाभिमतकारणरूपस्यासद्विषयस्य विद्यमानत्वादित्यर्थः ।

नन्वतीतानागतदृष्टिविषयकज्ञानोत्पत्तिस्थलेऽसत एव दृष्टिरूपविषयस्य स्वज्ञानजनकत्वदर्शनात्, तथाऽत्रापि संभवत्येवेति चेन्न ।

अतीतदृष्टिविषयकज्ञानोत्पत्तौ तत्कार्यस्येदानीन्तनस्य सत एवान्नादे, रनागतदृष्टिविषयकज्ञानोत्पत्तौ च तज्ज्ञापकरूपका-

रणस्य सत एव ज्योतिःशास्त्रस्य सद्भावत्वात् । नासतो-विषयस्य क्वापि ज्ञानादिकारणत्व,मप्रामाणिकत्वात् । न च वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमितिश्रुतिसिद्धत्वाद् ब्रह्मणि विवर्त्तमेवेदं सर्वमिति वाच्यम् । विकारो नामधेयमित्यत्र विकारशब्दपाठादेव विवर्त्तपक्षस्योक्तश्रुत्यैव निरस्तत्वात् । विकारो नामधेयमित्यत्र, विकारत्वं च परिणमनशील एव द्रव्ये दृष्टचरम्, अन्यथा भ्रान्तिर्नामधेयमित्युक्तं स्यात् । किं च विवर्त्तदृष्टान्तानां भवदभिमतानां शुक्तिरजतरज्जुसर्प्पादीनां क्वाप्यश्रवणात् प्रतिज्ञाबाधाच्च । तथा हि च्छन्दोगा आमनन्ति "उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातमिति," कथं नु भगवः स आदेशो भवतीति, यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्, यथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यादित्यादिना कारणविज्ञानेन कार्यविज्ञानं प्रतिज्ञातं, तत्र यथा मृत्पिण्डस्य घटाद्युपादानकारणस्य विज्ञानेन सर्वं मृद्विकारजातं घटादिरनुभूयते मृन्मयत्वेन, न तथा रज्जुज्ञानेन सर्पमात्रस्य रज्जुमयत्वेन विज्ञानं शुक्तिज्ञानेन रजतमात्रस्य शुक्तिमयत्वेन वा विज्ञानं दृष्टचरं श्रुतं च, सर्वानुभवविरोधात् । श्रौतप्रतिज्ञाहानिरित्यर्थः । तस्मात्सदेवेदं सर्वमिति राद्धान्तः श्रौतत्वात्साधीयान् । तथा च श्रुतिः सदेव सोम्येदमग्र आसीत् ।

गौरनाद्यन्तवती जनित्री भूतभाविनी, ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातनः तत्सदासीत् प्राणा वै सत्यं तेषामेष सत्यम्,

असत्यमाहुर्जगदेतदज्ञाः
शक्तिं हरेर्न विदुर्ये परां हि ।

यः सत्यरूपं जगदेतदीदृक्
सृष्ट्वा त्वभूत् सत्यकर्मा महात्मा ॥

अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते अथैनमाहुर्नित्यकर्मेति नित्यं ह्येवासौ कुरुतेऽष्टरूपामजां ध्रुवामित्यादि, सत्त्वाच्चावरस्य, असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषाद्, युक्तेः शब्दान्तराच्चे,त्यादिन्यायः—

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्—
असत्यमप्रतिष्ठं च जगदाहुरनीश्वरमिति—

भगवद्वचनं च । नन्वसद्वा इदमग्र आसीदित्यादिनाऽसत्यस्यापि श्रवणात् कथं विरोधपरिहार इति चेत्तत्राह-परिणामादिविकारि चेति । विकारित्वरूपासत्त्वपरत्वादुक्तवाक्यस्य सूक्ष्मावस्थाऽऽपत्तिप्रतिपादनपरत्वाद्वा । तथा चाह भगवान्पराशरः—

तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकारवदिति—॥

विष्णुपुराणे । तस्माद्विकारिसत्ताकस्येदंकारास्पदस्य जगतः कारणावस्थायामनभिव्यक्तनामरूपकत्वादसदादिशब्दवाच्यत्वाभिधानमप्यविरुद्धम् । कार्यावस्थायान्त्वभिव्यक्तनामरूपकत्वादाविर्भूतविस्तारकसदादिपदवाच्यताम्भजत इति श्रुत्यविरोधः । अन्यथा कथमसतः सज्जायेतेति वाक्यशेषविरोधात् । तथा चोक्तं वैष्णवे श्रीध्रुवेण—

न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः ।
संयमे विश्वमखिलं बीजभूते तथा त्वयि ॥
बीजादङ्कुरसंभूतो न्यग्रोधः सुसमुत्थितः ।
विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगदिति ॥

वक्ष्यते च भगवान् सूत्रकारः "पटवच्चे"ति सूत्रेण । यथा संकुचितः पटः पटत्वेनागृह्यमाणोऽपि पट एव, प्रसारणे तु पटत्वेन स्पष्टतया गृह्यत एव, तथा तिरोभावापन्नमव्यक्तमपि जगत्कार्यत्वेन नामरूपाभ्यामगृह्यमाणमपि सदेवा,विभूतं तु प्रत्यक्षागमाभ्यां सत्त्वेन स्पष्टं गृह्यत इति सूत्रार्थसंग्रहः ।

नन्विदं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यनुमानं कार्यासत्वे प्रमाणमिति चेन्न । दृश्यत्वस्य हेतोः साध्याभाववति ब्रह्मण्यतिव्याप्तत्वात् साधारणानैकान्तिकत्वेन हेत्वाभासत्वात् । एवं दृश्यत्वाविशेषाद् ब्रह्मणोऽपि मिथ्यात्वं समानमेव । ब्रह्म मिथ्या दृश्यत्वात् प्रपञ्चवदितिप्रयोगोऽपि वक्तुं समञ्जसः । श्रूयते च तस्य दृश्यत्वम्-आत्मा वा रे द्रष्टव्यः, आत्मन्परे दृष्टे श्रुते, दृश्यते त्वग्रया बुद्धया, सदा पश्यन्ति सूरयः, यत्तत्पश्यसि तद्वद, तमसः पारं दर्शयति, तस्मिन् दृष्टे परावरे, इत्यादिश्रुतिभ्यः ।

ननु न चक्षुषा गृह्यते नापि वाचा न संदृशा, तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनमित्यादिश्रुतिभ्यः सर्वप्रमाणाविषयत्वाद् दृश्यत्वनिषेधाद् ब्रह्मणो नोदाहृतवाक्यविषयत्वं, किन्तु मायाशबलस्यैव बुद्धिवृत्तिवियषत्वाभ्युपगमाद्, न निर्गुणनिर्विशेषस्य, मायाशवलस्य तु दृश्यत्वमिथ्यात्वयोरिष्टापन्नत्वादस्माकमिति चेन्न ।

दर्शनविषयस्यैव परत्वविधानान्नोक्तसिद्धान्तस्य साधीयस्त्वं-प्रमाणवत्त्वं च । स एतस्माज्जीवघनात्परात्परं पुरि शयम्पुरुषमीक्षते प्रधानपुरुषव्यक्तकालानां कारण हियत्पश्यन्ति सूरयो नित्यं तद्विष्णोः परमं पदमित्यादिश्रुतिस्मृतिभ्यः परस्यैव ब्रह्मणो दर्शनयोग्यत्वविधानात् । निषेधश्रुतीनां दर्शनयोग्यचर्मदृष्टि-

विषयकदर्शननिषेधपरत्वेन नैराकाङ्क्ष्याद् । निर्णीतं स्वयमेव श्रीमुखेन—

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमि—॥

त्यादिना । तस्माद्धेत्वाभासकमिदमनुमानं न प्रमाणपदवीमारोढुं शक्नोतीति सिद्धमुक्तसिद्धान्तस्यैव गरीयस्त्वम् ॥

उक्तार्थे शास्त्रं प्रमाणयति—गौरनाद्यन्तवतीत्यादि ॥ गुणानुद्दिशति । गुणाश्चेति । तत्र ज्ञानादिकारणत्वे सति गुणत्वं सत्त्वगुणत्वम् । सत्त्वात्संजायते ज्ञानमिति वचनात् । इदं सत्त्वं ज्ञानसुखाद्यभिमानेन बन्धकारणं रजस्तमोऽभिभवपूर्वकमुत्कटं च सन्मोक्षनिमित्तं च भवति शमदमादिसाधनरूपेणेति विवेकः । लोभादिकारणत्वे सति गुणत्वं रजस्त्वम् । रजसो लोभ एव चेति वचनात् । एतदेव लोभादिना क्षेत्रज्ञानां तत्त्वनिष्ठा प्रच्यवनहेतुः । प्रमादादिकारणत्वे सति गुणत्वं तमस्त्वम् ।

प्रमादमोहौ तमसो भवतो ज्ञानमेव चेति
वचनाद् । इदमेव स्वपरस्वरूपावरणहेतुभूतम् ।

अथ प्राकृतस्य फलं दर्शयति-तदेवेति । एवकारोऽन्ययोगव्यवच्छेदार्थकः । स चाप्राकृतं वस्तु व्यावर्तयति, प्राकृतमेव बन्धहेतुर्नाप्राकृतमित्यर्थः । स्वगुणैरुक्तलक्षणैः सत्त्वादिभिः । यद्यपि सत्त्वगुणस्य मोक्षहेतुत्वमपि निरूपितं, तथाऽपि ज्ञानसुखादिसङ्गेन बन्धकत्वं तस्यापि गीतत्वात् तदभिप्रायेण बन्धहेतुत्वं प्रतिपाद्यत इत्यर्थः ।

सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघेति—

गानात् । क्षेत्रज्ञानामिति । अनादिकर्मात्मकाविद्यासंकुचितज्ञानानामित्यर्थः । देहो द्विविधः । सूक्ष्मस्थूलभेदात् । इन्द्रिया-

णि द्विविधानि। ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च। तत्र श्रोत्रत्वक्-चक्षूरसनघ्राणभेदात् पञ्च ज्ञानेन्द्रियाणि। तेषां शब्दस्पर्शरूपरसगन्धविषयकज्ञानकारणत्वात्। वाक्पाणिपादपायूपस्थानां पञ्चानां च वचनादानगत्युत्सर्गानन्दानां कर्मणां हेतुत्वात् कर्मेन्द्रियत्वं ज्ञेयम्। बुद्ध्यादिरूपेणेयत्रादिपदेन चित्ताहङ्कारादिसंग्रहः। महदादिब्रह्माण्डान्तं कार्यं प्रकृतिकार्यत्वात् त्रिगुणात्मकद्रव्यत्वाच्च सर्वं प्राकृतमेवेति संक्षेपः।

इत्थं प्राकृतं निरूप्याप्राकृतं संग्रहीतुमुपक्रमत उद्देशलक्षणप्रमाणैः।

अथेत्यादिना।

अथाप्राकृतं नाम त्रिगुणप्रकृतिकालात्यन्तभिन्नमचेतनं च। आदित्यवर्णं तमसः परस्तादिति श्रुतेः। तच्च प्रकृतिमण्डलभिन्नदेशवृत्तिनित्यविभूतिविष्णुपदपरमव्योमपरमपदादिशब्दाभिधेयम्। योऽस्याध्यक्षः परमे व्योमन् तिष्ठति, तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, एते वै निरयास्तात लोकस्य परमात्मन इत्यादिवचनेभ्यः। तच्च भगवतीयानादिसङ्कल्पात्तस्य तदीयानां नित्यमुक्तानां च भोग्यादिरूपेणानेकरूपं परिणामादिविक्रियाऽनर्हं च। कालातीतत्वात्।

कलामुहूर्त्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः।

तवाष्टगुणमैश्वर्यं नाथ ! स्वाभाविकं परमि
त्यादिवचनात् ।

अथानन्तरं प्राकृतवस्तुनिरूपणानन्तरं तत्राप्राकृतं नामेत्युद्देशः । उद्दिष्टस्य लक्षणमाह–त्रिगुणप्रकृतिकालविलक्षणप्रकाशात्मकानावरकस्वभावत्वे सत्यचेतनमिति । उक्तार्थे श्रुतिं प्रमाणयति–आदित्यवर्णमिति । आदित्यवर्णमित्यनेन प्रकाशरूपत्वम् अनावरकत्वं चोक्तम् । तमसः परस्तादित्यनेन च तमःशब्दवाच्यप्रकृतिकालाभ्यां विलक्षणत्वमित्यर्थः । एवं सामान्यतो निरूप्य तस्य विशेषं संग्रहीष्यन् तत्पर्यायविशेषानाह । तच्च प्रकृतिमण्डलभिन्नदेशवृत्तिनित्यविभूतिविष्णुपदपरमव्योमपरमपदादिशब्दाभिधेयमिति । उक्तपर्यायेषु श्रुतिमुदाहरति–योऽस्याध्यक्षः परमे व्योमन्नित्यादिना । तस्य विशेषान्तरमाह–तच्चेत्यादिना । भगवतीयो य आत्मवदनादिसंकल्पस्तस्मात्कारणात् । तस्य श्रीभगवतः । तदीयानां पार्षदादीनाम् । तेषां द्वैविध्यमाह–नित्यमुक्तानां चेति । नित्याश्च मुक्ताश्च तेषामिति द्वन्द्वसमासोऽत्रानुसन्धेयः । तत्र नित्यानां विग्रहस्यानादित्वमनादियोगश्च । मुक्तानां तु विग्रहस्यानादित्वेऽपि तद्योगमात्रस्य मोक्षावस्थायां भगवत्प्रसादैकलभ्यत्वप्रकृतिसम्बन्धनिवृत्तिकालीनत्वमिति विवेकः । भोग्यादिरूपेणेत्यत्रादिपदेन भोगोपकरणं भोगस्थानं च गृह्यते । तत्र नित्यमुक्तानां भोग्यं भगवद्विग्रहादि, भोगोपकरणं च स्वविग्रहादि भूषणायुधयानासनकुसुममुगन्धस्रक्चन्दनादिकं च, भोगस्थानानि च गोपुरचत्वरप्राकारमणिमण्डपसरोवरोपवनादिकानि । तत्र परिणामादिविकारशङ्कां वारयति–परिणामादि-

विक्रियाऽनर्हं चेति। निर्विकारत्वं हेतुमुखेन प्रतिपादयति—कालातीतत्वादिति। उक्तमर्थं शास्त्रोक्तेन द्रढयति—कलामूहूर्त्तादीति। तत्र कालप्रभावाभावान्निर्विकारत्वमित्यर्थः। तन्मूलकानुमानं चाप्यत्र प्रमाणम्—अप्राकृतद्रव्यं निर्विकारं कालातीतत्वाद् यदेवं तदेवम्, आत्मवदिति, व्यतिरेके च यन्नैवं तन्नैवं पृथिव्यादिवदिति।

ननु लीलाविभूतेः कालाधीनत्वदर्शनादुक्तस्य हेतोरनैकान्तिकत्वादप्रामाण्यमिति चेन्न।

लीलाविभूतौ परमेश्वरस्य कालपारतन्त्र्यानुकरणमात्रत्वान्नोक्तदोषावकाशः। नित्यविभूतौ तु न तच्छङ्काऽवकाशगन्धोऽपीति वक्ष्यते कालनिर्णयसंदर्भ इत्यप्राकृताचेतनसंग्रहः।

प्रतिज्ञातेषु त्रिविधाचेतनविषयेष्ववशिष्टं कालं लक्षणप्रमाणाभ्यां निर्णेतुकामः प्रथमं तल्लक्षणमाह। अथ प्राकृताप्राकृतोभयभिन्नाचेतनद्रव्यविशेषः कालपदार्थ इति।

अथ प्राकृताप्राकृतोभयभिन्नाचेतनद्रव्यविशेषः कालपदार्थो नित्यो विभुश्च। अथ नित्यानि ह वै पुरुषः प्रकृतिः काल इत्यादिश्रुतेः। सदेव सोम्येदमग्र आसीदिति श्रुतौ सृष्टेः प्रागग्रशब्दवाच्यस्य कालस्य सत्यत्वश्रवणाच्च।

अनादिर्भगवान् कालो नान्तोऽस्य द्विज! विद्यते,

न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते, इत्यादिस्मरणाच्च। स च भूतभविष्यद्वर्त्तमानयुगपत्चिरक्षिप्रादिव्यवहारासाधारणहेतुः सृष्ट्यादिसहकारिपरमाणवादिपरार्द्धावसानव्यवहारासाधारणं च। सस्य च पुराणेषु प्रसिद्धत्वान्नात्र विस्तारः। सर्वमपि प्राकृतवस्तु कालतन्त्रम्। कालस्य सर्वनियामकत्वेऽपि परमेश्वरनियम्यत्वमेव। ज्ञः कालकालो गुणी सर्वविद्य इतिश्रुतेः। लीलाविभूतौ तु परमेश्वरस्य कालपारतन्त्र्यानुकरणमात्रमेव। नित्यविभूतौ तु न तत्प्रभावशङ्कागन्धोऽपीति विवेकः।

अथ प्राकृताप्राकृतद्रव्यनिर्णयानन्तरमित्यर्थः। स नित्योविभुश्चेति। अथोक्तार्थे श्रुतिम्प्रमाणयति—अथ नित्यानि ह वै पुरुषः प्रकृति काल इति।

ननु सदेव सोम्येदमग्र आसीदित्यत्र कालस्य भूतत्वनिर्देशाद् अनित्यत्वमेव, ध्वंसाभावप्रतियोगिन एव वस्तुनो भूतत्वनिर्देशदर्शनान्नोक्तसिद्धिरिति चेत्।

तत्र श्रुत्यन्तरमुदाहरन्नुपपत्तिं दर्शयति तन्मुखेनैव, सदेव सोम्येदमग्र आसीदिति श्रुतौ सृष्टेः प्रागग्रशब्दवाच्यस्य कालस्य सत्यत्वश्रवणाच्चेति। न हि ध्वंसाभावप्रतियोगिन एव भूतत्वनिर्देशार्हत्वमिति नियमः, तस्मिन्नेव

वाक्ये नित्यशुद्धस्य ब्रह्मणो भूतत्वनिर्देशश्रवणात्। तस्यापि ध्वंसाभावो भवद्भिरङ्गीकार्य एव तथा सति ब्रह्मणो मिथ्यात्व-साम्यमेव। अयं भावः। कालस्य नित्यत्वादखण्डत्वेऽपि औपाधिककार्यरूपेणानित्यत्वस्यापीष्टत्वात् सर्वं समञ्जसम्। उपाधिश्च-सूर्यपरिभ्रमणरूपा क्रियैव। तेनैवोपाधिना परमाण्वादिपरार्द्धावसानसमयनिर्देशो ह्यविरुद्धः। तस्य च पुराणेषु विस्तारितत्वान्महर्षिभिरिति। तदेवार्थतः स्मृतिमुखेनोपोद्बलयति—**अनादिर्भगवान्कालो नान्तोऽस्य द्विज! विद्यत** इति। वैष्णवे तस्यानाद्यनन्तत्वविधानात्। तत्रैव वाक्यान्तरं प्रमाणयति—**नसोऽस्तीति**। तस्य कार्यं संग्रहेण दर्शयति—**स चेति**। उक्तलक्षणः कालः। भूतभविष्यदादिव्यवहारहेतुत्वात्। तद्व्यवहारस्तस्यौपाधिककार्यभूत इत्यर्थः। तस्य शक्तिं दर्शयति-**सर्वमपि प्राकृतवस्तु कालतन्त्रमिति**। यद्यप्यत्र प्राकृतशब्दप्रयोगेणैवेश्वरादिव्यावृत्तिस्तथाऽपि मन्दमतीनां सन्देहनिवृत्तये स्पष्टत्वेनाह—**कालस्येत्यादिना**। **परमेश्वरानियम्यत्वमेवेति**। तस्य सर्वनियन्तृत्वाद्। नियम्यत्वं चात्रोपलक्षणं परमेश्वराधेयत्वं तद्व्याप्यत्वं तदात्मकत्वं चोपलक्षयति। एतेन सेश्वरजगत्कालाधेयमिति पक्षो निरस्तो बोध्यः। उक्तार्थस्य श्रौतत्वयोगं विधत्ते-**ज्ञः कालकाल** इत्यादि। तत्र ज्ञः सर्वज्ञः, सर्वदेशकालवस्तुविषयकसामान्यज्ञानाश्रयत्वात्। यः सर्वज्ञ इति श्रुत्यन्तरात्। कालस्यापि कालो नियन्ता सर्वान्तर्यामित्वादेव, एष सर्वभूतान्तरात्मेति श्रुतेः। **गुणीति**। स्वाभाविकनिरतिशयापरिमितयावदात्मवृत्तिज्ञानशक्तिबलतेजोवीर्यकारुण्यदयाक्षमातितिक्षावात्सल्यसौशील्यार्जवाद्यनन्तकल्याणगुणाब्धिः स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः। सर्ववित्सर्वविशेषज्ञानाश्रयः। ज्ञ इत्यत्र सामान्यज्ञानस्य, सर्वविदि-

त्यत्र विशेषज्ञानस्य चोक्तत्वान्न पौनरुक्त्यदोषः शङ्कनीय इत्यर्थः ।

प्रासङ्गिकपदार्थकथनस्य प्रयोजनमाह–मुमुक्षूणामुपकारार्थमिति ।

मुमुक्षूणामुपकारार्थं संक्षिप्तोऽयं सिद्धान्तः प्रासङ्गिकः, तस्य च श्रीनिवासाचार्यचरणैर्निगदभाषितत्वान्नात्र विस्तारः ।

शङ्कावतारः पुरुषोत्तमस्य
यस्य ध्वनिः शास्त्रमचिन्त्यशक्तिः ।
यत्स्पर्शमात्राद् ध्रुव आप्तकामं-
स्तं श्रीनिवासं शरणं प्रपद्ये ॥

इति ।

मुमुक्षवश्चात्र मन्दमतयः श्रीनिवासाचार्यप्रणीतशास्त्रविचारानर्हास्तदुक्तसिद्धान्तजिज्ञासवोऽलसाः शिथिलप्रयत्ना गृह्यन्ते । तेषामुपकारार्थम् । उपकारश्चाल्पप्रयासेन सर्वशास्त्रार्थविषयकज्ञानप्राप्तिस्तदर्थः ।

नन्वेवं तर्हि विदुषां सर्वविवेकसंपत्तिकुशलानामत्राधिकारो न स्यादित्याशङ्क्याह–तस्य च श्रीनिवासाचार्य्यचरणैरिति । तेषां सर्वशास्त्रविचारसामर्थ्ययोगादाकरसन्दर्भविचारेणापि पुरुषार्थसिद्धिरिति भावः ।

---

१ । तथाच श्रीमद्भागवते चतुर्थस्कन्धे नवमेऽध्याये ।
स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वाऽस्य सर्वस्य च हृद्यवस्थितः ।
कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले ॥
स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ।
तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रितोरुश्रवसं ध्रुवक्षितिरिति ॥

वाक्यावसाने मङ्गलमाचरति सम्प्रदायाचार्यनतिलक्षणं श्रीविश्वाचार्यप्रणीतेन श्लोकेन—शङ्खावतार इति। तं श्रीनिवासमिति। श्रीनिवासाचार्यं शरणं प्रपद्य इति। साधनत्वेन फलरूपत्वेन चाश्रयामीत्यर्थः। तत्स्वरूपमाह-पुरुषोत्तमस्येति। क्षराऽक्षरपदार्थाभ्यामुत्तमस्य श्रीकृष्णस्य शङ्खावतारः। यस्य ध्वनिरचिन्त्यशक्तिरिति। तथाभूतायां शक्तौ हेतुमाह—शास्त्रमिति। शास्त्ररूपत्वात्तद्ध्वनेरचिन्त्यशक्तित्वमित्यर्थः। यद्वाऽचिन्त्यशक्तीति शास्त्रविशेषणम्। तस्याचिन्त्यशक्तियोगस्य सुप्रसिद्धित्वात्। उक्तार्थे प्रमाणं वदन्नचिन्त्यशक्तित्वं व्यनक्ति—यत्स्पर्शमात्रादिति। ध्रुव औत्तानपादिः। यथा पूर्वं स्पर्शमात्रेणैव ध्रुवाय शक्तिं समचारयत् तथैव ममापि तच्चरणाश्रयणादेव शास्त्रप्रवृत्तिशक्तियोगः स्यात्। तस्माच्छ्रेयस्कामैस्तच्चरणारविन्दमेव सकलपुरुषार्थसिद्धये नितरां वरणीयम्। तस्यैव मुमुक्षुगतित्वादिति भावः।

यो ब्रह्माणं विदधाति पूर्वं
विद्यां तस्मै ह्युपदिष्टवांश्च कृत्स्नाम्।
तं श्रीगुरुं सर्वबुद्धिप्रकाशं
देवाऽऽचार्यं सततं चिन्तयेऽहम् ॥

इति ब्रह्मजिज्ञासाऽधिकरणम्।

अथ व्युत्पादितस्य पदार्थस्य लक्षणप्रमाणसापेक्षत्वादनुवादपूर्वकं लक्षणप्रमाणाभ्यां दार्ढ्यार्थं प्रथमं लक्षणसूत्रं व्याख्यातुं प्रतीजानीते—एव मित्यादिना ।

एवं निर्वचनमुखेन व्युत्पादितं जिज्ञास्यं लक्षणमुखेनापि निरूप्यते-जन्माद्यस्ययत इति ।

जन्माद्यस्य यतः १।१।२

जन्माऽऽदिर्यस्य तदिदं जन्मादि, सृष्टिस्थितिलयम्।तद्गुणसंविज्ञानबहुव्रीहिः। लम्बकर्णमानयेतिवत्। अस्येतिशब्दः कार्यपरः। यत इति कारणात्मकब्रह्मवाचकः । यतो यस्मात् सर्वेश्वरात् सर्वज्ञात् सर्वशक्तेःपरमकारणात् सर्वनियन्तुः पुरुषोत्तमाच्छ्रीभगवतोऽस्य विश्वस्य नामरूपाभ्यांव्याकृतस्य त्रिविधविभक्तभोक्तृसंयुक्तस्य नियतदेशकालफलोपभोगाश्रयभूतस्य तर्कागोचररचनस्य जन्मस्थितिप्रलयाः प्रवर्त्तन्ते तद् ब्रह्म तदेव जिज्ञास्यमिति सूत्राक्षरयोजना।यत्तच्छब्दयोर्नित्यसम्बन्धात्। तथा च श्रुतिः—यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद् ब्रह्म तद्विजिज्ञासस्वेत्यादिः ।

एवम् उक्तप्रकारेण। जिज्ञास्यं जिज्ञासाविषयो ज्ञेयमिति यावत्। लक्षणसूत्रं च, जन्माद्यस्य यत इति। लम्बकर्णमिति। यथा लम्बकर्णमित्यस्य सावयवार्थोपस्थापकत्वं तथाऽत्रापीति ज्ञेयम्। पदार्थमुक्त्वा वाक्यार्थमाह—**यतो यस्मादित्यादि**। यस्मात् सर्वेश्वराद्भगवतोऽस्य जन्मादयः प्रवर्त्तन्ते तद् ब्रह्मेत्यन्वयः। पदसन्निवेशप्रयोजनं व्यनक्ति-**सर्वेश्वरेति**। ईश्वरशब्दस्य ब्रह्मादिलोकपालेष्वपि तद्वाचकतया व्यभिचारात् तद्वारणाय—**सर्वेति**। ईश्वरेश्वरादिति यावत्। तमीश्वराणां परमं महेश्वरमिति श्रुतेः। तत्र हेतुगर्भितविशेषणद्वयम्—**सर्वज्ञात् सर्वशक्तेरिति**। वक्ष्यमाणेषु कारणत्वेन प्रतीयमानेष्वन्याभिप्रेतेष्वतिप्रसङ्गवारणाय विशेषणं-**परमेति**। अभिन्ननिमित्तोपादानकारणादिति यावत्।

नन्वभिन्ननिमित्तोपादानस्य क्वाप्यदृष्टत्वात् कथमेवं व्याख्यायत इति चेन्न। कस्य चिन्मते घटेश्वरसंयोगादौ जीवगतज्ञानादौ च कार्य ईशजीवयोस्तथाभूतकारणत्वदर्शनान्नात्यन्ताप्रसिद्धिः। तदृष्टान्तेनात्रापि तथात्वं सिद्ध्यत्येव। न केवलमेतावतैव तर्केण प्रामाण्यं, "प्रकृतिश्चे"ति शास्त्रस्यापि वक्ष्यमाणस्य प्रमाणत्वात् सुतरामसम्भवाभावः। तत्रापि हेतुमाह—**सर्वनियन्तुरिति**। भगवच्छब्दस्यान्यत्रापि जीवे गौणत्वेनातिव्याप्तेस्तच्छङ्कां निरस्यति—**पुरुषोत्तमादिति**। कार्यं विशिनष्टि—**नामरूपाभ्यामिति**। नाम देवदत्तादि, रूपमाकृतिर्देवतिर्यङ्मनुष्यादि, ताभ्यां, नामरूपे व्याकरवाणीति श्रुतेः। **व्याकृतस्य**। विकारभाजितस्य। **विविधविभक्तभोक्तृसंयुक्तस्येति**। विविधैरनेकैर्विभक्तैरनादिकर्मतन्त्रतया स्वस्वकर्मानुरूपविभागवैचित्र्यं भजद्भिर्भोक्तृभिस्संभिन्नस्येति। अनेन जीवानामनेकत्वे विचित्रकर्मणां चानादित्वे सिद्धे सति विश्वस्याप्यनादित्व-

सिद्धितरत्वेन सत्कार्यवादस्य सुतमां सिद्धिः सूचिता । तथा च श्रुतिः—ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातन इति । अथैनमाहुः सत्यकर्मेति । सत्यं ह्येवेदं विश्वमसौ सृजते । अथैनमाहुर्नित्यकर्मेति, नित्यं ह्येवासौ कुरुत इत्यादि । ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति भगवदुक्तेश्च । कथं तर्ह्युत्पत्तिरुच्यते । शृणु । न तावत्कूटस्थत्वमस्य जगतोऽस्माकं विवक्षितं, किं तु जडाजडवेदात्मकस्य प्रपञ्चस्य मध्ये जडस्य परिणामिसत्तावत्त्वेन स्थूलसूक्ष्मावस्थाऽन्तरव्यक्ताव्यक्तनामरूपान्तरविभागेनावस्थितिरत्रोत्पत्तिप्रलयशब्दाभ्यां प्रतिपाद्यते । चेतनस्य तु स्वानादिकर्मणामनन्तानां प्रबलस्यैकतमस्य भोक्तुमौन्मुख्याय स्थूलशरीरसंयोगे सति तद्भोगार्हज्ञानशक्त्यादिप्रकाशनं जन्मशब्देन विवक्षितम्। तदत्यन्तास्मरणे स्थूलदेहवियोगपूर्वकं भोगाद्यनर्हताऽऽपत्तिर्मृत्युनाशादिशब्दैरभिधीयते । प्रमादं वै मृत्युमहं ब्रवीमीति स्मृतेः। इतरथा कृतनाशाकृताभ्यागमप्रसङ्गस्य दुर्वारत्वात् । वेदानां जन्मादयस्तु निर्विकारित्वेनैवाविर्भावतिरोभावमात्रं, नत्वानुपूर्व्यन्यथाभावः ।

ननु तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे इति जन्मश्रवणादिति चेन्न ।

अत्रापि वाक्ये जनिशब्देनाविर्भावमात्रमेव विवक्षितम् । अन्यत्र च, "अस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदः" इत्यादिना ब्रह्मनिःश्वासितन्यायेनाविर्भूतेरेव स्पष्टतया प्रतिपादनात् । तस्मात् सत्कार्यवादस्यैव श्रुतिसम्मतत्वेन श्रीभगवत्सूत्रकृतां सुतरां सम्मतत्वम् ।

ननु वेदस्य यदि जन्मादि नास्ति तर्हि तदभ्युपगमे पुनश्चौपचारिकत्वसाधने महाप्रयासे किं फलं स्यात्। उच्यते। तदुत्पत्ते-

श्चौपचारिकत्वस्य च श्रुतिप्रतिपादितत्वेन श्रुत्यर्थसिद्धेरेव फलत्वं भगवतो वेदकारणत्वसिद्धेरपि फलत्वमनपन्हवमिति। अयं भावः। वेदस्योत्पत्तिराविर्भूतिरूपा वेदेनैव प्रतिपाद्यते, तदनङ्गीकारे श्रुतेर्निर्विषयत्वं दुष्परिहार्यम्। तदर्थं वैदिकानां तदुक्तेरभ्युपगमः। किं च भगवतः सर्वकारणत्वं प्रतिज्ञातं, वेदस्याविर्भावाऽभावाङ्गीकारे तदव्याप्तं स्यात्, तस्माद्वेदस्याप्याविर्भावरूपोत्पत्तेरुभयसिद्धान्तयोगक्षेमावश्यतयाऽङ्गीकार्य्यत्वमित्यलं विस्तरेण प्रासङ्गिकेन। प्रकृतमनुसरामः। अस्य सर्वज्ञानन्यकार्यत्वं द्रढयति विशेषणाभ्यां—नियतेत्यादि। नियतौ संस्कारानुरूपौ देशकालौ येषां तथाभूतानां फलानां तदुपभोगानां चाश्रयभूतस्यात एव सर्वेषां तर्कागोचरं रचनं यस्येति। न चैवंभूतकार्यस्य सर्वज्ञादन्यस्य कारणत्वं भवितुमर्हति। मनसा तर्क्यमाण एव कार्ये स्वज्ञानपौरुषाद्यनुसारेण कर्तुः प्रयत्नस्य दर्शनादिति भावः। मायावादिमते जगत्कारणत्वोपलक्षितस्य ज्ञेयत्वप्रतिपादनात्तत्र व्यभिचारनिवृत्तये श्रौतेनैव तत्पदेन प्रतिज्ञापयति—तदेव जिज्ञास्यमिति। सूत्राच्चरेति। सूत्रगतानां पदानां योजनाऽन्वय इत्यर्थः। तद् ब्रह्मेत्यत्र तच्छब्दाध्याहारे किं मानमित्याशङ्क्य नित्यसम्बन्धस्यैव मानत्वमाह—यत्तादिति। सम्बन्धस्योभयनिष्ठत्वेनैककथनस्योभयग्राहकत्वमनवद्यमिति भावः। तत्र प्रमाणशङ्कावारणाय विषयवाक्यमवतारयति-तथा चेति। यतो वा इत्यादिश्रुत्यर्थस्तु सूत्रार्थेनैव व्याख्यातः। किं च जन्ममात्रस्यैव लक्षणत्वे पित्रादीनामपि पुत्रादिजन्मकारणत्वात्, तत्रातिप्रसङ्गवारणायाभिसंविशन्तीति। उभयस्यापि लक्षणत्वे मृदादौ व्यभिचारस्तेषामपि घटादेरुत्पत्तिलययोः कारणत्वस्य प्रसिद्धत्वात्तद्व्यावृत्तयेऽसाधारणं विशेषणद्वयमाह—येन जातानि

जीवन्ति यत्प्रयन्तीति। प्रपदसन्निवेशप्रयोजनं तत्र प्रयन्तीति प्रकर्षेण कर्मबन्धध्वंसेन यन्ति प्राप्नुवन्तीति मुक्तानां प्राप्यत्वं सूच्यते। वक्ष्यते च, मुक्तोपसृप्येत्यादिसूत्रेण। अभिसंविशन्तीत्यनेन प्रलयकालिकप्रवेशो विवक्षितोऽतो न पौनरुक्त्यशङ्काऽवकाश इति। कैश्चित्तु सृष्टिस्थितिसंहारनियमज्ञानाज्ञानबन्धमोक्षा अष्टौ जन्मादिपदेन व्याख्यायन्ते। तच्चिन्त्यम्। विषयवाक्येऽपठनात्। अन्यथा सुखं दुःखम्भवो भाव इत्यत्रोक्तानाम्, अन्यत्र चोक्तानां च सर्वेषामेव लक्षणत्वप्राप्तेरिति भावः।

एवं वाक्यार्थो व्याख्यातः। इदानीं स्वसिद्धान्तासहिष्णुतावतां कारणे विवदमानानां मतं स्वयं प्रेक्षको भूत्वा तेषां मुखेनैवैकैकं निरासयति। तत्र प्रथमजीवकारणवादी उत्तिष्ठते—नन्वित्यादि।

ननु सामान्यनिर्देशस्य विशेषपारतन्त्र्यादिति न्यायेन यत इति सामान्योक्त्या,

जीवाद् भवन्ति भूतानि
जीवे तिष्ठन्त्यचञ्चलाः।
जीवे प्रलयमिच्छन्ति
न जीवात् कारणं परमिति—

श्रुत्या विशेषत्वेन विधानाज्जीवस्यैव कारणत्वमिति चेन्न।

सदेव सोम्येदमग्र आसीद्,एकमेवाद्वितीयमित्यादिना कारणस्यैकत्वप्रतिपादनात्, चेतनश्चेत-

नानामित्यादिना, अंशो नानाव्यपदेशादित्यादिना च जीवानामनन्तत्वोक्तेर्जीवकारणवादे बहुत्वप्रसङ्गान्न जीवस्य कारणत्वं, किं तु, हिरण्यगर्भः समवर्त्तताग्रे, आदिकर्त्ता स भूतानां ब्रह्मा ऽग्रे समवर्त्तत, ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य गोप्तेतिश्रुत्या सर्वप्रसिद्धया च एकत्वपूर्वकारणत्वप्रतिपादनाच्चतुर्मुख एव जगत्कारणमिति चेन्न ।

तस्य पुर्ववर्त्तित्वासिद्धया कारणत्वस्याप्यसिद्धत्वात्। तथा हि। न सन्न चासच्छिव एव केवल इत्यन्यनिषेधपुरस्कारेण पूर्ववर्त्तित्वं केवलत्वं चोच्यते। तथैव हिरण्यगर्भस्यावरत्वमपि, हिरण्यगर्भं पश्यति जायमानमिति। अतः शिवस्यैव जगत्कारणत्वं निश्चीयत इति चेन्न ।

तस्यापि कालादिपारतन्त्र्यात्। तथा च। ममापि कालो ग्रसते कुतः पुत्र ! रसायनमित्यादिना स्कन्दं पुत्रं प्रति स्वयमेव त्रिलोचनेनोक्तत्वात् ।

कालं तथाऽन्ये इति श्रुतेः। तथाच षष्ठेंऽशे बादरायणः ।

कालो भवाय भूतानामभवाय च पाण्डव !।

कालमूलमिदं ज्ञात्वा भव स्थैर्यधरोऽर्जुन !॥
सृष्टाः कालेन, कालेन पुनर्यास्यन्ति संयमम् ।

कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहीति-स्मृतेश्च ।

काल एव जगद्धेतुर्भवत्विति चेन्न । श्रुत्या कालवादिनां भ्रान्तित्वप्रतिपादनात् । "कालं तथाऽन्ये परिमुह्यमाना" इति । तत्रैव स्वभाववादिनां विवेकित्वप्रतिपादनात् । स्वभावमेके कवयो वदन्तीति ।

स्वभाव एव जगत्कारणमिति चेन्न । अघटितत्वात् । तन्मते च न कारणसापेक्षं कार्यम्, अपि स्वत एव । तत्र पृच्छ्यते, स्वाभाविकं जगदिति प्रतिज्ञायां तत्साधको हेतुरस्ति, न वेति । भावपक्षे स्वभाववादहानिर्यत्तत्र साधनं हेत्वन्तरं तदेव तत्र मुख्यकारणं, तस्य चौपचारिकत्वापत्तेः । द्वितीये हेत्वन्तराभावपक्षे मूकताऽऽपत्त्या प्रतिज्ञाभङ्गः । तस्मान्न स्वभाववादसिद्धिः ।

स्यादेतत् । तेषामुक्तैर्हेतुभिः कारणासिद्धता । किञ्चासदेव सोम्येदमग्र आसीत्ततः सदजायत इति छान्दोग्यवाक्याद्, अक-

स्माद्धीदमाविरासीदकस्मात्तिष्ठति अकस्माल्लय-
मभ्युपैतीत्यादेश्च, न कोऽपीत्येकः सर्वाभावस्तस्यैव
नैयायिकानां मते घटादीनां कारणत्वं प्रागभा-
वस्येव जगद्धेतुत्वं घटते। तस्मादभाव एव जग-
त्कारणमिति चेन्न। स्वतोऽभावरूपस्य गगनकु-
सुमायमानस्य भावात्मककार्योत्पादनेन कथमप्य-
सामञ्जस्यात्। नहि शशविषाणादीनां कार्य्योत्पा-
दनं कुत्रापि दृष्टिश्रुतिगोचरः। तस्मान्नाभावो जग-
द्धेतुः। दृष्टान्तस्यापि तार्किकाणां स्वबुद्ध्योत्प्रेक्षित-
त्वेनाऽप्रामाण्याद्, दार्ष्टान्तविरुद्धत्वाच्चेति दिक्।

सामान्यनिर्देशस्य। यत्तच्छब्दनिर्देशस्य। विशेषपार-
तन्त्र्यादिति। तद्गुणजात्याद्येकतमासाधारणधर्मवाचकशब्दा-
धीनत्वादित्यर्थः। यत इति। यतो वा इमानि भूतानि जायन्ते
येन जातानि जीवन्त्यत्र विषयवाक्ये, सूत्रे च यच्छब्दपाठस्य
सामान्यत्वापेक्षया, जीवादित्यस्य रूढितया निरपेक्षत्वेन विशेष-
त्वात्, सामान्याद्विशेषस्य बलीयस्त्वाज्जीव एव कारणमिति
शङ्काभागार्थः।

तन्मतं चतुर्मुखादिशब्दवाच्यजगत्कारणवादिमुखेन दूष-
यति—नेति। बहुत्वप्रसङ्गादित्यत्र "कारणे"तिशब्दस्य प्रकरणात्
समाकर्षः। कारणबहुत्वप्रसङ्गादित्यर्थः। सर्वेषां सर्वकारणत्वे सिद्धे
सति स्वस्यापि जीवत्वाविशेषेण सर्वकारणान्तःपातित्वेन च
स्वकारणत्वे सिद्धे सत्यन्योन्याश्रयात्माश्रयौ प्राप्नुत इति गूढो-

ऽभिप्रायः। न च सिद्धान्तेऽप्यतिप्रसङ्गः, कारणत्वाविशेषादिति वाच्यम्। औपनिषदानामस्माकं पक्षे तु कारणस्यैकत्वेन नान्योन्याश्रयत्वशङ्कागन्धस्पर्शोऽपि। परिशिष्टमात्माश्रयत्वं भूषणायैव, तस्य तु श्रुतिभिर्ब्रह्मलक्षणतया प्रतिपादनादिति प्रासङ्गिकः स्वसिद्धान्तः।

एकत्वस्य तु निर्दूषणत्वमाकलय्य हर्षभराक्रान्तो हैरण्यगर्भः स्वमतमुपक्षिपति—किं त्वित्यादिना।

एकत्वपूर्ववर्तित्वेति। अनेन कारणस्य सामान्यलक्षणं द्योतितम्। अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम्। तस्य च चतुर्मुखे व्याप्तिदर्शनात् तस्यैव कारणत्वमविवादमिति।

तन्मतं च पाशुपतमुत्थाप्य तद्द्वारेण निरासयति लक्षणाऽव्याप्तिरूपेणैव हेतुना—नेति। तत्र हेतुमाह—तस्य पूर्ववर्तित्वासिद्ध्येति। लक्षणसमन्वयाभावे लक्ष्यसिद्धेरभावादित्यर्थः। तदेव विवृणोति—तथा हीति। तत्र प्रमाणशङ्कायां श्रुतिं पठति—न सदित्यादि। हिरण्यगर्भावरत्वमपि श्रुतिपाठेन द्रढयति—हिरण्यगर्भं पश्यति जायमानमित्यादि। तदपि कालवादिमतेन दूषयितुं प्रतिजानीते—नेति। प्रतिज्ञातेऽर्थे हेतुमाह—तस्यापीति। कालपारतन्त्र्यादित्युपलक्षणं, कर्मपरतन्त्रत्वादपीति। तथा भारते राजधर्मे देवस्थानवाक्यम्—

महादेवः सर्वयज्ञे महात्मा
हुत्वाऽऽत्मानं देवदेवो बभूव।
विश्वांल्लोकान् व्याप्य विष्टभ्य कीर्त्या
विराजते द्युतिमान् कृत्तिवासा इति॥

काल एव जगद्धेतुर्भवत्विति चेदिति शङ्कां स्वभाववादिना निरासयति—नेति। कालवादस्य मोहमयत्वान्न कारणमिति भावः।

स्वभाववादी स्वस्य कवित्वमाकलय्याकाराविश्लेषं चाविचार्य प्रफुल्लमुख आह—स्वभाव एव जगत्कारणमिति। स्वभाववादः स्वयमेव निरस्यते निपुणैर्ग्रन्थकृद्भिः—नेति। तत्र प्रतिज्ञातमर्थं हेतुना द्रढयति—अघटितत्वादिति। अघटनां प्रपञ्चयितुं प्रतिजानीते—तथा हीति। तदेव प्रपञ्चयतीत्यर्थः। अथ तन्मतमनूद्य निरासितुं—तन्मते चेत्यादि। न कारणेति। न कार्यं कस्यापीत्यर्थः। अपि तु स्वत एव स्वाभाविको नानीदृश इति।

परमतानुवादस्य तन्निरासफलकत्वान्निरसितुमुपक्रमते—तत्र पृच्छचत इत्यादिना।

नन्वनुमानस्याप्यत्र प्रामाण्यान्नोक्तदोषः,। जगन्न कार्य्यं स्वाभाविकत्वात् परमत आत्मवदिति चेन्न। उक्तप्रयोगस्य सत्प्रतिपक्षात्मकेन हेत्वाभासेन ग्रस्तत्वान्न स्वभाववादसिद्धिः। तथा हि जगत् कार्यं परिणामादिमत्त्वात् स्थूलदेहादिवद्, व्यतिरेक आत्मवदिति। तस्मान्न कथंचित् स्वभावस्य कारणत्वम्।

आस्तिककल्पानां मतस्य परिहासविषयतां श्रुत्वा प्रसन्नवदनोऽभाववादी उत्थायेष्टापत्त्याऽभ्युपगच्छति—स्यादेतदिति। एतेषां कारणाभावत्वम् इष्टमेवेति भावः। स्वाभिप्रायं व्यनक्ति—किं त्वित्यादि। तस्येति। तस्य सर्वाभावस्यैव जगद्धेतुत्वमित्यन्वयः। तत्रोपमानं प्रमाणयति—नैयायिकानामिति। यथा नैयायिकानां मते प्रागभावस्य घटादिकारणत्वेनाभ्युपगमस्तथाऽस्माकमपीत्यर्थः। श्रुतीः स्वतात्पर्यानुसारेण व्याचष्टे—न कोऽपीत्येक इति। नसत्, असदि ति ज्ञेयम्। सिद्धान्तमाह-सर्वाभाव इति। उपसंहरति-तस्मादभाव एवेति। तद् दूषयति—नेति। तत्र हेतुः—स्वतोऽभावरूपस्येति।

गगनकुसुमायमानस्य गगनकुसुम इवाचरतः । आचरणार्थकप्रत्ययान्नामधातोः प्रयोगः साधीयान् । हेत्वर्थमुद्घाटयति—न हीत्यादि । तथात्र प्रयोगः । अभावकार्यत्वाभाववज्जगत् । भावत्वात् । व्यतिरेके शशशृङ्गताडनजन्यक्षतजोत्पत्तिवत् । उपमानस्यापि प्रमाणाभासत्वमाह—दृष्टान्तस्यापीति । दार्ष्टान्तविरुद्धत्वादित्यस्यायं भावः । यद्यपि नैयायिकैः प्रागभावस्य कारणत्वमभ्युपगतं, तथापि निमित्तकारणस्यान्तःपातित्वमात्रेणैव । न तूपादानापरपर्यायतयाऽभ्युपगम्यमानेन समवायित्वेन । अत्र तु मुख्यकारणत्वेन प्रतिपादनं सुतरां विरुद्धमिति । प्रकृतं संक्षिप्यते—इति दिगिति । अन्येषामग्रे वक्ष्यमाणत्वादित्यर्थः ।

अभाववादी तूष्णींभावमापन्नप्रायं सिद्धान्तिनं ज्ञात्वा पुनश्चोदयति—नन्विति ।

ननु यद्येतेषां मध्ये न कस्यापि कारणत्वं तर्हि फलतः शून्यवादस्यैव भवतामभ्युपगमः स्यादिति चेन्न । स देव सोम्येदमग्र आसीद्, ब्रह्म वा इदमेकमेवाग्र आसीदात्मा वा इदमेक एवाग्र आसीदेको ह वै नारायण आसीद् विष्णुस्तदासीद्धरिरेव निष्कलः नैव किंचनाग्र आसीद्दिव्यो देव एको नारायण इत्यादिश्रुतिकदम्बप्रतिपाद्यस्यैव श्रीभगवत्सूत्रकारबुद्धिस्थत्वेन तस्यैव तेन भगवता यच्छब्दोच्चारणेन परामर्शात्तस्यैव जगत्कारणत्वमिति

अयं भावः । सर्वेषां पूर्वोक्तानां कयाचिद्विवक्षया कारणत्वेऽपि तेषामपि कारणत्वेन यस्य प्राधान्यं तस्यैकत्वं कारणत्वं च श्रुतिभिरेव निर्णीयते। तथा च श्वेताश्वतराणां सिद्धान्ते ब्रह्मवादिनो वदन्ति ।

किंकारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च संप्रतिष्ठाः ।
अधिष्ठिताः केन सुखेतरेषु
वर्त्तामहे ब्रह्मविदो व्यवस्थाम् ॥
कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एकं न त्वात्मभावाद्
आत्माप्यनीशः सुखदुःखहेतुः ॥
ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम् ॥
यः कारणानि निखिलानि तानि
कालात्मयुक्तान्यधितिष्ठत्येकः—

इति प्रश्नोत्तरचिन्तया स्पष्टम् । अग्रेऽपि,

स कारणं कारणाधिपाधिपः
न तस्य कश्चिज्जनिता, न चाधिपः ।

इति कारणाकारणत्वं प्रतिपाद्य तस्यानन्य-कारणत्वं स्पष्टितमिति ॥

प्रधानपुरुषव्यक्तकालानां कारणं हि यत् ।
पश्यन्ति सूरयो नित्यं तद्विष्णोः परमं पदम् ॥
इति स्मृतश्च ।

न कस्यापीति । एतेषां पूर्वोक्तानां मध्ये एकतमस्यापि न कस्य चित्। फलत इति । मायावादिनामभिप्रेतनिषेधावधिकत्वन्यायेनेव शून्यवादस्यैवेति अस्माकमभिप्रेतस्येति । एवकारेणान्ययोगव्यवच्छेदकत्वं सूचयति । तन्निरासपुरस्कारेण स्वसिद्धान्तमाह—नेति । श्रुतिकदम्बप्रतिपादितस्यैव सिद्धान्तस्य भगवत्सूत्रकृतां बुद्धिस्थत्वेन हेतुना । तस्य कारणस्य श्रुतिप्रसिद्धस्य तेन सूत्रकृता लक्षणसूत्रे यत इति यच्छब्देन परामर्शादिति । पुनः शङ्कापरिच्छेदार्थं निर्गलितार्थमाह—अयं भाव इति। कयाचिद्विवक्षयेति यथा घटादिकार्यापेक्षया पृथिव्याः कारणत्वं, पृथिव्यपेक्षयाऽपां, तदपेक्षया तेजसः कारणत्वं, तथा यत्किञ्चित्कार्यापेक्षया तेषामपीति। तत्रान्यप्रमाणापेक्षानिवृत्तये श्रुतीनां पाठेनैव निरपेक्षप्रमाणेन सिद्धान्तमाह—तथा च श्वेताश्वतराणां सिद्धान्ते इति । स एवास्माकं सिद्धान्त इति तात्पर्यार्थः । तामेवोपनिषदं पठति—ब्रह्मवादिन इत्यारभ्य, अधितिष्ठत्येक इत्यन्तेन कारणं निर्णीतम् । प्रश्नोत्तरचिन्तया सिद्धान्तरीत्या। अग्रेऽपि उपसंहारेऽपि उपक्रमोपसंहाराभ्यां सिद्धान्तमित्यर्थः । अन्येषां कारणानां तेजआदीनाम्, अधिपानां कालादीनां चाधिप इत्युपसंहारवाक्यार्थः । तेजआदीनां

कारणत्वेऽपि आकाशादीनां कारणकारणत्वेऽपि अन्यकार्यत्वं सुप्रसिद्धम् । तन्न्यायस्यात्राव्याप्तिदर्शनात्तथात्वशङ्कावारणाय श्रुत्यन्तरं पठति—**न तस्य कश्चिज्जनिता न चाधिप** इति । परमते परमाणुप्रधानादीनां जन्यत्वाभावेऽपि परनियम्यतास्वीकारात् तन्न्यायावतारनिवृत्तये—न चाधिप इतिदलसंनिवेश इति । एतदर्थं स्वयमेवाह ग्रन्थकारः "**कारणकारणत्वं प्रतिपाद्यानन्यकारणत्वं स्पष्टितामिति**" । नान्यः कारणं यस्य तस्य भावस्तत्त्वमन्यकारणराहित्यमिति यावत् । तथा चोद्योगपर्वणि संजयवाक्यम् ।

कालचक्रं जगच्चक्रं युगचक्रं च केशव ।
आत्मयोगेन भगवान् परिवर्त्तयतेऽनिशम् ॥
कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च ।
ईशते भगवानेकः सत्यमेतद्ब्रवीमि ते—इति ॥

प्रतिज्ञापूर्वकः सिद्धांतः । श्रुत्यर्थस्तु—ब्रह्मवादिनो मुनयः । **किंकारणं ब्रह्मेति** । किंप्रकारकं कारणं निमित्तं वोपादानं वोभयात्मकं वेति । **कुतो जाताः स्म** तत्राप्याकाशादिजडवर्गवत् स्वविकृतितया वा, स्थूलशरीरभजनकर्मभोगार्हज्ञानप्रकाशमात्रेण वेति । **केन वा जीवाम इति** । केनाऽदृष्टादिना वेश्वरेण वेति । **क्व च संप्रतिष्ठाः**, मोक्षावस्थाभाजिताः कस्मिन्नधिष्ठाने स्थास्याम इति । **केन** देवैरिन्द्रियप्रवर्तकैरीश्वरेण वा **ऽधिष्ठिता** नियमिताः सन्तः, **सुखेतरेषु** सुखदुःखेषु पुण्यापुण्यकर्मफलभूतेषु **वर्त्तामहे** इति । हे ब्रह्मवादिनो व्यवस्थां 'ब्रूत' इति शेषः । न तावत्कालादीनां कारणत्वादिभावसंभवः पारतन्त्र्यादित्याहुः—**काल** इत्यादि । तत्र **नियतिर्मीमांसकाभिप्रेतपुण्यापुण्यनियमः, यदृच्छा कारणाभावः, योनिः सांख्यै**

रभिप्रेता प्रकृतिः, पुरुषो हिरण्यगर्भः, कालादीनां संयोगोपि न कारणं प्रत्येकं किमुत वक्तव्यम्। कुतः, आत्मनो भोक्तुर्भावात् भोग्यत्वेन तेषामकारणत्वम्। आत्मा प्रत्यगात्माऽपि न कारणं, यतोऽनीशः सुखदुःखाधीनः। ते च मुनयो ध्यानयोगानुगताः सन्तो ध्याननिष्ठिता भूत्वा देवात्मशक्तिं देवस्यात्माख्यां जीवभूतां परां शक्तिं स्वगुणैर्निगूढां सत्त्वादिभिर्निगूढाम् अपरां जडात्मिकां च शक्तिमपश्यन्। यश्चैको निखलानि कारणान्यधितिष्ठति तं चापश्यन्निति योजना। कथं भूतानि तानि पूर्वं विकल्पितानि कालात्मयुक्तानीति। तथा च, क्षरात्मानावीशते देव एकः, भोक्ता भोग्यं प्रेरितारं च मत्वा, प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादिभिरग्रे स्पष्टोक्तिः कण्ठरवोच्चरितेनैवेति।

इदानीमुक्तश्रुतीनां तात्पर्यानभिज्ञोऽज्ञानवत्त्वेनैव विरोधमारोप्य चोदयति—तर्हीत्यादिना।

तर्हि पूर्वोदाहृतवाक्यानां किंविषयत्वमिति। तेषामपि श्रुतित्वाविशेषेण बाधानर्हत्वात्।

अत्र ब्रूमः। न तावज्जीवाद् भवन्तीत्यादिवाक्यविरोधः। तस्यापि, जीवयति प्राणयतीति जीव इति व्युत्पत्त्या तत्परत्वात्। अन्यथा, य आत्मानमन्तरो यमयतीत्यादिश्रुतीनां जीवस्य नियम्यत्वप्रतिपादिकानां व्याकोपप्रसङ्गः।

नापि हिरण्यगर्भश्रुतिविरोधावकाशः। हि-

रण्मयान्यण्डानि गर्भे यस्य इति समासेन तस्यैव प्रतिपादनात्। "अण्डानां तु सहस्राणां सहस्राणय-युतानि च। ईदृशानां तथा तत्र कोटिकोटिशतानि च" इति पराशरवचनात्।

नच, शिव एव केवल इत्यस्य निर्विषयत्वम्। शिवशब्दस्यानन्दवाचकतया तस्यैव नामधेयत्वात्। विज्ञानमानन्दं ब्रह्मेति स्पष्टमेव। इतरथा, एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादीनां, नारायणाद् ब्रह्मा जायते, नारायणाद्रुद्रो जायत इत्यादीनां चान्वयव्यतिरेकश्रुतीनां, " यस्माद् ब्रह्मा तथाऽग्निश्च रुद्रेन्द्रमरुदश्विनः। वसवश्च सहादित्यैरिति " कालीयस्तुतिवाक्यस्य महद्विरोधात्।

नापि कालश्रुतिविरोधः। तस्य भगवच्छक्तित्वेन शक्तिमदभेदाविवक्षया घटनात्। कालः कलयतामहमिति भगवदुक्तेः। एवमेव, कालकाल इत्यादिनैकार्थत्वाच्च।

नापि स्वाभाववाक्यविरोधः। स्वे स्वीया असाधारणाः स्वाभाविका भावा गुणादयो यस्ये-

ति समासेन तस्यापि तद्वाचकत्वात् । स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः । अन्यकल्पनायामुक्तदोषाणां दुर्वारत्वात् । अघटनोक्तैव ।

नचाऽसदेव सौम्येदमिति वाक्यस्य विषयशून्यत्वं शङ्कनीयम् । अ ब्रह्मेति श्रुतेः । अक्षराणामकारोऽस्मीति स्मृतेश्च, अकारश्चासौ सच्चेति कर्मधारयसमासः । सद्रूपम् अकारवाच्यं ब्रह्मेत्यर्थः । उक्तार्थानभ्युपगमे तत्रैव, कथमसतः सज्जायेतेति निषेधादसामञ्जस्यमेव ।

अकस्मात्पदस्यैवं गतिः । तथाहि । क इतिशब्दस्यानन्दवाचकत्वाद् अश्चासौ कश्चेत्यानन्दरूपो वासुदेव इति न कस्यापि वाक्यस्य विषयहीनत्वमिति ।

कैचित्तु, नामानि सर्वाणि यमाविशन्तीत्यादिवाक्यमाश्रित्य जीवादिशब्दानां रूढ्यैव वृत्त्या भगवत्परत्वं व्याख्यायन्ते । तच्चिन्त्यम् । शेषाणामग्रे वक्ष्यमाणत्वादित्यलं विस्तरेण ।

पूर्वोदाहृतानां जीवाद्भवन्तीत्यादीनाम् । किंविषयत्वमिति । किंविषयकाणि वाक्यानीत्युक्तया निर्विषयकाणीत्या-

क्षेपार्थः । तत्र हेतुमाह–तेषामपीत्यादिना । बाधानर्हत्वान्निर्विषयत्वायोगान्निर्विषयत्वे च बाधप्रसङ्गादित्यर्थः ।

समाधातुं विरोधपरिहारेण व्याख्यानमुपक्रमते–अत्रेत्यादिना । तत्रादौ जीवाद्भवन्तीत्यादि वाक्यं व्याख्यायते–न तावदिति । तत्परत्वात् परमकारणप्रतिपादनपरत्वात् । अन्यथा उक्तार्थानङ्गीकारे । यद्यपि जीवस्यापि पूर्वोक्तन्यायेन स्वस्यानादिकर्मणा स्वदेहादिकार्यनिरूपितकारणत्वसम्भवात्, तथाऽपि, न जीवात् कारणं परमिति वाक्यशेषविरोधस्य दुष्परिहरत्वादुक्तार्थस्यैव वरीयस्त्वं भाव्यम् ।

हिरण्यगर्भ इति वाक्यस्य विरोधं परिहरति–नापि हिरण्यगर्भ इति । तस्यैव विवक्षितकारणस्यैवेति । अन्ययोगव्यवच्छेदार्थक एवकारः ।

त्रिलोचनवाचिकायाः श्रुतेरपि यथार्थव्याख्यया विरोधं निराकरोति-न च शिव एवेत्यादिना । इतरथा रूढिवृत्त्यभ्युपगमे इति । अनेन निरन्तरोक्तपक्षस्यापि परिहारस्य दार्ढ्यं ज्ञेयम् । एको ह वै नारायण इत्यादौ वाक्ये उभयोर्ग्रहणात् । नापि कालेत्यादिः स्पष्टार्थः । नापि स्वभावेति । स्वेनैव भवतीति स्वभाव इत्यप्यूह्यम् । न चाभावशब्दविरोध इत्याह–न चेति । उक्तार्थानभ्युपगमे । सद्रूपब्रह्मपरत्वानभ्युपगमे । तत्रैवेति छान्दोग्ये सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं, तद्धैके आहुरसदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायेत कुतस्तु खलु सोम्येवं स्यादिति होवाच कथमसतः सज्जायेतेत्यादिवाक्यसमुदायात्मके प्रकरणे । सैव गतिः कर्मधारयसमासाश्रयणरूपैवेति । तदेव प्रपञ्चयति–तथा हीत्यादिना । उपसंहरति–न कस्या-

पीति। अन्यमतमुपक्षिपति-के चित्त्विति। तच्चिन्त्यमित्यनेनाऽस्वारस्यं द्योतितम्। घटपटादिशब्दोच्चारणाद्ब्रह्मार्थोपस्थितेर्दुर्वारत्वात्। न च तथात्वमिष्टापन्नमिति वाच्यम्। सर्वानुभवविरोधात्। भगवन्नामसंकीर्त्तनविधेर्वैयर्थ्यात्। भगवन्नामवदस्यापि घटपटादिशब्दमात्रस्य कीर्तनविधिविधेयताऽऽपत्तेश्च। शेषाणां प्रकृतिपरमाणुसंघातादीनाम्। अलं विस्तरेण, उपरम्यते इत्यर्थः।

इत्थं विवादकारणीभूतवाक्यानां तात्पर्यं श्रुत्वा तमेव स्वीकारपूर्वकमनूद्य विशेषविवादार्थमुद्युनक्ति-स्यादेतदिति।

स्यादेतत्। सर्वज्ञस्य सर्वशक्तेर्ब्रह्मण उक्तरीत्या जगत्कारणमिति। किञ्च। कथं कार्योत्पत्तिरभिप्रेता, संघातेन, वाऽऽरम्भेण, परिणामेन वा ?। नाद्यौ पक्षौ संभावनीयौ। कुतर्कविषयत्वेनावैदिकत्वात्। नापि परिणामः। असम्भवात्। न ह्याकाशकल्पस्य ब्रह्मणो विभोः परिणामोऽनुभूत्या सोढुं शक्यो, दर्शनागोचरत्वादि चेत्।

अत्रोच्यते। नासम्भवः। परिणतिस्वाभाव्यात्। क्षीरवत्। सर्वज्ञत्वात् सर्वशक्तिमत्त्वाच्च स्वेच्छया परिणामः शक्यते प्रतिपादयितुम्।

ननु विपरीतो दृष्टान्तः। सावयवत्वात् क्षीरस्य परिणामो निर्विवादः। ब्रह्मणस्तु निरवयवत्वेन तद्विपर्ययत्वान्न तत्ता युक्तेति चेच्छृणु। न

तावत् सावयवत्वं क्षीरपरिणतिहेतुः । तथात्वे सति चाप्स्वतिव्याप्तेस्तासामपि दधिभावेन परिणामो दुर्वारः । अतोऽप्रयोजकं सावयवत्वम् । किन्तु तादृशशक्तिमत्त्वेनैव पयसः परिणाम इति

तत्रेत्थं विचारणीयम् । परिणामेऽवयविनः शक्तिरवयवानां वेति । नाद्यो विकल्पः । द्रवद्रव्येव्यतिरिक्तस्यावयविनस्त्वयानभ्युपगमात् पारिशेष्यादवयवानां शक्तिः । ते च निरवयवा एव । सावयवत्वे चावयवानामप्यवयवान्तरकल्पने तेषां चापि तद्भावेऽनवस्थानात् क्षीराब्धेः कुण्डपरिमाणत्वापत्तेः । अवयवानामानन्त्यात् । एवमपि तेषां परिणामाभावाङ्गीकारे दधनि पयो दृश्येतेति भिया अकामेनापि त्वया सर्वेषामप्यवयवानां परिणामवत्त्वमेष्टव्यम् । तस्मान्निरवयवस्यैव परिणामो दृश्यते । तथा ब्रह्मणोऽपि परिणामोपपत्तेरिति । श्रूयते च—पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति । स्मर्यतेऽपि भगवता पराशरेण—

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।

शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णतेत्यादि ॥

विवादं प्रपञ्चयति–किं चेति। कथं कार्योत्पत्तिरिति किं-प्रकारिकेतिभावः। प्रकारविकल्पांश्च वादिबाहुल्येनाह, तत्र प्रथमं बौद्धविकल्पमाह–संघातेनेति। संघातश्च यदृच्छया भूतसंहनन-पूर्वककार्योत्पादकत्वं ताम्बूलचूर्णादिसमूहस्येव शोणिमका-र्योत्पादनत्वमिति। एतेषां च द्वितीयाऽध्याये सविस्तरं वक्ष्य-माणत्वान्नात्र प्रपञ्चायोद्यम्यते। आरम्भवादश्च तार्किकाणां विकल्पः। परिणामो द्विविधः। प्रकृतिस्वरूपपरिणामः, शक्तिविक्षेपलक्षणो ब्रह्मपरिणामश्चेति। आद्यः सांख्यपक्षः। द्वितीयो ह्यौपनिषदानां सिद्धान्तश्चेति ज्ञातव्यः। तत्रासंभावनां द्योतयति–नाद्याविति। तत्र हेतुः–कुतर्केत्यादि। तदभ्युपगमे श्रौतसिद्धान्तस्य तिलाञ्जलिसम्प्रदानत्वापत्तेरित्यभिप्रायः। नापि परिणाम इति। सामान्योक्त्योभयपक्षविषयिका चोदने-ति ज्ञेयम्। तदेव हेतुमुखेन द्रढयति–असंभवादिति। ब्रह्मपरि-णामस्य संभावनाविषयत्वाभावाद्। असंभावितत्वं व्यनक्ति–न-ह्यीत्यादि। आकाशोपमस्य निरवयवस्य। विभोरिति। विभु-परिमाणकस्येति। परिशेषादगत्या विवर्तवाद एव समाश्रयणीय इति मायावादिचोदनाभिप्राय इति शङ्काऽर्थः। तत्र संघातादि-विकल्पानामग्रे वक्ष्यमाणतयेहोपेक्षयैव परिहारौ ज्ञापयित्वा स्वपक्षे समाधातुमुपक्रम्यते-अत्रोच्यत इति। तदेव स्पष्टयति-नासंभव इति। नासम्भावनासंस्पृष्टत्वायुस्पर्शनयोग्य इति यावत्। परि-णतिस्वाभाव्यादिति। यथा क्षीरं परिणमेर्हस्वाभाविकशक्ति-मत्त्वादेव दध्यात्मना परिणमति तद्वद्ब्रह्मापि सर्वाघटनघटनार्हश-

क्तिमत्त्वादेव जगद्रूपेण परिणमतीति कथयितुं शक्यत इति, न ति
प्रतिपादनानर्हताशङ्कावकाश इति सिद्धान्तः। अनेन प्रयोगः सू
चितः। जगदाकारावस्थाभजनशीलं ब्रह्म भवितुमर्हति, तादृश्यचि
न्त्यशक्तिमत्त्वात्। दधिभावे क्षीरवत्। उक्तहेतौ सत्प्रतिपक्षताऽऽ
त्मकहेत्वाभासत्वं, दृष्टान्ते विकलतां चारोप्य भूय उत्तिष्ठते—न
न्वित्यादि, निर्विवाद इत्यन्तेन। दृष्टान्तविकलत्वमुक्त्व
सत्प्रतिपक्षतां द्योतयितुं साध्याभावसाधकं हेत्वन्तरं पठति—नि
रवयवत्वेनेति। तथाऽत्र प्रयोगः—परिणामाभावशीलं ब्रह्म
निरवयवत्वाद् आकाशवदिति। तद्विपर्ययत्वादिति दृष्टान्तवि
पर्ययत्वाद्दार्ष्टान्तस्य साध्याभावसाधकहेत्वन्तरस्य विद्यमानतय
सद्धेतुविपर्ययाद्वा उक्तस्य हेतोरिति भावः। तस्मान्न तत्ता युक्ते
ति। ब्रह्मणः परिणमनानर्हता युक्तेति शङ्कार्थः। पूर्वपक्षोक्त
स्य हेतोरप्रयोजकत्वं दर्शयित्वा स्वसिद्धान्तोक्तहेतावारोपितदू
षणं निरस्य दृष्टान्तगतदोषं चोद्धरति—श्रृण्विति। न तावत्
सावयवत्वमिति। सावयवत्वस्य तवाभिप्रेतस्य हेतोः परिणामे
कारणत्वं नास्ति। तदेव व्यञ्जयति—तथात्वे च सावयवत्व
स्य परिणामकारणत्वेऽभ्युपगम्यमाने। परिणामो दुर्वार
इति। तास्वपि तवाभिप्रेतस्य हेतोः सावयवत्वस्य विद्यमान
त्वात्। न तु तदस्ति। तस्मादप्रयोजकहेतोर्न सिद्धान्तबाधन
सामर्थ्यम्। आरोपितप्रमाणं बाधयित्वा पूर्वोक्तहेतुना सिद्धान्त
यति-किन्तु, तादृशशक्तिमत्त्वेनैव परिणमनशक्तिमत्त्वेनैव
हेतुनेत्यर्थः।

उक्तेऽर्थे पुनर्विकल्पयितुमुद्युक्तं दृष्ट्वा तच्छान्तये स्वयमेव
शङ्कासमाधानाभ्यां निर्णेतुमारभते-तत्रेत्थमिति। उक्तसिद्धान्ते
इत्थं वक्ष्यमाणप्रकारेण। तमेव विचारं दर्शयति—परिणामे

इति । अत्र, क्षीरस्येत्यध्याहार्यः । धर्मस्य धर्म्याधेयतया तत्सापेक्षत्वात् । क्षीरस्य परिणामे इति । अवयविनः शक्तिरवयवानां वेति स्पष्टो विकल्पः । तत्र शक्तिपदेन तादृशभावायतनशक्तिर्विवक्षितेति ज्ञेयम् । तत्र पूर्वविकल्पं वादिमुखेनैव परिहरति—नाद्य इति । त्वया मायावादिनेति । पारिशेष्यात् परिशिष्टपक्षाङ्गीकारात् । अतस्ते च निरवयवा एवेति । ते नाम प्रसिद्धाः परिणमनशक्तिमन्त इति निरवयवत्वाभावाभावसंपन्ना एवेति । अयोगव्यवच्छेदार्थकोऽवधारणशब्दः । तमेवार्थं व्यञ्जयन्नाह—सावयवत्वे निरवयवत्वाभावलक्षणे । तेषाम् अवयवावयवान्तराणाम् । तद्भावे अवयवान्तरकल्पनेऽनवस्थानादिति । तत्रैव हेत्वन्तरमाह—क्षीराब्धेरिति । क्षीराब्धिः कुण्डपरिमाणकः कुण्डमात्रपरिमाणावच्छिन्न उपलभ्येत । तत्रापि हेतुः—अवयवानामिति । तस्मात् सिद्धमवयवानां निरवयवत्वमिति । एवमपीति । तेषां निरवयवत्वे निर्विवादे जाते सति ते परिणमन्ति, न वेति बुद्धौ कृत्वा द्वितीये दूषणमाह—तेषामित्यादि । इति भियेति । प्रत्यक्षानुभूतिविरोधलक्षणयेति । अनेनावश्यकत्वमुक्तम् । एष्टव्यमिति । कटुकमप्यौषधं पीयत एवेति न्यायेनावश्याङ्गीकर्तव्यमिति भावः । उपसंहरति—तस्मादिति । दार्ष्टान्ते उक्तन्यायमवतारयति—तथा ब्रह्मणोऽपीति । उपपत्तेरिति । न किमप्यनुपपत्तौ प्रमाणं, शास्त्रसिद्धान्तत्वादिति । तत्र प्रमाणं पठ्यते—श्रूयते चेति । अस्य ब्रह्मणः शक्तिः परा स्वरूपविलक्षणा विविधा अनन्ताऽचिन्त्यप्रकारिका श्रूयते चेत्यन्यप्रमाणनिरपेक्षेत्यर्थः । अनिर्वचनीयत्वमिथ्यात्वौपाधिकत्वादिशब्दप्रयोक्तॄणां मुखं धूलीकरोति—स्वाभाविकीति । अनाद्यनन्तेति स्वरूपवन्निष्ठेत्यर्थः । न केवलं

शक्तेरेव तत्त्वं, ज्ञानक्रियागुणानामपीत्याह—ज्ञानबलक्रिया चेति। ज्ञानबलाभ्यां सहिता क्रिया ज्ञानबलक्रिया चेति। चकारः सर्वेषामपि भगवतो गुणकर्मादीनामाकर्षणार्थः।

अक्षयं नाऽन्यदाधारमज्ञेयमजरं ध्रुवम्।
शब्दस्पर्शविहीनं तद्रूपादिभिरसंहतम्॥
त्रिगुणं तज्जगद्योनिरनादिप्रभवाऽप्ययम्।
वेदवादविदो विद्वन्नियता ब्रह्मवादिनः॥

पठन्ति वै तमेवार्थं प्रधानप्रतिपादकम्—

इति। नित्यत्वादि स्पष्टं स्मारयति, श्रुत्यर्थरूपां स्मृतिं च पठति—स्मर्यतेऽपीति। पराशरेणेति सूत्रकारपितृत्वेनास्यन्त-प्रामाण्यं द्योतयति। शक्तय इति, सर्वभावानामिति। स्वसंकल्पविषयवस्तूनां सूक्ष्मतया सद्रूपाणाम्। सर्गाद्याः सर्गादिकारणमिति। भावशक्तय इति स्वाभाविकीतिश्रुतिगतपदस्यार्थः। शतश इति विविधाः पदार्थाः। ब्रह्मण इत्यस्य पदस्यार्थः। अचिन्त्यज्ञानगोचरा इति। अचिन्त्यस्य असंकुचितस्य। मुक्तानां ज्ञानस्य विषया इति पराशब्दार्थः। तपतां श्रेष्ठेति श्रोतुः कुतर्कनिष्ठतां निवारयति। स्वाभाविकत्वानाद्यनन्तत्वनित्यसहचारित्वादिषु दृष्टान्तः—पावकस्य यथोष्णतेति। श्रुतौ जात्यभिप्रायेणैकवचनम्। स्मृतेर्व्याख्यारूपत्वादेकत्वभ्रान्तिवारणार्थं बहुवचनमिति।

प्रथमांशे—

दशोत्तराण्यशेषाणि मैत्रयैतानि सप्त वै।
महान्तं च समावृत्य प्रधानं समवस्थितम्॥
अनन्तस्य न तस्यान्तः संस्थानं चापि विद्यते।
तदनन्तमसंख्यातं प्रमाणं चापि वै यतः॥

हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ।
अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ॥
ईदृशानां तथा तत्र कोटिकोटिशतानि च—
इत्यादिरपि वाक्यकदम्बोऽनुसंधेयः ॥

एवं श्रुतिस्मृतिप्रतिपादितेऽप्यर्थे कुतर्कतामारोप्यासद्वादैर्विवदमानः स्वचित्तस्थासहिष्णुत्वं प्रकाशयितुमुत्तिष्ठते भूयः—नन्विति ।

ननु नैतच्छोभनं तर्कबलेन क्षीरस्येव ब्रह्मणः परिणामाङ्गीकरणमिति[1] । तथात्वे च, कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति वक्ष्यमाणान्न्यायात् कृत्स्नस्यापि ब्रह्मणः परिणामप्रसङ्गाद्[2] अनित्यतापत्तेश्च[3] । तत्त्वे, नित्यं विभुं निष्कलं निष्क्रियं शान्तमित्यादिवाक्यविरोधाच्च[4] । किञ्च, विकारभावापन्नस्य ब्रह्मणो[5] जगदाकारतया सर्वप्रत्यक्ष[6]विषयत्वेन सर्वस्यापि प्राप्तत्वात्[7] सर्वमोक्षप्रसक्त्या[8] उपदेशशास्त्रानर्थक्याच्चेति[9] चेन्मैवम् ।

न तावत् तर्कबलेनास्माकं ब्रह्मपरिणामाभ्युपगमः । अपि तु, स्वयमात्मानमकुरुत, आत्मकृतेः परिणामादित्यादिश्रुतिन्यायाभ्यामिति[1] । नापि कृत्स्नप्रसक्तिः । ऊर्णनाभ्यादौ व्यभिचारात्[2] । नापि निरवयवश्रुतिव्याकोपः ।

तथाभूतपरिणामस्योक्तरीत्या साधितत्वात्[३]। वस्तुतस्तु शक्तिविक्षेपस्यैव परिणामशब्देन विवक्षिततया ब्रह्मस्वरूपपरिणामानभ्युपगमान्न नित्यश्रुतिविरोधगन्धोऽपि[४]। एवञ्च विकारापत्त्यभावे[५] प्रत्यक्षगोचरत्वाभाव[६]स्तदभावे च सुतरां सर्वप्राप्त्यभाव[७]स्तत्त्वे तु सुतमां सर्वमोक्षप्रसङ्गाभावः[८]। एवञ्च को भूय उपदेशशास्त्रानर्थक्यप्रसङ्ग[९] इति।

नापि पुनराकाशकल्पस्येति दृष्टान्तसौरस्यम्। अप्रच्युतरूपस्यव निरवयवस्य विभुपरिमाणकस्य चाकाशस्य वायुभावापत्तिलक्षणपरिणामदर्शनात्। आकाशाद् वायुरिति श्रवणाच्च। प्रत्युत तस्याप्यस्मत्सिद्धान्तसाधकोपमानत्वमेवेति। सावयवत्वाकाशकल्पयोर्हेतुदृष्टान्तयोरप्रयोजकत्वाज्जगतो ब्रह्मपरिणामभावो निरवद्यः। तथैव श्रूयते—

यथोर्णनाभिः सृजते गृह्णते च
यथा सतः पुरुषात् केशलोमानि।
यथा पृथिव्या ओषधयः संभवन्ति

तथाऽत्तरात् संभवतीह विश्वम्—इति ।

तथैव परिणामेन विश्वस्य भगवान् हरि-रिति स्मरणाच्च ।

परिणामः शक्तिविक्षेप एव । सोऽपि तत्रैव क्षोभशब्देन तात्पर्यात्मकेनोक्तः—

प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरिः ।

क्षोभयामास संप्राप्ते सर्गकाले व्ययाऽव्ययाविति ।

किञ्चास्तां पर्यायतापि । भीष्मः कण्ठरवेणैव पठति—

प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः ।

तद्वद् भूतानि भूतात्मा सृष्टानि ग्रसते पुनरिति॥

तत् सिद्धं जगदभिन्ननिमित्तोपादानत्वं ब्रह्मणो लक्षणम् ॥

सामान्यवाचकैतच्छब्दार्थो विशिष्यते—तर्कबलेनेत्यादि । अशोभनत्वं प्रकाशयिष्यन् दूषणान्युद्भावयति—तथात्वे चेत्यादि । ब्रह्मणो विभोः परिणामित्वे, कृत्स्नप्रसक्तिरितिसूत्रार्थो द्वितीयेऽध्याये वक्ष्यते । कृत्स्नस्येति ब्रह्मविकारभूतजगद्व्यतिरिक्तब्रह्मणोऽभावप्रसङ्गादित्यर्थः । विकास्यानित्यत्वेनानित्यतापत्तेरप्यर्थसिद्धत्वादिति, नित्यं विभुमित्यादीनां , नित्यत्ववाच-

कानां, निष्कलमित्यादिनिरवयववाचकानां च वाक्यानां, विरोधापातादवैदिकत्वप्रसक्तेरित्यर्थः। विकारभावापन्नस्येति पितृपुत्रपतिकलत्रादिशब्दस्पर्शादिविषयचक्षुरादिकरणरूपापन्नस्य जगदाकारतया तन्मात्रतया देवतिर्यङ्मनुष्याद्यविशेषेण सर्वप्रत्यक्षानुभूत्या सर्वस्यापि देवाद्यविशेषेण प्राणिजातस्य प्राप्तत्वात् सर्वेषां मोक्षे प्रतिबन्धकस्य ब्रह्मानुभवाभावस्याभावात् तत्प्रसक्त्या संसारनिवर्तकमोक्षप्रतिपादकशास्त्रस्योपदेशसंततेश्च विषयाभावाद् बाध इति दूषणकदम्बो दुर्वार इति शङ्कातात्पर्यार्थः

पूर्वोक्तक्रमेण दूषणनिरासपूर्वकं समाधातुमाह—मैवमिति॥ तूष्णींभूत्वा श्रूयतामित्यर्थः।

तत्र यदुक्तं, तर्कबलेनेत्यादि, तत्राह—न तावदिति। यदि श्रुत्यादिप्रमाणविरहेण केवलं युक्तिं समाश्रयेम, तर्हि त्वद्वचनावकाशः स्यात्। न त्वेतदस्ति। श्रुत्यादिप्रमाणस्य विद्यमानत्वादिति निश्चित्य प्रमाणं पठति—स्वयमात्मानमित्यादि श्रुतिन्यायाभ्यामित्यस्याऽभ्युपगम इत्युक्तेन पदेन सहान्वयः। अनेन प्रमाणपाठेन विवर्तवादस्य निर्मूलतया कुतर्कवादत्वात् परिहासविषयत्वमिति द्योतितम् १। द्वितीयदूषणं निरस्यते—नापि कृत्स्नप्रसक्तिरिति। तत्र हेतुः—ऊर्णनाभ्यादाविति ऊर्णनाभेस्तन्तुभावापत्तौ सत्यामंशतोऽपि स्वरूपप्रच्युतिदर्शनाभावात् कृत्स्नप्रसङ्गस्य तु का कथेति भावः २। तृतीयं परिहरति नापि निरवयवेति। तथाभूतपरिणामस्य निरवयवद्रव्यपरिणामस्य, उक्तरीत्या निरवयवानां क्षीरावयवानां परिणामप्रतिपादनरीत्या साधितत्वात् साधुनिर्णीतत्वात्। इदं च सामान्यपरिणामप्रस्तावेनोक्तम् ३। इदानीं स्वसिद्धान्तेन शेषपरिहारानाह—वस्तुतास्त्विति सूत्रकारमतेन तु। शक्तिविक्षेपस्यैवेति शक्ति-

प्रसारणस्यैवेत्यन्ययोगव्यवच्छेदार्थ एवकारः। नान्यस्येत्यर्थः। यदि ब्रह्मस्वरूपपरिणामोऽस्माभिरभ्युपगतः स्यात् तदा विवादाय छिद्रमवलोकनीयम्। तस्य त्वनभ्युपगमादित्येवकारस्यार्थप्रपञ्चे हेतुः – **ब्रह्मस्वरूपपरिणामानभ्युपगमादिति** । **विरोधगन्धोऽपीति** । अपिशब्देन कैमुत्यन्यायावतारः। यदि तद्गन्ध एव नास्ति, विरोधस्य कः प्रसङ्ग इति भावः ४। एव ञ्चेति । सिद्धान्तस्य श्रौतत्वनोक्तदोषाभाववत्त्वेन च ब्रह्मणो निर्विकारत्वे सिद्धे सति ५। प्रत्यक्षप्रमाणगोचरत्वासिद्धिः ६। तद्भावे प्रत्यक्षविषयत्वाभावे साधुतरं **सर्वप्राप्त्यभावः** ७। तत्त्वे तु सर्वप्राप्त्यभावे तु साधीयान् सर्वमोक्षाभावः ८। एवम् उक्तप्रकारेण, को भूय इत्युक्त्या न कोऽपि । दूरतमादपास्तः **शास्त्रानर्थक्यप्रसङ्ग** ९ इत्यर्थः।

किञ्च। पूर्वोक्तयोर्हेतुदृष्टान्तयोर्मध्ये हेतुरप्रयोजकत्वेन दूषितः। तदवशिष्टं दृष्टान्तमपि सिंहावलोकनन्यायेन स्मृत्वा तत्राप्रयोजकतां विधत्ते—**नापि पुनराकाशकल्पस्येति**। **सौरस्यं** सुरसत्वं सौष्ठवमिति यावत्। **अप्रच्युतस्वरूपस्येति**। आकाशकल्पत्वे सति परिणामवत्त्वस्य दार्ष्टान्तिके विद्यमानत्वाद्धेतुवद् दृष्टान्तस्यापि तथात्वं सिद्धमिति प्रथमस्य हेतोस्तात्पर्यार्थः। श्रुतिगर्भितहेत्वन्तरं च—**आकाशादिति** । अपिच तथाभूतदृष्टान्तो युक्तौ दीयतां योऽन्यस्य पक्षस्य बाधकः स्यादिति अस्मत्तः शिक्षणीयं त्वया। अमुष्य दृष्टान्तस्य तु तद्विपरीतत्वादिति परिहसन्निवाह—**प्रत्युत तस्येति**। **तस्योक्तदृष्टान्तस्येत्यर्थः** । उपसंहरति–**ब्रह्मपरिणामभावो निरवद्य इति** । तत्र प्रमाणं पठ्यते–**तथैवेति**। श्रुतिस्मृत्योः। अयं भावः। पदार्थभावानां शक्तयो न केनापि प्राकृतबुद्धिनाऽपच्छेत्तुं शक्याः।

तर्काणामप्रतिष्ठितत्वेनास्माकमौपनिषदानां श्रौतस्यैव सिद्धान्त-
स्याश्रयणीयत्वादितिभावख्यापनाय दृष्टान्तगर्भितवाक्यमाह—
यथोर्णनाभिरिति । यथोर्णनाभेरूर्णाप्रसारणाकुञ्चनोभयार्ह
तालक्षणशक्तिमत ऊर्णाविर्भावतिरोभावौ तदप्रच्युतस्वरूपतयैव
भवतः । यथा च पुरुषादन्नमयात् तन्मात्रशक्तिमतः केशलो-
मानामुत्पत्तिमात्रकार्यसिद्धिः । यथा च भूमेस्तथाभूतशक्तिमत्या
औषधीनां जन्ममात्रम् । तथा सर्वकार्योत्पादनलक्षणाचिन्त्यान-
न्तसर्वशक्तेरक्षरपदार्थाद् ब्रह्मणो विश्वं सम्भवतीति । यदा
स्वस्वस्वाभाविकाल्पाधिकसातिशयशक्तिमद्भ्योऽचेतनेभ्यस्तच्छ-
क्त्यनुसारेण स्वस्वकार्यभावापत्तावप्यप्रच्युतस्वरूपत्वाभावाभाव
प्रत्यक्षगोचरत्वेनापह्नोतुमशक्यस्तर्ह्यचिन्त्यसर्वाचिन्त्यविश्वाख्यका-
र्योत्पादनार्हशक्तिमतो भगवतो जगद्भावापत्तावप्यप्रच्युतस्वरू-
पत्वं किमशक्यमिति श्रुतेर्ध्वनितार्थः । श्रुतिसहकारिणी स्मृ-
तिश्च—तथैव परिणामेनेत्यादि । परिणामोऽत्र शक्ति-
विक्षेप इत्युक्तमेव । तत्र प्रमाणकथनाय प्रनिजानीते—सो-
ऽपि तत्रैवोक्त इति । न हि तत्र विक्षेपशब्दस्य कण्ठरवेण
पाठ इत्यत आह—क्षोभशब्देनेति । कथं तेनोक्तार्थोपस्थि-
तिरिति चेत् तत्राह—तात्पर्यात्मकेनेति । देवदत्तस्य चेतसि
क्षोभो यज्ञदत्तस्य मनसि विक्षेप इति पर्यायत्वप्रसिद्धेरिति
सुव्यक्तम् । तमेव श्लोकं पठति—प्रधानं पुरुषं चापीत्यादिना ।
पर्यायमुखेनोदाहृत्य तत्कल्पनानिरासाय साक्षात्प्रतिपादकवाक्य-
माह—किञ्चेत्यादिना । प्रकृतमुपसंहरति—तत् सिद्धमिति ।
तच्छब्दस्य व्याख्यानमाह—जगदभिन्नेत्यादि । जगज्जन्माद्य-
भिन्नेत्यर्थः ॥

ननु किमुपादानं किं वा निमित्तत्वं, कथं चोभयाभिन्नत्व-

मित्याकाङ्क्षोपशमाय क्रमेणोपनिषद्विवक्षितार्थं लक्षयितुमादावुपादानं निर्दिशति–तत्रेति ।

तत्रोपादानत्वं नाम परापरक्षेत्रक्षेत्रज्ञादिपदार्थभूतस्वस्वाभाविकीनां सूक्ष्मावस्थापन्नानां शक्तीनां तत्तद्गतसद्रूपकार्याणां स्थूलतया प्रकाशकत्वमिति ।

निमित्तत्वं च स्वस्वानादिकर्मसंस्कारवशीभूतात्यन्तसंकुचितभोगस्मरणानर्हज्ञानधर्माणां चेतनानां कर्मफलभोगार्हज्ञानप्रकाशेन तत्तत्कर्मफलतत्तद्भोगसाधनैः सह योजयितृत्वमिति ।

एतदुभयाभिन्नत्वं तत्त्वमितीत्थमुक्तस्वरूपकारणत्वस्य ब्रह्मस्वरूपगतत्वेन स्वरूपप्रतिपादनपरत्वमेव । न हि परमताभिप्रेततटस्थत्वोपलक्षणादिकल्पनावकाश इति ।

नच लक्षणवाक्यस्य तद्भिन्नपदार्थवैलक्षण्यज्ञापनभूते फलमात्रे पर्यवसानात् तस्य चैतावता जन्मादिवाक्योक्तलक्षणेनैव सिद्धेः, सत्यं ज्ञानमनन्तं ब्रह्मेत्युत्तरवाक्योक्तलक्षणस्य वैयर्थ्यं, विशेषाभावादिति वाच्यम् । जन्मादिवाक्यस्य ब्रह्मलक्षणस्य लक्ष्यस्वरूपनिरूपणपरत्वेऽपि कार्य-

निरूपितत्वेन तत्सापेक्षत्वात्, सत्यादिवाक्यस्य तु तदभाववत्त्वेन निरपेक्षत्वात् तथाभूतविशेषस्य विद्यमानतया सार्थक्यमेव । तत्र च सत्यत्वमात्रकथनेऽचिद्वर्गेऽतिप्रसङ्गात् तद्वारणफलको ज्ञानपदसंनिवेशः । तत्त्वे च चेतनेऽतिव्याप्तेरनन्तपदगुम्फनमिति । सत्यत्वज्ञानत्वानन्तत्वैश्वोभयवैलक्षण्यज्ञापकं ब्रह्मलक्षणमिति ।

नच सत्यादीनामेव गुणत्वान्न सत्यत्वादिपर्यन्तधावनं युक्तं, गौरवादिति वाच्यम् । सत्यादीनां स्वरूपवाचकत्वाऽभावेन गुणपरत्वविधानेऽसत्यजडपरिच्छिन्नमेव लक्ष्यं ब्रह्मस्वरूपं भवन्मतेऽभ्युपगतं स्यात् ।

तस्मादुक्त एव सिद्धान्तो वरीयान् । अभिन्ननिमित्तोपादानत्वे सति सत्यत्वादिमत्त्वं जिज्ञास्यस्य ब्रह्मणो लक्षणमिति कृतं विस्तरेण १।१।२॥

निर्दिष्टं लक्षयति—परेति । पराऽपरादिशब्दवाच्यानां स्वस्य ब्रह्मणोऽसाधारणानां स्वाभाविकीनां प्रलये सूक्ष्मावस्थापन्नानां कार्यविस्तरणव्यापारानर्हाणां शक्तीनां तत्तदुत्तसद्रूपकार्याणां च स्वावान्तरकारणभूतशक्तिस्थभावरूपसूक्ष्मतापन्नकार्याणामित्यर्थः तत्राऽऽदिपदेन चेतनाचेतनप्रकृतिपुरुषादीनां संग्रहः । कार्यसद्रूपत्वं चारम्भणाधिकरणस्थसूत्रैर्वक्ष्यति । तानि तु—भावे चो-

पलब्धेः । १ । सत्त्वाच्चावरस्य । २ । असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषात् । ३ । युक्तेः शब्दान्तराच्च । ४ । पटवच्चेति । ५ ।

निमित्तस्वरूपं निर्देशलक्षणाभ्यामाह—निमित्तत्वं चेति निर्देशः । स्वेत्यादिलक्षणम् । स्वस्य स्वस्य नियतविभक्तानादिविचित्रकर्मसंस्कारस्य परतन्त्राणामत्यन्तसङ्कुचितोऽत एव भोगस्मरणानर्हो ज्ञानलक्षणो धर्मो येषां तेषां क्षेत्रज्ञानां कर्मोन्मुख्यभवनतत्फलभोगार्हधर्मभूतज्ञानप्रकाशेन तत्तत्कर्मफलैस्तेषां तेषां फलानां भोगयोग्यशरीरेन्द्रियादिकरणैः सह संबन्धकारयितृत्वमिति। एतदुभयाभिन्नत्वं तत्त्वमिति । अनयोरुपादाननिमित्तयोरेकस्मिन्नाश्रितत्वं तदभिन्नत्वम् । लक्षणमुक्त्वा तत्समन्वयमाह—इत्थमिति । पूर्वप्रतिपादनप्रकारेण, उक्तं स्वरूपं यस्य तथाभूतकारणत्वस्य कारणलक्षणस्य ब्रह्मस्वरूपगतत्वेन जिज्ञासासूत्रोक्तनिरतिशयबृहत्समानाधिकरणत्वेन स्वरूपनिरूपणपरत्वमेवेति । अयोगव्यवच्छेदार्थपर एवकारः । स्वरूपनिरूपणपरत्वाभावाभावस्य तल्लक्षणस्यात्र विद्यमानत्वात् । तदेव द्रढयति—न हीत्यादिना ।

एवं स्वाभिप्रेतविरोधमसहिष्णुं पुनरुत्तिष्ठमानं स्वयमेवोपशामयति—नचेत्यादिना । लक्षणस्य लक्ष्यभिन्नवस्तुमात्रव्यावर्तकत्वमेव कार्यमिति प्रसिद्धम् । तस्य च वैलक्षण्यद्योतनस्य चोक्तलक्षणेनैव सिद्धत्वाल्लक्षणान्तराकाङ्क्षोपशमत्वेन सत्यादिवाक्योक्तोत्तरलक्षणस्य वैयर्थ्यं विशेषाभावादिति । फलाकाङ्क्षाऽभावे साधनाकाङ्क्षाया अभावादिति न वाच्यं न शङ्कनीयम् । विशेषस्य सत्त्वादित्याह—जन्मादिवाक्यस्येति । उक्तफलवत्त्वेऽपि तत्सापेक्षत्वात् स्वनिरूपककार्यतदवस्था-

कालसापेक्षज्ञानवत्त्वात् । सत्यादिवाक्यस्य तु, तुशब्दो भिन्नोपक्रमार्थो महद्वैलक्षण्यं द्योतयति । तदभाववत्त्वेन कार्य-निरूपितत्वापेक्षाभाववत्त्वेनेति । तथाभूतविशेषस्य निरपेक्षत्वभूतविशेषस्येति । सार्थक्यमेवेति न वैयर्थ्यमित्यर्थः । इदानीं पदसंनिवेशफलं व्यनक्ति—तत्र च सत्यत्वेति । तस्यापि सत्यत्वादिति भावः । तथाच श्रुतिः—ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातन इति । स्मृतिश्च—अश्वत्थं प्राहुरव्ययमिति । ननु सनातनाव्ययपदयोः श्रुतिस्मृतिभ्यां पठितयोरनादित्वप्रतिपादनपरत्वादविद्यादेरनादित्वमभीष्टमेव चास्माकं "षडस्माकमनादय" इत्यादिनाऽनादिसान्तत्वं तल्लक्षणमस्माभिः संपाद्यमेवेति चेदेवमविद्यादेरनादित्वाऽभ्युपगमे सति भावत्वमपि अकामेनापि त्वया स्वीकार्यमेव । तथात्वे तन्नाशे न कापि निगमना । ननु प्रागभावदृष्टान्तेनानुमानस्यैवात्र निगमनात्वमिति चेन्न । प्रागभावस्याभावरूपत्वेन भावसाधने दृष्टान्तविकलत्वात् । अभावस्य भवन्मते भिन्नपदार्थत्वानभ्युपगमाच्च । न केवलं युक्तिमात्रं श्रुतेरपि प्रमाणत्वात् । "अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते । अथैनमाहुर्नित्यकर्मेति नित्यं ह्येवासौ कुरुते" इति । तन्नाशाऽचिति अतिप्रसङ्गवारणं फलं यस्येति तथा । तत्त्वे च सत्यत्वज्ञानत्वोभयसमुदायस्य लक्षणत्वे सति । चेतने इति । चेतनस्यापि सत्यज्ञानरूपत्वात् । अनन्तपदेनात्र स्वरूपगुणशक्तिभिरनन्तत्वं विवक्षितम् । अन्यथा जीवज्ञानेऽतिप्रसङ्ग इत्यर्थः ।

इत्थमुक्तार्थमसहिष्णोः पुनराशङ्कोद्भावनमाकलय्य तदुत्थानात् प्राक् स्वयमेव समाधत्ते—न चेति । अयमत्र चिन्तनीयः । भवन्मते सत्यादिपदानां स्वरूपत्वं गुणत्वं वेति । नाद्यः । त्रैवि

ध्यापत्त्याऽद्वैतभङ्गः । नच त्रयाणामपि तदैक्यार्थकत्वम् । पर्यायत्वापत्तेः । ननु बहूनामपि पदानामन्यसापेक्षत्वेनैकपरत्वं घटतेऽतो न पर्यायत्वापत्तिरूपो दोषः । एकस्यापि पुंसः पितृत्वभ्रातृत्वपुत्रत्वादेः शब्दस्य तत्तदुपयोगिभूतपुत्रभ्रातृपित्रादिसापेक्षतया प्रतिपादनं दृश्यते । तथैवात्राप्यसत्त्ववदज्ञानवदन्तवद्वस्तुसापेक्षतया सत्यादिवत्त्वेन न सत्यादीनां पर्यायत्वमिति चेन्न । एवमपि निर्विशेषत्वहानिर्दुर्वारा । तथाहि । लोके पुरुषत्वादिनिरपेक्षविशेषवत एव सापेक्षपदवाच्यत्वं, न स्वतोऽनिर्वचनीयस्येति । आस्तामेतत् । असत्यवत्त्वं भावोऽभावो वेति विवेचनीयम् । भावत्वे स्वरूपहानिः । सत्यत्वापत्तेः । द्वितीये चासतः खपुष्पादेर्व्यावृत्तेरिव निरर्थकस्य वारणाय न श्रुतिप्रवृत्तिः । पूर्वमेवासत्यत्वादित्युभयथापि पाशारज्जुरित्यर्थः । एष न्याय उत्तरयोरपि पदयोर्योजनीयः । नापि शेषपक्ष इत्याह—सत्यादीनामिति । अयं भावः । सत्यादिपदानां स्वरूपवाचकत्वे ब्रह्मणो वाक्यगोचरत्वापत्तेरतो न स्वरूपप्रतिपादनत्वं, किन्त्वगत्या गुणपरत्वमभिगन्तव्यम् । तथा सति, असत्यरूपं सद्गुणकं, जडस्वरूपं चैतन्यगुणकं, परिच्छिन्नस्वरूपमपरिच्छिन्नगुणकं तत्त्वं स्यात् । किञ्च । वाक्यागोचरत्वाङ्गीकारेऽनिर्वचनीयत्वमप्यर्थतः सिद्धम् । तथात्वे च मिथ्यात्वं भवतां सिद्धान्तेनैवापतितं कथमप्यनिवारणीयम् । तथाच प्रयोगाः—ब्रह्म मिथ्या, अनिर्वचनीयत्वाद् यदेवं तदेवम् । तव मते मायादिवत् । ब्रह्म मिथ्या, असत्यस्वरूपत्वात् । तव मते रज्जुसर्पवत् । ब्रह्म मिथ्या, जडत्वात् । तवाभिप्रेतघटादिवत् । ब्रह्म मिथ्या, परिच्छिन्नत्वात् । घटादिवदित्यादयः ।

उपसंहरति—तस्मादिति । उक्त एवेति । सत्यात्वादिगुणैः

सत्यादिस्वरूप इति पूर्वोक्तसिद्धान्तो वरीयानिति । तर्कागोचरत्वाच्छ्रौतत्वाच्च श्रेष्ठतम इत्यर्थः । उक्तोभये लक्षणे वैशिष्ट्येन स्मारयति—अभिन्ननिमित्तेत्यादि । प्रकृतमुपसंहरति—कृतमिति ॥ १ । १ । २ ॥

इत्थं निर्वचनलक्षणाभ्यां प्रतिपाद्य तदनुवादपूर्वकं प्रमाणमवतारयितुमारभ्यते—एवमिति ।

एवं लक्षिते जिज्ञास्ये ब्रह्मणि प्रमाणमाह—

शास्त्रयोनित्वात् । १ । १ । ३ ।

शास्त्रं वेदलक्षणमेव योनिः कारणं ज्ञापकं प्रमाणं यस्मिंस्तच्छास्त्रयोनि । तस्य भावस्तत्त्वम् । तस्मादिति समासः । शास्त्रैकप्रमाणकत्वे सति तदन्यप्रमाणागोचरत्वादिति फलितोऽर्थः । तं त्वौपनिषदं पुरुषं पृच्छामि, सर्वे वेदा यत्पदमामनन्ति, नमो वेदान्तवेद्यायेत्यादिश्रुतेः । वेदैश्च सर्वैरहमेव वेद्यः, नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वतीत्यादिस्मृतेश्च ॥

नच निष्प्रयोजनकोऽनुवाद इति शङ्कनीयम् । पूर्वोक्तसंबन्धार्थमनुवादस्यावश्यापेक्षितत्वात् । तथाहि । संबन्धस्योभयनिष्ठत्वनियतत्वेन पूर्वानुवादं विनोत्तरग्रन्थेन संबद्धुमशक्यत्वात् पूर्वमनूद्योत्तरेण संबद्धुं युक्तमेवेत्यलं प्रासङ्गिकेन । प्रकृतं व्याख्यायते । एवं पूर्वोक्तप्रकारेणेति सामान्योक्तिः । तदेव

विशिनष्टि—लक्षित इति । लक्षणमुखेन प्रतिपादिते इति लक्षणसूत्रार्थानुवादः । जिज्ञास्ये इति । जिज्ञासाविषये इति प्रथमसूत्रार्थानुवादः । ब्रह्मणीति । विषये सप्तमी । प्रमाणमिति । ब्रह्मज्ञानासाधारणं कारणमिति यावत् । व्याख्यातुकामः सूत्रं पठति—शास्त्रयोनित्वादिति । वेदलक्षणमित्युपलक्षणम् । वेदतदविरुद्धार्थकपुराणादि । नचोपलक्षणे किं मानमिति वाच्यम् । पुराणादीनां वेदार्थत्वेन वेदेत्युक्तौ तदर्थस्य तद्वतत्वाविरोधात् । शब्दार्थयोर्नित्यसंबन्धत्वादिति भावः । तथाच छान्दोग्ये नारदवाक्यम्—

इतिहासपुराणं पञ्चममिति ।

तत्रैव सनत्कुमारः—

इतिहासपुराणः पञ्चम इति ।
ऋग्युजुः सामाऽथर्वा च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥
यच्चानुकूलमेतस्य तच्च शास्त्रं परं मतम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत्—

इत्यादिस्मृतेश्च । एवकारश्चान्ययोगव्यवच्छेदवचनपरो, नान्यप्रमाणगोचरत्वं तस्येत्यर्थक इत्यर्थः । एतच्च निरन्तरमत्रैव वक्ष्यते । योनिः कारणमिति । ननु वेदस्य ब्रह्मकारणत्वाङ्गीकारे "सकारणं कारणाधिपाधिपः । न तस्य कश्चिज्जनिता नचाधिपः । न तस्य कार्यं करणं च विद्यते" इत्यादिश्रुतिकदम्बविरोधाद्, ब्रह्मणोऽप्यन्यकार्यत्वे पूर्वोक्तसिद्धान्तभङ्गाच्चेति चेदत आह—ज्ञापकमिति । तज्ज्ञानकारणत्वात् । तत्कारणत्वमित्यौपचारिकोक्तिर्न तु तत्स्वरूपादिजनकत्वमित्यतो न

विरोधः । कर्तरि व्युत्पत्तिशङ्कावारणायाह—प्रमाणमिति । समास इति । अनेनैकपदकत्वमुक्तम् । सूत्रस्य निर्गलितार्थमुद्घाटयति—शास्त्रैकेत्यादि । निष्प्रमाणत्वेन खपुष्पसाम्यशङ्कावारणाय—शास्त्रेति पूर्वदलम् । शास्त्राभिन्नतर्कादिविषयत्ववारणार्थं—तदन्येत्याद्युत्तरदलम् । तत्र विषयवाक्यमवतारयति—तं त्विति । तं सर्वशास्त्रप्रसिद्धम्, औपनिषदम् उपनिषत्प्रतिपाद्यं, पुरुषं पूर्णं पुरुषोत्तममित्यर्थः । पृच्छामीत्यनेन वेदवेद्यस्यैव जिज्ञास्यत्वं सूचितम् । अन्यदपि वाक्यमुदाहरति—सर्वे इति । नच वेदा इति बहुवचनादेव सर्वशब्दार्थसिद्धत्वात् सर्वपदस्य वैयर्थ्यं शङ्कनीयम् । बहुवचनस्य त्रिसंख्यकेऽपि पदार्थे समाप्तिदर्शनात् तथात्वे सति वेदत्रय्युक्तकर्ममीमांसकसिद्धान्तेऽतिप्रसङ्गात् तद्व्यावृत्तये, सर्व इति पदसंनिवेशस्य सार्थक्यमेव । सर्वेऽपि वेदाः परम्परया साक्षाद्वा तत्तत्प्रकृतै रूपैर्यत् पदं पद्यते गम्यत इति पदं प्राप्यम्, आमनन्ति आसमन्तात् स्वप्रमेयतया प्राप्यतया च निश्चिन्वन्ति, गमयन्तीति यावत् । ननु सर्वस्यापि ब्रह्मरुद्रेन्द्रादेर्यत्तच्छब्दवाच्यतया सामान्यवत्त्वात् सर्वत्रातिप्रसङ्ग इति शङ्कावारणाय निर्णयपरं विशेषवाक्यमाह—नमो वेदान्तेत्यादि । "सच्चिदानन्दरूपाय कृष्णायाऽक्लिष्टकारिणे। नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे" इति संपूर्णं वाक्यमत्रानुसंधेयम् । अस्यार्थस्तापनीव्याख्याने प्रतिपादितो विस्तराभिया नात्र लिख्यते । यत्तच्छब्दैरपि पूर्ववाक्येषु श्रीभगवान् कृष्ण एव प्रतिपाद्य इत्येतद्वाक्यावतरणप्रयोजनार्थः । एतदेवोपोद्बलयति, श्रीभगवद्वाक्येन—वेदैश्चेत्यादि । सर्वपदसन्निवेशप्रयोजनं पूर्ववत् सर्वत्रानुसंधेयम् । अहमिति स्वाभिन्नोक्तिः । एवेति सावधारणोक्तिः । आभ्यां,

मत्तोऽन्यो न कश्चिदपि वेदाविषयोऽस्तीति व्यञ्जितम्। तथाचान्यत्र स्पष्टोक्तिः—"मत्तः परतरं नान्यत् किञ्चिदास्ति धनञ्जय" इति। एतद्दार्ढ्यायान्यद्वाक्यमाह—नताः स्मेति। यत्रेति। यत्र यस्मिन् भगवति, सर्ववचसां प्रतिष्ठा प्रतिपाद्यता तं नताः स्म इत्यन्वयः। यः सर्ववेदवेद्यः स एव नतिविषयः। स च भगवान् श्रीकृष्ण एवेत्युक्तम्। ननु वचसां स्वस्वार्थेषु प्रतिष्ठा, प्रमाणसिद्धत्वात्। कथमेकत्र श्रीभगवति ब्रह्मण्येव सर्वप्रतिष्ठाऽभ्युपगम्यते? इत्याशङ्क्यं समाधत्ते—शाश्वतीति। अयमर्थः। पदानां स्वार्थे प्रमाणत्वेऽपि सर्वस्यापि पदार्थस्य तत्कार्यत्वात् तत्रैवाऽव्यभिचारिणी प्रतिष्ठा। अन्यत्र चार्थानां व्यभिचारवत्तया तद्वाचकतयाऽपि व्यभिचारग्रस्तत्वादिति भावः। तथाच श्रुतिः—"नामानि सर्वाणि यमाविशन्ति" इति। एतच्च देवताधिकरणे निपुणं वक्ष्यते॥

उक्तसिद्धान्तेऽनुपपत्तिमारोप्य शङ्कामुत्थापयति—नन्वित्यादि।

नन्ववधारणे किं मानम्। तद्वाचकपदस्य सूत्रे दर्शनाभावात्। नच विषयवाक्योपजीवित्वात् सत्राणां तदेव प्रमाणमिति जिज्ञासासूत्रोक्तन्यायावतरणमत्रापीति वाच्यम्। श्रुतिवाक्येषु तद्विषयेष्वपि तददर्शनस्य समानत्वादिति चेन्न। अन्ययोगव्यवच्छेदार्थकस्य श्रौतवाक्यस्यैवात्र प्रमाणत्वात्। "नावेदविन्मनुते तं बृहन्तम्" इति। निरतिशयबृहत्त्ववद् ब्रह्म, वेदविद्ध्योऽन्योऽवेदविन्न

वेद। वेदनप्रमाणभूतवेदाज्ञानात् सुतरां वेद्यज्ञाना-
भाव इत्यर्थः ।

किञ्च । विषयवाक्यपर्यायभूते, अहमेवेति
भगवद्वाक्येऽवधारणस्य कण्ठरवेण पठितत्वाच्च
नान्यथाकल्पनावकाश इति ।

तथाहि । न तावद् ब्रह्मणः प्रत्यक्षप्रमाण-
विषयत्वम् । अतीन्द्रियत्वात् । नचैतेन ब्रह्मणः
परिच्छिन्नत्वं शङ्कनीयम् । तस्य विभुत्वादिन्द्रियेषु
बहिरन्तःसत्त्वेऽपि तेषां तत्प्रकाश्यतया तत्प्रका-
शनशक्तिमत्त्वाभावात्। रूपगन्धप्रकाशने रसनश्र-
वणवत्। सूर्यादिप्रकाशने खद्योतादिवच्च। अणो-
रणीयानिति श्रुतेः ॥

नापि तस्यानुमेयत्वम् । अनुमानस्य स्व-
तन्त्रप्रमाणत्वाभावात् ।

श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ॥
इत्यादिस्मृतेः ॥

अवधारणे इति । शास्त्रं वेदलक्षणमेव योनिरिति
त्रावधारणार्थवाचकैवकाराध्याहारे । यद्वा, शास्त्रैकप्रमाण
कत्वे सतीत्यत्रावधारणार्थकैकपदसन्निवेशसहकृतव्याख्याने

किं मानमिति । सापेक्षवचनं न किमपीति निष्प्रमाणकत्वाद-नुपपन्नं व्याख्यानमित्यर्थः । किमत्रानुपपत्तिबीजमिति शङ्कां निरसितुं हेतुमाह—तद्वाचकपदस्येति । तद्वाचकस्यान्ययोग-व्यवच्छेदलक्षणावधारणार्थवाचकस्यैवकारादिपदस्येति तत्पुरुष-पूर्वककर्मधारयसमासः । सूत्रे दर्शनाभावादिति । सूत्रनि-ष्ठाऽक्षरानुपूर्व्यां पाठाभावात् । तददर्शनस्यानुपलब्धिसहकृतप्र-त्यक्षप्रमाणसिद्धत्वादित्यर्थः । उक्तशङ्कादार्ढ्याय सिद्धान्तिमुखेन स्वयमेवाशङ्क्य समाधत्ते—नचेति । सूत्राणां स्वविषयभूतोपनिष-द्वाक्योपजीवित्वाद् विषयवाक्यार्थानामेव भगवता श्रीबादरायणेन सूत्रकृताऽत्र सूत्रितत्वात्, तदेवेति तद्धतपदमेव विषयवाक्यानु-पूर्व्यां पठितमेवात्रापि मानम् । तदेवोपमिनोति—जिज्ञासासूत्रे-त्यादि । अथातो ब्रह्मजिज्ञासेत्यस्मिन् सूत्रे उक्तो यो न्यायस्तस्या-त्राप्यवतरणमुपमानीकरणम् । तथाहि यथा जिज्ञासासूत्रे, कर्त-व्येति विधिपदस्य पाठादर्शनेऽपि सोऽन्वेष्टव्यः, स विजिज्ञासि-तव्यः, श्रोतव्यो मन्तव्य इत्यादिविषयवाक्याद् विधिपदमध्या-हृत्य ब्रह्मजिज्ञासा कर्तव्येति व्याख्यातं, तथात्रापीति न च वाच्यं न शङ्कनीयम् । कुत इत्याकाङ्क्षोपशमाय हेतुमाह—श्रुतिवाक्ये-ष्वित्यादि । तद्विषयेषु सूत्रविषयेषु, सर्वे वेदा इत्यादिषु पूर्वो-दाहृतेषु, तददर्शनस्य अवधारणार्थकपददर्शनाभावस्य । समा-नत्वाद् अविशेषत्वात् । जिज्ञासासूत्रविषयवाक्यानुपूर्व्यां पठित-तस्य सूत्रानुपूर्व्यामपठितत्वेऽपि तदध्याहारस्य युक्तत्वात् । नचात्र तन्न्यायस्यावतरणार्हत्वं, विरुद्धत्वादिति शङ्काभागार्थः । अथ विषयवाक्यं द्विविधम् । अन्वयव्यतिरेकभेदात् । तत्रान्व-यवाक्येऽध्याहृतपदाभावेपि व्यतिरेकवाक्ये तदर्थस्य स्पष्टत्वा-दुक्तन्यायावतरणविरोधो, नतरां दृष्टान्तविरोधो, नतमामुपमि-

सिद्धरिति तात्पर्यं बुद्धौ निधायोक्तां शङ्कां निराकरोति—
नेत्यादि । तत्र, नेति । न निष्प्रमाणकमस्मद्व्याख्यानमित्यर्थः
कुत इत्याकाङ्क्षायां हेतुमाह—श्रौतवाक्यस्यैवेति । अत्रैवका
रोऽयोगव्यवच्छेदार्थकः । अत्रेति । अस्मिन्नवधारणे । प्रमा
णत्वात् । उक्तार्थस्य श्रुतिप्रामाण्वत्वादिति भावः । उक्तार्थप्र
काशनाय वाक्यं विशिनष्टि—अन्ययोगेति । अन्ययोगव्यव
च्छेदो नान्यदित्याकारकोऽर्थो यस्य तथा । किं तदित्यपेक्षायां
वाक्यं पठति-नावेदविदिति । एतस्य वाक्यस्यार्थमाह—निर
तिशयेत्यादि । बृहत्पदस्य व्याख्यानमाह—निरतिशयबृह
त्त्ववदिति । स्वरूपगुणशक्तिभिर्निरतिशयबृहत्त्वं विद्यतेऽस्येति
तद् बृहत्पदवाच्यं ब्रह्म, तत्रासाधारणं प्रमाणं वेदं स्वरूपतोऽर्थ
तश्च संप्रदायमुखेन विदन्ति ये ते वेदविदस्तेभ्यो भिन्नोऽवेद
विदुक्तलक्षणहीनस्तन्न वेद न जानातीत्यर्थः । कारणाभावे का
र्याभावः, प्रमाणज्ञानाभावे प्रमेयज्ञानाभाव इति न्यायावतारेण
द्रढयति—वेदनेत्यादि । वेदने प्रमेयवेदने ब्रह्मज्ञाने प्रमाणभूतो
यो वेदस्तस्याऽज्ञानाद् वेद्यज्ञानाभावः, सुतरामिति
वेद्यस्य ब्रह्मणो ज्ञानाभावो निःसंशय इत्यर्थः ।

अथ न केवलं व्यतिरेकवाक्यस्यैवोक्तार्थे प्रामाण्यम्, अ
न्वयवाक्येऽप्यवधारणार्थस्य सत्त्वादित्याह—किञ्चेति । उक्तवा
क्यादन्यदपि । प्रमाणस्याप्यत्र सत्त्वादित्यर्थः । तदेवाह—विषये
त्यादि । विषयवाक्यस्य सर्वे वेदा इत्यादेः पर्यायभूते विव
रणभूते, वेदैश्च सर्वैरहमेव वेद्य इत्यस्मिन् भगवद्वाक्ये अहमे
वेत्यवधारणस्य एवकारस्य कण्ठरवेणेति साक्षाद्विद्यमानत्वात्
नन्वहमेव वेद्य इत्यत्रावधारणस्यैवकारस्य सत्त्वेऽपि नोक्तार्थे
प्रामाण्यमस्ति । अहंपदेन प्रमेयवाचकेन सहान्वयान्न प्रमाणवाच

केन वेदैरित्यनेन सहान्वेतुं शक्यः । तथाऽहमेव वेद्यो, नान्यो मत्त इति सिद्धेऽप्यर्थे, नान्यप्रमाणगोचरोऽहमित्यर्थस्यासिद्धत्वादिति चेन्न । सर्वैर्वेदैरहमेव वेद्यो, न मत्तोऽन्य इत्यर्थस्य तव निर्विवादत्वेन अवधारणनिर्द्धारितवेद्यत्वे सिद्धे सति वेदितुं योग्यो वेद्य इति योग्यार्थकप्रत्ययादेवान्यप्रमाणगोचरत्वस्यानर्हत्वमवधार्यते । अतो नोक्तार्थऽसिद्धितारोपणावकाशः । नच कण्ठरवेणेत्याद्युक्तप्रतिज्ञाहानिरिति वाच्यम् । एवकारस्योभयत्रान्वयाद् वेदैरहमेव वेद्यो, न मत्तोऽन्यः कश्चिदिति, पुनश्च वेदैरेव वेद्यो, नान्यैः प्रमाणैरित्यन्वयेऽपि न कश्चिद्दोषः । नच गौरवात्मकदोषस्य सत्त्वादिति शङ्कनीयम् । फलवद्गौरवस्य तन्त्रपाठवद्दोषवत्त्वाभावादिति नोक्तशङ्कागन्धस्पर्शः । चकारोऽत्र वाक्यान्तरं समुच्चिनोति । तथाच हरिवंशे नारदवाक्यम्—

यं विदुर्वेदतत्त्वज्ञा ब्रह्माद्याः सनकादयः ।
विचिन्वन्तः प्रदीपेन ज्ञानाख्येन च केशवम् ॥
यं प्राप्य न निवर्तन्ते योगिनो यतचेतसः ।
सोऽसि वेदपुराणस्थस्तुभ्यं देव नमो नमः ॥
त्वामाहुः सकला वेदा ब्रह्मेति ज्ञाननिश्चयादिति ॥

तत्रैव दुर्वासोवचनम्—

वेदान्ते प्रथितं तेजस्तव चेदं विचार्यते ।
ये च विज्ञानतृप्तास्तु योगिनो वीतकल्मषाः ॥
पश्यन्ति हृत्सरोजे हि तदेवेदं वपुः प्रभो ॥
वेदैर्यद्गीयते तेजो ब्रह्मेति प्रतिपाद्यते ।
तदेवेदं विजानेऽहं रूपमैश्वरमीश्वर ॥
वैष्णवं परमं तेज इति वेदेषु पठ्यते ।

अवगच्छाम्यहं विष्णो तदेवेदं वपुस्तवेति ॥

तत्रैव घण्टाकर्णवचनम्—

केचिद् बहुत्वेन वदन्ति देव-
मेकात्मना केचिदिमं पुरातनम् ।
वेदान्तसंस्थापितसत्त्वयुक्तं
द्रष्टुं तमीशं वयमुद्यताः स्म-इति ॥

मोक्षधर्मे ब्रह्मवाक्यम्-

एष वेदनिधिः श्रीमानेष वै तपसो निधिः ।
नारायणपरा वेदा यज्ञा नारायणात्मका, इत्यादि ॥

स्वर्गपर्वणि वैशम्पायनवाक्यम्-

वेदे रामायणे पुण्ये भारते भरतर्षभ ।
आदौ चान्त्ये च मध्ये च हरिः सर्वत्र गीयते-इति ॥

अथ स्वातन्त्र्येण प्रमाणान्तरगोचरतां मन्यमानानां मतस्य दूषणवत्तां दर्शयितुं प्रतिजानीते-**नान्यथेति** प्रमाणान्तरगोचरत्वकल्पनोद्भावनावकाशः ।

तदेव व्यनक्ति—**तथाहीति** सैवोक्ताऽन्यप्रमाणाविषयता प्रपञ्च्यत इत्यर्थः । तत्रादौ प्रत्यक्षप्रमाणकं ब्रह्मेति केषाञ्चित् पक्षो निराक्रियते—**न तावदित्यादि** । न प्रत्यक्षप्रमाणविषयताश्रयं ब्रह्मेति प्रतिज्ञा, तत्र हेतुमाह—**अतीन्द्रियत्वादिति**। एतदुक्तं भवति । इन्द्रियार्थसन्निकर्षजन्यज्ञानस्य प्रत्यक्षत्वमिति निर्विवादः। तथाचेन्द्रियार्थत्वाभावेन तत्सन्निकर्षानर्हस्य वस्तुनः सन्निकर्षाभावेन सुतरां तज्जन्यत्वाभाव इति । तथाच प्रयोगः। न प्रत्यक्षप्रमाणवेद्यं ब्रह्म, अतीन्द्रियत्वात् । परमाण्वादिवत् । व्यतिरेकेऽपि, न प्रत्यक्षविषयं ब्रह्म, जात्यादिलौकिकानेकविशेषणवत्त्वाभावात् । यन्नैवं तन्नैवम् । मनुष्यादिवत् । ननु यदि ब्रह्मणि

इन्द्रियसन्निकर्षानर्हत्वमभ्युपेयते, तर्हि तस्येन्द्रियेष्वव्यापकत्व-मभ्युपेयं स्यात्। तथा सति परिच्छिन्नत्वं दुर्वारणीयम्। व्यापकत्वे चेन्द्रियेषु तस्य सत्त्वेन कथं सन्निकर्षाभाव इति शङ्कानिरासा-र्थमाह—नचेति। एतेन ब्रह्मण इन्द्रियसन्निकर्षानर्हत्वप्रतिपा-दनेन, ब्रह्मणः परिच्छिन्नत्वंम् अव्यापकत्वमिन्द्रियदेशाव्या-प्तिमत्त्वमिति यावत्। शङ्कनीयं शङ्काविषयीकर्तुं युक्तं, संशयास्पद-त्वमुद्भाव्यमित्यर्थः। तस्य ब्रह्मणो विभुत्वाद् विभुपरिमाणक-त्वादेव सर्वत्र व्यापकत्वाविशेषतयेन्द्रियेष्वपि बहिरन्तः सत्त्वे-ऽपि विद्यमानत्वेऽपि तेषामिन्द्रियाणां, तस्य भासा सर्वमिदं विभातीत्यादिप्रमाणात् तत्प्रकाश्यतया तेन ब्रह्मणा प्रकाश्य-तया। तत्प्रकाशनेति स्वप्रकाशकब्रह्मप्रकाशने प्रकाश्यानां-श्रवणादेः शब्दादिप्रकाशनसामर्थ्यवत्त्ववद् योग्यताभावात्।

इदमत्राकूतम्। न तावत् प्रमाणविषयीभावे प्रमेयसत्तामात्रमसा धारणं कारणम्। तथात्वे क्षीरादिगतस्वरूपस्य तत्र सत्त्वेन तत्पाने रसनेन्द्रियेणापि तद्ग्रहणापत्तेः। अपि तु प्रमाणगतस्वाभावि-क्यास्तच्छक्तेरेव कारणत्वं वाच्यम्। तथाऽत्रापि ब्रह्मणः सर्वत्र व्यापकत्वेनेन्द्रियेषु सत्त्वेऽपि तद्ग्रहणे सामर्थ्याभावान्न तद्विषयो ब्रह्मेति। एतदर्थगर्भितदृष्टान्तावाह — रूपगन्धेत्यादि। यथा लड्डुकादौ रूपगन्धयोः सत्त्वेऽपि रसनश्रवणयोरिन्द्रियत्वेन प्रमाणाविशेषत्वेऽपि रूपादिग्रहणसामर्थ्याऽभावात् तद्ग्रहणं नास्ति, तद्वदिति शक्त्यभावमात्रे दृष्टान्तः। प्रकाश्यानां प्रका-शकाऽप्रकाशने द्वितीयदृष्टान्तमाह—सूर्यादीति। यथा सूर्यादीनां स्वस्य प्रकाशकानां प्रकाशने खद्योतादेस्तत्प्रकाश्यस्याशक्यता तद्वत्। खद्योतादीत्यत्रादिपदेन दीपादेः संग्रहः। उक्तहेतावतीन्द्रियत्वादित्यत्र श्रुतिं प्रमाणयति — अणोरणीयानिति

व्याख्याता चेयं मनुना "प्रशासितारं सर्वेषामणीयांसमणीयसाम् इति। पञ्चमांशे, ब्रह्मणाऽपि। "नारायणमणीयांसमशेषाणामणीयसाम्" इति। अणीयसां क्षेत्रज्ञादीनामपि अणीयांसं निरतिशयसूक्ष्मम्। अणुपरिमाणकानां प्रत्यगात्मादीनां सूक्ष्मत्वेऽपि ब्रह्मणस्तु तेभ्योऽपि सूक्ष्मतमत्वम्। तेषामान्तरत्वाद् ब्रह्मण इति श्रुतिस्मृतिफलितार्थः ॥ १ ॥

उक्तप्रयोगे दृष्टान्तीकृतानां परमाण्वादीनां प्रत्यक्षानर्हत्वेऽप्यनुमानगम्यत्वात् तथा ब्रह्मणोऽप्यतीन्द्रियत्वाविशेषादनुमानगोचरत्वमस्त्विति शङ्कां वारयन्नाह—नापीति। अपीत्यवधारणार्थकः। तस्य उक्तलक्षणस्य ब्रह्मणोऽनुमानगोचरता नास्त्येवेत्यर्थः। यद्वा। उपमायाम् अपिशब्दः। यथा प्रत्यक्षप्रमाणाऽगोचरं ब्रह्म, तथाऽनुमानागोचरमपीत्यर्थः। तस्य ब्रह्मणः, अनुमेयत्वम् अनुमानगोचरत्वं न। कुत इत्यपेक्षायामाह—अनुमानस्येति। स्वन्त्रेति। श्रुतिमूलकत्वाभावेनाप्रमाणत्वादिति भावः। तत्र स्मृतिं प्रमाणयति— श्रुतीति। अस्या अयमर्थः। श्रुतिनिर्मूलकानुमानं कुत्रचिदपि पदार्थे निश्चयान्नियमादर्थं स्वसाध्यं वस्तु न प्रतिपादयेत्। साध्यनिश्चयज्ञानस्य तत्प्रतिबन्धकत्वादनुमितिज्ञानस्य संदिग्धविषयकत्वाच्च। उक्तन्यायमन्यत्राप्यतिदिशति— प्रमाणान्तरमेव चेति। श्रुतिसाहाय्यरहितमित्यत्रापि संबद्ध्यते। श्रुतिसहायविरहवतः प्रमाणमात्रस्यापि संदिग्धविषयकत्वमेवेत्यर्थः। तथाच श्रुतिः— "नेन्द्रियाणि, नानुमानम्" इति। उक्तप्रत्यक्षस्य प्रकृतस्यानुमानस्य च निषेधपरमिदं श्रुतिवाक्यं बोध्यम् ॥

अथानुमानस्य स्वतन्त्रप्रमाणकत्वाभावं श्रुत्वा तदसहिष्णुस्तार्किक उत्तिष्ठते —नन्वित्यादि।

ननु क्षित्यादीनि महाभूतानि कर्तृजन्यानि, कार्यत्वात् । यदेवं तदेवम् । घटादिवत् । व्यतिरेकेऽपि, यन्नैवं तन्नैवम् । कालादिवत् । परपक्षे प्रधानादिवच्चेत्यन्वयव्यतिरेकमुखेन तत्साध्यभूतस्य जगत्कर्तुर्ब्रह्मणोऽनुमातुं शक्यत्वात् कथं तदविषयत्वमिति चेन्न । उक्ततर्केण कुलालादिवत् सामान्यकर्त्रनुमितौ जातायामपि तत्स्वरूपगुणशक्तीनामलौकिकतया प्रत्यक्षागोचरत्वात् क्षेत्रज्ञविशेषस्यैव प्रतीतिविषयतापत्तेर्नोक्तलक्षणस्य ब्रह्मण उपलब्धिः ।

किञ्च । आस्तां तावद् ब्रह्मस्वरूपाद्युपलब्धिप्रसङ्गः । उक्तानुमानस्यैव दुष्टत्वेन, न प्रमाणत्वभावः । स्वरूपासिद्धतादोषग्रस्तत्वात् । तथाहि । युष्मन्मते आकाशस्य भूतत्वेऽपि कार्यत्वानभ्युपगत्योक्तस्य हेतोः स्वरूपाऽसिद्धत्वात् । अन्यथाऽस्मत्पक्षप्रवेशो दुर्वार इति सिद्धं ब्रह्मणोऽनुमानावेद्यत्वम् ॥

अनुमानाकृतिं रचयति—क्षित्यादीनि महाभूतानीत्यादि । तत्रान्वयव्याप्तिं दर्शयति—यदेवं तदेवमिति । यत् कार्यत्वावच्छिन्नं तत् कर्तृजन्यताश्रयं, घटादिवदिति । व्यतिरे-

कव्याप्तिं च—यत्रैवं तत्रैवमिति । यत् कार्यताभावाश्रयं तत् कर्तृजन्यताभावाश्रयम् । तत्र स्वमतानुसारिदृष्टान्तमाह—कालादीति। आदिना परमाण्वादिसंग्रहः। अन्यसाधारणदृष्टान्तान्तरमाह—परपक्षे इत्यादि। अन्वयव्यतिरेकाभ्यां यो जगत्कर्ता तदेव ब्रह्मेति निश्चेतुमर्हत्वान्नोक्तदोष इत्याह—अन्वयव्यतिरेकमुखेनेति । तत्साध्यभूतस्येति । उक्तानुमानसाध्यभूतस्य विचित्रजगल्लक्षणकार्यकर्तुरनुमातुमनुमानेन ग्रहीतुं विषयीकर्तुमिति यावत् । योग्यत्वात् । कथमिति। न कथमप्यनुमानाऽविषयत्वमितिचेदिति पूर्वपक्षव्याख्या। तत्रोत्तरमाह —नेति नानुमानविषयत्वं ब्रह्मण इत्यर्थः । तत्रादौ सामान्यदृष्ट्योक्तानुमानमभ्युपेत्य समाधत्ते—उक्ततर्केणेति । यथा कुलालादयः कर्तृत्वावच्छिन्नास्तद्वत् । सामान्यस्य कर्तुरनुमितौ जातायां सत्यामपि तन्निरूपितविषयतावच्छिन्नस्य कस्यचित् कर्तुः सिद्धावपि क्षेत्रज्ञविशेषस्यैव तत्प्रतीतिविषयतापत्तेरित्यन्वयः। तत्र हेतुः—तत्स्वरूपादीनामलौकिकतयेति । प्रत्यक्षादिप्रमाणविषयतानर्हत्वेनेत्यर्थः। तदेवाह—प्रत्यक्षागोचरत्वादिति। लौकिकस्यैव तद्गोचरत्वनियमादित्यर्थः। उपसंहरन् सिद्धान्तमाह—नोक्तलक्षणस्येति । पूर्वानन्तरेणोक्तसूत्रेणोक्तं लक्षणं यस्य तस्य ब्रह्मण इत्यर्थः। नोपलब्धिः, न स्वरूपादिज्ञानमित्यर्थः। अयमभिप्रायः। व्याप्तिज्ञानजन्यं ज्ञानमनुमितिः। तल्लक्षणं च—हेत्वधिकरणनिरूपिताधेयताविशिष्टात्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्यमित्यादि युष्मच्छास्त्रप्रसिद्धम्। तथाच कार्यत्वकर्तृजन्यत्वयोर्व्याप्त्या सामान्यक्षेत्रज्ञकल्पस्यानुमितिविषयत्वेऽपि तत्करणरूपाणां स्वाभाविकाचिन्त्यानन्तशक्तीनामघटनघटनापटीयसीनां तर्काविषयतया तद्धीनस्य च कार्योत्पादनानर्हस्य

क्षेत्रज्ञेभ्योऽपि न्यूनत्वादसिद्धप्रायत्वमेवेति । अतो नानुमेयत्वं ब्रह्मण इति। नच वेदे तच्छक्तीनां प्रसिद्धत्वाद् तत एव ज्ञात्वा तद्वतो जगत्कारणत्वमनुमेयमिति वाच्यम् । शास्त्रसहकृतानुमानस्येष्टत्वाच्चोक्तमेवास्माभिः । तथात्वे चानुमानस्वातन्त्र्यभङ्गस्य तादवस्थ्यान्न स्वातन्त्र्यं क्वचिदप्यनुमानस्येति सिद्धम् । इदं तूक्तप्रयोगाभ्युपगम्या सपाहितम् ।

इदानीं तन्निरसितुमुपक्रमते—किञ्चेति । एषा तु सद्धेतुकानुमानमात्रस्य गतिरुक्ता । नैतन्न्याय उक्तप्रयोगेऽवतारणीयोऽसद्धेतुकत्वात्तस्येत्याह—आस्तामिति । ब्रह्मस्वरूपस्येत्यादि। ब्रह्मणः साध्यस्य स्वरूपाद्यनुमेयतामसङ्गो महद् दूरं तिष्ठतु । उक्तानुमानस्यैव दुष्टत्वेन दूषणमिलितत्वेन न प्रमाणत्वभावः स्थितिभावत्वमित्यर्थः । तत्र हेतुमाह—स्वरूपासिद्धतादोषग्रस्तत्वाद्। अंशतः स्वरूपासिद्धतात्र विवक्षिता । क्षित्यादौ तदभावादिति विवेकः । कथमसिद्धतेत्यपेक्षायामाह—तथाहीति । तदेव प्रपञ्च्यत इत्यर्थः । एतद्विवृणोति—युष्मन्मत इति। युष्माकं तार्किकाणां मते प्रतिज्ञातेषु भूतेषु क्षित्यादीनां कार्यत्वेऽप्याकाशस्य तत्त्वानङ्गीकाराद् । उक्तस्य हेतोरिति । कार्यत्वादित्याकारकस्य यद् स्वरूपं कार्यत्वं तस्याकाशांशेऽसिद्धेः । रूपं गुणः श्रावणत्वाद्, चक्षुस्तैजसं गन्धवत्त्वाद्, अग्निरनुष्णो गुणत्वादित्यादिवदाकाशस्यापि कार्यत्वाभावादित्यर्थः। नच तस्यामतिज्ञातत्वं वाच्यम्। भूतत्वावच्छिन्नस्य प्रतिज्ञातत्वेन तस्याप्यविशेषाद् । आकाशस्यापि कार्यत्वाभ्युपगतौ न्यायसिद्धान्तभङ्गप्रसङ्ग इत्याह—अन्यथेति । आकाशस्य कार्यत्वे । अस्मत्पक्षप्रवेश इति । वेदान्तपक्षप्रवेश इत्यर्थः । स्वसिद्धान्तस्य तिलाञ्जल्युद्देश्यता

कल्प्यतामिति भावः। उपसंहरति—तत्सिद्धमित्यादि। अनुमानावेद्यत्वं स्वतन्त्रानुमानागोचरत्वमिति कृतं पल्लवनेन॥२॥

ननु मास्तां ब्रह्मज्ञापके प्रत्यक्षानुमाने। उक्तरीत्यानुपपन्नत्वात्। उपमानस्य तु दोषवत्त्वाभावात् तद्विषयत्वं भवेदिति संभावनायामाह—नचैवोपमेयत्वमिति।

नचैवोपमेयत्वम्। उपमानकारणीभूतसदृशज्ञानाभावेनोपमानस्यासिद्धत्वात्। नच पूर्वोक्ततत्त्वमस्यादिव्याख्यानविरोधः शङ्कनीयः। साधारणधर्मवत्त्वज्ञानस्य नोपमानसिद्धौ कारणत्वं, किन्त्वसाधारणधर्मज्ञानस्यैवेति। तथाभूतस्य च सर्वज्ञत्वसर्वशक्तिमत्त्वादिधर्मवतो ब्रह्मसदृशो द्वितीयपदार्थस्याभावान्नोक्तसिद्धान्तभङ्गशङ्का, नतरां सादृश्यज्ञानलक्षणोपमानसिद्धिर्नतमां तद्विषयतेत्यर्थः। तथाच श्रुतिः— न सदृशे तिष्ठति रूपमस्येति, न तस्य प्रतिमास्तीहेति च॥

एवकारोऽवधारणे। चकारो दृष्टान्ते। ब्रह्मण इत्यध्याहारः। यथा प्रत्यक्षानुमानगोचरत्वं नास्ति, तथैवोपमानगोचरत्वं ब्रह्मणो नास्त्येवेति वाक्यार्थः। एतदुक्तं भवति। सादृश्यज्ञानमुपमानम्। तच्च सदृशज्ञानतन्त्रम्। यथा गोसदृशो गवय इति वाक्यं श्रुतवतो नागरिकस्याऽरण्ये गोसदृशव्यक्त्यन्तरदर्शने पूर्वश्रुतवाक्यार्थस्मरणेन गोसादृश्यगवयपदार्थनिश्चय इति। तच्च नैवं ब्रह्म प्रमातुं शक्यम्। ब्रह्मसदृशवस्त्वन्तरासत्त्वेन तत्सा-

दृश्यज्ञानासिद्धिरिति तात्पर्यं बुद्धावस्थाप्योक्तार्थे हेतुमाह—उपमानेति । उपमाने सादृश्यज्ञाने कारणीभूतं यत् सदृशज्ञानं तस्याऽभावेन सदृशवस्तुनः सदृशज्ञानविषयस्याभावात् सदृशज्ञानाभावः । तदभावे च सादृश्यज्ञानं कथमित्यर्थः । एतदेवाह—उपमानस्येति ।

ननु परमं साम्यमुपैतीति श्रुतेः, मम साधर्म्यमागता इति भगवदुक्तेश्च, तत्त्वमस्यादिव्याख्याने प्रधानक्षेत्रज्ञयोः साम्यस्य स्वयमपि सिद्धान्तमुखेन निरूपितत्वाच्च कथं तत्सदृशाभाव उच्यते । अपि तु सदृशाभावाङ्गीकारे चोक्तश्रुतिस्मृत्योस्तदनुगतसिद्धान्तस्य च भङ्गप्रसङ्गादितिचेत् तत्राह—नचेति । पूर्वोक्तेन स्वसंप्रदायसिद्धान्तरीत्या प्रतिपादितेन तत्त्वमस्यादिवाक्यव्याख्यानेन विरोधो विपर्ययः शङ्कनीयः । तत्त्वमसीति वाक्यार्थे प्रत्यगात्मनां ब्रह्मणा सार्द्धं तज्ज्ञानादिसाधारणधर्मवत्त्वेन साम्यं प्रतिपादितम् । तथैव च सर्वं खल्विदं ब्रह्मेति वाक्यर्थे जडस्यापि तेन सह सत्यत्वाजडत्वादिसाधारणसाधर्म्यं च । तेन विरुद्धशङ्का मा भूदित्यर्थः । तदेव दृढयन्नन्वयव्यतिरेकाभ्याम्-साधारणेति । अन्यथा सर्वत्वावच्छिन्नस्यापि सर्वत्वावच्छिन्नं प्रत्यन्योऽन्यमुपमानोपमेयतापत्तेः । सर्वस्यापि कैश्चित् साधारणधर्मैरैक्यस्य तत्रैव प्रतिपादितत्वात्, तत् कथं न शङ्क्यते भवतेति भावः । पदार्थश्च स्पष्ट एव । उक्तसिद्धान्तं कैमुत्यन्यायेन दृढयन्नुपसंहरति—तथाभूतस्येति । एतत्पदार्थं स्वयमेव प्रपञ्चयति—सर्वज्ञत्वेति । ब्रह्मासाधारणधर्मवतो द्वितीयवस्तुन इत्यर्थः । यदुक्तं, सदृशाभावाङ्गीकारेत्यादि । तत् समाधत्ते—नोक्तेति । तत्त्वमस्यादिवाक्यव्याख्यानभङ्गशङ्केति कुतस्तरामुपमानसिद्धिः । कुतस्तमां तद्विषयतेति । अत्र श्रुतिं प्रमाणयति—न सदृशे

इत्यादि । अस्य ब्रह्मणो रूपं स्वसाम्ये पदार्थे न तिष्ठति तत्सर्वज्ञत्वाद्यसाधारणगुणाश्रयस्य द्वितीयस्याभावाद् । वस्तुमात्रस्य ततोऽवरत्वेन विसदृशत्वाच्च । "न तत्समश्चाऽभ्यधिकश्च दृश्यत" इति श्रुतेः । "न तत्समोऽस्त्यभ्यधिकः कुतोऽन्य" इत्यर्जुनोक्तस्मृतेश्च । एतद् द्रढयितुं वाक्यान्तरं पठति—न तस्य प्रतिमेत्यादि ॥

उक्तसिद्धान्तमनुवादपूर्वकं स्वीकृत्य प्रकारान्तरेणाशङ्कामुत्थापयति—नन्वित्यादि ।

ननु स्यादेतत् । ब्रह्मसदृशपदार्थान्तराभावेनोपमानासिद्धत्वादनुपमेयत्वमिति । तथापि गोविसदृशोऽश्वः, उष्ट्रविसदृशो हस्ती, विषविसदृशममृतमित्यादिवद् विसदृशज्ञानादपि वैसादृश्यज्ञानलक्षणकमुपमानं सुप्रसिद्धम् । तथाच विसदृशानां सत्त्वेन तज्ज्ञानस्यापि सत्त्वात् तद्भिन्नब्रह्मविषयकज्ञानस्यापि सुकरत्वान्न सर्वथोपमानाऽगोचरं ब्रह्मेति चेन्न । वैसादृश्यज्ञानज्ञापकस्य प्रसिद्धोपमेयज्ञानपूर्वकज्ञापयितृत्ववत्त्वात् । वेदेन विना तज्ज्ञापकाभावेन वैसादृश्यज्ञानस्याप्यसिद्धत्वात् तादवस्थ्यं, ब्रह्मणोऽनुपमेयत्वमिति ।

किञ्च । वैसादृश्यज्ञानसत्त्वाऽभ्युपगमेऽपि तेन जडाजडविसदृशं ब्रह्मेत्युपमितौ सत्यामपि

सामान्यतः किञ्चित् क्षराक्षरचेतनाचेतनपदार्थभिन्नवस्तुसिद्धेऽपि सर्वज्ञत्वसर्वशक्तिमत्त्वेन जगत्कारणत्वसर्वनियन्तत्वादिधर्माश्रयोक्तलक्षणब्रह्मज्ञानस्य न सर्वथोपमितत्वसिद्धिरित्यलं विस्तरेण ॥

स्यादेतदिति । संभाव्यमेवैतत् । किं तदित्यपेक्षायामेतच्छब्दार्थं प्रपञ्चयन्ननुवदति—ब्रह्मसदृशेत्यादि । स्वीयतात्पर्यमाह—तथापीति । विसदृशज्ञानादपि उपमानं सुप्रसिद्धमित्यन्वयः । तत्र लक्षणगर्भितविशेषणमाह—वैसादृश्येति । वैसादृश्यं ज्ञानं लक्षणं यस्य तत् । तत्रोदाहरणमाह—गोविसदृशोऽश्व इत्यादि । स्यादेतदिति चेत् तत्राह—तथाचेति । विसदृशज्ञानादुपमाने सिद्धे सतीत्यर्थः । विसदृशानां क्षेत्रज्ञादीनां भावेन, तज्ज्ञानस्येति विसदृशज्ञानस्यापि । तद्भिन्नेति । विसदृशक्षेत्रज्ञादिभिन्नं ब्रह्म विषयो यस्य तथोपमितिब्रह्मविषयकज्ञानस्य सामञ्जस्यात् । न सर्वथेति । पूर्वोक्तसादृश्यज्ञानजन्योपमित्यविषयत्वेऽपि वैसादृश्यज्ञानजन्योपमितिविषयत्वमस्त्येवेत्यर्थः । इति चेदिति पूर्वपक्षतात्पर्यार्थः । तन्निराकुर्वन् समाधत्ते—नेति । नोक्तप्रकारेणोपमेयत्वं ब्रह्मण इत्यर्थः । तत्र हेतुमाह—वैसादृश्येति । अयमर्थः । कीदृशोऽश्व ? इति तदविदुषा पृष्टे सति तज्ज्ञापकस्य प्रमेयभूताऽश्वादिज्ञानवत्त्वाभावे, गोविसदृशो द्विशफस्वल्पपुच्छविशिष्टव्यक्तिमद्भिन्नोऽश्वः । अतिदीर्घग्रीवविशिष्टव्यक्तिमद्भिन्नो हस्ती । विषविसदृशं हननक्रियासाधारणकारणीभूतौषध्यादिभिन्नममृतमित्यादिज्ञापनात्मकवचनप्रयोक्तृत्वानुप-

पत्तेः । हेतुं विवृणोति—वेदेन विनेति । प्रमेयभूतब्रह्मज्ञातुरभावात् । तज्ज्ञापकाभावेनेति । ब्रह्मज्ञापकाभावेन । ज्ञातृत्वपूर्वकत्वात् तज्ज्ञापकत्वस्येत्यर्थः । वैसादृश्यज्ञानस्योपमानलक्षणस्याप्यसिद्धत्वात् तदसिद्धयाचानुपमेयत्वम् । तादवस्थ्यमिति । उपमानसिद्धयभावे च कः प्रसङ्ग उपमेयत्वस्येति भावः ।

तदभ्युपगमेऽपि न ब्रह्मज्ञानसिद्धिरित्याह—किञ्चेति । नैतदेव दूषणं, किन्त्वन्यदपि श्रूयतामित्यर्थः । तदेव प्रतिपाद्यते—वैसादृश्येति । अयमभिप्रायः । गोविसदृशोऽश्व इति ज्ञानाद् गोभिन्नपदार्थमात्रस्य सामान्यज्ञाने जातेऽप्यश्वत्वावच्छिन्नव्यक्तिज्ञानस्यासिद्धेरिव ब्रह्मविसदृशचेतनाचेतनवस्तुज्ञानाद् तद्विसदृशं ब्रह्मेति ज्ञानोत्पत्तावपि सर्वज्ञत्वादिस्वासाधारणधर्मावच्छिन्नज्ञानाभावेन जगत्कारणत्वज्ञानासिद्धत्वान्नोपमेयं ब्रह्मेति । उपसंहरति—अलमिति ॥ ३ ॥

अर्थापत्तिवेद्यतां निराकरोति—नहीति ।

न ह्यर्थापत्तिगोचरत्वं ब्रह्मणो वाच्यम् । तस्या अपि तर्कविशेषत्वेनानुमानकल्पयोगक्षेमत्वात् । नच पृथक्कथनवैयर्थ्यमिति वाच्यम् । पृथक्प्रमाणत्वात् ।

नचाऽप्यनुपलब्धिप्रमाणप्रमेयता तस्य कल्पनीया । अनुपलब्धेश्च प्रत्यक्षोपजीवित्वात् ।

ततश्च परिशिष्टशब्दैकवेद्यमेव ब्रह्मेति सिद्धम् ॥ १ । १ । ३ ॥

हिशब्दः संशयवारणार्थकः । तत्र हेतुः—तस्या इति । अर्थापत्तेरपि तर्करूपतयाऽनुमानतुल्यत्वात् । तर्ह्यनुमानान्तर्गतत्वेन किमर्थः पृथगुपन्यास इति शङ्कायामाह—नचेति । तत्र हेतुः—पृथक्प्रमाणत्वात् । तदन्तर्भावे षट्प्रमाणाभ्युपगमभङ्गप्रसङ्गादित्यर्थः ॥ ४ ॥

अनुपलब्धिप्रमाणगोचरतासंभावना वार्यते—नचापीति। न कल्पनीया न कल्पयितुं योग्येत्यर्थः । कुत इत्यत आह—अनुपलब्धेरिति । प्रत्यक्षविषयस्यैवानुपलब्धिगोचरत्वनियमात् । यदि स्यादुपलभ्येतेति प्रतीतिविषयस्य, प्रतियोगिप्रत्यक्षज्ञानपूर्वकत्वादभावज्ञानस्येत्यर्थः ॥ ५ ॥

उपसंहरति—ततश्चेति । परिशिष्टेति । उक्तप्रकारैर्हेतुभिः । षट्सु मध्ये पञ्चानां शब्दमात्रनिरपेक्षतया ब्रह्मज्ञापनानर्हत्वेन परिशिष्टो यः शब्दस्तदेकवेद्यं ब्रह्मेति सिद्धम् । वस्तुतस्तु प्रत्यक्षानुमानशब्दभेदात् त्रीण्येव प्रमाणानि । अन्येषां च तत्रैवान्तर्भावस्य वक्तुं शक्यत्वादिति प्रज्ञातव्यमिति भावः ॥ १ । १ । ३ ॥

———:o:———

इत्थं तावज्जिज्ञासासूत्रे निर्वचनमुखेन जिज्ञास्यं ब्रह्म प्रतिपाद्य तदेव च लक्षणप्रमाणाभ्यां निर्णीय तस्य चान्यप्रमाणविषयत्वं प्रमाणैरेव निरस्य वेदैकगोचरत्वमुक्तम् ।

इदानीं ब्रह्मणोऽन्यप्रमाणाविषयत्ववद्वेदाविषयत्वशङ्का मा भूदिति निर्धारयितुं सूत्रान्तरमवतारयति—नन्वित्यादिना ।

ननु "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । अशब्दमस्पर्शम् । यद्वाचानभ्युदितम् ।

अवचनेनैव प्रोवाच । यच्छ्रोत्रेण न शृणोति" इत्यादिश्रुतिभिरेव ब्रह्मणो वेदाविषयताया अपि प्रतिपादितत्वात् कथं शब्दैकप्रमाणकं ब्रह्मेति चेत् तत्राह—

तत्तु समन्वयात् ॥१।१।४॥

तुशब्दः पूर्वपक्षनिरासार्थकः । तद् उक्तलक्षणकं सर्वज्ञं सर्वाचिन्त्यानन्तशक्ति ब्रह्म वेदैकप्रमाणकमेव । कुतः ? । समन्वयात् । औपनिषदवाक्येषु तस्यैव समन्वयात् । सम्यग् वाच्यतयाऽन्वयः समन्वयस्तस्मात् । ब्रह्मप्रतिपादनपरत्वेन समन्वितानि वेदान्तवाक्यानि । " यतो वा इमानि भूतानि जायन्ते । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । सदेव सौम्येदमग्र आसीत् । एकमेवाद्वितीयं ब्रह्म । तदैक्षत बहु स्यां प्रजायेय । नारायणाज्जायते प्राणः । नारायणाद् ब्रह्मा जायते । नारायणाद् रुद्रो जायते । एको नारायण आसीन्न ब्रह्मा, नेशानः । ब्रह्म वा इदमेकमेवाग्र आसीत् । ब्रह्म वा इदमग्र आसीत् ।

तदात्मानमेवावेदहं ब्रह्मस्मीति । तस्मात् तत् सर्वमभवत् । आत्मा वा इदमेक एवाग्र आसीत् । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दं ब्रह्मणो विद्वान् । विज्ञानमानन्दं ब्रह्म । यः सर्वज्ञः सर्ववित्" इत्यादीनि ॥

कथं शब्दैकप्रमाणकं ब्रह्मेति । निषेधपरः कथंशब्दः । न शब्दैकवेद्यं ब्रह्मेत्यर्थः । तत्र हेतुमाह—श्रुतिभिरेव ब्रह्मणो वेदाविषयतायाः अपि प्रतिपादितत्वादिति । अपिशब्दो दृष्टान्ते । यथाऽन्यप्रमाणागोचरत्वमुक्तं तथैव शब्दागोचरत्वस्यापि प्रमाणसिद्धत्वात् स्वीकार्यमित्यर्थः ।

एतदुक्तं भवति । शब्दवृत्तिस्तावद् द्विधा । मुख्या, जघन्या चेति । तत्र मुख्या नाम शक्तिः । सा चाभिधानामकं पदार्थान्तरं संकेतग्राह्यं सामान्यमात्रविषयकं चेति मीमांसकाः ।

अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरेच्छासंकेतरूपा सामान्यविशिष्टव्यक्तिविषयिकेति तार्किकाः ।

अर्थैः सार्द्धं शब्दानामनादिसंबन्धो योग्यतालक्षण इति शाब्दिकाः ।

अग्नौ स्वाभाविकदहनसामर्थ्यवच्छब्दनिष्ठतदर्थबोधनाईसामर्थ्यं पदार्थान्तरमित्यौपनिषदाः । नचातिरिक्तशक्तौ मानाभाव इति वाच्यम् । उक्तदृष्टान्ते दाहादिलक्षणकार्यानुपपत्तिवत् तत्तदर्थप्रकाशानुपपत्तेरेव प्रमाणत्वात् । किञ्च । शब्दब्रह्मणोऽपि ब्रह्मत्वाविशेषेण जगत्कारणस्य परब्रह्मण उक्तश्रुतिस्मृति-

प्रतिपादितशक्तेर्निर्विवादत्ववच्छब्दब्रह्मणोऽपि स्वाभाविकाचिन्त्यानन्तशक्तिमत्त्वे विवादायोग्यत्वात् । उक्तशास्त्रस्यैवात्रापि प्रमाणयितुं शक्यत्वाच्चेत्यलं विस्तरेण ।

सा च त्रिधा । रूढिर्योगो योगरूढिश्च । सर्वत्र जनपदेष्वपि प्रतिपन्नप्रयोगेण घटाद्याकृतिवाचकत्वेन वृत्ती रूढिः । सा च समुदायशक्तिरित्यप्याख्यायते । यथा—गौः, नीलं, शुक्लः, डित्थ इत्यादि । रूढाः शब्दाश्च द्विविधाः । अनेकार्थाः, पर्यायरूपाश्च । तत्रानेकार्था हरिगोसैन्धवादयः । पर्यायरूपाश्च, हस्तकरादयः । अवयवशक्तिर्योगः । यथा—माधवो लक्ष्मीकान्त इत्यादि । उभयविधशक्तिका योगरूढिः । यथा–पङ्कजमित्यादि । रूढया पद्मवाचकत्वेऽपि, पङ्काज्जातं पङ्कजमित्यन्यस्यापि वृक्षादेर्वाचकत्वं पद्मवाचकत्वं च । यथा च सोम इत्यादे रूढया चन्द्रवाचकत्वम् । उमया सह वर्तत इति सोम इति योगवृत्त्या त्रिनयनवाचकत्वमपीति ।

जघन्यापि द्विविधा । लक्षणा, गौणी चेति । शक्यसंबन्धो लक्षणा । यथा गङ्गायां घोष इत्यत्र गङ्गापदशक्यो गङ्गाप्रवाहस्तत्संबन्धस्तीरेऽस्त्येव । तथाच स्वशक्यप्रवाहसंयोगरूपसंबन्धेन गङ्गापदात् तीरोपस्थितिः । स्वशक्येन सह नियमरूपा व्याप्तिरेव लक्षणेति मीमांसकाः । तदसम्यक् । तथात्वे सति, मञ्चाः क्रोशन्तीत्यत्र मञ्चपदस्य मञ्चस्थपुरुषे लक्षणाभावापत्तेः । मञ्चपुरुषयोर्व्याप्त्यभावात् । एवं, यष्टीः प्रवेशयेत्यादिष्वप्यव्याप्तिर्द्रष्टव्या ।

गङ्गादिपदानां तीरादौ शक्तिरेव । सर्वेषामपि शब्दानां प्रायः सर्वत्रैव शक्तेः । लक्षणा च स्वतन्त्रवृत्तिर्नाभ्युपेयेति वैयाकरणाः । तच्चिन्त्यम् । सर्वेषां पदानां सर्वार्थे शक्त्यङ्गीकारे

सर्वेषु पदेष्वेकतमेनापि सर्वार्थोपस्थितौ तस्यैव सर्वार्थोपस्थापनाय पौनःपुन्येनानुपूर्व्या रचनयाऽन्यपदयोजनानैरपेक्ष्यापत्तेः। घटपदार्थे पटपदप्रयोगस्यापि साधुताऽभावानापत्तेश्चेत्यन्यत्र प्रपञ्चो द्रष्टव्यः।

सा त्रिधा। जहत्स्वार्था, अजहत्स्वार्था, जहदजहत्स्वार्था चेति। तत्र वाच्यार्थस्य सर्वांशत्यागेनान्यत्र वृत्तिः प्रथमा। यथा—गङ्गायां घोषः, कुसुमितद्रुमा गङ्गेति। शक्यार्थापरित्यागेनैवान्यत्र वर्तमाना द्वितीया। सा च शक्तिसदृशी। यथा—काकेभ्यो दधि रक्ष्यतामित्यत्रोपघातकत्वेन काकपदस्य काकतदितरेषु वृत्तिः। यथा वा—सृष्टीरुपदधातीत्यत्र सृष्टिशब्दस्य मन्त्रोपाधेयेष्टकासु वृत्तिः सृष्टिमन्त्रबाहुल्येनेति। यथा च—शोणो धावतीत्यत्र शोणगुणगमनलक्षणस्य शक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तदाश्रयाश्वादिषु वृत्तिः।

एके तु, शोणो धावतीत्यत्र तादात्म्यसंबन्धेन मुख्यत्वोपपत्तेः। अत एव, "चतुष्टयी शब्दानां प्रवृत्तिरि"ति महाभाष्यकारोक्तिः। चतुष्टयञ्च जातिगुणक्रियाद्रव्यस्वरूपम्। तत्र, गौरित्यादौ जातिः। शुक्लो नील इत्यादौ गुणः। चलतीत्यादौ क्रिया। डित्थ इत्यादौ द्रव्यस्वरूपमेव। लक्षणाङ्गीकारे च तद्विरोधापत्तिरित्याहुः।

शक्यैकदेशत्यागेन तदेकदेशवृत्तिस्तृतीया। यथा—घटो नित्य इत्यत्र घटस्य नित्यत्वेनान्वयानुपपत्त्यास्तद्गतघटत्वसामान्येन तदेकदेशेनान्वयः। यथा च—सोऽयं देवदत्त इत्यत्रापि तद्देशकालवैशिष्ट्यैतद्देशकालवैशिष्ट्ययोर्युगपदन्वयासम्भवेन तत्पिण्डमात्रे शक्यैकदेशे वृत्तिरित्यन्ये। तदविचारितम्। पूर्वकालादिवैशिष्ट्यस्यान्वयासंभवेऽप्येतत्कालवैशिष्ट्यस्यान्वयेऽनु-

पपत्तेरभावात् तदन्वयस्य दुर्वारणीयतया सत्त्वादित्यन्यैर्वैष्णवाचार्यैरेव निरस्तम्। इयमेव भागलक्षणेत्यभिधीयते।

शक्यवृत्तिलक्ष्यमाणगुणसंबन्धो गौणी। यथा सिंहो माणवकः। अत्र सिंहवृत्तिशौर्यादिगुणलक्षणया तद्वति माणवके वृत्तिः। "लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता" इति वचनात्।

व्यञ्जनाऽन्या वृत्तिरित्यालङ्कारिकाः। ते तु गौणीं लक्षणायामन्तरीकृत्य, मुख्या, लक्षणा, व्यञ्जनेति वृत्तेस्त्रैविध्यमाचक्षते। व्यञ्जनेनार्थज्ञापिका व्यञ्जना। यथा—गतोऽस्तमर्कः इत्युदासीनवाक्यप्रयोगाद्, दूरं मागा इति, पण्यान्यपसार्यन्तामिति, सन्ध्योपास्यतामिति बहूनां बहुविधार्थप्रत्ययो भवति। तत्र न शक्तिर्न वा लक्षणा। किन्तु शब्दस्य चान्वयव्यतिरेकाभ्यामपरा व्यञ्जनाख्या वृत्तिराश्रयणीयेति वदन्ति।

तत्रेदं बोध्यम्। तेषां तु प्रत्ययानां लक्षणया शक्त्या वा सम्भवाद् वृत्त्यन्तराभ्युपगमे गौरवादिति।

यत्तु—

यौगिको योगरूढश्च शब्दः स्यादौपचारिकः।
मुख्यो लाक्षणिको गौणः शब्दः षोढा निगद्यते॥

इति वैयाकरणैः षड्विधत्वमुक्तम्। तन्मुख्यजघन्ययोरवान्तरभेदमादाय योजनीयम्। तथाहि। मुख्यो, यौगिको, योगरूढ इत्येकं त्रिकं मुख्यायाम्। लाक्षणिक, औपचारिको, गौण इत्यपरं त्रिकं जघन्यायाम्। तत् सिद्धं वृत्तेर्द्वैविध्यमिति शब्दवृत्तिनिर्णयः।

नैतासां कतमस्या अपि वृत्तेर्ब्रह्मणि प्रवृत्तिसंभवः। तत्र न तावद्रूढिवृत्तेर्ब्रह्मणि प्रवृत्तिः संभवति। तस्या जातिगुणस्वरूपादिभिर्निर्देशयोग्ये पदार्थे प्रवृत्तिसत्त्वात्, तस्मिंश्च तत्प्रवृत्त्यौपयिकजात्यादेरभावात्। तथाहि। न तावद् गौरित्यादिवज्जात्या

ब्रह्म निर्देष्टुं शक्यम् । एकत्वात् । तस्य जातिबांधकत्वात् । 'एको देवः सर्वभुतेषु गूढः । एकमेवाद्वितीयं ब्रह्म' इत्यादि-श्रुतेः । नापि, शुक्ल इत्यादिवद् गुणवत्तया । निर्गुणत्वात् । "केवलो निर्गुणश्च" इति श्रुतेः । नापि, डित्थ इत्यादिवद् द्रव्य-स्वरूपेण । अव्यक्तत्वात् । नापि, चलतीत्यादिक्रियानिर्देशेन । विभुत्वेन निष्क्रियत्वात् । "निष्कलं निष्क्रियं शान्तम्" इत्यादि-श्रुतेः । तस्मान्न रूढेर्ब्रह्मविषयकत्वमिति सिद्धम् । नापि योगस्य तत्र प्रवृत्तिसंभवः । तस्य तत्प्रवृत्तिनिमित्तप्रकृतिप्रत्ययार्थत्वायो-गात् । अत एव, न योगरूढेः प्रवृत्तिरपि संगच्छते । न हि ब्रह्मणि लक्षणावृत्तिप्रवृत्तेरवकाशः । शक्येन समं संबन्धाग्रहात् । नच लक्षणयैव लक्ष्यस्वरूपोपस्थितिः । तस्याः स्मारकत्वात् । स्मरणस्य च पूर्वानुभवजन्यत्वनियमात् । नाप्यन्यमताभीष्टव्य-ञ्जनावृत्तेस्तत्र प्रवेशः संभावनीयः । निःसंबन्धे वस्तुनि तस्याः प्रसरणाभावात् । नापि गौणीप्रवृत्तिः । सर्वसादृश्यशून्यत्वात् । " न सदृशे तिष्ठति रूपमस्य " इति श्रुतेः । तस्मात् कतमस्या अपि वृत्तेस्तत्र प्रवेशाभावेनान्यप्रमाणागोचरताया इव शब्दगो-चरत्वस्यापि साम्यान्न श्रुतिवेद्यं ब्रह्मेति । उक्तपक्षे शास्त्रं प्रमाण यति—यतो वाच इत्यादि । इति चेदिति शङ्कासंदर्भार्थः । उक्त-पक्ष उत्तरं पठति—तत्राहेति । तस्याम् उक्तायां शङ्कायां सिद्धान्त-सूत्रेणाह—तत्तु समन्वयादिति । तत्र तावत् पदार्थं व्याचष्टे—तुशब्द इति । सूत्रानुपूर्व्यां पठितस्तुकार इत्यर्थः । पूर्वपक्षनि-रासार्थक इति । पूर्वपक्षस्य, न शब्दैकवेद्यं ब्रह्मेत्यस्य निरासो व्यावृत्तिरर्थो यस्य सः । तथाच न वेदवेद्यताऽभाववद् ब्रह्मेत्यर्थः । द्वितीयपदार्थमाह— तदिति । उक्तलक्षणकं द्वितीयसूत्रेणोक्तं लक्षणं यस्य तत् । सर्वज्ञमिति । सर्वदेशकालवस्तुविषयक-

सामान्यविशेषज्ञानाश्रयम्। सर्वत्वावच्छिन्नदेशाद्यान्तरतया सर्वाधिष्ठानतया सर्वसाक्षितया च सर्वसामानाधिकरण्यार्हत्वाद्, यः सर्वज्ञः सर्ववित्इति श्रुतेश्च । **सर्वाचिन्त्यानन्तशक्तीति** । सर्वकार्योत्पादनार्हा इयत्तावच्छेदेन चिन्तयितुमशक्याश्चासंख्याकाः शक्तयो यस्य तत् । **ब्रह्मेति** । स्वरूपगुणशक्त्यादिभिर्निरतिशयबृहद्वस्तु । **वेदैकप्रमाणकमेवेति** । वेद एकं केवलं निरपेक्षं प्रमाणं यस्मिंस्तत् । एकशब्दोऽन्ययोगव्यवच्छेदार्थः । एवकारोऽयोगव्यवच्छेदार्थकः । तथाचान्यप्रमाणाऽगोचरत्वे सति वेदैकवेद्यमित्यर्थः । कुत? इत्याकाङ्क्षायां हेतुमाह भगवान् बादरायणः—**समन्वयादिति** । सम्यक् पदार्थाभिन्नतयाऽन्वयः समन्वयस्तस्मात् । तदेवाह—**औपनिषदवाक्येष्विति** । **तस्यैव ब्रह्मण इत्यर्थः** । **सम्यगिति** । सम्यक्त्वं च शब्दस्वार्थापरित्यागेन तदभिन्नतया तात्पर्यभूतम् । तच्च वाच्यमेवेत्याह—**वाच्यतयेति** । तदेवं ब्रह्मणो वाच्यतां निरूप्य वेदस्य तद्वाचकतामाह वाच्यवाचकसंबन्धज्ञापनाय—**ब्रह्मप्रतिपादनपरत्वेनेत्यादिना** । अनेन वेदप्रतिपाद्यं ब्रह्म, तत्प्रतिपादकश्च वेद इति नित्यसंबन्धो दर्शित इति बोध्यम् ।

तथाचाह, श्रीपराशरः प्रचेतसां वाक्येन—

नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वतीति ।

शाश्वती नित्येत्यर्थः । प्रतिष्ठा संबन्धः । तान्येव कानिचिद् वाक्यानि पठ्यन्ते—**यतो वा इत्यादीनि** । अनेकोपनिषत्कत्वाद् वाक्यानां , नार्थतः पुनरुक्तिर्दोषाय कल्पनीया ॥

इत्थं पदार्थं निरूप्य समन्वयप्रकारनिर्द्धारणाय शङ्कोत्थापनमुखेनारभ्यते । तत्र तावत् पूर्वपक्ष्युत्थापितश्रुतिविरोधनिरासाय शङ्कते—**नन्विति** ।

ननु पूर्वोक्तश्रुतीनां गत्यभावेन तद्विरोधस्य तादवस्थ्यान्नोक्तसिद्धान्तसिद्धिरिति चेन्न । पूर्वोक्तश्रुतीनां ब्रह्मणः स्वरूपगुणशक्त्यादीयत्तावच्छेदनिषेधात्मिकाया गतेर्विद्यमानत्वाद् विरोधाभावेन सर्वं समञ्जसम् । अन्यथा, "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, मनसैवानुद्रष्टव्यः, हृदा हृदिस्थं, मनसा य एतमेवं विदुः, दृश्यते त्वग्रयया बुद्धया, निचाय्य तं मृत्युमुखात् प्रमुच्यते, परात् परं पुरिशयं पुरुषमीक्षते, परिपश्यन्ति धीरा" इत्यादिश्रुतिकदम्बविरोधात्। सर्वप्रमाणागोचरत्वाभ्युपगमे शशशृङ्गादितुल्यताभाक्तया अवस्तुतापत्तेश्च ।

नच ब्रह्मणः शब्दप्रतिपाद्यतास्वीकारे तत्प्रकाश्यतापत्त्या घटवन्नश्वरतापत्तेरिति वाच्यम् । वैदिकशब्दगतायाः शक्तेर्ब्रह्मशक्त्यभिन्नतया स्वशक्तिप्रकाश्यत्वान्न स्वप्रकाशताहानेर्नतरां परप्रकाश्यतापत्तेश्चावकाशः ।

नचैवं सति प्रत्यक्षादिप्रमाणगतशक्तीनामपि तथात्वात् तद्गोचरतास्वीकारे उक्तनयेन

त्यभाव इति शङ्कनीयः । प्रत्यक्षादिगतशक्तीनां क्षेत्रज्ञबुद्ध्यादिव्यवहितत्वेन भ्रमवत्तासंभवेन उक्त न्यायावतरणस्य तत्रानवसरत्वात् ॥

पूर्वोक्तानां पूर्वपक्षे पठितानां, यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादीनां **गत्यभावेन** विषयाभावेन, **तद्विरोधस्य** तासां श्रुतीनां विरोधस्य **तादवस्थ्याद्** अपरिहार्यत्वात् । **नोक्तसिद्धान्तस्य** वेदान्ते वाच्यतया ब्रह्मसमन्वयस्य **सिद्धिरिति चेत्** । उक्तवाक्यानां तद्वाचकत्वनिषेधवत्त्वेन न तेषु वाच्यतया ब्रह्मणः समन्वय इति शङ्काग्रन्थभावार्थः । तत्रोत्तरमाह—**नेति** । न ह्युक्तसिद्धान्ते विरोध उद्भावनीय इत्यर्थः । तत्र हेतुः—**श्रुतीनां गतेर्विद्यमानत्वादि**त्यन्वयः । का सा गतिरित्यपेक्षायां तत्स्वरूपमाह—**ब्रह्मण** इति । **इयत्तावच्छेदस्य निषेध आत्मा** स्वरूपं यस्यास्तस्या इत्यर्थः । यथा क्षीराब्धेः पयस इयत्ताऽभावे ऽपि तत्पानादेरवर्जनीयत्वात् तत्तीरवासिनां तत्र प्रवृत्तेस्तेन तृप्तेश्च लोकशास्त्रसिद्धत्वात् । तथा ब्रह्मणः स्वरूपगुणादीनामियत्तामलभमानोऽपि तद्दत्तस्वशक्त्यनुसारेण तदन्तरङ्गो वेदः क्षेत्रज्ञानां संसृतिनिवृत्तये यतमानस्तच्छक्त्यैव तत्प्रतिपादने प्रवृत्तस्तज्ज्ञापयतीत्यर्थः । **विरोधाभावेन सर्वं समञ्जसमिति** । घटितमेव, न काप्यनुपपत्तिरित्यर्थः । व्यतिरेके चानुपपत्तेः सत्त्वादित्याह—**अन्यथेति** । उक्तसिद्धान्तानङ्गीकरण इत्यर्थः । अनेन श्रुतिकदम्बबाधलक्षणानुपपत्तेरप्यत्रमानत्वादिति सूचितम् । अन्यामप्यनुपपत्तिं दर्शयति—**सर्वप्रमाणेति** । शशशृङ्गादीत्यादिना खपुष्पादिसंग्रहः । यथा खपुष्पादेः सर्वप्रमाणाविषयत्वेनावस्तुत्वं सर्वेषां संमतं तथा ब्रह्मणोऽपि । तथा-

चात्र प्रयोगः—वेदाप्रमेयं ब्रह्म अवस्तु । सर्वप्रमाणागोचरत्वात् । खपुष्पादिवत् । एवं जिज्ञास्याभावे जिज्ञासायाः शास्त्रभूतायाः शारीरकमीमांसाया आरम्भस्यैव वैयर्थ्यापत्तिरिति भावः ।

ब्रह्मणो वेदप्रतिपाद्यतामसहमानस्य वादिनश्चोदनां निराकरोति—नचेति। ब्रह्मणः शब्दप्रतिपाद्यतास्वीकारे शब्दस्य तत्प्रकाशकताऽवर्जनीया। तथात्वे च तत्प्रकाश्यतापत्त्या ब्रह्मणः शब्दप्रकाश्यताव्याप्त्या स्वप्रकाशत्वहानेर्घटादिवन्नश्वरतापत्तेः । तथाच प्रयोगः—शब्दप्रतिपाद्यं ब्रह्म नश्वरम् । परप्रकाश्यत्वात् । घटादिवदिति शङ्काकोटिः । लौकिकशब्दे उक्तचोदनावकाशेऽपि वेदस्येश्वरात्मकत्वेन न तत्र शङ्का प्रवेष्टुं शक्येति बुद्धौ कृत्वा परिहरति—इति नच वाच्यमिति । इत्थं न शङ्कितव्यमित्यर्थः । तदेव द्रढयति—वैदिकेति । वैदिकशब्दगतशक्तेर्ब्रह्मशक्तित्वात् स्वशक्त्यैव स्वस्य प्रकाश्यता । तथाच परप्रकाश्यत्वाभावान्न स्वप्रकाश्यत्वहानिर्नतरां नश्वरताकल्पनागन्धस्य तत् स्पष्टुं क्षमत्वमिति भावः ।

उक्तन्यायस्यान्येषु प्रत्यक्षादिप्रमाणेष्वतिव्याप्तिप्रसक्तिमाशङ्क्य परिहरति—नचैवमिति । इति नच शङ्कनीय इत्यन्वयः । इतिशब्दोक्तं व्याचष्टे—एवं सतीति । शब्दगतशक्तेर्ब्रह्मशक्तित्वाभ्युपगतौ सत्याम् । प्रत्यक्षादीति, तथात्वात् ब्रह्मशक्तेर्विभुत्वेन तदभेदात् । तद्गोचरतेति । ब्रह्मणः प्रत्यक्षादिगोचरतापि । उक्तनयेनेति । परप्रकाश्यताभावेन स्वप्रकाश्यत्वाऽहानिलक्षणेन च्युत्यभावः, नश्वरतापरिच्छिन्नताऽभाव इति । कुत इत्यपेक्षायां हेतुमाह—प्रत्यक्षादिगतशक्तीनामिति । आदिशब्दात् प्रत्यक्षादिवल्लौकिकशब्दस्यापि संग्रहः । ब्रह्मशक्तेर्विभुत्वे प्रत्यक्षादिगतशक्तिषु व्याप्त्यङ्गीका-

रेऽपि तासां क्षेत्रज्ञबुद्ध्यादिभिर्व्यवहितत्वेन तच्छक्त्या च साक्षात् तदभेदस्याघटितत्वात् । भ्रमवत्तासम्भवेन तेषां प्रत्यक्षादिप्रमाणानामिति शेषः । तेषां क्षेत्रज्ञबुद्ध्यादीनामिति वा। भ्रमवत्तेति करणापाटवविप्रलिप्सादीनामुपलक्षणम्। तथाच क्षेत्रज्ञादीनां बुद्धिमान्द्यदुराग्रहविप्रलिप्सेन्द्रियापाटवत्वादीनामवर्जनीयत्वेन, तद्व्यवहितप्रत्यक्षादिशक्तीनां साक्षात् तत्ताभावस्य सूक्तत्वं युक्तमेवेति भावः ।

श्रुत्यर्थस्तु, अरे इति सम्बोधने । आत्मा जिज्ञास्यं सर्वज्ञं सर्वशक्ति ब्रह्म, द्रष्टव्यो द्रष्टुं योग्य इति । अनेन दर्शनमुद्दिश्य तदसाधारणसाधनतया ध्यानं विधीयते—निदिध्यासितव्य इत्यत्र विध्यर्थकस्तव्यप्रत्ययः । श्रवणमनने तु ध्यानस्य साधनभूते । एतच्च विधिनिरूपणप्रकरणे निपुणमुक्तम् । मनसैवेत्यनेन, अप्राप्य मनसा सहेति श्रुत्या प्रतीतं मनोगोचरत्वं वार्यते । नचोभयवाक्ययोस्तुल्ययोगक्षेमत्वेनैकतरस्यापि निवृत्तेरसंभव इति तर्कनीयम् । मनसैवेत्यस्य सावधारणत्वाद् बलीयस्त्वम् । तद् स्पष्टार्थं द्वितीयवाक्यं पठति—मनसैवेति । शिष्टानि वाक्यानि स्पष्टार्थकानि ॥

पूर्वोक्तश्रुतीनां गतेर्विद्यमानत्वादित्युक्त्या पूर्वपक्षो निरस्तः । तत्र, का सा गतिरित्याकाङ्क्षायां तज्ज्ञापनाय प्रतिजानीते—पूर्वपक्षे पठितानामित्यादिना ।

पूर्वपक्षे पठितानां तु वाक्यानामयमर्थः । अगाधतोयेऽब्धौ तदवगाहनार्थं प्रवृत्ता मनुजा यथाशक्ति तमवगाह्य तदगाधतामप्राप्य पुनरावृत्ता इव मनसा सहिता वाचस्तत्प्रतिपादने प्रवृत्ता

अपि अप्राप्य तत्स्वरूपगुणादीनामियत्तामलब्ध्वा स्थागिताः सत्यो, यत इति पूर्वं लक्षणप्रमाणाभ्यां प्रतिपादिताज्जगत्कारणाद् ब्रह्मणो निवर्तन्त इत्यर्थः । अशब्दमिति, शब्देन परिच्छेत्तुमनर्हम् । यद्वाचेति । अनभ्युदितप्रायम् । कात्स्न्र्येनागोचरत्वात् । अवचनेनेति । इयत्तावच्छिन्नवचनाभावेनैवेति । अन्यथा, प्रोवाचेति क्रियापदस्यानर्थक्यप्रसङ्गात् । यच्छ्रोत्रेणेति । यद् ब्रह्म श्रोत्रेण श्रवणेन्द्रियेण परिच्छिन्नतया श्रोतुं नार्ह्यते । स्वरूपादिभिरपरिच्छिन्नत्वादिति भावः । यद्वा, केवलस्य स्वरूपमात्रस्य शक्त्यादिमृते वागाद्यगोचरत्वेऽपि तद्वत्तया श्रुतिभिः प्रतिपाद्यमानत्वान्न किञ्चिद् दुरर्थकेति श्रुतीनां निर्गलितोऽर्थः ।

अथवा, यतो वाच इत्यादौ वाक्शब्दस्य लौकिकशब्दपरत्वान्न श्रुतिप्रतिपाद्यताया असामञ्जस्यमित्यर्थः । मनसा सहेति पाठ एव लौकिकतां स्पष्टं बोधयति । वेदस्य तत्साहचर्यनियमाभावात् । प्रत्युत ब्रह्मनिःश्वसितत्वेनालौकिकत्वप्रतिपादनाच्च ॥

वाक्यानां, यतो वाचो निवर्तन्त इत्यादीनाम् । प्रतिज्ञातेषु मध्ये प्रथमं व्याचष्टे—अगाधतोयेऽब्धावित्यादिना । **मनसा सहिता वाचस्तत्प्रतिपादने प्रवृत्ता अपि यतो निवर्तन्त** इत्यन्वयः । निवर्तने कारणमाह—**अप्राप्येति** । एतद्विवृणोति—**तत्स्वरूपगुणादीनामिति** । तथाच श्रुतिः,—न ते विष्णो-र्जायमानो न जातो देवस्य महिम्नः परमं तमाप । विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादि । उक्त-मर्थं दृष्टान्तमुखेन निगमयति—**अगाधतोय** इत्यादि । **अगाधं** तलस्पर्शनयोग्यताऽभाववत् **तोयं** जलं यस्य तस्मिन् । यथा अगाधजले समुद्रे तद्गाधतोपलब्धये प्रविष्टा जना **यथाशक्ति** यावद्बलम् **अवगाह्य तद्गाधतां** तलस्पर्शम् **अप्राप्य** अकृ-तार्था इव पुनरावर्तन्ते तद्वत् । **इवेति** शब्दः सर्वथाऽकृतार्थत्व-निषेधपरः । स्नानपानादिदृष्टादृष्टफलैः कृतार्था अपि तत्तलस्प-र्शमात्रे अकृतार्थाः । न तावता बलहानिः । अगाधत्वात् । तथा वेदा अपि तत्स्वरूपगुणादिप्रतिपादने प्रवृत्ता यथाधिकारं सर्वाधिकारिभ्यः पुरुषार्थचतुष्टयप्रापकत्वलक्षणभगवदत्तकैङ्कर्य-पालनेन कृतार्था अपि तदियत्ताद्योतनामात्रे अकृतार्था इत्यर्थः । तथाभूताऽकृतार्थत्वस्य तु तेषां भूषणवत्त्वमेव । भगवदैश्वर्यान-न्त्यद्योतकत्वात् । एतेन वेदेषु ब्रह्मस्वरूपादेरियत्ताया अज्ञता दूरे निरस्ता । यदि तदियत्तासत्त्वे वेदो न जानीयात् तर्हि उक्तशङ्काप्रवेशो घटेत । न तु तदस्ति । अदृष्टश्रुतत्वात् । न हि खपुष्पादीनां गन्धाज्ञाने, शशविषाणादिताडनक्षतादर्शने च ज्ञानहानिः । अन्यथा सोऽङ्ग वेद यदि वा न वेदेत्यनेन वाक्येन ब्रह्मणोऽपि सर्वज्ञताया हान्यापत्तेरिति भावः । **यत** इत्यस्य व्याख्यानमाह—**पूर्वं लक्षणप्रमाणाभ्यां प्रतिपादितादिति**।

लक्षणप्रमाणसंज्ञकाभ्यां सूत्राभ्यामित्यर्थः । **अशब्दमिति** । द्वितीयं वाक्यं व्याख्यायते—**शब्देनेति** । परिच्छेदविषयीकर्तुमयोग्यमित्यर्थः । **यद्वाचेत्यादिवाक्यान्तरार्थमाह—अनभ्युदितप्रायमिति** । उदितममप्यनुदितकल्पमिति प्रायशब्देन सूच्यते । तत्र हेतुमाह—**कात्स्न्र्येनेति** । तथाचोक्तं भगवद्भिराद्याचार्यचरणैः । "अचिन्त्यशक्तेरविचिन्त्याशयाद्" इति । **अवचनेनेति** वाक्यान्तरव्याख्यानमाह—**इयत्तावच्छिन्नेति** । अपरिच्छिन्नत्वेनाहेत्यर्थः । " य उद्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्च कोऽद्धा वेद यत आबभूव, योऽस्याध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदि वा न वेद । न तस्य काश्चित् पतिरस्ति लोके न वेदिता नैव च तस्य लिङ्गमित्यादिप्रकारकैर्वाक्यैरिति भावः । अत्रानुपपत्तिलक्षणं प्रमाणमाह—**अन्यथेति** । वेदानां तत्प्रवचनात्मकक्रियानुकूलव्यापाराश्रयताभावापत्तेरित्यर्थः । यच्छ्रोत्रेणेतिवाक्यार्थमाह—**यद् ब्रह्मेति** । अनेनैव यच्छब्दार्थ उक्तः । **श्रवणेन्द्रियेण परिच्छिन्नतयेति** । घटादिपदार्थवत् तत्तद्घटानुपूर्वीमात्रशब्दपरिच्छिन्नतया श्रोत्रेण ग्रहीतुमशक्य इति यावत् । यथा कम्बुग्रीवादिव्यक्तिमान् पदार्थो घटकलशादिमात्रशब्दपरिच्छेदेन श्रोत्रग्राह्यो, न तथा ब्रह्म । सर्वपदार्थवत्त्वेऽपि सर्वविलक्षणत्वादिति भावः । एतस्मिन्नर्थे हेतुमाह—**स्वरूपादिभिरिति** । किञ्च । "स वेत्ति वेद्यं, न च तस्यास्ति वेत्ता, न वेदिता" इत्यस्य वाक्यस्य मुख्यार्थस्वीकारे "तमेव विदित्वा अतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय । ऋते ज्ञानान्न मुक्तिः । यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तं निगच्छति" इत्यादिश्रुतीनामन्वयव्यतिरेकावधारणरूपप्रमाणस-

हकृतानां बाधप्रसङ्गभयादन्या गतिः सर्वसंमता इव उक्तानामपि श्रुतीनां गतेः सुकरत्वादिति निष्कर्षः ।

प्रकारान्तरेण व्याचष्टे—यद्वेति । केवलस्येति । अहंत्वेदंत्वावच्छिन्नसर्ववस्तुविलक्षणस्य । यद्यपि तच्छक्त्यादीनां स्वाभाविकत्वेन तदत्यन्तवैलक्षण्यस्याघटितत्वान्न तादृशकेवलत्वसिद्धिस्तथापि शक्त्यादिभ्यो ब्रह्मणः स्वरूपविवेचनमात्रविवक्षया तथोक्तमित्याह—स्वरूपमात्रस्येति । नैतावता शक्त्यादिशून्यता संभावनीया । तद्वत्त्वेऽपि तद्विवेकस्य स्वाभाविकत्वात् । नाप्यत्यन्ताभिन्नत्वं शङ्कनीयम् ब्रह्मण एव तदात्मकतापत्त्या तद्भिन्नस्वरूपाभावप्रसङ्गात् । शक्तिरेव ब्रह्मेति प्रत्यापत्त्या केवलत्वस्यैव नाशप्रसक्तिरित्यर्थः । तदेव द्रढयन्नाह—शक्त्यादिऋते वागाद्यगोचरत्वेऽपीति । शक्त्यादि विना तदवस्थानाऽभावेन सर्वप्रमाणागोचरत्वे सत्यपि । तद्वत्तयेति । सर्वशक्त्यादिमत्त्वेन यथावस्थितस्य कारणकार्यावस्थाभ्यामुक्तप्रकारकैकत्वानेकत्वाभ्यां श्रुतिभिः प्रतिपद्यमानत्वादिति । तत्र कारणावस्थायामुपसंहृतशक्तित्वादेकत्वेन, "सदेव सौम्येदमग्र आसीदकमेवाद्वितीयं, तदक्षतै बहु स्यां प्रजायेय, एको ह वै नारायण आसीन्न ब्रह्मा नेशान" इत्यादिप्रकारेण । कार्यावस्थायां च विक्षिप्तशक्तित्वादनेकत्वेन, "तस्माद्वा एतस्मादात्मन आकाशः संभूतः, सर्वं प्रोक्तं त्रिविधं ब्रह्मयेतत् । भोक्ता भोग्यं प्रेरितारं च मत्वा, पृथगात्मानं प्रेरितारं च मत्वा" इत्यादिना । "एकत्वेन पृथक्त्वेन बहुधा" इति श्रीभगवदुक्तेश्च ।

एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूप कस्तद् वेदितुमर्हति ॥—

इत्यादिवचनाच्च । निखिलस्य वस्तुनो ब्रह्मात्मकत्वेऽपि त्रिरूपताया अपि श्रुतिसूत्रसिद्धत्वादिति भगवद्भिराद्याचार्यैरप्युक्तेश्च । ख्यातिनिर्णये व्याख्यातं चैतच्छ्रीनिवासाचार्यचरणैः । "अवस्थाभेदेनैकत्वानेकत्वयोर्विरोधाभावाद् सर्वं घटितमेव" इत्यादिना । एतदपि सिद्धान्तक्षीरार्णवे श्रीपुरुषोत्तमाचार्यचरणैराक्षेपसिद्धान्ताभ्यां निष्कर्षितम् । विस्तरभयादुपरम्यते । एतमेव विवक्षयाह—**न किञ्चिद् दुरर्थकतेति** । उक्तरीत्या सर्वं सामञ्जस्यमित्यर्थः । उपसंहरति—**इति श्रुतीनां निर्गलितोऽर्थ इति** । ब्रह्मणि तत्प्रतिपादकतया श्रुतीनां समन्वितत्वप्रकारस्य सिद्धान्तः ।

अन्यया चापि परिपाट्या व्याचष्टुमाह—**अथवेति** । **यतो वाच इत्यादाविति** । आदिपदेन, अशब्दमित्यादीनां व्याख्यातानां सर्ववाक्यानां संग्रहः । **वाक्शब्दस्येति** पूर्वपक्ष्युच्चरितवाक्येषु पौनःपुन्येन पठितस्य । **लौकिकेति** । वैदिकविलक्षणशब्दपरत्वात् । **न श्रुतिप्रतिपाद्यताया इति** । निषिद्धविलक्षणश्रौतशब्दवाच्यतायाः सुकरत्वमेवेत्यर्थः । तस्य लौकिकपरत्वे प्रमाणमाह—**मनसा सहेति पाठ एवेति** । अवधारणेन स्वार्थत्यागपरार्थकल्पनाशङ्का वार्यते । **स्पष्टमित्यनेन** संकल्पपूर्वकत्वाल्लौकिकशब्दस्येति तद्व्याप्तेरन्वयाव्यभिचारः सूच्यते । यत्र लौकिकवाग्विसर्गत्वं, तत्र मनःपूर्वकत्वमिति साहचर्यनियमस्य श्रुतिमूलकत्वात् । तथाच श्रुतिः—मनसा वा अग्रे संकल्पयत्यथ वाचा व्याहरति, यद्वै मनसा ध्यायति तद् वाचा वदतीत्यादिः । श्रौतशब्दे चोक्तन्यायस्य व्यतिरेकं प्रमाणयति—**वेदस्य सत्साहचर्यनियमाभावादिति** । लौकिकशब्दवच्छ्रौतशब्दे मनोव्याप्तेरभावादित्यर्थः । उक्तार्थे श्रुतिगर्भितहेतु-

माह—प्रत्युत तस्येति । अलौकिकत्वप्रतिपादनादित्यस्य पूर्वं शास्त्रमुखेनेति शेषो योजनीयः । शास्त्रमुखेनाऽलौकिकत्व-प्रतिपादनादित्यर्थः । तथाच श्रुतिः—अस्य महतो भूतस्य निःश्वसितमेवैतद् यद् ऋग्वेदो यजुर्वेदः सामवेद इति ।

नन्वीश्वरमनःसाहचर्यस्य तत्रापि सत्त्वान्न व्यतिरेक इति चेन्न। ब्रह्मणि मनआदिकल्पनाया अप्रमाणकत्वाद्। "अप्राणो ह्यमना" इति श्रुतेः । एतेन " नमो वेदान्तवेद्याय, योऽसौ वेदे तिष्ठति, योऽसौ सर्वैर्वेदैर्गीयते, सर्वे वेदा यत् पदमामनन्ति, तं त्वौपनिषदं पुरुषं पृच्छामि, नावेदविन्मनुते तं बृहन्तम्" इत्या-द्यन्वयव्यतिरेकगर्भितवाक्यकदम्बस्यानुपपत्तेरप्यत्र प्रामाण्य-मुपलक्षितं बोध्यम् । इत्थं ब्रह्मणो वेदवाच्यताप्रतिपादनेन ब्रह्मणि त्रिविधमुख्यवृत्तिप्रवृत्त्यभावपक्षो निरस्तः । अयम-भिप्रायः । यदुक्तं ब्रह्मणि जातिगुणादीनां रूढि-वृत्तिप्रवृत्तौपयिकानामसंभवात् तत्प्रवृत्त्यभाव इति । तत्तुच्छम्। तद्धर्मगुणादीनां श्रुतिस्मृतिसिद्धत्वात् । तथाहि यदुक्तं—"न तावद् गवादिवज्जात्या निर्देष्टुं शक्यम्, एकत्वादि"ति । तन्न समीचीनम् । एकत्वस्य जातित्वाभावेऽपि तदादीनां देवत्व-बृहत्त्वादिधर्माणां बाधकाभावेनाकाशत्वादिवत् प्रतिपादयितुं शक्यत्वात् । एको देव इत्यादीनां त्वत्पठितश्रुतीनामेवात्र प्रमाणत्वात् । ' नापि शुक्ल इत्यादिवद् गुणवत्तया, निर्गुणत्वाद् ' इत्युक्तिरपि तथैव बोध्या । तद्वर्णस्यापि शास्त्रेण मोक्षासाधार-णतया अनादरमुखेन प्रतिपादितत्वात् । तथाच श्रुतिः—

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ।
आदित्यवर्णं तमसः परस्तात् ।

आप्रणखात् सुवर्णः ।

सत्पुण्डरीकनयनं मेघाभं वैद्युताऽम्बरमित्यादि ।

स्मर्यते च मनुना औषधवद्वाक्येन—

प्रशासितारं सर्वेषामणीयांसमणीयसाम् ।

रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परम्—इति ।

नच निर्गुणश्रुतिविरोध इति वाच्यम् । मायिकगुणादिपरत्वस्य पौनःपुन्येनोक्तत्वात् । नापि ' स्वरूपेण, अव्यक्तत्वाद् ' इत्युक्तिर्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतीनां स्वरूपप्रतिपादनपरत्वस्य सर्वसंमतत्वात् । ' नापि क्रियानिर्देशेन, निष्क्रियत्वाद्' इत्यपि न रोचकम् । विभुत्वेऽपि अचिन्त्यशक्तित्वेनाविरोधात् । " अनेजदेकं मनसो जवीय " इत्यादिश्रुतेः । निष्क्रियत्वश्रुतेः प्रयोज्यतानिषेधपरत्वान्न दोषः । " नामानि सर्वाणि यमाविशन्ती"ति श्रुतिः स्पष्टं रूढिवृत्तिमप्यादरेण स्वीकरोति । तस्मान्न रूढिप्रवृत्त्यभाव इति सिद्धम् । ' नापि योगस्य तत्र प्रवृत्तिसंभवः । तत्प्रवृत्तिनिमित्तप्रकृतिप्रत्ययार्थत्वायोगाद् ' इत्युक्तमपि तुच्छतरम् । ब्रह्मणो, बृहि बृंहि वृद्धाविति धात्वर्थतायाः श्रुतिस्मृतिभिः साधितत्वात् । तथाच श्रुतिः—बृंहति बृंहयतीति ब्रह्मेत्यादि ।

हरिवंशे शिवः—

बृहत्त्वाद् बृंहणत्वाच्च तस्माद् ब्रह्मेति शब्दित इति ।

वैष्णवेऽपि श्रीध्रुववाक्यम्—

बृहत्त्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितमिति ।

उक्तेभ्यो हेतुभ्यो योगरूढिप्रवृत्तेरपि सौकर्यं ज्ञातव्यम् । इत्थं शक्त्यसंभवो निरस्तः ॥

इदानीमुभयप्रकारकजघन्यवृत्त्यसंभवं निराकुर्वंस्तत्रादौ गौ-

ण्वप्रवृत्तिपक्षो निवार्यते आक्षेपसमाधानाभ्याम्—नन्विवमादिना।

ननु गुणशक्त्याद्यभ्युपगमे केवलनिर्गुणश्रुतिविरोधापत्तिर्दुर्वारेति चेन्न। तासां मायिकगुणादिनिषेधपरत्वात्। ब्रह्मणः शक्तिगुणक्रियादीनां स्वाभाविकतायाः श्रुतिसूत्रसाधितत्वाच्च। एवं शक्त्यादीनां स्वाभाविकत्वे सिद्धे तत्संबन्धस्यापि तत्तायां विवादस्य निरवकाशत्वात्। एवंभूतस्य शास्त्रसमन्वितस्य ब्रह्मणः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यो निदिध्यासितव्य' इत्यादिश्रुतिप्रमितेन ध्यानेन, 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते ननुं स्वाम्' इत्यादिवाक्योक्ततदनुग्रहसहकृतेन,।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे—इत्यादिमन्त्रप्रतिपादितात् तत्साक्षात्कारात् कार्यकारणप्रकृतिसंबन्धात्मकप्रतिबन्धनिवृत्तौ सत्याम्,

निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता—

इति सर्वज्ञपराशरोक्तश्रीभगवत्प्राप्तिलक्षणो मोक्षः ॥

अत्र प्राप्तिर्नाम

"द्वयक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ॥

निर्ममो निरहंकार" इति शास्त्रोक्तेन इदंकाराहंकारास्पदयोः क्षेत्रक्षेत्रज्ञयोः स्वत्वममत्वभावनाशेन, "ममैवांशो जीवलोके । अंशो नानाव्यपदेशादि"ति शास्त्रोक्तस्वाभाविकतदीयतासंबन्धसाक्षात्कारपूर्वकं सुरसरित्प्रवाहवच्छ्रीभगवदनवच्छिन्नानुभूत्या स्थितिरिति । एषैव साम्यसायुज्यब्रह्मादिशब्दैः श्रुतिस्मृतिभिर्गीयते ।

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥

जुष्टं, तरति शोकमात्मवित् । ब्रह्मविद् ब्रह्मैव भवतीत्यादिश्रुतेः । मम साधर्म्यमागता इति भगवदुक्तेश्च । ब्रह्मैव भवतीति बृहज्ज्ञानादिधर्मेण बृहत्त्वस्य तत्रापि भावान्न स्वरूपेणेत्यर्थः ॥

गुणेत्यादेः पूर्वं ब्रह्मण इति शेषो योक्तव्यः। तथाच ब्रह्मणो गुणशक्त्याद्यभ्युपगमे आदिपदेन ज्ञानबलक्रियादीनां संग्रहः। तत्रोत्तरं—नेति। नोक्तश्रुतिविरोध इत्यर्थः। तत्र हेतुमाह—तासामित्यादि। केवलो निर्गुणश्चेत्यादीनाम्। तत्रैव हेत्वन्तरमाह—ब्रह्मण इत्यादि। श्रुतिसूत्रसाधितत्वादिति। "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतेः। "विवक्षितगुणोपपत्तेश्च" इत्यादिसूत्राच्च। तथाच गुणादिमत्त्वे सिद्धे सादृश्यस्यापि तत्सामान्यगुणैः सत्त्वचैतन्यादिभिर्वक्तुं शक्यत्वात्, परमं साम्यमुपैतीति श्रुतेर्मम साधर्म्यमागता इति भगवदुक्तेश्च।

किञ्च, 'न हि लक्षणायाः प्रवृत्तेरवकाशः, शक्येन समं संबन्धाग्रहाद्' इति यदुक्तं तदपि न रमणीयमित्याह—एवं शक्त्यादीनामिति। सिद्धे, शास्त्रप्रतिपादितत्वेनेति शेषः। तत्संबन्धस्येति। शक्तिशक्तिमतो, गुणगुणिनः क्रियातद्वत इत्यादेरित्यर्थः। तत्रायां स्वाभाविकतायाम्। तथैव वाच्यवाचकशब्दपदार्थसंबन्धस्यापि स्वाभाविकत्वं शास्त्रप्रसिद्धमेव। "नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती" इत्यादिना पराशरादिभिः सर्वज्ञैस्तत्प्रतिपादिताया उक्तत्वात्। 'न च लक्षणयैव लक्ष्यस्वरूपोपस्थितिः। तस्याः स्मारकत्वाद्' इति यदुक्तं, तन्न विरुद्धम्। लक्षणायाः स्मारकत्वमात्रमेवास्तु। अस्माकमपीष्टत्वात्। नच तथात्वे लक्ष्यस्वरूपोपस्थित्यभावस्तदवस्थ इति वाच्यम्। शक्त्या तदनुभाविकत्वस्याभ्युपगमात्। तथाहि। गङ्गायां घोष इत्यत्र तीरात्मकपदार्थस्य तीरपदानुभावितस्यैव गङ्गापदेन स्मारकत्वम्। न सर्वत्र लक्षणाप्रवेशो युक्तः। अनवस्थाप्रसङ्गात्। व्यञ्जनादेर्लक्षणायामन्तर्भावस्य पूर्वमेवोक्तत्वाच्च। एवं हि सर्वज्ञाचिन्मानन्तश-

क्तिब्रह्माभ्युपगच्छतां वैदिकानुयायिनामस्माकं किं वा दुर्घटमिति भावः। उक्तलक्षणस्य ब्रह्मणो निष्ठायाः फलं चतुर्थाध्याये वक्ष्यमाणमपि प्रसङ्गादत्र चिन्त्यते—एवंभूतस्येत्यादिना। एवंभूतस्य ब्रह्मवः साक्षात्कारात् कार्यकारणप्रकृतिसंबन्धात्मकप्रतिबन्धकनिवृत्तौ सत्यां मोक्ष इत्यन्वयः। कीदृशस्येत्यपेक्षायां शास्त्रयोनित्वादित्याद्युक्तप्रमाणगर्भितविशेषणमाह—शास्त्रसमन्वितस्येति। शास्त्रं वाचकतया समन्वितं येन तस्य। शास्त्रे वाच्यतया समन्वितं यत् तस्येति वा।

तथा स्वर्गपर्वणि वैशंपायनः—

वेदे रामायणे पुण्ये पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते—इति।

साक्षात्कारादेव मोक्ष इत्यत्र किं मानमिति चेत् तत्राह—मन्त्रप्रतिपादितादिति। मन्त्र एवात्र मानमित्यर्थः। तमेव मन्त्रं पठति—भिद्यते हृदयग्रन्थिरित्यादि। अस्यार्थः। तस्मिन् ब्रह्मणि दर्शनगोचरे सति हृदयग्रन्थिः स्थूलसूक्ष्मरूपप्रकृतिसंबन्धो भिद्यते ध्वंसं प्राप्नोति। तत्कार्यभूताः सर्वे संशयाः स्वपरेतरत्वविषयकाश्छिद्यन्ते। अस्य ब्रह्मसाक्षात्कारवतः कर्माणि क्षीयन्ते। कर्मभिर्मुच्यत इति यावत्। तस्मिन्नितितच्छब्दार्थं विवृण्वँस्तत्स्वरूपमाह—पराऽवरे इति। परे चिदचिद्वर्गा अवरे यस्मात् तस्मिन् पुरुषोत्तम इति यावत्।

प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।—
इति भगवदुक्तेश्च। ननु तस्मिन् दृष्ट इति यदुक्तं, तन्न,

तस्यासम्भवत्वाद् दृष्टिगोचरताया इति चेन्न । तदगुणरूपादि-मत्तया द्रष्टुमर्हति इत्युक्तमेव । "सदा पश्यन्ति सूरय" इत्यादिश्रुतेः । "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेनेति" स्वयं भगवतैवोक्तत्वाच्च । दर्शने कोऽन्तरङ्ग इत्यत आह—ध्यानेनेति । तत्र प्रमाणमाह—श्रुतिप्रमितेनेति । तदेव प्रमाणं पठयते—सोन्वेष्टव्यः, निदिध्यासितव्य इत्यादि । स्पष्टोऽर्थः । तत्र व्यभिचारशङ्कावारणाय सहकारिणमाह—वाक्योक्तदनुग्रहसहकृतेनेति । श्रुतिप्रतिपादितेन तस्य भगवतोऽनुग्रहसहकृतेनेत्यर्थः । वाक्योक्तिविशेषणेन पूर्ववत् प्रमाणशङ्का निरस्ता । वाक्यं दर्शयति—यमेवैष इत्यादि । एष सर्वज्ञः सर्वेश्वरो यं कञ्चिदपि क्षेत्रज्ञं वृणुते तेनैव लभ्यो, नान्यैरित्यन्वयः । 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' इतिवचनात् । तत्र, यमिति शब्दः श्रीभगवत्प्रसादविषयवाचकः । प्रसादविषयश्च निरतिशयप्रीतिविषय एवेति लोकप्रसिद्धः । स चानन्यभक्त एव । एतच्च स्वयमेवाह श्रीभगवानभ्यासेन—

सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः—
इत्यादिना ।

नारायणीये नरनारायणौ नारदं प्रति—

नारदैतद्धि नौ सख्यं वचनं समुदाहृतम् ।
नास्य भक्तात् प्रियतरो लोके कश्चन विद्यते ॥

यतः स्वयं दर्शितवान् स्वमात्मानं द्विजोत्तमेति ।

अनन्यत्वं च, अन्यसाधनान्यफलान्यसम्बन्धशून्यत्वम् । तत्र-

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात् पार्थ मय्यावेशितचेतसाम् ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं नित्ययुक्ता उपासते ॥

सर्वारम्भपरित्यागी । शुभाशुभपरित्यागी । सर्वधर्मान् परित्यज्य । तमेव शरणं गच्छेत्यादिभिरन्वयव्यतिरेकगर्भितैः स्वस्यैव श्रीभगवतः स्वेनैव स्वप्रियाणां साधनत्वबोधनादन्यसाधनं निरस्तम् ।

एवमेव च,

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।
मम साधर्म्यमागताः ।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ॥
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ।
आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ।

मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्—

इत्यादिभिश्च प्रतिज्ञापूर्वकान्वयव्यतिरेकसहस्रताभ्यासलिङ्गालङ्कृतवाक्यैः स्वात्मनो भिन्नफलस्य निषेधो विस्तृतः ।

किञ्च नारायणीयाख्यानेऽपि स्वयमेवार्जुनं प्रत्येवमेवाह—

चतुर्विधा मम जना भक्ता एवेति मे श्रुतम् ।
तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः ॥
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम्—

इत्यादिना सिद्धान्तितम् । तथैव हि,

ममैवांशो जीवलोके जीवभूतः सनातनः ।

मद्भक्त एतद् विज्ञाय । स मे प्रियः । अहं स च मम प्रियः । तद्धाम परमं मम । प्रतिजाने प्रियोऽसि मे—इत्यादिवचनसंदर्भेण परस्परसंबन्धिसंबन्धयोर्वैशद्येन प्रतिपादनादन्यसंबन्धोऽपि स्पष्टं निषिद्धः । तद् सिद्धमुक्तलक्षणानन्यत्वम् । तदवच्छिन्नस्तत्प्रसादविषय इति ।

किञ्च, यमित्यत्रैकवचनम्,

मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः—

इति वचनादुक्तलक्षणाधिकारिणां निरतिशयदुर्लभतां सूचयति ।

तत्र तावदसंख्याः क्षेत्रज्ञास्तेष्वसंख्या एव मनुष्ययोनयस्तेष्वपि केचिन्मनुष्याः शास्त्राधिकारिणस्तेष्वपि केचिद्यत्नसंभावनामात्रपरास्तेषु केचिद् यत्नपरायणाः । यत्नपरायणानां केचिद् विरला यत्नसिद्धाः । तेषां केचित् तत्त्वजिज्ञासवः । तेषां केचिच्छास्त्रतत्त्वज्ञाः । तेषामपि कश्चिदुक्तलक्षणो मन्निष्ठावानिति श्लोकार्थ एवैकवचनेन श्रुत्या द्योत्यत इति भावः । अपिच ।

यमित्यत्र यच्छब्दसामान्याद्युक्ताधिकारिणो जातिकुलादिगौरवतानियमोऽपि निरस्तः । " ये जनाः पर्युपासते । चतुर्विधा भजन्ते मां जनाः । मद्भक्त " इत्यादिनाभ्यासस्य व्यक्ततया सर्वत्र गीतापाठे जात्यादेरधिकारिविशेषणतया क्वाप्यस्मरणात् ।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥—

इत्यादिना सर्वेषामप्यधिकारित्वेन ग्रहणात् । अन्यत्रापि नारायणीये भगवदेकान्तिनां सर्वेभ्यो विलक्षणगतिप्रतिपादनाच्च ।

सहोपनिषदान् वेदान् ये विप्राः सम्यगाश्रिताः ।
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ॥
तेभ्यो विशिष्टां जानामि गतिमेकान्तिनां नृणामित्यादिना ।

अथ, एष इत्यनेन, " तेषामहं समुद्धर्ता । प्रतिजाने । ददामि बुद्धियोगं तम् । योगक्षेमं वहाम्यहम् । अहं सर्वस्य प्रभवः । मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय । भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन " इत्यादिसर्वसाधनफलादिदातृत्वप्रतिज्ञाता सर्वज्ञो भगवान् पुरुषोत्तम उच्यते । " एष भूताधिपतिरेष लोकपाल एष त आत्माऽन्तर्यामी " इत्यादिश्रुतेः । एकेति तन्त्रपाठः । एवैवेत्यर्थः । एकेन, नान्यैरिति साधनान्तरं व्यावृत्तम् ।

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथेत्यादिवचनात् ।
न हि यज्ञफलैस्तात न तपोभिश्च संचितैः ।
शक्यते भगवान् द्रष्टुं न दानेन नचेज्यया ॥—

इत्यादिनोत्तरकाण्डे श्रीभगवत्सनत्कुमारवचनाच्च । द्वितीयाऽवधारणेन चोक्तलक्षणभिन्नाधिकारिनिषेधः । तथाच, " देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिण " इत्यादिवचनात् ।

न स शक्यः सुरैर्द्रष्टुं नाऽसुरैर्न च पन्नगैः ।
यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥
तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैस्तत्परायणैः ।

शक्यते भगवान् द्रष्टुं ज्ञाननिर्द्धतकिल्बिषैरिति— तत्रैव सनत्कुमारवचनात् ।

एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ।
इदं मे समनुप्राप्ता मम दर्शनलालसाः ॥
न च मां ते ददृशिरे न च द्रक्ष्यति कश्चन ।

ऋते ह्यैकान्तिकं चैषां त्वं चैवैकान्तिको ममेति— नारदं प्रति भगवतः श्वेतद्वीपपतेर्वचनाच्च । तच्च, प्रपत्तिचिन्तामणौ भगवच्चरणैराद्याचार्यैस्तद्व्याख्यातृभिः श्रीचरणैर्विश्वाचार्यैश्च चरमश्लोकव्याख्यायां निपुणं प्रपञ्चितं, विस्तरभयादुपरम्यते । किञ्चोक्तार्थदार्ढ्यार्थं तुल्यार्थकमपि वाक्यान्तरमुदाहरति—तस्यैष आत्मा वृणुते तनुं स्वामिति । व्याख्यातमाया चेयं श्रुतिः । आदिना, "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्" इत्यादिश्रुतीनां संग्रहः । कार्यकारणेति । कार्यमत्र स्थूलशरीरम् । कारणं सूक्ष्मशरीरम् तद्रूपायाः प्रकृतेः सम्बन्ध एव स्वरूपं यस्य स चासौ प्रतिबन्धकश्च, तस्य निवृत्तौ सत्यामित्यर्थः । मोक्ष इत्युक्तं, तस्य च श्रीपराशरोक्तमेव लक्षणमाह । श्रीभगवत्प्राप्तिलक्षणो मोक्ष इति । भगवत्प्राप्तिरेव लक्षणं यस्य सः ॥

कीदृशी प्राप्तिरित्याशङ्क्य तां विवृणोति—अत्र प्राप्तिर्नामेति । श्रीभगवदनवच्छिन्नानुभूत्या स्थितिरिति तत्त्वं प्राप्तेर्लक्षणमित्यर्थः । अनुभूतेत्युक्ते ध्यानादावपि तस्याः सत्त्वात् तत्रातिप्रसङ्गस्तद्वारणायाह—अनवच्छिन्नेति । तत्र तावत्कालीना-

नुभूतौ सत्तामप्यनवच्छिन्नत्वं नास्तीत्यर्थः। यद्वा परेषां संमतायां जीवन्मुक्तावपि तस्याः सत्त्वेनातिव्याप्तेस्तद्व्यावृत्तये आह—अनवच्छिन्नेति। जीवन्मुक्तौ विक्षेपलक्षणपरिच्छेदस्य तैरपि स्वीकृतत्वात्। ननु क्षेत्रज्ञस्वरूपानुभूतेरप्यनुभवितुरपेक्षयानवच्छिन्नत्वात् तत्रातिव्याप्तिरिति चेत् तत्राह—भगवदिति। भगवदनुभूतेर्निरपेक्षानवच्छिन्नत्वान्महद्वैलक्षण्यमिति भावः। केषाञ्चिन्मतेऽनुभूतेरेव मोक्षस्वरूपाऽभ्युपगमात् तत्र व्यभिचारवारणाय स्थितिपदम्। अनुभूतेरनुभवितुर्वैलक्षण्यादेवंभूतानुभूत्या स्थितो मुक्तसंज्ञक इत्यर्थः। ननु भगवदनुभूतेर्निरपेक्षानवच्छिन्नताभ्युपगमे विभुत्वापत्तिस्तत्त्वे च तस्या बद्धेषु विषयप्रवणेष्वपि व्याप्तत्वादतिप्रसङ्गो दुर्वारः। तथात्वे सर्वमोक्षापत्तेः। व्यतिरेके चासम्भव इति चेत् तत्राह— क्षेत्रक्षेत्रज्ञयोः स्वत्वममत्वभावनाशेनेति। श्रीभगवदनुभूतेस्तेष्वपि सामान्यतः सत्त्वेन तेषां धर्मभूतज्ञानशक्तेस्तदनुभवासाधारणभूताया अनादिप्रकृतिसम्बन्धेनैवावृतत्वाज्जन्मान्धस्य सूर्यादितेऽपि तत्प्रकाशानुभवाऽभाववन्न प्रकाशतेऽतो न किञ्चिद् विरुद्धमिति भावः। प्रकृतिसम्बन्धात्मकप्रतिबन्धकनिवृत्तौ सत्यां मोक्ष इत्युक्तम्। तत्र किमात्मकः सम्बन्ध इत्यपेक्षायां तत्स्वरूपं ज्ञापयन् विशिनष्टि—इदंकाराहंकारास्पदयोरिति। अनयोः स्वत्वममत्वस्वातन्त्र्यभावस्यैव प्रकृतिसम्बन्धरूपत्वात् तद्भावाभावयोर्बन्धमोक्षबीजत्वमिति निष्कर्षः। तत्राप्रामाण्यशङ्कां निरासयति, अश्वमेधपर्वणि पठितसूत्रकारवाक्येनैवान्वयव्यतिरेकगर्भितेन—द्वाक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम्। ममेति च भवेन्मृत्युर्न ममेति च शाश्वतमिति। ममेति मृत्युर्बन्धः। "प्रमादं वै मृत्युमहं ब्रवीमि" इति श्रुतेः। परकीयस्वकीयत्वा-

भिमानस्यैव प्रमादत्वाद् । न ममेति ब्रह्म शाश्वतं, ब्रह्मवदेकरसो मोक्ष इत्यर्थः । तदेवोपोद्बलयति, द्वादशाध्यायपठितभगवद्वाक्येन—निर्ममो निरहङ्कार इति । "स मे प्रिय" इत्युत्तरेणान्वयो ज्ञातव्यः । बद्धानां विषयप्रवणानां तदनुभूतिप्रकाशाभावे हेतुमाह—स्वाभाविकतदीयतासम्बन्धसाक्षात्कारपूर्वकमिति स्वाभाविकस्येत्यस्य पूर्वं, क्षेत्रज्ञस्येति योजनीयम् । तत्र भगवद्वाक्यं प्रमाणयन् विशिनष्टि—ममैवांशो जीवलोके जीवभूतः सनातन इति । सनातन—इति, अंशस्य विशेषणम् । सनातनोंऽश इत्यर्थः । एतेनौपाधिकभेदवादः स्पष्टं निरस्तो भगवतेति ज्ञायते । तदर्थकं वक्ष्यमाणं सूत्रमपि पठयते—अंशो नानाव्यपदेशादिति । एतच्च, "अंशो ह्येष परस्ये"त्यादिश्रुतीनामप्युपलक्षणम् । बद्धानां तु उक्तलक्षणसम्बन्धस्याऽऽवृतत्वान्न प्रकाशत इत्यर्थः । अनवच्छिन्नत्वे दृष्टान्तः—सुरसरित्प्रवाहवदिति । तत्र पराशरवचनमनुवदति—निरस्तातिशयाह्लादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मतेति । उक्तेनैव लक्षणेन श्लोकोऽपि व्याख्यातप्राय एव । तथाहि । भगवत्प्राप्तिर्भेषजमित्यन्वयः । प्रकृतिसम्बन्धरूपरोगस्येति शेषः । कीदृशीत्यपेक्ष्याह—निरस्तेति । निरस्तोऽतिशयाह्लादो यस्माद् तथाभूतेन सुखेन भावः स्थितिरेवैकं लक्षणं यस्याः सा । अत एवैकान्तात्यन्तिकी निरतिशया च । एतच्च सर्वं परिष्कारमुखेनोक्तमेव । श्लोकस्य परिष्कार एव लक्षणतया प्रतिपादितो, न स्वतन्त्रः । सर्वज्ञपराशरोक्तश्रीभगवत्प्राप्तिलक्षणो मोक्ष इति प्रतिज्ञातत्वादित्यर्थः । ननु भगवत्प्राप्तिरेव मोक्ष इत्युक्तं, तदनुपपन्नम् । श्रुतिष्वन्यथैव दर्शनादिति चेद् तत्राह—एषैवेति । उक्तलक्ष-

णैवेत्यर्थः। तान्येव ज्ञापकानि श्रुतिस्मृतिवाक्यानि पठयन्ते—यदा पश्यः पश्यते इत्यादीनि। ब्रह्मैव भवतीत्यत्र मायावादभ्रान्तिं वारयति—बृहज्ज्ञानादिधर्मेणेत्यादिना॥

कैश्चिच्च "सोऽयं देवदत्तः। दशमस्त्वमसी"त्यादिवाक्यश्रवणज्ञानादेवाज्ञाननिवृत्तिः। तथात्वे च कारणाभावे कार्याभाव इति न्यायात् स्वरूपविषयकाज्ञाननिवृत्तौ बन्धनकारणाऽज्ञानस्य नाशान्मोक्ष इति मन्यते। तन्निराकरोति—नचेत्यादिना॥

नच वाक्यज्ञानमात्रादज्ञाननिवृत्तिलक्षणो मोक्ष इति संभावनीयः। अपि तु तद्वाच्यसाक्षात्कारेणैव। तत्र च ध्यानस्यैवान्तरङ्गत्वात्। "श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुत्या वाक्यज्ञानानन्तरमननव्यवहितध्यानस्यैव स्पष्टमन्तरङ्गत्वविधानात्। अन्यथा रोगिणो भेषजश्रुतिमात्रादेव तत्सेवनमृतेऽपि, रोगनिवृत्तिप्रसङ्गात्। ननु, नायं सर्पो मा भी रज्जुरेषेत्याप्तवाक्याद् भयनिवृत्तिदर्शनात् तथा प्रकृतेऽपि संगच्छत इति चेन्न। तत्रापि रज्जुस्वरूपसाक्षात्कारद्वारेणैव भ्रान्तिनिवृत्त्या भयनाशनिश्चयात्। तथात्रापि श्रवणानन्तरं वाक्यज्ञानावगतेऽपि तत्साक्षात्कारौपयिकासाधारणध्यानेन तद्दर्शने कृते उक्तलक्षणो मोक्षः। तथाच, " भिद्यते हृदयग्र-

न्थिरि " त्यादिप्रमाणस्य पूर्वोक्तत्वादत्रापि द्रष्टव्यम् ॥

इति न संभावनीय इत्यन्वयः । एतत्संभावनायोग्योऽपि नास्तीत्यर्थः । इतिशब्दार्थस्य विवरणमाह—वाक्यज्ञानमात्रादिति । किन्तर्हि तदिति चेत्तत्राह—अपि तु तद्वाच्यसाक्षात्कारेणैवेति । न वयं वाक्यज्ञानस्य साधनत्वं वारयामः । तस्यापि "श्रोतव्य" इत्यादिना श्रूयमाणत्वात् । किन्तु साक्षात्कारव्यवहिततया स्वातन्त्र्याभावादन्तरङ्गत्वं निषेध्यत इति यावत् । तदेवाह—तत्र चेत्यादि । तत्र साक्षात्कारे । ध्यानस्यैवेत्यत्रैवकारस्तदन्यसाधनव्यावृत्तिपरः । नान्येषां तद्विज्ञानामित्यर्थः । अन्तरङ्गत्वादिति । स्वतन्त्रत्वेन साक्षादुपयोगित्वात् । उक्तार्थे शास्त्रप्रमितहेत्वन्तरं कथयन् वाक्यज्ञानस्यान्तरङ्गतां बोधयति, श्रुतिमुखेनैव—श्रोतव्य इत्यादिना । श्रुत्यैव वाक्यज्ञानोत्तरं, तत्रापि मननरूपसाधनान्तरव्यवधानेन । किञ्च । स्पष्टं कण्ठरवेणैव, नार्थगौणकल्पनयेति । नास्माकं वाक्यस्य स्वातन्त्र्यनिषेधे आग्रहः । अपि तु श्रुतेरेव । तथाहि श्रोतव्य इति वाक्यज्ञानात्मकं श्रवणं विधाय ततश्च मन्तव्य इति मननस्य तन्मध्ये व्यवधानं कृत्वा पश्चाच्चोपसंहारोक्त्यैव निदिध्यासितव्य इति ध्यानस्यान्तरङ्गत्वं विधत्त इति भावः ।

उक्तसिद्धान्तमसहिष्णुः पुनराक्षिपति—नन्वित्यादि । आप्तवाक्यादित्यादि । दृष्टान्तगर्भितो हेतुः । नायं सर्प इत्याद्युदाहरणम् । यथा ह्याप्तवाक्याद् भयनिवृत्तिस्तथा प्रकृतेऽपि वेदस्याप्ततरत्वाद् तद्वाक्याद् बन्धनिवर्तने किं विकल्प इति भावः ।

अत्र प्रयोगः—वाक्यश्रवणान्मोक्षः। लोके तथा दर्शनात्। आप्तवाक्यजन्यसर्पादिभयनाशवदिति शङ्कार्थः। परैः कथितेऽर्थेऽनुपपत्तिं दर्शयन् समाधत्ते—नेति। तदेव द्रढयति, हेतुमुखेन—तत्रापीत्यादिना। तत्रापीति। आप्तवाक्यश्रवणजन्यविश्वासेऽपि। आप्तवाक्यश्रवणजन्यविश्वासेन भयनिवृत्तिरित्यत्र न विवादः। परन्तु रज्ज्वादिस्वरूपसाक्षात्कारव्यवधाननैव, न तु स्वातन्त्र्येण। तच्छ्रवणानन्तरमपि भयकम्पादेस्तादवस्थ्यदर्शनादित्यर्थः। उक्तन्यायं दार्ष्टान्तिकेऽतिदिशन् सिद्धान्तयति—तथात्रापीत्यादिना। स्पष्टार्थः। उक्तप्रक्रियाकत्वात् तत्र पूर्वपठितमेव वाक्यं प्रमाणयन् स्मारयति—तथाच, भिद्यत इत्यादिना। किं बहुना, वाक्यस्य मोक्षेऽन्तरङ्गत्वमभ्युपगच्छतां श्रुतय एव परिहसन्त्य उक्तसिद्धान्तं बहु मन्यमान्या उररीकुर्वत्यस्तन्निषेधं कण्ठरवेणैव डिण्डय्यन्त्य आक्रोन्ति "शृण्वन्तोऽपि बहवो यं न विद्युः। नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मन" इत्यादय इत्यलं विस्तरेण॥

स्यादेतत्। ध्यानेनोक्तरीत्या मोक्ष इति। एष पक्षश्चास्मदेकदेशिभिर्वाचस्पत्यादिभिरपि स्वीकृतः। तथापि मोक्षस्य जन्यत्वापातादनित्यत्वं दुर्वारमित्याशयेनाशङ्क्यते—नन्वित्यादिना।

ननु ध्यानस्य मानसक्रियाविशेषस्य मोक्षान्तरङ्गत्वे तस्य तज्जन्यत्वेन घटादिवदनित्यताप्रसङ्ग इति चेन्न। तस्य तु साक्षात्कारप्रतिबन्धकरूपावरणभङ्गेनैव नैराकाङ्क्ष्यान्न तज्जन्यत्वं, न सुत-

रामनित्यत्वमुक्तलक्षणमोक्षस्य । नच ध्यानस्य क्रियाविशेषत्वेन पुरुषतन्त्रता कल्पनीया । तस्य स्वाभाविकाचिन्त्यानन्तशक्तिब्रह्मविषयकत्वेन वेदैकगम्यतया ज्ञानवत् प्रमाणतन्त्रत्वाज्ज्ञानाभिन्नत्वाच्च । तथाच ब्रह्मणः सार्वज्ञ्यादिमत्तया सर्ववैलक्षण्येन च वेदनस्य ध्यानज्ञानशब्दाभ्यां प्रतिपाद्यमानत्वाच्छास्त्रमुखेन "ऋते ज्ञानान्न मुक्तिः । तमेव विदित्वाऽतिमृत्युमेति । पृथगात्मानं प्रेरितारं च मत्वा । जुष्टं यदा पश्यत्यन्यमीशस्य । भोक्ता भोग्यं प्रेरितारं च मत्वा । निश्चाय्य तं मृत्युमुखात् प्रमुच्यते । भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते । इदं ज्ञानमुपाश्रित्य । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा । तद् ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिणा । श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्" इति शास्त्रस्योक्तलक्षणवेदनमेवार्थः । अन्यथा त्वत्संमतस्य ज्ञानस्यापि मानसत्वाविशेषेणोक्तन्यायस्य तत्राप्यवतारणशक्यत्वात् ।

ध्यानस्य मोक्षान्तरङ्गत्वाभ्युपगमे तस्य मोक्षस्यानित्यत्वप्रसङ्ग इति योजना। अनित्यत्वे हेतुमाह—तज्जन्यत्वेनेति। ध्यानजन्यत्वेन। तत्र दृष्टान्तः—घटादिवदिति। कथमित्यपेक्षायां जन्यत्वे हेतुगर्भितविशेषणमाह—क्रियाविशेषस्येति। मानसक्रियाविशेषत्वादिति यावत्। तथाचात्र प्रयोगः—उक्तलक्षणो मोक्षः, अनित्यः। मानसक्रियाजन्यत्वात्। यदेवं तदेवम्। शारीरिकक्रियाजन्यघटादिवदिति शङ्कासंदर्भः। तत्रोत्तरमाह—नेति। नास्तिशङ्कास्थितिपदमत्रेत्यर्थः। तत्र हेतुः—तस्येत्यादि। तस्य ध्यानस्य नैराकाङ्क्ष्यात् कृतकृत्यत्वात्। यथा तव मते ज्ञानस्यावरणभङ्गेनैव परिक्षीणत्वान्न तज्जन्यत्वं मोक्षस्य, तथाऽस्माकं ध्यानस्यापि तुल्ययोगक्षेमत्वान्नोक्तदोषगन्धस्पर्शावकाश इत्याह—न तज्जन्यत्वमिति। निमित्ताभावे नैमित्तिकाभाव इति न्यायमवतारयन् सिद्धान्तमाह—न सुतरामनित्यत्वमुक्तलक्षणमोक्षस्येति। उक्तप्रयोगस्य स्वरूपासिद्धलक्षणेन हेत्वाभासेन गिलनान्न प्रामाण्यमितिभावः। ननु 'यथा तव मते ज्ञानस्य' इत्यनेन यद् ध्यानस्य ज्ञानसादृश्यमुक्तं, तदयुक्तम्। तस्य क्रियात्वेन पुरुषतन्त्रत्वान्महद्वैलक्षण्यमिति शङ्कां निराकरोति—नचेत्यादिना। कल्पनीयेति। कल्पनाविषयीकर्तुमनर्हेति। तत्र हेतुः—तस्यापि ज्ञानवत् प्रमाणतन्त्रत्वादिति। तत्र, तस्येति। ध्यानस्य। यथा युष्माकं ब्रह्मविषयकं ज्ञानं प्रमाणतन्त्रं, न पुरुषतन्त्रं, तथास्माकं ध्यानेऽपि तुल्यन्याय इत्यर्थः। किं तत्र मानमितिचेच्छास्त्रमेवेत्याह—वेदैकगम्यतयेति। ननु क्रियाया अपि विध्यात्मकवेदमुखेनैव श्रूयमाणत्वाविशेषाद् ध्यानस्यापि तथात्वमेवेतिचेत् तत्राह—तस्य स्वाभाविकस्यादि। क्रियाया वैदिकत्वेऽपि तस्या दृश्यमाङ्गु-

तसाध्यवस्तुविषयकत्वादस्य च नित्यसिद्धैकरसोक्तलक्षणवस्तु-विषयत्वान्महान् भेदोऽतो न पुरुषतन्त्रत्वम् । प्रमाणतन्त्रमेव ध्यानमिति भावः । प्राकृतवस्तुविषयकध्यानस्य तु क्रियासाद-श्यात् पुरुषतन्त्रत्वं स्वभीष्टमेव । तच्चान्यविषयकज्ञानेऽपि समा-नमित्युक्तं कर्ममीमांसकैरपि—

सर्वत्रैव हि विज्ञानं संस्कारेणोपगम्यते ।
पराङ्गं चात्मविज्ञानादन्यत्रेत्युपधार्यताम् ॥—

इत्यादिना । तच्च वक्ष्यते तृतीयाध्याये । ध्यानस्य क्रिया-भिन्नत्वे हेत्वन्तरमाह—**ज्ञानाभिन्नत्वाच्चेति** । ज्ञानशब्दस्य पूर्वं तस्येति पदं योजनीयम् । **वेदैकगम्यतयेत्युक्तं**, तत् प्रप-ञ्चयति—**तथाचेत्यादिना** । **ब्रह्मणो वेदनस्यैव ध्यानज्ञान-शब्दाभ्यां शास्त्रमुखेन प्रतिपाद्यमानत्वादित्यन्वयः** । कथमित्यपेक्षायामन्यप्रमाणागोचरतया वैलक्षण्यं दर्शयन् प्रति-ज्ञातां वेदैकगम्यतां व्यनक्ति—**सार्वज्ञ्यादिमत्तयेति** । तत्र हेत्वन्तरमाह—**सर्ववैलक्षण्येन चेति** । क्षेत्रक्षेत्रज्ञकालकर्मादी-नामन्तर्यामितया तेभ्यो वैलक्षण्याच्चेत्यर्थः । अयं भावः । ब्रह्मणः स्वरूपमात्रस्य ध्यानाविषयत्वे न विवादः । किन्तु सार्वज्ञ्यादिम-त्त्वेन तद्विषयत्वं वाच्यम् । एतच्च ज्ञानेऽपि तुल्यमिति **शास्त्र-मुखेनेत्युक्तम्** । तदेव शास्त्रं पठन्नुक्तार्थे योजयति—**ऋते ज्ञानादित्यादि** । श्रुतीनां, भोक्तारं यज्ञतपसामित्यादिस्मृतीनाञ्च सर्वज्ञत्वादिमत्त्वेन वेदनमेवार्थ इत्युक्तार्थानङ्गीकारे उक्तदोषस्य तन्मतेऽप्यतिव्याप्तिं दर्शयन् हेत्वन्तरमाह—**अन्यथेति** । **ज्ञान-स्यापि मानसत्वाविशेषेणेति** । अनेन भगवदनुग्रहासहकृ-तज्ञानस्य विघ्नबाध्यत्वेन प्रत्युत बन्धनहेतुत्वेन चाकिञ्चित्का-रित्वं द्योतितं बोध्यम् । तथाच श्रीभगवतैवोक्तम्—

ज्ञानविज्ञाननाशनमिति ।

सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघेति च ॥

यद्यप्यत्र सत्त्वस्य बन्धनहेतुताप्रतिपादने श्रीभगवतस्तात्पर्यं न, ज्ञानस्य गुणत्रयप्रकरणत्वात् । तथापि ज्ञानस्य तत्र व्यापाररूपत्वादस्ति बन्धनहेतुत्वमिति भावः । उक्तज्ञानस्य भगवदनुग्रहासहकृतत्वं द्योतयन् विशिनष्टि—त्वत्संमतस्येति । उक्तज्ञानमुपलक्षणं साधनमात्रस्य । अस्मन्मते साधनमात्रस्य भगवदुपेक्षितस्याकिञ्चित्करत्वेनाज्ञानसादृश्यात् । अत एव, ध्यानेन तदनुग्रहसहकृतेनेत्युपक्रमाद् व्यतिरेके ध्यानेऽप्युक्तन्यायोपसर्पणादिति भावः । उक्तन्यायस्येति । तज्जन्यत्वेनानित्यत्वमित्यस्य । तत्रापि तव मतेऽपि । तथात्वेचोक्तदुष्टतायाः समानत्वादुक्तसिद्धान्तस्यैव वरीयस्त्वमित्यर्थः ।

अपिच । चतुर्विधप्रसिद्धक्रियाजन्यपदार्थस्यानित्यत्वाश्रयताघटना तत्रोक्तशङ्काप्रवेशच्छिद्रं लभते । प्रकृते तु नैतदस्तीत्याशयेनाह—किञ्चेति ।

किञ्चोक्तलक्षणभगवदनुभूतेराश्रयविषयाभ्यां स्वरूपतश्चतुर्विधक्रियाजन्यत्वाभावादपि नानित्यत्वकल्पनावकाशः ।

तत्र न तावदाश्रयेण । तथाहि तदनुभूत्याश्रयः क्षेत्रज्ञः । स च नोत्पाद्यः कटादिवत् । तस्याजत्वात् । "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः । अजो नित्यः

शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे इति वचनात्। नापि चाप्यः। स्वस्वरूपत्वेन नित्यप्राप्तत्वात्। अन्यप्रामाणानपेक्षत्वाच्च। नापि विकार्यो दध्यादिवदयम्। षड्विकारहीनत्वात्। "न जायते म्रियते वा विपश्चित्। न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भुय" इत्यादिप्रमाणात्। न च संस्कार्यः। स च द्विविधः। गुणाधानदोषापकर्षभेदात्। नाद्यः। नित्यज्ञानादिगुणवत्त्वात्। ज्ञोऽत एव। न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, अविनाशित्वात्। "एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद" इत्यादि शास्त्रात्। नापि द्वितीयः। विज्ञानरूपत्वेनास्पृष्टदोषगन्धत्वात्। "योऽयं विज्ञानघन" इति श्रुतेः॥

ननु क्षेत्रज्ञस्य सर्वथा प्राकृतदोषसंबन्धाभावेऽभ्युपगम्यमाने बन्धमोक्षव्यवस्थाभङ्गप्रसङ्गः। संबन्धे च व्यवस्थासिद्धौ सत्यामपि तदपाकरणलक्षणसंस्कारस्यावश्यंभावित्वात्, तर्हि कथं संस्कार्यत्वाभाववत्त्वमितिचेन्न। तस्य धर्मात्मकज्ञानमेवानादिकर्मात्मकाज्ञानसंवलितत्वेन संकुचितम्। सैव बद्धावस्थेति कथ्यते। भूयो भगवत्-

प्रसादेन तत्संकोचकारणप्रकृतिसंबन्धध्वंसे सति स्वस्वाभाविकज्ञानप्रकाशेन मोक्षो, न स्वरूपतो बन्धमोक्षावतो नोक्तदोषावकाशः । तत् सिद्धं भगवदनुभूतेराश्रयेण क्रियाजन्यताभाववत्त्वम् । नापि विषयतस्तथात्वम् । विषयश्चास्याब्रह्मैव । तस्य चतुर्विधक्रियाजन्यत्वाभावे सर्वेषामपि संमतत्वेन विवादाभावात् । अत एव न स्वरूपतोऽपीति । तस्याः स्वाभाविकत्वात् । ब्रह्मस्वरूपवत् । तस्मान्न कथमप्युक्तलक्षणमोक्षे अनित्यत्वकल्पनागन्धसंबन्धसंस्पर्शः ।

तत्र तावद् भगवत्प्राप्तिरूपमोक्षस्याश्रयविषयस्वरूपभेदाद् अंशत्रयवत्त्वेऽपि न केनाप्यंशेन क्रियाजन्यत्वकल्पनागन्धस्पर्श इति वक्तुं प्रतिजानीते—उक्तलक्षणभगवदनुभूतेराश्रयविषयाभ्यां स्वरूपतश्च नानित्यत्वकल्पनावकाश इत्यन्वयः। तत्र हेतुः—चतुर्विधक्रियाजन्यत्वाभावादिति। तत्राश्रयः प्राप्ता, विषयश्च प्राप्यः, स्वरूपं च प्राप्तिरिति विवेकः। अत्रायं प्रयोगः सूचितः । भगवत्प्राप्तिरनित्यत्वकल्पनानवकाशवती । क्रियाजन्यत्वाभावात् । यन्नैवं तन्नैवम् । घटादिवत् । अन्वये वा ब्रह्मस्वरूपंवादिति । आदावाश्रयांशे उक्तार्थं प्रपञ्चयति—तत्र न तावदाश्रयेणेति । कथमित्यपेक्षायामाह—तथाहीति । तदेव वर्ण्यत इत्यर्थः। किमाश्रयस्वरूपमिति? तत्राह—तदनुभूत्याश्रयः क्षेत्रज्ञ इति । चतुर्विधक्रियाजन्यत्वाभावादित्यनेनोक्तं

चातुर्विध्यं विचार्यते—स चेत्यादिना । स क्षेत्रज्ञरूप आश्रयः कटादिवन्नोत्पाद्य इति । उत्पाद्यत्वं नाम भूतकालीनसत्ताशून्यत्वे सत्युत्तरकालीनसत्ताभाक्त्वम् । तच्च क्षेत्रज्ञे असमन्वितम् । कुतः ? । अजत्वात् । तथाच क्षेत्रज्ञो नोत्पाद्यः । अजत्वात् । यन्नैवं तन्नैवम् । कटादिवदिति । उक्तप्रयोगे बाधशङ्कां वारयँस्तन्मूलं शास्त्रं पठति—अजो ह्येको जुषमाणोऽनुशेत इत्यादिश्रुतयः, अजो नित्यः शाश्वतोऽयमित्यादिस्मृतयश्चास्य मूलमित्यर्थः ॥ १ ॥

आप्यत्वमस्यास्तीति चेत् तत्राह—नापि चाप्य इति । आप्यत्वं प्राप्तिक्रियाविषयतावत्त्वम् । नैतल्लक्षणलक्षितो जीवात्मा इत्यर्थः । स्वस्वरूपेत्याद्युक्तहेतोरन्यप्रमाणनिरपेक्षतामाह, हेत्वन्तरेण—अन्यप्रमाणानपेक्षत्वादिति । एतदपि प्रमाणगर्भितमेव । तथाच, नाप्यो जीवात्मा । नित्यप्राप्तत्वात्, स्वस्वरूपत्वात्, अन्यप्रमाणानपेक्षत्वाच्च । यन्नैवं तन्नैवम् । रूपादिवत् । न हि स्वस्य प्राप्तौ प्रमाणापेक्षेति भावः ॥ २ ॥

उभये मा स्याताम् । विकार्यत्वं भवेदेव । तद्विकार्यैः क्रोधादिभिस्तथात्वानुमानादिति संभावनां वारयन्नाह—नापि दध्यादिवदयं विकार्य इति । विकार्यत्वं हि परिणामादिमत्त्वम् । न तदाश्रयोऽयमित्यर्थः । कुतः ? । षड्विकारहीनत्वादिति । नायं विकार्यः । विकारहीनत्वात् । यन्नैवं तन्नैवम् । दध्यादिवदिति । उक्तप्रमाणं शास्त्रमुखेन द्रढयति—न जायते म्रियते इत्यादिश्रुतेः । तद्व्याख्यानरूपभगवद्वाक्याच्च—न जायते म्रियते वा कदाचिदित्यादेः । किञ्च, अविकार्योऽयमुच्यत इति श्रीमुखेनैवोक्तत्वाच्च क्रोधादीनामन्तःकरणपरिणामत्वान्नोक्तानुमानस्यात्रावतरणमिति भावः ॥ ३ ॥

स्यादेतत् । तथापि वक्ष्यमाणरीत्या बन्धमोक्षव्यवस्थानुपपत्तिभयेन संस्कार्यत्वस्यापरिहार्यत्वादवश्यंभाव इतिचेत् तत्राह—नच संस्कार्य इति । संस्कार्यत्वं च संस्कर्तुमर्हत्वम् । तच्च क्षेत्रज्ञे नास्तीत्यर्थः । तत्र विशेषमाह—स च द्विविध इति । यद्वान् संस्कार्य उच्यते स संस्कारो द्विविध इति यावत् । द्वैविध्यमेवाह—गुणेत्यादि । प्रथमं निराकरोति—नाद्यः । न गुणाधानरूपसंस्कारयोग्योऽयं क्षेत्रज्ञ इत्यर्थः । यद्वा, पाठान्तरानुसारेण गुणाधेय—मलापनयनीयभेदात् संस्कार्यस्यैव द्वैविध्यम् । तत्रहेतुः—नित्यज्ञानादिगुणवत्त्वादिति । नोक्तसंस्कारवानयम् । नित्यगुणत्वात् । यन्नैवं तन्नैवम् । राजादिवत् । एतच्च शास्त्रमुखेनाह—ज्ञोऽत एवेति वक्ष्यमाणसूत्रमेव । तत्र श्रुतिवाक्यं चोदाहरति—न हि विज्ञातुरित्यादि । स्मृतिञ्च—एतद् यो वेत्तीति । द्वितीयस्य व्युदासमाह—नापीति । दोषापनयनात्मकसंस्कारवान्न जीव इति यावत् । कुतः? । विज्ञानरूपत्वेनाऽस्पृष्टदोषगन्धत्वात् । नोक्तलक्षणसंस्कार्योऽयम् । अस्पृष्टदोषगन्धत्वात् । यन्नैवं तन्नैवम् । दर्पणादिवत् । ब्रह्मवदित्यन्वये च । उक्तेषु सर्वत्रापि योजनीयम् । तत्र, विज्ञानरूपत्वेनेत्यस्यायं भावः । प्राकृतवस्तुनः प्राकृतगुणस्य सजातीयसंबन्धो ज्ञायते । अस्य तद्विजातीयत्वान्न तथात्वमिति । तत्र श्रुतिं प्रमाणयति—योऽयमित्यादि ॥

असंस्कार्यत्वेऽनुपपत्तिं दर्शयन् शङ्कामारोपयति—नन्वित्यादिना । क्षेत्रज्ञस्य प्रकृतिसंबन्धो न वेति द्वितीये बन्धमोक्षव्यवस्थानुपपत्तिरित्याह—क्षेत्रज्ञस्य सर्वथा प्राकृतदोषसंबन्धाभावेऽभ्युपगम्यमाने इत्यादि । आद्ये चोक्तानुपपत्त्यभावेऽपि असंस्कार्यत्वाभावेऽकामैरपि युष्माभिरभ्युपगम्य इत्याह—संबन्धे

च्चेत्यादिना । उभयत्रापि पाशारज्जुरिति शङ्कार्थः । क्षेत्रज्ञस्वरूपे सर्वथैव दोषसंबन्धाभावान्नोक्तदोष इत्युत्तरमाह—नेति । नोभयथापि दोष आरोपयितुं शक्य इत्यर्थः । बन्धमोक्षव्यवस्थां निरूपयन् द्वितीयपक्षं निराकरोति—तस्येत्यादिना । तत्र, ज्ञानमेवेत्यत्रैवकारः स्वरूपव्यावर्तकः । संबन्धध्वंसे इत्यनेन मायावादभ्रान्तिर्वारिता। प्रकृतितत्संबन्धगुणादीनां ध्वंसाभावप्रतियोगितैव, नात्यन्ताभावप्रतियोगितेति भावः । यद्वा, ईश्वरापेक्षया ध्वंसाभावो, लौकिकापेक्षयाऽत्यन्ताभाव इति विवेकः । किञ्च । धर्मस्य संकोचविकाशयोग्यतया आरोप्यकल्पनावकाशवत्त्वेऽपि न स्वरूपे तद्भाव इति नान्यस्य दोषोऽन्यं दूषयितुं शक्त इति भावः । आद्याऽनुपपत्तिं वारयति—न स्वरूपत इति । अतो न संस्कार्यत्वमिति निष्कर्षः ॥ ४ ॥

उपसंहरति—तत् सिद्धमित्यादि । इत्थमाश्रयतो निर्दोषत्वं प्रतिपाद्य विषयतोऽपि तत्त्वमाह—नापि विषयतस्तथात्वमिति । मोक्षस्य विषयांशतोऽपि तथात्वं क्रियाजन्यत्वं नास्तीत्यर्थः । को वा तस्य विषय इत्यत आह—विषयश्चेति । ब्रह्मैवेति । नान्यः प्रत्यगात्मादिरित्यवधारणार्थः । उक्तार्थस्य सर्ववादिसम्मतत्वं दर्शयन् प्रमाणनिरपेक्षतामाह—तस्य चेत्यादि । तत्र सर्वेषामपीत्यत्रास्तिकपर एव सर्वशब्दो नेतव्यः । नास्तिकानां विवादस्य तु विद्यमानत्वात् । तमेवातिदिशन् स्वरूपे तत्त्वं वार्यते—अत एव न स्वरूपतोऽपीति । उक्तन्याया देवेत्यर्थः । आदिमद्वस्तुन उक्तदोषसहिष्णुत्वादस्यास्तु तद्विलक्षणत्वान्न तथात्वमित्याह—तस्या इत्यादि । ब्रह्मानुभूतेरिति यावत् । ब्रह्मानुभूतिः शाश्वती, स्वाभाविकत्वात् । क्रियाजन्यत्वाभावाच्च । ब्रह्मवत् । "स्वाभाविकी ज्ञानबलक्रिया

च"इत्यादिशास्त्रमप्यत्रानुसंधेयम् । प्रकरणमुपसंहरति–तस्मान्न कथमपीत्यादि । केनाप्यंशेन, कुतर्कादिभिश्चेत्यर्थः ॥

भूयश्च प्रमाणाभासमाश्रित्य विवादायोत्तिष्ठते–नन्विति।

ननु ध्यानस्योपासनात्मकत्वाद्, ध्येयस्य च ब्रह्मण उपास्यत्वेन, नेदं ब्रह्म यदिदमुपासते इत्यादिश्रुतिभिरब्रह्मत्वप्रतिपादनान्नोक्तसिद्धान्तो रमणीय इतिचेन्न। उक्तश्रुतीनामध्यासादिरूपोपासनपरत्वेन तन्निषेधस्य युक्तत्वान्नोक्तलक्षणब्रह्मनिषेधपरत्वम् । आरोप्यस्यैव निषेधविषयत्वं, न प्रमाणसिद्धवस्तुन इति न्यायस्य सर्वसंमतत्वात् । यथाऽन्यत्र नद्यादिजले गङ्गात्वमारोप्य पुनर्नेदं गङ्गात्वमिति निषेधसंभवान्न साक्षाद् विष्णुपादोदक्यां भागीरथ्यां तन्निषेधावकाशः । यथा वा," पुरुषो वा व गौतमाग्निर्योषिद् वा व गौतमाग्निरि" त्यादिपञ्चाग्निविद्यायां योषित्पुरुषयोरुपासनार्थमग्नित्वमारोपितं रूपकरीत्या, तन्निषेधश्चेदर्हत्येव, नतु प्रसिद्धेऽग्नौ तन्निषेधस्पर्शः । प्रमाणसिद्धत्वात् । तथा प्रकृतेऽपि अतद्वस्तुषु"मनो ब्रह्मेत्युपासीते" त्यादिश्रुत्युक्तेषु मनोवागादिष्वारोपितब्रह्मत्वनिषेधो, न सर्वेश्वरे साक्षाद् ब्रह्मणि तत्स्पर्शः । एतच्च,

नेदं ब्रह्मेतीदंकारेणैव द्योत्यमानत्वान्न श्रुतार्थत्यागाश्रुतकल्पनाप्रसङ्गोऽवतारणीयः । इदङ्कारास्पदप्रपञ्चविलक्षणं ब्रह्मेति श्रुत्यर्थः । अन्यथा प्रमितस्यैव निषेधें वेदस्यैवोन्मत्तता पत्तेः । तच्चानिष्टमेव बौद्धमतापत्तेरिति ॥

नोक्तसिद्धान्तो रमणीय इतिचेदित्यन्वयः । रमणीयत्वाभावे किं बीजमितिचेत्तत्राह—ब्रह्मण उपास्यत्वेनेति । उपास्यत्वे किं दूषणमित्यत आह—नेदमित्यादि । श्रुतिभिरब्रह्मत्वप्रतिपादनात् । उपास्यत्वमेव कथं निश्चितमत्राह—ध्येयस्येति । ध्यानविषयस्येति यावत् । उपास्यत्वेऽपि हेतुः—ध्यानस्योपासनात्मकत्वादित्यादि । वाक्यार्थाऽज्ञानाद् भ्रान्त्याऽऽशङ्क्यते इत्याशयवांस्तन्निराकरोति—नेति । एतद् वैशद्येनाह—श्रुतीनामिति । तासां नोक्तलक्षणब्रह्मनिषेधपरत्वमिति शास्त्रैकप्रमेयब्रह्मणो निषेधायोगादित्याह—आरोप्यस्यैवेति । न प्रामाणासिद्धेत्यादवधारणार्थः । पूर्वपक्षे पठितशास्त्रस्य प्रमेयब्रह्मनिषेधपरता नास्तीत्युक्तम् । किं विषयकं तद् ? इत्यपेक्षायामाह—अध्यासाद्युपासनपरत्वेनेति । अध्यस्तोपास्यनिषेधपरत्वं तासामित्यर्थः । एतच्चाभीष्टमेवेत्याह—तन्निषेधस्य युक्तत्वादिति । ननु तर्हि स्वार्थत्यागपरार्थकल्पनाप्रसक्तेर्मुख्यार्थबाधोऽवश्यं भावी, ब्रह्मेति सामान्यनिर्देशादितिचेत् तत्राह—एतच्चेति । न श्रुतार्थत्यागाश्रुतकल्पनेति । कुतः ? नेदमित्यत्र पठितेदंकारपदेनैवोक्तर्थस्य द्योतमानत्वादिति । न हि शास्त्रैकगम्यस्य ब्रह्मण इदंकारनिर्देशविषयत्वमिति भावः । वाक्यार्थं चाह—इदंकारास्पदेति । इदंकारानिर्देश्यो यः प्रपञ्चस्तद्विजातीयं ब्रह्मेति मनोवागादिप्र-

पञ्चाध्यस्तं ब्रह्म न भवति । तस्य मनआदीनां सर्वपदार्थानामन्तर्यामितया तद्भिन्नत्वात् । मनआदेश्च दृश्यत्वाच्च तस्य वैलक्षण्यं च । तस्मिन्नेव वाक्ये, " यद्वाचानभ्युदितं येन वागभ्युद्यते" इत्यादिना कण्ठरवेणैव पाठात् । वागभ्युद्यत इत्यनेनैव वागाद्यध्यस्तस्यैव निषेधविषयतालाभाच्च । व्यतिरेके दोषमाह—अन्यथेत्यादि । वेदस्यापि भ्रान्तित्वे अप्रामाण्यापातात् सर्वप्रमाणोच्छेदप्रसङ्ग इति भावः । उक्तसिद्धान्तं लौकिकवैदिकदृष्टान्ताभ्यामुपपिमनोति—यथान्यत्रेत्यादि । स्पष्टार्थः संदर्भः ॥

भवेदेतत् । वेदस्याप्रामाण्यापातभयात् तत्प्रमितस्य ब्रह्मणो निषेधागोचरत्वमिति । तथापि तस्योपास्यत्वे मोक्षे सशरीरत्वं मुक्तस्य तदाश्रयस्यावश्यं भाव्यम् । एवं हि मुक्तशरीरनिषेधपराणां श्रुतीनामप्रामाण्यस्य तवापि तौल्यमेवेति तात्पर्येणाशङ्क्यते—नन्वित्यादिना ।

ननु ब्रह्मण उपास्यतायां मोक्षे शरीरत्वप्रसङ्गः । तथात्वे च "न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः । अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति । अप्राणो ह्यमनाः शुभ्रः । असङ्गो ह्ययं पुरुष" इत्यादिवाक्यानां बाधप्रसङ्ग इतिचेन्मैवम् । तेषां प्राकृतोभयविधस्थूलसूक्ष्मशरीरनिषेधपरत्वात् । नैतावता मोक्षे शरीराभावः प्रतिपादयितुं योग्यः । "यक्ष्यन् क्रीडन् रममाणः सह ब्रह्मणा"

इत्यादिश्रुतिप्रमेयत्वात्। अन्यथा ईश्वरे सुखादि-सम्बन्धे सम्भाविते सति अज्ञत्वप्रसक्त्या सार्व-ज्ञ्यादिहानिः। तत्राप्यज्ञाने कल्प्यमाने जीवसा-म्यापत्तेः। तथात्वे च "तमीश्वराणां परमं महे-श्वरम्। न तत्समश्चाभ्यधिकश्च दृश्यते। स्वा-भाविकी ज्ञानबलक्रिया च। यः सर्वज्ञः सर्ववित्। यस्य ज्ञानमयं तपः" इति ब्रह्मस्वरूपप्रतिपादक-श्रुतिकदम्बबाधापत्तेश्च ॥

ब्रह्मण उपास्यतायां मोक्षे शरीरत्वप्रसङ्ग इति शरीराभावे उपासनानुपपत्तेरिति भावः। तथात्वे चेति। शरी-रत्वे सति। "न ह वै शरीरस्य सतः। अशरीरं वा व सन्तम्" इत्यादिवाक्यानां बाधप्रसङ्गादिति। मोक्षस्वरूप विषयकप्रमाणबाधे तत्प्रमेयस्य मोक्षस्यैवासिद्धेरिति शङ्कानि ष्कर्षः। निषेधवाक्यानां विषयस्य सत्त्वान्न बाध इत्याशयेनोत्त रमाह—मैवमिति। एवं श्रुतीनां बाधशङ्कां मा कार्षीरित्यर्थः कुतः ?। तेषां प्राकृतोभयविधेत्यादि। तर्ह्यागतोऽसि नि मार्गे। सिद्धो मोक्षे शरीराभावस्तदभावे चोपासनाभाव एव तत्साधनाभावादितिचेत् तत्राह—नैतावता मोक्ष इत्यादि एतावता प्राकृतशरीराभावमात्रेण दिव्याऽप्राकृतशरीरस्य श्रुति प्रमाणसिद्धत्वादित्याह—यक्ष्यन् क्रीडन्निति। व्यतिरेक दोषमाह—अन्यथेति। शरीरमात्रस्य दुःखादिसंबन्धनियमस्वी कारे। ईश्वर इति। सुखादीनां पुण्यादिकर्मकार्यत्वात् कर्मण श्चाज्ञानरूपत्वात्। सार्वज्ञ्याज्ञत्वयोः परस्परात्यन्तविरुद्धत्वादि

भावः । ननु भवेदेतदस्माकं पक्षे ज्ञानाज्ञानयोरविद्याकल्पितत्वादितिचेत् तत्राह—तत्रापीति । तस्मिश्चापि सर्वेश्वरे अज्ञाने कल्प्यमाने सति अज्ञत्वाविशेषाज्जीवसाम्यापत्तेरिति । भवत्वेवं, तत्रापि विक्षेपादिदर्शनाद् विक्षेपादेश्चाज्ञानत्वप्रसिद्धेरिति चेत् तत्राह—तथात्वे चेति । ईश्वरस्य जीवसाम्यापत्तौ सत्यां स्वरूपप्रतिपादकशास्त्रबाधापत्तौ तवापि सिद्धान्तभङ्गस्तुल्य एव । अयं भावः । ज्ञानाज्ञानयोरविद्याकल्पितत्वादित्युक्तम् । तत् पृच्छ्यते । सा कल्पनाकारणीभूताऽविद्या जीवनिष्ठा ? ब्रह्मनिष्ठा वा ? । नाद्यः । भवतां जीवस्य प्रतिबिम्बस्वरूपत्वेन जडत्वात् । ब्रह्माभिन्नानङ्गीकाराच्च । नापि द्वितीयः । तस्य स्वयंप्रकाशत्वेन प्रकाशतमसोरिवात्यन्तविरुद्धत्वात् । ब्रह्मणोऽप्याविद्यकत्वे च जीववत्तदभावप्रसङ्गाच्च । किञ्च अविद्या । सहेतुकी ? निर्हेतुकी वेति ? । आद्ये तस्यापि कारणान्तरकल्पनेऽनवस्थापत्तेः । द्वितीये मुक्तानां भूयोऽपि बन्धप्रसङ्गात् । अस्माकं तु कर्मसंस्कारादेरनादित्वेऽपि भगवत्कृपाकटाक्षेणोक्तरीत्या तत्सम्बन्धनिवृत्तेर्नासमञ्जसमिति श्रुतीनामयमर्थः । न ह वा इति । प्रकृतिकार्यभूतोभयशरीरस्य सतः सुखदुःखयोर्नाशो नास्तीति प्राकृतशरीरसंबन्धरहितं मुक्तं सुखदुःखे न स्पृशत इति । "अशरीरं शरीरेष्वि" त्यादिवाक्यं तु ब्रह्मस्वरूपपरम्। तथाहि। आत्मानम् अन्तर्यामिणं मत्वा धीरो न शोचति। कीदृशं, महान्तं निरतिशयबृहद् ब्रह्मेति यावत्। विभुं विभुपरिमाणकम्, अनवस्थेषु क्षणभङ्गुरेषु शरीरेषु ब्रह्मादिस्थावरान्तेषु तन्नियामकत्वेनावस्थितमिति । अन्तर्यामिणः स्थूलशरीरसंबन्धवारणपरामिदं वाक्यम्। अप्राण इति । प्राणादिसंबन्धशून्यः । तेषां प्रकाशकत्वादिति तस्यैव सूक्ष्मशरीरसंबन्धं वारयति ॥

अपिच । ब्रह्मणो वेदनस्यैव ध्यानज्ञानशब्दाभ्यां शास्त्रमुखेन प्रतिपाद्यमानत्वादित्युक्तम् । तत्रानुपपत्तिमारोपयन्नाह—ननिवति ।

ननु "अन्यदेव विदितादथो अविदितादधि, येनेदं सर्वं विजानाति तं केन विजानीयात्, तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद् वद" इत्यादिश्रुतिभिर्वेदनादिक्रियाऽविषयताया निर्णीयमानत्वात् कथं तस्य ध्येयत्वमिति चेन्मैवम् । तासां ब्रह्मणो रूपगुणादीनामियत्तानिषधपरत्वात् । तदनङ्गीकारे "तरति शोकमात्मवित् । ब्रह्म वेद ब्रह्मैव भवति । तस्मिन् दृष्टे परावरे । आनन्दं ब्रह्मणो विद्वान् । यदात्मानमेवावेद् । कों मोहः कः शोकः एकत्वमनुपश्यतः । तद्धैतत् पश्यन्नृषिर्वामदेव" इत्यादिवाक्यकदम्बैर्वेदनदर्शनादिविषयत्वेन ब्रह्मप्रतिपादनपरैर्मोक्षविधायकैर्विरोधेन निर्मोक्षप्रसङ्ग इति पौनःपुन्यनोक्तमेव । अन्यथा शास्त्रयोनित्वस्यैवासिद्धेः ॥

कथं तस्य ध्येयत्वमितिचेदित्यन्वयः । तस्य ब्रह्मणो ध्यानादिविषयत्वमसंभावितमित्यर्थः । का वात्रासंभावनेतिचेदत

आह—अन्यदेव विदितादथोऽविदितादधि, येनेदं सर्वमित्यादिश्रुतिभिः । वेदनादिक्रियाविषयताया निर्णीयमानत्वादिति । तद्विरुद्धवेदनादिविषयतास्वीकारे श्रुतिकदम्बबाधो महान् दोषः । स च वैंदिकानामनिष्टतमस्तदेवासंभावनाबीजमिति निष्कर्षः । "आत्मा वा रे द्रष्टव्यः । परिपश्यन्ति धीराः । ब्रह्म वेद ब्रह्मैव भवती" त्यादिश्रुतिविरोधादित्यादिना पूर्वोक्तमेवोत्तरमनूद्य स्मारयति—मैवमिति । भूय एवं मा वद । कुतः ? । तासामित्यादि । पौनः पुन्येनोक्तमेवेत्यत्रावधारणेन शङ्कायाः पुनरुक्तत्वाद् वैयर्थ्यमेवेति द्योतितम् । दोषान्तरमाह—अन्यथा शास्त्रयोनित्वस्यैवेति । श्रुत्यर्थस्तु—अन्यदेवेति, तद् ब्रह्म विदितात् परिच्छिन्नज्ञानविषयात् कार्यादाकाशादेरन्यदेव विलक्षणम् अपरिच्छिन्नत्वात् । मायावादिभिर्जीवस्यापि स्वरूपतो विभुत्वाङ्गीकारात् सिद्धान्तेऽपि जीवस्य जडवर्गाद् वैलक्षण्यं ज्ञानेन धर्मेण विभुत्वं च स्वीक्रियतेऽतो जीव एवास्तीतिचेत् तत्राह—अथो अविदितादधीति । अविदितादतीन्द्रियात् क्षेत्रज्ञादधि अधिकमित्यर्थः । यद्वा अविदितात् कारणात् प्रधानमहदादिवर्गादधिकमिति । यद्वा, विदिताल्लौकिकाद् बद्धजीवादन्यद् भिन्नम् । अविदितान्मुक्तादप्यधिकम् । तयोर्नियामकत्वात् । "प्रधानक्षेत्रज्ञपतिर्गुणेश" इति श्रुतेः । तदेवाह—येन ज्ञापयित्रा स्वतन्त्रेण प्रेरित इदं सर्वं विजानाति । "यद्विज्ञातेन सर्वं विज्ञातं स्यादि"तिश्रुतेः । तत्परतन्त्रो ज्ञाता जीवस्तत्प्रसादं विना केन साधनेन विजानीयात् । न केनापीत्यर्थः । "भक्त्या मामभिजानाति । मद्भक्त एतद् विज्ञाये"त्यादिभगवदुक्तेः । एतद् ब्रह्म कीदृशं तद् अपूर्वं पूर्वं ज्येष्ठं यस्य नास्ति तद् । सर्वतो भूयस्त्वाद् । अनपरमिति । न परं साम्यं यस्य

तत्। अनुपपेयत्वात्। "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतेः। "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य" इति स्मृतेश्च। अनन्तरमिति। अन्तरमन्तःकरणं यस्य नास्ति तत्। "अप्राणो ह्यमना" इति श्रुतेः। अबाह्यमिति। बाह्यं बहिर्यस्मान्न किञ्चिदस्ति। सर्वस्य तदाधेयत्वात्। आधेयस्याधाराद् बहिःस्थित्यदर्शनाच्च। "यत् प्रयन्त्यभिसंविशन्तीति" श्रुतेः। यद् वस्तु धर्मादिभ्यो वैलक्षण्येन पश्यसि तद् वदेत्यर्थः। तत्र धर्माद् धर्मफलाद् वैषयिकसुखाद्, अधर्माद् पापफलाद् दुःखात्, कृताद् कार्यादाकाशादेरकृतात्, कारणात् प्रधानादेर्भूतादतीतकालाद्, भव्याद् भाविनश्चकाराद् वर्तमानात्। द्वितीयश्चकारः स्वभावादिसमुच्चयार्थः। उत्तरश्रुतीनां प्रायः स्पष्टोऽर्थः। तत्र, को मोह इति। उभयोर्जडचेतनवर्गयोरन्तर्यामिणः सर्वकारणस्यैकत्वं नैरन्तर्येण पश्यतः पुंसः शोकादयो न सन्तीति समुदायार्थः। शोकादीनां तत्कारणानाञ्च स्वातन्त्र्याभावात्। यदात्मानमिति। अत्रात्मशब्दः परमात्मवाचो। आत्मैवैक एवाग्र आसीदिति तैत्तिरीये प्रसिद्धः॥

यस्यामतं तस्य। विज्ञातमविजानतामित्यादिना ब्रह्मज्ञानाभाववतां ज्ञातृत्वप्रतिपादनान्नानिर्मोक्षप्रसङ्गो वाच्यः। तज्ज्ञानाभावस्यैव ज्ञानत्वेनोपचरितत्वात् तेन मोक्षसंभवादिसाशयेनाक्षिप्यते—नन्विवयादि।

ननु, "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्। न हि दृष्टेर्द्रष्टारं पश्ये। न हि विज्ञातेर्विज्ञातारं विजानीयाम्" इत्यादिश्रुतिभिस्तदज्ञातत्वप्रपञ्चनान्न निर्मोक्षप्रसङ्गो वक्तुं योग्य इति

चेन्न।आश्वकीटादीनां तदज्ञानस्याविशेषात् सर्व-मोक्षप्रसक्तेः शास्त्राचार्यसंततिवैयर्थ्यापत्तेः।किञ्च अन्यदेव विदितादित्यत्र वेदनानिषेधवद्, अथोऽ विदितादधीत्यनेन वाक्यशेषेणावेदनस्यापि निषि-द्धत्वाद्, अन्यत्र धर्मादित्यत्रापि वाक्यशेषे, यद्वै पश्यसि तद् वदेति वेदनदर्शनादिविषयत्वेनैवोप-संहाराच्च । तस्मादुभयविधश्रुतीनां प्रामाण्यप्राव-ल्याविशेषात् तासां बाधनिरासार्थमुक्तैव गतिरा-श्रयणीया। समुद्रं पश्यामि, कियानित्येतन्न जाना-मीति प्रतीतिवत् प्रकृतेऽपि उभयथा समञ्जस-मेव । किञ्च, " तद् यथा निर्व्वयनी वल्मीके मृतायास्ता शयीतैवमेवेदं शरीरं शेतेऽथायम-शरीरोऽ मृतः प्राणो ब्रह्मतेज एवेति सचक्षुरच-क्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इवेति । आत्मानं चेद् विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमभिसंज्वरेद्" इत्यादिवा-क्यान्युक्तलक्षणनिष्ठावतो विदुषः प्रकृतिसंबन्धे सत्यपि देहद्वयाभिमानशून्यतां बोधयन्ति सन्ति तत्कृतार्थतामाहुः । नच जीवन्मुक्तस्वरूपपराण्ये-

तानीति वाच्यम् । "तस्य तावदेव चिरं यावन्न-विमोक्ष्ये अथ संपत्स्ये" इति श्रुत्या तस्य मोक्षे चिरमित्यनेन कालप्रतिबन्धकता, न विमोक्ष्य इत्यनेन मोक्षाभावः । अथ संपत्स्य इत्यनेन भविष्यत्काले तद्भाव्यता च स्पष्टं कण्ठरवेण प-ठ्यते । अनेन ज्ञानकाल एव मोक्ष इत्यपि नि-रस्तं वेदितव्यम् । नच "अत्र ब्रह्म समश्नुत इति श्रुतिविरोध इति शङ्क्यम् । ध्यानेऽपि ब्रह्मानुभूतेः सत्त्वान्न तूक्तलक्षणो मोक्ष इत्यलं विस्तरेण । अग्रे समन्वयस्य विस्तरणीयत्वात् ॥

श्रुतिभिस्तदज्ञातत्वप्रपञ्चनादिति । तज्ज्ञानाभावस्यैव ज्ञानत्वेन मोक्षसाधनत्वात् तदेव ऋते ज्ञानान्न मुक्तिरित्यादिना ज्ञानशब्देनोपचर्यत इति भावः । तत्र समाधानमाह—नेति । ब्रह्मज्ञानाभावोऽज्ञानत्वेनोच्यत इति सत्यं ज्ञानाभावशब्देन ब्रह्म-स्वरूपादिज्ञानस्य स्वरूपतोऽभावो विवक्षितः ? स्वरूपादीय-त्ताभावो वा ? । न द्वितीयः । अस्मत्पक्षे नेष्टत्वात् । तच्चोक्त-मेव । नाद्योऽपि पक्षः संभवतीत्याह—आश्वकीटादीनामिति । श्वकीटादिनित्यनारकीयाणामपि तदज्ञानस्य विशेषाभावात् सर्व-मोक्षप्रसक्तेरिति । तत्रापि हेतुः—शास्त्राचार्येति । श्रुत्यर्थ-स्तु—यस्यामतमिति । यस्य पुंसो देशादिपरिच्छेदेनामतम् अज्ञातं तस्य मतं ज्ञातं भवति । यस्य तु परिच्छेदेन मतं स न वेद, न जानाति । परिच्छिन्नदर्शित्वात् । तदेव द्रढयति—विजा-

नतां परिच्छिन्नज्ञानवताम् अविज्ञातम् । परिच्छेदमविजानतां विज्ञातम् । वाक्यान्तरं व्याचष्टे—दृष्टेश्चक्षुर्जन्याया वृत्तेः कर्मभूतायां द्रष्टारं स्वाभाविक्या दृष्ट्या व्यापारं दृश्यमानया दृष्ट्या न पश्येदित्यादिना मैत्रेयीं प्रति याज्ञवल्क्यवचनम् । तथाच भगवदुक्तेः—दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरमिति । विज्ञातेर्बुद्धिवृत्तेर्निश्चयलक्षणाया विज्ञातारं तयैव वृत्त्या तत्प्रसादं विना विज्ञातारं न विजानीयाः । तत्प्रसादैकगम्यत्वात् । यद्वा दृष्टेरित्यादिना स्वाभाविकीनां क्षेत्रज्ञस्य शक्तीनामेव ग्रहणम् । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादिना श्रवणात् । तथा च क्षेत्रज्ञस्य स्वाभाविक्या दृष्टेर्दर्शनशक्तेरपि द्रष्टारं तस्या अप्यन्तर्यामिणं तत्प्रयोज्यद्रष्ट्रीत्वं न पश्येः । यावद् भगवत्प्रसादं तस्याः संकोचात् । एवमग्रेऽप्यूह्यम् । यत्प्रमाणबलेन शङ्कितं, तेनैव तद्घटनां दर्शयति—किञ्चेति । अन्यदेव विदितादित्यस्मिन् वाक्ये यथा वेदनस्य निषेधं भवद्भिः स्वीकृत्य शङ्क्यते तथा तत्रैवावेदनस्यापि निषेधस्तुल्य एव । तथात्वे शून्यवादापत्तिरिति भावः । उक्तन्यायमत्राप्यतिदिशति, अन्यत्र धर्मादित्यत्रापि सिद्धान्तमाह—तस्मादुभयश्रुतीनामिति । तमेव विदित्वाऽतिमृत्युमेति, अन्यदेव विदितादित्याद्युभयप्रकारिकाणामित्यर्थः । उक्तार्थे लौकिकानुभवं प्रमाणयति—समुद्रमित्यादिना । इदानीं ब्रह्मनिष्ठस्य प्रकृतिवियोगात् पूर्वमपि कृतकृत्यतां दर्शयति श्रुतिवाक्यैरेव—किञ्चेति । तद्यथा निर्ल्वयनीति विदुषः प्रकृतिसंबन्धे सत्यपि कृतार्थतां बोधयन्ति वाक्यान्येव । न वयं स्वातन्त्र्येण कथयाम इत्यर्थः । श्रुत्यर्थश्च यथालोकेऽहेर्निर्ल्वयनी सर्पविनिर्मुक्ता त्वग् वल्मीके प्रत्यस्ता प्रक्षिप्ता मृता पूर्वमिव सर्पेणात्मतयाऽगृहीता वर्तत एवमेवेदं विदुषः शरीरं प्रागे-

वात्माभिमानेनागृहीतं प्रकृतिवियोगपर्यन्तं तिष्ठतीत्यर्थः । त्वचा शरीरस्य साम्यमुक्त्वा विदुषः सर्पसाम्यं दर्शयति—अथेति । दृष्टान्तेऽथशब्दः । यथा त्यक्तां त्वचम् अहिरहमिति न मन्यते तथायं विद्वान् देहस्थोऽपि तत्राहमिति बुद्धिं न करोति । अहंकारममकारास्पदयोर्भगवद्विभूतित्वेन निश्चयात् । अशरीरः शरीराभिमानशून्योऽत एव अमृतो देहकार्यमदादिरहितः, प्राणः प्राणसहितो, ब्रह्मतेजो ब्रह्मणोंऽशः । एवं स्थूलदेहाभिमानं निरस्य वाक्यान्तरेण सूक्ष्मदेहाभिमानाभावमपि दर्शयति—सचक्षुरित्यादि । चक्षुषा युक्तोऽपि तत्कार्यप्राकृतरूपासक्तेरभावादचक्षुरिव । श्रोत्रसहितोऽपि तत्कार्यबाह्यशब्दसङ्गाभावादकर्ण इव । वागिन्द्रिययुक्तोऽपि तत्कार्यवृथालापशून्यत्वान्मूक इव । मनसा युक्तोऽपि तत्कार्यनानासंकल्पहीनत्वादमना इव । प्राणसहितोऽपि तत्कार्यबाह्यशब्दसङ्गाभावादकर्ण इव । वागिन्द्रिययुक्तोऽपि तत्कार्यवृथालापशून्यत्वान्मूक इव । मनसा युक्तोऽपि तत्कार्यनानासंकल्पहीनत्वादमना इव । प्राणसहितोऽपि तत्कार्यबलज्ञापनादिशून्यत्वादप्राण इव । चक्षुरादीन्द्रियतद्वृत्तीनां प्रयोजकनियन्तृपारतन्त्र्यप्रवृत्तिज्ञानात् तेषु स्वातन्त्र्यप्रवृत्तिसामर्थ्याभावनिश्चयाच्च न तत्राभिमानं धत्ते । स्वात्मना सह सर्वेषामपि तत्पारतन्त्र्यादिति भावः । इत्थं देहद्वयेऽनात्मवर्गे आत्मत्वाभिमानाभावं प्रदर्श्य वाक्यान्तरेण तत्कृतार्थत्वं द्योतयति—आत्मानं चेदिति । चेदिति संदिग्धशब्दप्रयोगात् तस्य विदुषोऽत्यन्तदौर्लभ्यं द्योतयति । यदि श्रीभगवान्निर्हेतुककृपाकटाक्षेण कोटिकोटीनां क्षेत्रज्ञानां मध्ये कश्चिदात्मानं विजानीयात् स्वरूपं निश्चिनोति । कथमितिचेदत आह—अयमस्मीति । सर्वज्ञाऽनन्ताचिन्त्यशक्तेर्भगवतोंऽशभूतोऽयं ब्रह्मात्मकस्तन्नियोज्यस्तदा-

त्मीयचिदानन्दस्वरूपः साक्षादहमस्मीति, न तु देहद्वयरूपो न तत्संबन्धवान्, अत एव न तद्गुणशोकादिभागिति । तर्हि, किमिच्छन्निति । किं स्वर्गाद्यामुष्मिकं फलमिच्छन् । कस्य कामायेति, कस्य वा पुत्रराज्यादैहिकस्य विषयस्य प्राप्तये । शरीरमनुसंज्वरेदिति । शरीरमिसनेन यद्यपि स्वस्य तत्रात्मत्वाभावात् तत्कृतसंतापो नास्ति, केवलं शारीरतापनमेव निरभिमानिनां क्रियाकरणम् । यदि काचिद् फलप्राप्तिरवशिष्येत तदा तदर्थं तदुपाये प्रवृत्तिः । तस्य त्वेतन्नास्त्येव । किमर्थं शरीरं संज्वरेत् । ऐहिकामुष्मिकयोः फलयोः प्राकृतत्वेन नश्वरत्वाद्, यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुतेः, क्षीणे पुण्ये मर्त्यलोकं विशन्तीति स्मरणाच्च, तद्भोक्तुश्च संसारित्वाद्, गतागतं कामकामा लभन्ते इति भगवदुक्तेः, स्वस्य च निरतिशयानन्दब्रह्मांशत्वनिश्चयेन तदात्मीयत्वेन तदात्मकत्वेन च समाप्तसर्वपुरुषार्थत्वात् । तथाच वक्ष्यते स्वयमेव भगवान् सूत्रकारः । अंशो नानाव्यपदेशात् । उक्तं श्रीभगवतापि साभिमानवचनेन—ममैवांशो जीवलोके जीवभूतः सनातन इति । अयं भावः । लोके तावद् वासनायुक्तस्य तत्साधनसम्पादनसमर्थस्य तदुपायफले विदुषश्च प्रवृत्तिदर्शनात् । तथाचाह भगवाञ्जैमिनिः । अर्थी समर्थो विद्वानधिकारी । अस्य तु अधिकारिविशेषणाभावादधिकाराभावः । तथाहि । न तावत् तस्यार्थित्वसम्भवः । ऐहिकामुष्मिकयोस्तुच्छत्वनिश्चयात् । नापि सामर्थ्यवत्त्वम् । साध्यसाधनकर्तृभोक्तृणां भगवत्पारतन्त्र्यज्ञानात् । फलविषयकविद्वत्त्वेऽपि पारतन्त्र्यनिश्चयादेव विद्वत्तारहित्यात् प्रवृत्त्यधिकारिणः सकाशात् तस्यास्यन्तवैलक्षण्यमिति । ननु प्रकृतिसम्बन्धे

सति देहाभिमानभावस्य दुर्निवर्त्यत्वात् कुतः कृतार्थत्वम् । नचोक्तश्रुतीनां निर्विषयत्वापत्तिः कल्पनीया । तासां जीवन्मुक्तविषयकत्वादितिचेत् तत्राह—नच जीवन्मुक्तेत्यादि । अत्र प्रमाणं दर्शयन्ननुपपत्तिमाह—तस्येति । स्पष्टार्थः । जीवन्मुक्तेर्इति संज्ञामात्राभ्युपगमे न कश्चिल्लाभः । नेत्रहीनस्य कमलनयनेति संज्ञावदिति भावः । केषाञ्चिज्ज्ञानकालीन एव मोक्ष इत्याग्रहस्तान् प्रत्याह—अनेनेति । जीवन्मुक्तानुपपत्तिप्रतिपादनेन । ननु ब्रह्मप्राप्तिलक्षणमोक्षप्रतिपादकवाक्यानां कथं निर्वाह इतिचेत् तत्राह—नचात्र ब्रह्मेति । ध्यानेऽपीति । भगवत्स्वरूपादिध्यानेऽपि तत्सम्भवस्य सत्त्वादिति भावः । विस्तरादुपरमन्नाह—अलं विस्तरेणेति । ननु विस्तराभावे कथं ज्ञानं, ज्ञानाभावे कथन्तरां जिज्ञासावतां प्रवृत्तिरित्यत आह—अग्रे समन्वयस्येति । अग्रेऽग्रिमग्रन्थेऽस्मिन्नेवाध्याये समन्वयस्य समन्वयप्रकारविशेषस्य भगवता सूत्रकृतैव विस्तरिष्यमाणत्वादित्यर्थः ॥

चतुःसूत्र्यर्थमुपसंहरन्नाह—तत् सिद्धमिति ।

तत् सिद्धं सर्वज्ञे स्वाभाविक्यचिन्त्यानन्तशक्तौ शास्त्रयोनौ ब्रह्मणि पुरुषोत्तमे अस्पृष्टमायागुणसंबन्धगन्धमाहात्म्ये भगवति श्रीकृष्णे वेदान्तस्य तद्वाचकतया समन्वयः, समन्वितश्च वेदान्ते वाच्यतया भगवान् वासुदेव इति । तस्मादेव जिज्ञासाविषय इति । तथाहि । यतो वा इमानि भूतानि जायन्ते इति यच्छब्देन जग-

त्कारणमुपक्रम्य, तद् विजिज्ञासस्वेतिवाक्यशेषेण तस्य जगत्कारणस्य ब्रह्मणस्तच्छब्देन परामर्श इत्युक्तमेव । किञ्च । आद्याचार्यचरणैर्वेदान्तपारिजातसौरभपठितवाक्यचतुष्टयस्यैतन्मूलभूतस्य श्रीनिवासचरणैर्भगवद्भिर्वेदान्तकौस्तुभे तद्भाष्ये निगदभाषितत्वाद्, अत्रापि सूत्रव्याख्यामुखेनास्माभिरपि व्याख्यातप्रायत्वेन पौनरुक्त्यापातदोषाच्च नेह व्याख्यार्थमुद्युज्यते । सूत्रव्याख्ययैव कृतार्थत्वात् ॥ ४ ॥

श्रीनिवासपदाम्भोजस्मरणोद्बुद्धबुद्धिना ॥
संक्षिप्तैव मुमुक्षूणां परमानन्दलब्धये ॥ १ ॥

कारुण्यसिन्धोश्चरणाम्बुजं मुदा
ध्यायेन्मुमुक्षुः सततं सुमङ्गलम् ॥
तरेत संसारमपारवारिधिं
लभेत ह्यानन्दमनन्तमञ्जसा ॥ २ ॥

इति श्रीसनत्कुमारसन्ततिपदाश्रितश्रीभगवन्नियमानन्दाद्याचार्यपदपङ्कजमकरन्दभृङ्गश्रीदेवाचार्यविरचितायां सिद्धान्तजाह्नव्यां शारीरकमीमांसाव्याख्यायां चतुः सूत्रीव्याख्यानो नाम प्रथमस्तरङ्गः समाप्तः ॥

तत्पदार्थं स्वयमेव व्याकरोति—**सर्वज्ञे** इत्यादिना । श्रीकृष्णे वेदान्तस्य समन्वय इति योजना । वेदान्तप्रतिपाद्यो भगवान् श्रीकृष्ण एवेति भावः । अहमेव वेद्य इति तदुक्तेः । तमेव विशिनष्टि—**सर्वज्ञ** इत्यादि । सर्वदेशकालवस्तूनि जानातीति तथा ।

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चनेति भगवदुक्तेः । स्वाभाविकयचिन्त्यानन्तशक्तौ स्वाभाविक्य आद्यन्ताभाववत्त्वः स्वरूपवद् यथार्था, अचिन्त्या एतावत्त इति परिच्छेत्तुमनर्हा, अनन्ता असंख्याकाश्च शक्तयो यस्य तस्मिन् । **शास्त्रयोनाविति** । शास्त्रं योनिः कारणं प्रमाणं यस्मिंस्तस्मिन् ब्रह्मणि निरतिशयस्वरूपशक्तिकल्याणगुणादिभिर्बृहति । **पुरुषोत्तम** इति । क्षराक्षराभ्यामुत्कृष्टे । **अस्पृष्टमायेति** । माया च तद्गुणाश्च तत्संबन्धश्च मायागुणसंबन्धास्तेषां गन्धो मायागुणसंबन्धगन्धः । न स्पृष्टं मायागुणसंबन्धगन्धेन माहात्म्यं यस्य तस्मिन् । **भगवतीति** षड्गुणैश्वर्यसंपन्ने । तथाह भगवान् पराशरः—

यत् तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्देश्यस्वरूपं च पाणिपादादिवर्जितम् ॥
विभुं सर्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यव्याप्तं यतः सर्वं तद्वै पश्यन्ति सूरयः ॥
तद् ब्रह्म परमं धाम तद् ध्येयं मोक्षकाङ्क्षिणा ।
श्रुतिवाक्योदितं सूक्ष्मं तद् विष्णोः परमं पदम् ॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षायात्मनः ॥

शुद्धे महाविभूत्याख्ये परे ब्रह्मणि निष्कले ।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥
संबिभर्ति तथा भर्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि ।
सर्वभूतेष्वशेषेषु वकारार्थस्तथाऽव्ययः ॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ॥
एवमेष महाशब्दभगवानिति सत्तमः ।
परमो ब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
स सर्वभूतप्रकृतिं विकारान्
गुणाँश्च दोषाँश्च मुने व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा
तेनाश्रितं यद् भुवनान्तराले ॥
समस्तकल्याणगुणात्मकोऽसौ
स्वशक्तिलेशावृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहाववोध-
स्ववीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो-

ऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्वगः सर्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥
उत्पत्तिस्थितिनाशानां हेतुर्यो जगतोऽव्ययः ।
स सर्वभूतः सर्वात्मा कथ्यते भगवान् हरिः ॥

एतदुक्तं भवति । यथा काचिन्नवयौवना बाला प्रियसङ्गसंभूतस्वानुभूतानन्दपरिपूर्णत्वात् तज्ज्ञाऽपि तदानन्दस्य कुमारीं बोधयितुमशक्ता । तस्यानुपमेयत्वात् कुमार्याश्चानधिकारित्वात्। अन्यस्यै तदधिकारिभूतायै स्वचिह्नादिद्वारा तज्ज्ञापनेऽशक्यत्वाच्च । तथैव वेदोऽपि श्रीभगवदनुभवानन्देन परिपूर्णोऽपि तस्यानुपमितत्वादियत्ताभाववत्त्वाच्चानधिकारिणे तज्ज्ञापयितुमशक्योऽपि तत्प्राप्यमानाय तदेकदेशेन बोधयतीति । यद्यपि दृष्टान्ते विषयस्य परिच्छिन्नत्वान्न तदुपमानार्हत्वं, तथाऽप्यनुपमेयत्वमात्र एकदेशे दृष्टान्तः । तस्माद् ब्रह्मणः स्वरूपगुणादीनामियत्तां निराकुर्वंस्तस्य जडाजडवैलक्षण्यं च प्रतिपादयन् बेदान्त उक्तलक्षणे ब्रह्मणि तत्प्रतिपादकतया समन्वेतीति राद्धान्तः ।

अथ ग्रन्थोपक्रमे पठितानां श्रीभगवदाद्याचार्यवाक्यानां व्याख्याभावरूपापूर्णतां स्मृत्वा निरासयति-किञ्चेति। आद्याचार्यो भगवान् संप्रदायप्रवर्तको नियमानन्दाख्यो निम्बार्कापरनामा । तेन स्वप्रणीतवेदान्तपारिजातसौरभाख्ये ग्रन्थ शारीरकमीमांसावाक्यार्थलक्षणे पठितानां सूत्रस्थानीयानां चतुष्टयस्य अथात इत्यादिसूत्रचतुष्टयविषयकस्य निर्मितग्रन्थमूलभूतस्य श्रीनिवासचरणैर्वाक्यार्थभाष्यकृद्भिर्व्याख्यातप्रायत्वेन सूत्रार्थस्य तद्व्याख्यारूपत्वात् प्रायपदग्रहणम् । तेनैव सूत्रव्याख्यानेनैव ॥४॥

अथ ग्रन्थसंक्षेपणे प्रयोजनमाह—श्रीनिवासस्य श्रीनिवासाभिधस्य वाक्यार्थभाष्यकारस्य पादाम्बुजस्मरणेनोद्बुद्धा बुद्धिर्यस्य तेन मया संक्षिप्ता। ननु व्याख्या तु विस्तार्यैव। मुमुक्षूपकारकत्वात्। किमिति संक्षिप्यते इति चेत् तत्राह—मुमुक्षूणामिति। तेषां सौलभ्येन पदार्थप्राप्तये पूर्वाचार्यैर्विस्तृतत्वात् तैरेव प्रेरितेन मया संक्षिप्तेति भावः। परमानन्दो मोक्षस्तत्प्राप्त्यर्थं व्यस्तसमस्तयोर्मोक्षफलकत्वसाम्यात्। यद्वा, श्रीनिवासो रमाकान्तो भगवाञ्च्छ्रीपुरुषोत्तमो गोविन्दो वेदमात्रुक्तसवितृदेवपदवाच्यो जगत्कारणभूतः सर्वधियां प्रवर्तकस्तेनोद्बुद्धिता प्रचोदिता बुद्धिर्यस्य तेन मया संक्षिप्ता। त्वं मुमुक्षूणां तत्त्वप्राप्त्यर्थं सुलभोपायं कुर्विति बुद्धौ प्रेरितेनेत्यर्थः ॥ १ ॥

अथ तरङ्गसमाप्तौ सूत्रकारचरमसिद्धान्तव्याख्यानरूपमङ्गलमाचरन् पूर्वप्रतिपादितमर्थं संक्षिप्य स्मारयति—कारुण्येति कारुण्यशब्द उपलक्षणार्थः। कारुण्यवात्सल्यक्षान्तिबलाद्यनन्ताचिन्त्यासंख्येयबृहद्गुणसागरस्य। अनेनैवोपक्रमसूत्रस्य ब्रह्मपदार्थः स्मारितो भवति। चरणाम्बुजं ध्यायेदिति पूर्वोक्तसाधनकदम्ब उपलक्षणत्वेन स्मार्यते। मुमुक्षुरिति पूर्वोक्ताधिकारिस्मारणम्। तरेतेत्यादिनोक्तभगवद्भावापत्तिलक्षणमोक्षज्ञापनमिति तत्त्वम्। अम्बुजपदाद् ध्यानविषयस्य निरतिशयसौन्दर्योक्तिः। मुदेति ध्यानस्यान्तरङ्गतां सौलभ्यञ्च द्योतयति। निरतिशयसौन्दर्ये स्वाभाव्यादेव चेतस आसक्तिघटनात्। सुमङ्गलमिति क्रियाकर्तृकर्मणां सर्वेषामपि विशेषणत्वात् सर्वत्र संयोजनीयम्। सततमिति ध्याने नैरन्तर्यगुणविधानम्। वारिधिरूपकेण संसारस्य भगवत्कृपामन्तरेण दुस्तरत्वं सूचयति। अञ्जसेति ध्यानस्य निरपेक्षत्वं स्फुटयति। आनन्दमिति। भगव-

त्स्वरूपगुणादिविषयको निरतिशयानन्दः । यं लब्ध्वानन्दीभवति, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति श्रुतिकदम्बप्रतिपादितः । तं मोक्षाख्यम्, अत एवाऽनन्तम् आनन्दमयाधिकरणे वक्ष्यमाणं देशकालादिपरिच्छेदशून्यं सर्वदेशसर्वकालसर्ववस्तुव्याप्तमञ्जसा लभेत इति यावत् । हिशब्दोऽवधारणेऽयोगव्यवच्छेदार्थे । यस्मादेवं तस्मान्मुमुक्षोः सततं ब्रह्मभूतस्य श्रीमाधवस्य पादारविन्दचिन्ता मोक्षान्तरङ्गोपायरूपेति शास्त्रनिर्गलितोऽर्थः । तथाह सूत्रकारः—

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति ॥
वेदान्ताभ्युपगीयमानमहिमा तर्काप्रतिष्ठो हि यो
ध्यानाभ्यासविनिश्चलेन मनसा साक्षात्कृतो मोक्षदः ।
तं देवं कमलाभिलालितपदं गोपीकटाक्षार्चितं
गोपालं शरणं व्रजामि सततं वंशीकरं सद्गुरुम् ॥ १ ॥

इति श्रीसनत्कुमारसन्ततिपदाश्रितश्रीदेवाचार्यविरचितसिद्धान्तजाह्नवीटीकायां श्रीसुन्दरभट्टविरचितायां सिद्धान्तसेतुकायां प्रथमतरङ्गमर्यादा समाप्ता ॥

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 95.

षड्दर्शनसमुच्चयः ।

अर्थात्

बौद्ध—नैयायिक—कापिल—जैन—वैशेषिक—जैमिनीय—

दर्शनीयसंक्षिप्तनिरूपणपरो निबन्धः ।

आर्हतप्रवरश्रीहरिभद्रसूरिरचितः ।

परमार्हतमणिभद्रकृतलघुवृत्तिसमाख्यया व्याख्यया सहितः ।

कलियुगजनपावनावतारपरपुमर्थप्रेमवितरणपरायणश्री१०८भगवत्कृष्णचैतन्यचरणोप-

दिष्टैकवीथीमात्रपथिकेन श्री६मध्वसंप्रदायाचार्यसाहित्यदर्शनाचार्येण

श्रीगोस्वामिदामोदरलालशर्मणा संशोधितः ।

SHADDARSHANASAMUCHCHAYA

BY

SHREE HARIBHADRASOORI:

With a commentary called Laghuvritti by

MANIBHADRA.

EDITED BY

Sâhityâchârya Pandit Dâmodara Lâl Goswâmi:

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES.

AGENTS:—OTTO HARRASSOWITZ, LEIPZIG:

PANDIT JYESHṬHARAMA MUKUNDJI, BOMBAY.

Printed by Hari Dâs Gupta, Proprietor,

AT THE VIDYA-VILASA PRESS & T. P. WORKS.

BENARES.

Price Rupee One.

1905.

Registered According to Act XXV of 1867.

श्रीः

षड्दर्शनसमुच्चयस्य भूमिका ।

———ooo———

अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ।
तरणिरिव तिमिरजलधिं जयति जगन्मङ्गलं हरेर्नाम ॥

अयि षड्दर्शनीवल्लभाः !

लभतां ननु भवतामासेचनकतां चिररात्राय चिन्वानाया-स्तन्वानायाश्च हृद्याया: किल वोऽस्याः षड्दर्शन्याः समुद्वेलोत्कण्ठोदधेरुद्ग्रीविकासहस्रप्रदानं श्रीमतामात्मदर्शनाय सौखप्राकटनिकता भवत्सु पदम् ।

न हि खलु सर्वदर्शनसंग्रहादिजातीयनिबन्धैः समं पास्पर्द्धेयं निबन्धो नामाकर्णनमात्रजनुर्भ्रमैर्भवादृशैर्हेलालवमपि जामितासधीचीनं नेयस्तत्त्वनिभालनमार्मिकतास्वयंवृतैः । नयनाञ्चलार्पणायासमात्रेण चेदमीयरहस्यमनुबोभुवतो भवन्तो भविष्यन्ति, कृतमर्थवादविडम्बनेन ।

अयञ्च निबन्धः सप्ताशीत्या पद्यैर्निर्मितो ग्रन्थकर्त्रा षड्दर्शनसमुच्चयनाम्ना प्रसेधितः । दर्शनपदार्थश्चैतादृशस्थले दृश्यते ज्ञायत आत्माऽनेनेति ज्ञानसामान्यार्थकात् पश्यतेः करणल्युटा निष्पन्नदर्शनपदजन्यज्ञानविषयः चेतनवस्तुविचारप्रवणागमात्मकः । दर्शनगतषट्संख्याविधायां तु तैर्थकानां भूयांसि मतानि । के चित् खलु पूर्वोत्तरमीमांसाद्वयं निरीश्वरसेश्वरसांख्यद्वयं-षोडशसप्तपदार्थाख्यायिन्यायद्वयं चेति मिलितानि दर्शनषट्कं-प्राहुः । अन्ये पुनः सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकप्रभेदबौद्धेन जैनलौकायतिकाभ्याञ्च पूर्वदर्शनषट्कं द्वादशदर्शनीं-प्रतिजानते । परे तु मीमांसकसांख्यनैयायिकबौद्धजैनचार्वाकाणां-दर्शनानि षड्दर्शनीं संगिरन्ते । प्रकृतनिबन्धकारस्तु—

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयञ्च नामानि दर्शनानाममून्यहो–

इति तृतीयकारिकायां प्रकारान्तरमेवान्वसरत् । अपराणि चापि दर्शनान्येकेऽमन्यन्त, यानि सर्वदर्शनसंग्रहसर्वदर्शनशिरोमण्यादिनिबन्धेषु व्यक्तानि । परन्तु न ज्ञायते दर्शनविभागस्य स्वेच्छयैवेशानैस्तद्विभागकर्त्तृमहाभागैः केनागसाऽसौ तपस्विनी दर्शनसंख्यैतादृगपव्यवस्थाविपदमनायीति । कथं वा दोषैकदृग्भ्योरोचतेऽप्यवधीरितनिजस्वरूपोऽदसीयो विभागोऽपरिगणयद्भयो "रसो वै स" इत्यादिप्रमाणमूर्धन्यनैकविधोपपत्तिप्रसाधितरसस्वरूपात्मप्रतिपादनपरभारतीयदर्शनम् । यतः, स्वसमभिव्याहृतपदार्थताऽवच्छेदकव्याप्यपरस्परासमानाधिकरणयावद्धर्म्मप्रकारकज्ञानानुकूलव्यापारात्मकं हि विभागं तज्ज्ञाः समाभिप्रयन्ति । न चेत्थंभूततैभिरुक्तचरेष्वेकमपि विभागमाश्रयते । प्रकृतनिबन्धा त्वशेषदर्शनसम्राजं वेदान्तमवहेलयन् "दीपाधस्तिमिर"न्यायमेव स्मालम्बते । आस्तां वैषा दुर्व्यवस्था, कृतमनेनानुपक्रान्तविमर्शेन । किन्तु तिष्ठत्येवायं निबन्ध आपाततः षञ्चषदर्शनीयस्थवीयोऽनेकविषयनिरूपणेन प्रविविक्षुजनानांकतिपयपदार्थावबोधसंपदं वितरीतुं बद्धपरिकर इति नात्र विशयलेशोऽपि ।

अस्य च षड्दर्शनसमुच्चयस्य निर्म्माता परमार्हतो हरिभद्रसूरिः ।

अयं हि हरिभद्रसूरिर्जात्या ब्राह्मणः, चित्रकूटाद्रिनिकटवर्त्तिचित्तौडाख्यनगरराज्यासनारूढस्य जितारिनामकभूपस्य पुरोहितः प्रौढाभिरूपः कदा चित् क चनोपजैनोपाश्रयं–

चक्कीदुगं हरिपणागं, पणगं चक्कणकेसवो चक्की ।
केसवचक्की केसव, दुचक्की केसवचक्कीय इति–

गाथां याकिनीनाम्न्याः कस्याश्चिदार्हत्याः सांध्यां मुखान्-निशम्योदितविस्मयातिशयस्तदर्थमवबुभुत्समानो भृशमागृहयालुतां दधदप्यनुपलभमानोऽनुनीयमानयाऽपि निजधर्ममर्मरक्षणशिक्षणपरायणया तया गोपितां तद्गाथाप्रतिपत्तिं, तयैव सूचितं-तदर्थावबोधवितरणपरिवृढं जैनविपश्चिदपश्चिमं जिनभद्रसूरिं-तदवगतयेऽस्यर्थमन्वरुणत् ।

तथाऽनुरोरुध्यमानमानसमेनमवेत्य जिनभद्रसूरिणाऽपि "विनाऽर्हतधर्म्मोपदेशमेषाऽनीषदवगमा गाथे" त्युक्तोऽयं तदैव विरज्याशिश्रियज्जिनोपदिष्टधर्मम् । अनन्तरञ्च क्रमेणानेकान्तजयपताका, ललितविस्तर, चैत्यवन्दनवृत्ति, दर्शनसप्ततिका, मुनिपतिचरित्र, वेदबाह्यतानिराकरण, श्रावकधर्मविधि, समरादित्यचरित्र, योगबिन्दुप्रकरणवृत्ति, षड्दर्शनसमुच्चय, प्रभृतिनिबन्धप्रकाण्डग्रेसरां चतुश्चत्वारिंशदुत्तरचतुर्दशशतीं ग्रन्थानां व्यररचत् । जन्मसमयश्च हरिभद्रसूरेः प्रायः पञ्चम्या वैक्रमशताब्द्याः समाप्त्युपकण्ठमनुमीयते, यतः षष्ठ्यास्तच्छताब्द्याः पञ्चत्रिंशे वर्षेऽयं पञ्चत्वमगमदिति निरदीधरन्नैतिहासिकाः।

तत्त्वप्रबोधादिनिर्म्माता हरिभद्रसूरिस्तु भिन्न एवास्मादस्यर्वाचीनः खर्त्तुदस्रेन्दुमितविक्रमादित्याब्देऽविद्यतेति ।

इदं च सर्वमेतदीयवृत्तं जामनगरवास्तव्यपण्डितश्रावकहीरालालसम्पादित "जैनधर्मप्राचीनेतिहास" नामकग्रन्थाश्रयादुद्धारीत्यैतिह्यविदो विदाङ्कुर्वन्तु ।

टीकाकुन्मणिभद्रसूरिवृत्तं तु विहितेऽपि भूयसि मार्गणे नाल्पीयोऽप्यध्यगम्यद्यावधि, भविष्यन्त्यां तदाधिगतौ क चनावसरेऽवश्यमितिहासरसिकमनोविकासाय प्रकाशायिष्यत इत्याशेमहे । अत्युपादेयस्य सटीकस्यास्य ग्रन्थस्याधुनाऽवध्यप्रकाशनमवेक्ष्य दृयमानमानसेनानुक्षणमप्रकाशितप्राचीनप्रशस्तभूरिदर्शननिबन्धप्रकटीकृतिबद्धपरिकरेण विद्याऽनुरागिणा सौजन्यशेवधिनाऽस्म-

द्भक्तवरेण श्रेष्ठिना श्रीहरिदासगुप्तेन भृशमेतच्छोधनाय प्रार्थितोऽहं व्यापृतोऽप्यन्यात्मीयावश्यकशास्त्रीयकार्यकार्येषूक्तश्रेष्ठिभक्तिमात्रवशंवदः समभ्युपागममेनत् ।

अस्य चैकं सटीकं पुस्तकं प्रायोऽशुद्धं जयपुरस्थसाहित्याचार्यविहारिलालशास्त्रिण उक्तश्रेष्ठिनैव तत आनाय्य मदान्तिकं प्रापितम्।

द्वितीयं च स्वकीयमेव श्रीवृन्दावनस्थश्री१०८भगवन्मदनगोपालपुस्तकालयस्थमहमानैषम् । एवं पुस्तकद्वयाश्रयतः समुपक्रान्तवान् मुद्रयित्वा प्रकाशनायाहममुं ग्रन्थम् । अस्वल्पीयसा समयेनैतत्प्रतिपाद्यं जिज्ञासूनाञ्च हिताय कारिकाऽऽत्मकं मूलमात्रं पर्यशीशिषम् । मध्ये चास्यागतानि प्राकृतवचनानि संस्कृत्य परिशिष्टात्मना समावीविशम् । अत्र चास्यवदधतोऽपि शोधने मन्मानुष्यकनान्तरीयकदृष्टिदोषादिजन्मानोऽशुद्धयो मर्षणीयाः सौजन्यवद्भिर्भवद्भिः ।

इत्थमदः साङ्गं ग्रन्थरत्नं स्वकीयविद्याविलासनामके काशीस्थे यन्त्रालये श्रेष्ठिहरिदासेन स्वीयव्ययेनाविर्भावितं मत्तश्च जातसंशोधनमनुसृत्य मरालपद्धतिं भवादृशाश्चेद् दृक्पथपथिकीकुर्युर्भवेतां किल फलेग्रहिश्रमौ शोधकप्रकाशकावित्यत्र न नाम मात्रयाऽपि सन्देहः ।

प्रीयताञ्चानेनास्मद्व्यापारेण सर्वान्तर्यामी सच्चिदानन्दविग्रहो भगवान् श्री१०८ राधिकारमण इत्याशास्ते

कलियुगजनपावनावतारभक्तिजीवजीवातुपरपुमर्थप्रेमवितरणपरायणश्री१०८भगवत्कृष्णचैतन्यचरणोपदिष्टैकवीथीपथिकः श्रीमद्मध्वसम्प्रदाचार्य्यः साहित्यदर्शनाचार्य्यो—

दामोदरलालगोस्वामी ।

विजयादशम्याम्
सं० वै० १९९२

वाराणस्याम् ।

॥ श्रीः ॥

षड्दर्शनसमुच्चयः ।

श्रीहरिभद्रसूरिविरचितः

मणिभद्रकृतया टीकया समलङ्कृतः ।

———:o:o:o:———

सज्ज्ञानदर्पणतले विमलेऽत्र यस्य
ये के चिदर्थनिवहाः प्रकटीबभूवुः ।
तेऽद्यापि भान्ति कलिकालजदोषभस्म-
प्रोद्दीपिता इव शिवाय स मेऽस्तु वीरः ॥ १ ॥

जैनं यदेकमपि बोधविधायिवाक्य-
मेवं श्रुतिः फलवती भुवि येन चक्रे ।
चारित्रमाप्य वचनेन महत्तरायाः
श्रीमान्स नन्दतु चिरं हरिभद्रसूरिः ॥ २ ॥

सन्निधेहि तथा वाणि षड्दर्शनाङ्कषड्भुजे ।
यथा षड्दर्शनव्यक्तिस्पष्टने प्रभवाम्यहम् ॥ ३ ॥

व्यासं विहाय संक्षेपरुचिसत्त्वानुकम्पया ।
टीका विधीयते स्पष्टा षड्दर्शनसमुच्चये ॥ ४ ॥

इह हि श्रीजिनशासनप्रभावनाविभावकप्रभोदयभूरियशश्चतुर्दशशतप्रकरणकरणोपकृतजिनधर्मो भगवान् श्रीहरिभद्रसूरिः षड्दर्शनप्रमाणपरिभाषास्वरूपजिज्ञासुशिष्यहितहेतवे प्र-

करणमारिप्समानो निर्विघ्नशास्त्रपरिसमाप्त्यर्थं स्वपरश्रेयोऽर्थं च समुचितेष्टदेवतानमस्कारपूर्वकमभिधेयमाह ।

सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकम् ।
सर्वदर्शनवाच्योऽर्थः संक्षेपेण निगद्यते ॥ १ ॥

अर्थो निगद्यतेऽभिधीयत इति सम्बन्धः । अर्थशब्दोऽत्राभिधेयवाचको ग्राह्यः । "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि"त्यनेकार्थवचनात् । मयेत्यनुक्तस्यापि गतार्थत्वात् । किंविशिष्टोऽर्थः सर्वदर्शनवाच्य इति । सर्वाणि च तानि दर्शनानि बौद्धनैयायिकजैनवैशेषिकसांख्यजैमिनीयादीनि समस्तमतानि वक्ष्यमाणानि तेषु वाच्यः कथनीयः । किं कृत्वा जिनं नत्वा । सामान्यमुक्त्वा विशेषमाह । कं जिनं, वीरं वर्द्धमानस्वामिनम् । वीरमिति साभिप्रायम् । प्रमाणवक्तव्यस्य परपक्षोच्छेदादिसुभटवृत्तित्वात् । भगवतश्च दुःखसम्पादिविषमोपसर्गसहिष्णुत्वेन सुभटरूपत्वात् । तथा चोक्तम् ।

विदारणात्कर्मततेर्विराजना-
त्तपःश्रिया विक्रमतस्तथाऽद्भुतात् ।
भवत्प्रमोदः किल नाकिनायक-
श्चकार ते वीर इति स्फुटाभिधाम् ।

इति युक्तियुक्तं ग्रन्थारम्भे वीरजिननमस्करणं प्रकरणकृतः । यद्वाऽऽसन्नोपकारित्वेन युक्ततरमेव श्रीवर्द्धमानतीर्थकृतो नमस्करणम् । तमेव विशिनष्टि । किंभूतं सद्दर्शनं सत् शोभमानं दर्शनं शासनं सामान्यावबोधलक्षणं ज्ञानं सम्यक्त्वं वा यस्य स तमिति । ननु दर्शनचारित्रयोरुभयोरपि मुक्तयङ्गत्वात् किमर्थं

सद्दर्शनमित्येकमेव विशेषणमाविष्कृतम् । न । दर्शनस्यैव प्राधान्यात् । यत्सूत्रम् ।

"सद्धेण चरित्ताउ दंसणमिह दिढयरं गहेयव्वं ।
सिज्झंति चरणरहिया दंशणरहिया न सिज्झंति" ॥

इति तद्विशेषणमेव युक्तम् । पुनः किंभूतं स्याद्वाददेशकम् । स्याद्विकल्पितो वादः स्याद्वादः सदसन्नित्यानित्याभिलाप्यानभिलाप्यसामान्यविशषात्मकस्तं दिशति भावकेभ्य उपदिशति यस्तम् । अत्रादिमार्द्धे भगवतोऽतिशयचतुष्टयमाक्षिप्तम् । सद्दर्शनमिति दर्शनज्ञानयोः सहचारित्वाज्ज्ञानातिशयः । जिनं वीरमिति रागादिजेतृत्वादष्टकर्माद्यपायनिराकर्तृत्वाच्चापायापगमातिशयः । स्याद्वाददेशकमिति वचनातिशयः । ईदृग्विधस्य निरन्तरभक्तिभरनिर्भरसुरासुरनिकायनिषेव्यत्वमानुषङ्गिकमिति पूजाऽतिशयः ॥ १ ॥

कानि तानि दर्शनानीति व्यक्तितस्तत्सङ्ख्यामाह—

दर्शनानि षडेवात्र मूलभेदव्यपेक्षया ।
देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥ २ ॥

अत्र जगति प्रसिद्धानि षडेव दर्शनानि । एवशब्दोऽवधारणे । यद्यपि भेदप्रभेदतया बहूनि दर्शनानि प्रसिद्धानि । यदुक्तं सूत्रे ।

"असियसयं किरियाणं अकिरियवाईण हुंति चुलसीई ।
अन्नाणिय सत्तट्ठी वेणइआणं च वत्तीसं" ।

इति त्रिषष्ट्यधिका त्रिशती पाषण्डिकानाम् । बौद्धानां चाष्टादश निकायभेदा, वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकाद्यो भेदाः । जैमिनेश्च शिष्यकृता बहवो भेदाः ।

"उत्पलः कारिकां वेत्ति तन्त्रं वेत्ति प्रभाकरः।
वामनस्तूभयं वेत्ति न किंचिदपि रेवणः" ॥

अपरेऽपि बहूदककुटीचरहंसपरमहंसभाट्टप्राभाकरादयो बहवोऽन्तर्भेदाः। अपरेषामपि दर्शनानां तत्त्वदेवताप्रमाणादिभिन्नतया बहुभेदाः प्रादुर्भवन्ति। तथाऽपि परमार्थतस्तेषामेष्वेवान्तर्भावात्षडेवेति सावधारणं पदम्। ननु संघटमानानियतो भेदानुपेक्ष्य किमर्थं षडेवेत्याह। मूलभेदव्यपक्षया। मूलभेदास्तावत्षडेव षट्संख्यास्तेषां व्यपेक्षया तानाश्रित्येत्यर्थः। तानि दर्शनानि मनीषिभिः पण्डितैर्ज्ञातव्यानि बोद्धव्यानि। केन प्रकारेणेति। देवतातत्त्वभेदेन देवता दर्शनाधिष्ठायका,स्तत्त्वानि च मोक्षसाधकानि रहस्यानि, तेषां भेदस्तेन पृथक् पृथग् दर्शनदेवतादर्शनतत्त्वानि च ज्ञेयानीत्यर्थः ॥ २ ॥

तेषामेव दर्शनानां नामान्याह—

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा।
जैमिनीयं च नामानि दर्शनानाममून्यहो ॥३॥

अहो इति इष्टामन्त्रणे। दर्शनानां मतानाममूनि नामानीति संग्रहः। ज्ञेयानीति क्रिया,ऽस्तिभवत्यादिवदनुक्ताऽप्यवगन्तव्या। तत्र बौद्धमिति बुद्धो देवताऽस्येति बौद्धं सौगतदर्शनम्। नैयायिकं पाशुपतदर्शनम्। तत्र न्यायः प्रमाणमार्गस्तस्मादनपेतं नैयायिकमिति व्युत्पत्तिः। सांख्यमिति कापिलदर्शनम्। आदिपुरुषनिमित्तेयं संज्ञा। जैनमिति जिनो देवताऽस्येति जैनमार्हतम्। वैशेषिकं काणाददर्शनम्। दर्शनदेवताऽऽदिसाम्येऽपि नैयायिकेभ्यो द्रव्यगुणादिसामग्र्या विशिष्टमिति वैशेषिकम्।

---

१ इदं चिन्त्यम्। इत्थं हि न्याय्यमिति स्यात्। नैयायिकेतिपदं तूक्थादिगणघटकन्यायशब्दादेव्यत्वविधिचन्यतरार्थकठका निष्पद्यते।

जैमनीयं जैमनिऋषिमतं भाट्टदर्शनम् । चः समुच्चयस्य दर्शकः । एवं तावत् षड्दर्शननामानि ज्ञेयानि शिष्येणेत्यवसेयम् ॥ ३ ॥

अथ द्वारश्लोके प्रथममुपन्यस्तत्वाद्बौद्धमतमेवादावाचष्टे—

तत्र बौद्धमते तावद्देवता सुगतः किल ।
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥४॥

तत्र तस्मिन् बौद्धमते सौगतशासने । तावदिति प्रक्रमे सुगतो देवता बुद्धो देवता बुद्धभट्टारको दर्शनादिकरः किलेत्याप्तप्रवादे । तमेव विशिनष्टि । कथं भूतस्तत्त्वनिरूपकत्वेन, प्ररूपको दर्शकः कथयितेति यावत् । केषामित्याह । आर्यसत्यानाम् । आर्यसत्यनामधेयानां तत्त्वानाम् । कतिसंख्यानामिति चतुर्णां चतूरूपाणाम् । किं रूपाणामित्याह । दुःखादीनां दुःखसमुदयमार्गनिरोधलक्षणानाम् । आदिशब्दोऽवयवार्थोऽत्र । यदुक्तम् ।

"सामार्थ्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा ।
चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेत् " ॥

इति । एवंविधः सुगतो बौद्धमते देवता ज्ञेय इत्यर्थः ॥४॥

आदिममेव तत्त्वं विवृण्वन्नाह—

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ५ ॥

दुःखं किमुच्यत इत्याशङ्कायां संसारिणः स्कन्धाः । संसरन्तीति संसारिणो विस्तरणशीलाः स्कन्धाः प्रचयविशेषाः । संसारेऽमी चयापचयरूपा भवन्तीत्यर्थः । ते च स्कन्धाः पञ्च प्रकीर्तिताः पञ्चसंख्याः कथिताः । के त इत्याह । विज्ञानं

वेदना संज्ञा संस्कारो रूपमेव चेति। तत्र विज्ञानमिति-विशिष्टं ज्ञानं सर्वक्षणिकत्वज्ञानम्। यदुक्तम्।

"यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च भावा इमे
सत्ताशक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा च सा।
नाप्येकैव विधाऽन्यदाऽपि परकृन्नैव क्रिया वा भवेद्
द्वेधाऽपि क्षणभङ्गसंगतिरतः साध्ये च विश्राम्यति"॥ इति

विज्ञानम्। वेदनेति-वेद्यत इति वेदना पूर्वभवपुण्यपापपरिणामबद्धाः सुखदुःखानुभवरूपाः। भिक्षुर्भिक्षामटंश्चरणकण्टकेलग्ने माह।

इत एकनवतेः कल्पे शक्त्या मे पुरुषो हतः।
तेन कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः!॥

इत्यादि। संज्ञेति-संज्ञानामकोऽर्थः। सर्वमिदं सांसारिकं सचेतनाचेतनस्वरूपव्यवहरणं संज्ञामात्रं नाममात्रम्। नात्र कलत्रपुत्रमित्रभ्रात्रादिसंबन्धो घटपटादिपदार्थसार्थो वा पारमार्थिकः। तथा च तत्सूत्रम्। "तानीमानि भिक्षवः संज्ञामात्रं व्यवहारमात्रं कल्पनामात्रं संवृति-मात्रमतीतोऽध्वाऽनागतोऽध्वा सहेतुको वि नाआकाशं पुद्गला" इति। संस्कार इति-इह परभवविषयसंतानपदार्थनिरीक्षणप्रबुद्धपूर्वभवानुरूपसंस्कारस्य प्रमातुः स एवायं देवदत्तः, सैवैयं दीपकलिके, त्याद्याकारेण ज्ञानोत्पत्तिः संस्कारः। यदाह

"यस्मिन्नेव हि सन्तान आहिता कर्मवासना।
फलं तत्रैव सन्धत्ते कार्पासे रक्तता यथा"।

इति। रूपमिति-रगरगायमाणपरमाणुप्रचयः। बौद्धमते हि स्थूलरूपस्य जगति विवर्तमानपदार्थजातस्य तदर्शनोपपत्तिभिर्निराक्रियमाणत्वात् परमाणव एव तात्त्विकाः। चः पुनरर्थः। एवेति पूरणार्थः॥ ५॥

दुःखनामधेयमार्यसत्यं पञ्चभेदतया निरूप्यार्थसमुदाय-तत्त्वस्वरूपमाह—

समुदेति यतो लोके रागादीनां गणोऽखिलः ।
आत्मात्मीयस्वभावाख्यः समुदयः स संमतः॥६॥

यतो यस्माल्लोके रागादीनां रागद्वेषमोहानामखिलः समस्तो गणः समुदेत्युद्भवति । कीदृगित्याह । आत्मात्मीयस्वभावाख्यः । अयमात्मा,ऽयञ्चात्मीयः, पदे पदसमुदायोपचारादयं परोऽ,यञ्च परकीय, इत्यादिभावो रागद्वेषनिबन्धनं, तदाख्यस्तन्मूलो रागादीनां गणः । आत्मात्मीयरूपेण रागरूपः, परपरकीयपरिणामेन द्वेषरूपो, यतः समुदेति स समुदयः । समुदयो नाम तत्त्वं, सम्मतो बौद्धदर्शनेऽभिमत इति ॥ ६ ॥

अथ तृतीयचतुर्थतत्त्वे प्रपञ्चयन्नाह—

क्षणिकाः सर्वसंस्कारा इत्येवं वासना तु या ।
स मार्ग इति विज्ञेयो, निरोधो मोक्ष उच्यते॥७॥

सर्वसंस्काराः क्षणिकाः । सर्वेषां विश्वत्रयाविवरविवर्तमानानां घटपटस्तम्भाम्भोरुहादीनां द्वितीयादिक्षणेषु स एवायं स एवायमित्याद्युल्लेखेन ये संस्कारा ज्ञानसन्ताना उत्पद्यन्ते ते विचारगोचरगताः क्षणिकाः । यत्प्रमाणयन्ति. सर्वं सत् क्षणिकमक्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधादिति वादस्थलमभ्यूह्यं क्षणिकत्वाविशेषकम् । विशेषोपपत्तिश्च समग्रं तावदौत्पत्तिकं पदार्थकदम्बकं घटपटादिकं मुद्गरादिसामग्रीसाकल्ये विनश्वरमाकलय्यते । तत्र योऽस्य प्रान्तावस्थायां विनाशस्वभावः स पदार्थोत्पत्तिसमये विद्यते, न वा, । अथ विद्यते चेदापतितं

तदुत्पत्तिसमयानन्तरमेव विनश्वरत्वम् । अथेदृश एव स्वभावो यत्किंयन्तमपि कालं स्थित्वा विनष्टव्यम् । एवञ्चेन्मुद्गरादिसन्निधानेऽप्येष एव तस्य स्वभाव इति भूयोऽपि तावत्काले स्थेयम्। एवं मुद्गरादिघातशतपातेऽपि न विनाशो जातं कल्पान्तस्थायित्वं घटस्य । तथा च जगद्व्यवहारव्यवस्थालोपपातकपङ्किलतेत्यभ्युपेयमानिच्छताऽपि क्षणक्षयित्वं पदार्थानाम् ।प्रयोगस्त्वेवम् । वस्तु; उत्पत्ति समये ऽपि विनश्वररूपं, विनश्वरस्वभावत्वाद्, यद्विनश्वरं तदुत्पत्तिसमयेऽपि तत्स्वरूपं यथाऽन्यक्षणवर्त्ति-घटस्य स्वरूपं, विनश्वरस्वभावं च रूपरसादिकमुदयत एवारभ्येति स्वभावहेतुः । ननु यदि क्षणक्षयिणो भावाः कथं तर्हि स एवायमिति वासनाज्ञानम् । उच्यते। निरन्तरसदृशापरापररक्षणनिरीक्षणचैतन्योदयाद,विद्याऽनुबन्धाच्च पूर्वक्षणप्रलयकाल एव दीपकलिकायामिव सैवेयं दीपकलिकेति संस्कारमुत्पाद्य तत्तदृशमपरक्षणान्तरमुदयते । तेन समानाकारज्ञानपरम्परापरिचयचिरतरपरिणामान्निरन्तरोदयाच्च पूर्वक्षणानामत्यन्तोच्छेदेऽपि स एवायमित्यध्यवसायः प्रसभं प्रादुर्भवति । दृश्यते चावलूनपुनरुत्पन्नेषु नखकेशकलापादिषु स एवायमिति प्रतीतिः । तथेहापि किं न संभाव्यते सुजनेन । तस्मात्सिद्धं साधनमिदं "यत्सत्तत् क्षणिकमि"ति युक्तियुक्तञ्च "क्षणिकाः सर्वसंस्कारा इत्येवं वासने"ति । प्रस्तुतार्थमाह । एवं या वासना स मार्गो नामार्यसत्यम्,इह बौद्धमते, विज्ञेयोऽवगन्तव्यः । तुशब्दः पाश्चात्यार्थसंग्रहः पूर्वसमुच्चयार्थे । चतुर्थमार्यसत्यमाह । निरोधः किमित्याशङ्कायां मोक्ष उच्यते । मोक्षोऽपवर्गः । सर्वक्षणिकत्वसर्वनैरात्म्यवासनारूपो निरोधो नामार्यसत्यमभिधीयत इत्यर्थः ॥ ७ ॥

अथ तत्त्वानि व्याख्याय तत्संलग्नान्येवायतनान्याह—

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशायतनानि च ॥ ८ ॥

पञ्चसंख्यानीन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणि । शब्दाद्या विषयाः पञ्च, शब्दरूपरसस्पर्शगन्धरूपाः पञ्च विषया इन्द्रियव्यापारा इत्यर्थः । मानसं चित्तम् । धर्मायतनमिति धर्मप्रधानमायतनं चैत्यस्थानमिति । एतानि द्वादशसंख्यानि ज्ञातव्यानि न केवलमेतानि द्वादशायतनानि जातिजरामरणभवोपादानतृष्णावेदनास्पर्शनामरूपविज्ञानसंस्कारा अविद्यारूपाणि द्वादशायतनानि । चः समुच्चये । अमी सर्वेऽपि संस्काराः क्षणिकाः । शेषं तदेवेति ॥ ८ ॥

तत्त्वानि व्याख्यायाधुना प्रमाणमाह—

प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने ।
प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः ॥ ९ ॥

तथेति प्रस्तुतानुसन्धाने । सौगतदर्शने बौद्धमते । द्वे प्रमाणे विज्ञेये । चशब्दः पुनरर्थे । तदेवाह—प्रत्यक्षमनुमानं, च । अक्षमक्षं प्रति गतं प्रत्यक्षमैन्द्रियकमित्यर्थः । अनुमीयत इत्यनुमानं लैङ्गिकमित्यर्थः । यतः सम्यग्ज्ञानं निश्चितावबोधो द्विधा द्विप्रकारः । सम्यग्ग्रहणं मिथ्याज्ञाननिराकरणार्थम् । प्रत्यक्षानुमानाभ्यामेवेत्यर्थः ॥ ९ ॥

पृथक्पृथग्दर्शनापेक्षलक्षणसांकर्यभीरु कीदृक् प्रत्यक्षमत्रग्राह्यमित्याशङ्कायामाह—

प्रत्यक्षं कल्पनाऽपोढमभ्रान्तं तत्र बुध्यताम् ।

---

१ षडायतनेति पञ्चमधिकं क्वचित्पुस्तके ।

त्रिरूपाल्लिङ्गतो लिङ्गिज्ञानं त्वनुमानसंज्ञितम्॥१०

तत्र प्रमाणोभय्यां प्रत्यक्षं बुध्यतां ज्ञायतां शिष्येणेति। किं-भूतं कल्पनाऽपोढं, शब्दसंसर्गवती प्रतीतिः कल्पना, तयाऽपोढं रहितं निर्विकल्पकमित्यर्थः। अन्यच्चाभ्रान्तं भ्रान्तिरहितं रग-रगायमाणपरमाणुलक्षणं स्वलक्षणं हि प्रत्यक्षं निर्विकल्पकमभ्रान्तं च तद् घटपटादिबाह्यस्थूलपदार्थप्रतिबद्धं च ज्ञानं सविकल्पकम्। तच्च बाह्यस्थूलार्थानां तत्तन्मतानुमानोपपत्तिभिर्निराकरिष्यमा-णत्वात्। नीलाकारपरमाणुस्वरूपस्यैव तात्त्विकत्वात्। ननु यदि बाह्यार्था न सन्ति, किंविषयस्तर्ह्ययं घटपटशकटादिबाह्यस्थूल-प्रतिभास इति चेत्। निरालम्बन एवायमनादिवितथवासनाप्रवर्ति-तो व्यवहाराभासो निर्विषयत्वादाकाशकेशवत्स्वप्नज्ञानवद्वेति। यदुक्तम्।—

"नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशत"इति॥
"बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते।
वासनालुठितं चित्तमर्थाभासे प्रवर्तत" इति॥
तदुक्तं निर्विकल्पकमभ्रान्तं च प्रत्यक्षमिति।

अनुमानलक्षणमाह—तु पुनः त्रिरूपात्पक्षधर्मत्वसपक्षसत्व-विपक्षव्यावृत्तिरूपाल्लिङ्गतो धूमादेरुपलक्षणाद्यल्लिङ्गिनो वैश्वा-नरादेर्ज्ञानं तदनुमानसंज्ञितमनुमानप्रमाणमित्यर्थः। सूत्रे लक्षणं नान्वेषणीयमिति चरमपदस्य नवाक्षरत्वेऽपि न दोष इति॥१०॥

रूपत्रयमेवाह—

रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता।
विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव्यन्ताम्॥११

हेतोरनुमानस्य त्रीणि रूपाणि विभाव्यन्तामिति संबन्धः । तत्र पक्षधर्मत्वमिति । साध्यधर्मविशिष्टो धर्मी पक्षः । यथा पर्वतोऽयं वह्निमान् धूमवत्त्वादत्र पर्वतः पक्षः, तत्र धर्मत्वम् । धूमवत्त्वं वन्हिमत्त्वेन व्याप्तं धूमोऽग्निं न व्यभिचरतीत्यर्थः । सपक्षे सत्त्वं यो यो धूमवान् स स वह्निमान् यथा महानसप्रदेशः । अत्र धूमवत्त्वेन हेतुना सपक्षे महानसे सत्त्वं वह्निमत्त्वमस्तीत्यर्थः । विपक्षे नास्तितेति यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा जलाशये, जलाशये हि वह्निमत्त्वं व्यावर्तमानं व्याप्यं धूमवत्त्वमादाय व्यावर्तते । एवं प्रकारेण हेतोस्त्रीणि रूपाणि ज्ञायन्तामित्यर्थः ॥ ११ ॥

उपसंहरन्नाह—

बौद्धराद्धान्तवाच्यस्य संक्षेपोऽयं निवेदितः, ।
नैयायिकमतस्येतः कथ्यमानो निशम्यताम् ॥१२

अयं संक्षेपो निवेदितः कथितः निष्ठां नीतः । कस्य बौद्धराद्धान्तवाच्यस्य बौद्धानां राद्धान्तः सिद्धान्तस्तत्र वाच्योऽभिधातव्योऽर्थस्तस्य । इतोऽनन्तरं नैयायिकमतस्य शिवशासनस्य "कथ्यमानो निशम्यतां" संक्षेपः कथ्यमानः श्रूयतामित्यर्थः ॥ १२ ॥

तदेवाह—

आक्षपादमते देवः सृष्टिसंहारकृच्छिवः ।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः ॥१३॥

आक्षपादा नैयायिकास्तेषां मते शासने देवो दर्शनाधिष्ठायकः शिवो महेश्वरः स कथंभूतः सृष्टिसंहारकृत् सृष्टिः प्राणिनामुत्पत्तिः, संहारस्तद्विनाशः, सृष्टिश्च संहारश्चेति द्वन्द्वः तौ

करोतीति क्विपि तोऽन्तः। तथा हि। अस्य प्रत्यक्षोपलक्ष्यमाणचराचरस्वरूपस्य जगतः कश्चिदनिर्वचनीयमाहात्म्यः पुरुषः सृष्टा ज्ञेयः। केवलसृष्टौ च निरन्तरोत्पद्यमानापारप्राणिगणस्य भुवनत्रयेऽप्यमातृत्वमिति संहारकर्ताऽपि कश्चिदभ्युपगन्तव्यः। यत्प्रमाणं, सर्वं धरणिधरणीधरतरुपुरप्राकारादिकं, बुद्धिमत्पूर्वकं कार्यत्वात्। यद्यत् कार्यं तत्तद्बुद्धिमत्पूर्वकं, यथा घटः। कार्यं चेदं, तस्माद् बुद्धिमत्पूर्वकमिति प्रयोगः। स भगवानीश्वर एवेत्यर्थः। व्यतिरेके गगनम्। न चायमसिद्धो हेतुः। भूभूधरादीनां स्वकारणकलापजन्यत्वेना,वयवितया, वा कार्यत्वस्य जगत्प्रसिद्धत्वात्। नापि विरुद्धानैकान्तिकदोषौ। विपक्षादस्यन्तव्यावृत्तत्वात्। नापि कालात्ययापदिष्टः। प्रत्यक्षानुमानोपमानागमाबाध्यमानधर्मधर्मित्वात्। नापि प्रकरणसमः। तत्परिपन्थिपदार्थस्वरूपसमर्थनप्रथितप्रत्यनुमानोदयाभावात्। अथ निर्वृतात्मवदशरीरत्वादेव न संभवति सृष्टिसंहारकर्तेश्वर इति प्रत्यनुमानोदयात्कथं प्रकरणसमदूषणाभाव इति चेत्। उच्यते। अत्र साध्यमान ईश्वररूपो धर्मी प्रतीतो, ऽप्रतीतो, वाऽनुमन्यते सुहृदा। अप्रतीतश्चेद्भवत्परिकल्पितहेतोरेवाश्रयासिद्धिदोषप्रसङ्गः। प्रतीतश्चेत्तर्हि येनैव प्रमाणेन प्रतीतस्तेनैव स्वयमुद्भावितस्वतनुरपि किमर्थं नाभ्युपगम्यत इति कथमशरीरत्वमतो न दुष्टो हेतुरिति साधूक्तं सृष्टिसंहारकृच्छिवः। तथा विभुः सर्वव्यापकः। एकनियतस्थानवृत्तित्वे ह्यनियतप्रदेशनिष्ठितानां पदार्थानां प्रतिनियतयथावन्निर्माणानुपपत्तेः। न ह्येकस्थानस्थितः कुम्भकारोऽपि दूरदूरतरघटघटनायां व्याप्रियते। तस्माद्विभुर्भगवान्। तथा नित्यैकः। नित्यश्चासावेकश्चेति, यतो नित्योऽत एव एकोऽप्रच्युतानुत्पन्नस्थिरैकरूपं नित्यम्। भगवतो ह्यनित्यत्वे

पराधीनोत्पत्तिसव्यपेक्षतया कृतकत्वप्राप्तिः । स्वोत्पत्तावपेक्षित-परव्यापारो हि भावः कृतक इष्यत इति । अथ चेत्कश्चिज्जगत्क-र्तारमपरमभिदधाति स एवानुयुज्यते । सोऽपि नित्यो, ऽनित्यो, वा नित्यश्चेदधिकृतेश्वरेण किमपराद्धम् । अनित्यश्चेत्तस्याप्यन्येनो-त्पादकान्तरेण भाव्यमनित्यत्वादेव तस्याप्यन्येनेति नित्यानित्य-वादविकल्पशिल्पशतस्वीकारे कल्पान्तेऽपि न जल्पसमाप्तिः । तस्मान्नित्य एव भगवान् । अन्यच्चैकोऽद्वितीयो बहूनां हि जग-त्कर्तृत्वस्वीकारे परस्परं पृथक् पृथगन्योन्यमसदृशमतिव्यापा-रतयैकैकपदार्थस्य विसदृशनिर्माणे सर्वमसमञ्जसमापद्येतेति भगवानेक एवेति, युक्तियुक्तं नित्यैकेति विशेषणम् । तथा सर्वज्ञ इति सर्वपदार्थानां सर्वविशेषज्ञाता । सर्वज्ञत्वाभावे हि विधित्सितपदा-र्थोपयोगयोग्यजगत्प्रसृमरविप्रकीर्णपरमाणुकणप्रचयसम्यक्सा-मग्रीमीलनाक्षमतया याथातथ्येन पदार्थनिर्माणरचना दुर्घटा । सर्वज्ञश्च सन् सकलप्राणिनां संमीलितसमुचितकारणकलापानु-रूपपारिमाण्डल्यानुसारेण कार्यवस्तु निर्मिमाणः स्वार्जितपुण्य-पापानुमानेन च स्वर्गनरकयोः सुखदुःखोपभोगं ददानः केषां नाभिमतः । तथा चोक्तम् ।—

"ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ।
अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः" ॥

इति । भूयोऽपि विशेषयन्नाह "नित्यबुद्धिसमाश्रय" इति शाश्वत-बुद्धिस्थानं । क्षणिकबुद्धिमतो हि पराधीनकार्योपेक्षितया मुख्य-कर्तृत्वाभावादनीश्वरत्वप्रसक्तिरिति । ईदृग्गुणविशिष्टः शिवो-नैयायिकमतेऽभ्युपगन्तव्यः ॥ १३ ॥

अथ तत्त्वानि प्ररूपयन्नाह—

तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा ।

प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥१४॥
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च॥ १५
जातयो निग्रहस्थानान्येषामेवं प्ररूपणा, ।
अर्थोपलब्धिहेतुः स्यात्प्रमाणं तच्चतुर्विधम् ॥ १६

(त्रिभिर्विशेषकम्)

अमुत्रास्मिन् प्रस्तुते नैयायिकमते षोडश तत्त्वानि प्रमाणादीनि प्रमाणप्रभृतीनि । तद्यथेति । बालावबोधाय नामान्यप्याह । प्रमाण-प्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवि-तण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयससि-द्धिरिति षोडश । एषामेवं प्ररूपणेति । तत्त्वानाममु-ना प्रकारेण प्ररूपणा नाममात्रप्रकटनमित्यर्थः । अथैकै-कस्वरूपमाह । तत्रादौ प्रमाणस्वरूपं प्रकटयन्नाह । अर्थोपल-ब्धिहेतुः प्रमाणं स्यात् । अर्थस्य पदार्थस्योपलब्धिर्ज्ञानं तस्य हेतुः कारणं प्रमाणं स्यादिति । परापरदर्शनापेक्षया प्रमाणा-नामनियतत्वात्संदिहानस्य संख्यामुपदिशन्नाह । तच्चतुर्विधमिति । तत्प्रमाणं चतुर्विधं ज्ञेयमिति ॥ १४ ॥ १५ ॥ १६ ॥

प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा, ।
तत्रेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिकम् ॥१७॥
व्यवसायात्मकं ज्ञानं व्यपदेशविवर्जितम् ।
प्रत्यक्ष,मितरन्मानन्तत्पूर्वं त्रिविधं भवेत् ॥१८॥

तत्र प्रमाणचातुर्विध्ये प्रत्यक्षं कीदृगिति सम्बन्धः । विशेषणान्याह । इन्द्रियार्थसन्निकर्षोत्पन्नमिति । इन्द्रियं चार्थश्चेति द्वन्द्वः । तयोः सन्निकर्षात्संयोगादुत्पन्नं जातम् । इन्द्रियं हि नैकट्यात्पदार्थं संयुज्यते । इन्द्रियार्थसंयोगाज् ज्ञानमुत्पद्यते । यदुक्तम् ।—

"आत्मा सहैति मनसा, मन इन्द्रियेण,
स्वार्थेन चेन्द्रिय,मिति क्रम एष शीघ्रम् ।
योगोऽयमेव मनसः किमगम्यमास्ति
यस्मिन्मनो व्रजति तत्र गतोऽयमात्मा ॥

तत्राव्यभिचारिकं,ज्ञानान्तरेण नान्यथाभावि । शुक्तिशकले कलधौतबोधो हीन्द्रियार्थसन्निकर्षोत्पन्नोऽपि व्यभिचारी दृष्टोऽतोऽव्यभिचारिकं ग्राह्यम् । तथा व्यवसायात्मकं व्यवहारसाधकम् । सजलधरणितले हि बहलशाद्वलवृक्षावल्यामिन्द्रियार्थसान्निध्योद्गतमपि जलज्ञानं तत्प्रदेशसंगमेऽपि स्नानपानादिव्यवहारासाधकत्वादप्रमाणम् । अतः सफलं व्यवसायात्मकमिति विशेषणम् । तथा व्यपदेशविवर्जितमिति । व्यपदेशो विपर्ययस्तेन रहितं, तथा ह्याजन्मकाचकामलादिदोषदूषितचक्षुषः पुरुषस्य धवलशङ्खे पीतज्ञानमुदेति तद्यद्यपि सकलकालं तन्नेत्रदोषाविरामादिन्द्रियार्थसंनिकर्षोत्पन्नमास्ति तथाऽप्यन्यवस्तुनोऽन्यथाबोधान्न तद्यथोक्तलक्षणं प्रत्यक्षमिति प्रत्यक्षसाधकं विशेषणचतुष्टयमुक्तम् । साम्प्रतमनुमानमाह । इतरदन्यन्मानमनुमानमुपादिशति तदनुमानं पूर्वं प्रथमं त्रिविधं त्रिप्रकारकं भवेज्ज्ञायेत । पूर्वमितिपदेनानुमानान्तरभेदानन्त्यमाह । तत्पूर्वं प्रत्यक्षपूर्वं चेति श्लोकद्वयार्थः ॥१७॥१८॥

अनुमानत्रैविध्यमाह—

पूर्ववच्छेषवच्चैव दृष्टं सामान्यतस्तथा ।

तत्राद्यं कारणात्कार्यमनुमानमिह गीयते ॥१९॥

पूर्ववत्, शेषवत्, सामान्यतोदृष्टं, चेत्यनुमानत्रयम्। चः समुच्चये। एवेति पूरणार्थे। तथेति उपदर्शने। तत्र त्रिषु मध्ये, आद्यमनुमानमिह शास्त्रे कारणात्कार्यमनुमानमुदितं कारणान्मेघात्कार्यं वृष्टिलक्षणं यतो ज्ञायते तत्कारणकार्यनामानुमानं कथितमित्यर्थः ॥ १९ ॥

निदर्शनेन तमेवार्थं द्रढयन्नाह—

रोलम्बगवलव्यालतमालमलिनत्विषः ।
वृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः॥२०॥

यथेति दृष्टान्तकथनारम्भे। रोलम्बाः भ्रमराः। गवलं माहिषं शृङ्गम्। व्याला गजाः, सर्पा, वा। तमाला वृक्षविशेषाः। सर्वेऽप्यमी कृष्णाः पदार्थाः स्वभावतो ज्ञेयाः। द्वन्द्वसमासो बहुव्रीहिश्च। एवंप्राया, एवंविधाः पयोमुचो मेघा वृष्टिं न व्यभिचरन्तीति। एवंप्राया इत्युपलक्षणेन परेऽपि वृष्टिहेतवोऽभ्युन्नसादिविशेषा ज्ञेयाः। यदुक्तम्।—

"गम्भीरगर्जितारम्भनिर्भिन्नागिरिगह्वराः।
तुङ्गत्तडिल्लतासङ्गपिशङ्गोत्तुङ्गविग्रहाः"

इत्यादयोऽपि वृष्टिं न व्यभिचरन्ति ॥ २० ॥

शेषवन्नामधेयं द्वितीयमनुमानभेदमाह—

कार्यात्कारणानुमानं यच्च तच्छेषवन्मतम् ।
तथाविधनदीपूरान्मेघो वृष्टो यथोपरि ॥ २१ ॥

यत्कार्यात्फलात्कारणानुमानं फलोत्पत्तिहेतुपदार्थावगमनं तच्छेषवदनुमानं मतं कथितं नैयायिकशासने। यथा तथाविध-

नदीपूरादुपरि मेघो दृष्टस्तथाविधप्रवहत्सलिलसम्भारभरितो यो नदीपूरः सरित्प्रवाहस्तस्मादुपरि शिखरिशिखरोपरि जलधराभिवर्षणज्ञानं तच्छेषवत् । अत्र कार्यं नदीपूरः कारणं च पर्वतोपरि मेघो दृष्ट इति । उक्तं च नैयायिकैः ।—

"आवर्तवर्तनाशालिविशालकलुषोदकः ।
कल्लोलविकटास्फालस्फुटफेनच्छटाङ्कितः ॥
वहद्बहुलशैवालफलशाद्वलसंकुलः ।
नदीपूरविशेषोऽपि शक्यते न निवेदितुम्" ॥ इति ॥२१॥

तृतीयानुमानमाह—

यच्च सामान्यतो दृष्टं तदेवं गतिपूर्विका ।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा ॥२२॥

चः पुनरर्थे । यत् सामान्यतो दृष्टमनुमानं तदेवममुना प्रकारेण । यथा पुंसि पुरुषे देवदत्तादौ देशान्तरप्राप्तिर्गतिपूर्विका । एकस्माद्देशाद्देशान्तरगमनं गमनपूर्वकमित्यर्थः । यथोज्जयिन्याः प्रस्थितो देवदत्तो माहिष्मतीं पुरीं प्राप्तः । सूर्येऽपि सा तथेति, यथा पुंसि तथा सूर्येऽपि सा गतिरभ्युपगम्यते । यद्यपि गगने संचरतः सूर्यस्य नेत्रावलोकप्रसरणाभावेन गतिर्नोपलभ्यते, तथाऽप्युदयाचलात्सायमस्ताचलचूलिकाऽवलम्बनं गतिं सूचयति । एवं सामान्यतोदृष्टमनुमानं ज्ञेयमित्यर्थः ॥२२॥

अथ क्रमायातमपि शाब्दप्रमाणं स्वल्पव्यक्तत्वादुपेक्ष्यादावुपमानलक्षणमाह—

प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम् ।
उपमानं समाख्यातं यथा गौर्गवयस्तथा ॥२३॥

तदुच्यमानमुपमानमाख्यातं कथितं । यत्तदोर्नित्यसम्बन्धात् । यत्किम् अप्रसिद्धस्य साधनम् अज्ञायमानस्यार्थस्य ज्ञापनं क्रियते । प्रसिद्धधर्मसाधर्म्यादिति,आबालगोपालाङ्गना विदितो योऽसौ धर्मोऽसाधारणलक्षणं तस्य साधर्म्यं समानधर्मत्वं तस्मादित्युपमानमाख्यातम् । दृष्टान्तमाह-यथागौर्गवयस्तथेति । यथा कश्चिदरण्यवासी नागरिकेण कीदृग्गवय इति पृष्टः स च परिचितगोगवयलक्षणो नागरिकं प्राह यथा गौस्तथा गवयः,खुरककुदलाङ्गूलास्नाऽऽदिमान् यादृशोगौस्तथा जन्मसिद्धो गवयोऽपि ज्ञेय इत्यर्थः । अत्र प्रसिद्धो गौस्तत्साधर्म्यादप्रसिद्धस्य गवयस्य साधनमिति ॥२३॥

उपमानं व्यावर्ण्य शब्दप्रमाणमाह—

शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधम् । ।
प्रमेयं चात्मदेहार्थबुद्धीन्द्रियसुखादि च ॥२४॥

तु पुनराप्तोपदेशः शाब्दम् । अवितथवादी हिताप्तः प्रत्ययितजनस्तस्य य उपदेश आदेशवाक्यं तच्छाब्दम् आगमप्रमाणं ज्ञेयमिति । एवमुक्तभङ्ग्या मानं प्रमाणं चतुर्विधं चतुष्प्रकारं निष्ठितमित्यर्थः । अथ प्रमेयलक्षणमाह—"प्रमेयं त्वात्मदेहार्थबुद्धीन्द्रियसुखादि चेति" प्रमाणग्राह्योऽर्थः प्रमेयं, तु पुनरर्थे । आत्मा च देहश्चेति द्वन्द्वः । आदिशब्देन शेषाणामपि षण्णां प्रमेयार्थानां संग्रहः । तच्च नैयायिकसूत्र आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदेन द्वादशविधं, तत्र सचेतनत्वकर्तृत्वसर्वगतत्वादिधर्मैरात्मा प्रमीयते । एवं देहादयोऽपि प्रमेयतया ज्ञेयाः । अत्र तु ग्रन्थविस्तारभयान्न प्रपञ्चित इतरग्रन्थेभ्योऽपि सुज्ञेयत्वाच्चेति ॥ २४ ॥

संशयादिस्वरूपमाह—

किमेतदिति सन्दिग्धः प्रत्ययः संशयो मतः ।
प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनम् ॥२५॥

दूरावलोकनेन पदार्थपरिच्छेदकधर्मेषु संशयानः प्राह-किमेतदिति । एतत्किं स्थाणुर्वा पुरुषो वेति, यः संदिग्धः प्रत्ययः स संशयो नाम तत्त्वविशेषो मतः संमतः तच्छासन इति। प्रयोजनमाह-तत्तु तत्पुनः प्रयोजनं नाम तत्त्वं यत्किमित्याह—अर्थित्वात्प्राणी साध्यं कार्यं प्रति प्रवर्तते । प्रतीत्यध्याहार्यम् । न हि निष्फलकार्यारम्भ इत्यर्थित्वादुक्तम् । एवं यत्प्रवर्तनं तत्प्रयोजनमित्यर्थः ॥२५॥

दृष्टान्तस्तु भवेदेष विवादविषयो न यः, ।
सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः ॥२६॥

तु पुनरेष दृष्टान्तो नाम तत्त्वं भवेत् । यत्किमिति । विवादविषयो न, यस्मिन्नुपन्यस्ते वचने वादगोचरो न भवति । इदमित्थं भवति न वेति विवादो न भवतीत्यर्थः । तावच्चान्वयव्यतिरेकयुक्तोऽर्थः स्खलति यावन्न स्पष्टं दृष्टान्तोपष्टम्भः । उक्तं च ।

तावदेव चलत्यर्थो मन्तुर्गोचरमागतः ।
यावन्नोत्तम्भनेनैव दृष्टान्तेनावलम्ब्यते ॥

एष दृष्टान्तो ज्ञेयः । सिद्धान्तः पुनश्चतुर्भेदो भवेत् । कथमित्याह—सर्वतन्त्रादिभेदत इति । सर्वतन्त्रासिद्धान्त इति प्रथमो भेदः । आदिशब्दाद्भेदत्रयमिदं ज्ञेयम् । यथा प्रतितन्त्रसिद्धान्तोऽधिकरणसिद्धान्तोऽभ्युपगमसिद्धान्तश्चेति । अमी चत्वारः सिद्धान्तभेदाः । नाममात्रकथनमिदं, विस्तरग्रन्थेभ्यस्तु विशेषो ज्ञेयः ॥ २६ ॥

अवयवादितत्त्वत्रयस्वरूपमाह—

प्रतिज्ञाहेतुदृष्टान्तोपनया निगमस्तथा ।
अवयवाः पञ्च तर्कः संशयोपरमो भवेत्॥२७॥
यथा काकादिसंपातात् स्थाणुना भाव्यमत्र हि, ।
ऊर्ध्वं सन्देहतर्काभ्यां प्रत्ययो निर्णयो मतः ॥२८॥

अवयवाः पञ्चेति सम्बन्धः । पूर्वार्द्धमाह—प्रतिज्ञाहेतु-दृष्टान्तोपनया निगमनं चेति पञ्चावयवाः । तत्र प्रतिज्ञा, पक्षः कृशानुमानयं सानुमानित्यादि । हेतुर्लिङ्गवचनम्, धूमवत्त्वादि-त्यादि । दृष्टान्त उदाहरणवचनं, यो यो धूमवान् स स वह्निमान् यथा महानसप्रदेश इत्यादि । उपनयो हेतोरुपसंहारकं वचनं धूमवांश्चायमित्यादि । निगमनं हेतूपदेशेन पुनः साध्यधर्मोपसंह-रणं, तस्माद्वह्निमानित्यादि । इति पञ्चावयवस्वरूपनिरूपणम् अवयवतत्त्वं ज्ञेयमिति । तर्कः संशयोपरमो भवेत् । यथा काकेत्यादि । दूराद् दृग्गोचरे स्पष्टप्रतिभासाभावात् किमयं स्था-णुर्वा पुरुषो वेति संशयस्तस्योपरमेऽभावे सति तर्को-भवेत् तर्को नाम तत्त्वं स्यात् । कथमित्याह—यथेति । दूरा-दूर्ध्वस्थं पदार्थं विलोक्य स्थाणुपुरुषयोः संदिहानोऽवहिती-भूय विमृशति । काकादिसंपातादादिशब्दाद्वल्युत्सर्पणादयः स्थाणुधर्मा ग्राह्याः । वायसप्रभृतिसंबन्धादत्र स्थाणुना भाव्यं, कीलकेन भवितव्यम् । पुरुषे हि शिरःकम्पनहस्तचालनादिभिः काकपातानुपपत्तेः । एवं संशयाभावे तर्कतत्त्वं ज्ञेयमिति । ऊर्ध्व-मित्यादि पूर्वोक्तलक्षणाभ्यां संदेहतर्काभ्यामूर्ध्वमुत्तरं यः प्रत्ययः स्थाणुरेवायं पुरुष एवायमिति प्रतीतिविषयः, स निर्णयः निर्णय-नामा तत्त्वविशेषो ज्ञेयः । यत्तदावर्थसम्बन्धादनुक्तावपि ज्ञेयौ॥२८

वादतत्त्वमाह—

आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् ।
यः कथाऽभ्यासहेतुः स्यादसौ वाद उदाहृतः॥२६॥

असौ वाद उदाहृतः कथितस्तज्ज्ञैरित्यर्थः । यः क इत्याह—कथाऽभ्यासहेतुः । कथा प्रामाणिकी तस्या अभ्यासः कारणम्। कयोराचार्यशिष्ययोः। आचार्य्यो गुरुरध्यापकः, शिष्यश्चाध्येता विज्ञेय इति । कस्मात् पक्षप्रतिपक्षपरिग्रहात् । पक्षः पूर्वपक्षः प्रतिज्ञाऽऽदिपरिग्रहः, प्रतिपक्ष उत्तरपक्षः पूर्वपक्षवादिप्रयुक्त-प्रतिज्ञाऽऽदिप्रतिपक्षकोपन्यासप्रौढिः तयोः परिग्रहात्संग्रहादित्यर्थः । आचार्यः पूर्वपक्षमङ्गीकृत्याचष्टे । शिष्यश्चोत्तरपक्षमुररीकृत्य पूर्वपक्षं खण्डयति। एवं निग्राहकजयपराजयच्छलजात्यादिनिरपेक्षतयाऽभ्यासनिमित्तम् । पक्षप्रतिपक्षपरिग्रहेण यत्र गुरुशिष्यौ गोष्ठीं कुरुतः स वादो ज्ञेयः ॥ २९ ॥

अथ तद्विशेषमाह—

विजिगीषुकथा या तु च्छलजात्यादिदूषणम् ।
स जल्पः,सा वितण्डा तु या प्रतिपक्षवर्जिता॥३०॥

स जल्प इति सम्बन्धः । यद् विजिगीषुकथायां विजयाभिलाषिवादिप्रतिवादिप्रारब्धप्रमाणोपन्यासगोष्ठ्यां सत्यां छलजात्यादिदूषणम् । छलं त्रिप्रकारम् । वाक्छलं, सामान्यच्छलम्, उपचारच्छलं चेति । जातयश्चतुर्विंशतिभेदाः। आदिशब्दान्निग्रहस्थानादिपरिग्रहः । एतैः कृत्वा दूषणं परोपन्यस्तपक्षादेर्दूषणजालमुत्पाद्य निराकरणम्। अभिमतं च स्वपक्षस्थापनेन सन्मार्गप्रतिपत्तिनिमित्ततया छलजात्याद्युपन्यासैः परप्रयोगस्य दूषणोत्पादनम्। तथा चोक्तम्—

"दुःशिक्षितकुतर्कीशलेशवाचालिताननाः ।
शक्याः किमन्यथा जेतुं वितण्डा दोषमाण्डिताः ॥
गतानुगतिको लोकः कुमार्गं तत्प्रतारितः ।
मा गादिति च्छलादीनि प्राह कारुणिको मुनिः" ॥

इति। संकटे प्रस्तावे च सति च्छलादिभिरपि स्वपक्षस्थापनमनुमतम् । परविजये हि धर्मध्वंसादिदोषसंभवस्तस्माद्वरं छलादिभिरपि जयः। प्रतिपक्षस्तेन विवर्जिता रहितेति प्रतिपक्षसाधनविहीनो वितण्डावादः । वैतण्डिको हि स्वाभ्युपगतपक्षमस्थापयन् यत्किंचिद्वादेन परोक्तं दूषयतीत्यर्थः ॥ ३० ॥

हेत्वाभासा असिद्धाद्या,श्छलं कूपो नवोदकः ।
जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः॥३१॥

हेत्वाभासा ज्ञेया इति । के त इत्याह—असिद्धाद्या, असिद्धविरुद्धानैकान्तिककालात्ययापादिष्टप्रकरणसमाः पञ्च हेत्वाभासा ज्ञेयाः । तत्र पक्षे धर्मत्वं यस्य नास्ति सोऽसिद्धः । विपक्षे सन् सपक्षे चासन् विरुद्धः । पक्षत्रयवृत्तिरनैकान्तिकः । प्रत्यक्षानुमानागमविरुद्धपक्षवृत्तिः कालात्ययापदिष्टः । विशेषाग्रहणे हेतुत्वेन प्रयुज्यमानः प्रकरणसमः । उदाहरणानि स्वयमभ्यूह्यानि । छलं, कूपो नवोदक इति, परोपन्यस्तवादे स्वाभिमतार्थान्तरकल्पनया वचनविघातश्छलम् । कथमित्याह—वादिना कूपो नवोदक इति कथायां प्रत्यग्रार्थवाचकतया नवशब्दप्रयोगे छलवादी नवसंख्यामारोप्य दूषयति । कुत एक एव कूपो नवसंख्योदक इति वाक्छलम् । प्रस्तावागतत्वेन शेषच्छलद्वयमप्याह-संभावनयाऽतिप्रसङ्गिनोऽपि सामान्यस्य हेतुत्वारोपणेन तन्निषेधः सामान्यच्छलम् । यथा अहो

नु खल्वसौ ब्राह्मणो विद्याचरणसंपन्न इति ब्राह्मणस्तुतिप्रसङ्गे कश्चिद्ब्रूयात् संभवति ब्राह्मणे विद्याचरणसंपदिति । तच्छलवादी ब्राह्मणत्वस्य हेतुत्वमारोप्य निराकुर्वन्नभियुङ्क्ते । यदि ब्राह्मणे विद्याचरणसंपद्भवति व्रात्येऽपि सा भवेद्व्रात्योऽपि ब्राह्मण एवेति । औपचारिके प्रयोगे मुख्यप्रतिषेधेन प्रत्यवस्थानम्, उपचारच्छलं, यथा मञ्चाः क्रोशन्तीत्युक्ते परः प्रत्यवतिष्ठते कथमचेतना मञ्चाः क्रोशन्तीति छलत्रयस्वरूपं ज्ञेयमिति । जातय इत्यादि । दूषणाभासा जातयः । अदूषणान्यपि दूषणवदाभासन्त इति दूषणाभासाः । यैः, पक्षादिर्न दूष्यते, आभासमात्रत्वान्न पक्षदोषः समुद्भावयितुं शक्यते केवलं सम्यग्हेतौ । हेत्वाभासे चोत्कर्षापकर्षसमे जाती भवतः । तत्रैव प्रयोगे दृष्टान्तधर्मं कं चित्साध्यधर्मिण्यापादयन्नुत्कर्षसमां जातिं प्रयुङ्क्ते । यदि घटवत्कृतकत्वादनित्यः शब्दो घटवदेव मूर्तोऽपि भवेद्, न चेन्मूर्तो घटवदनित्योऽपि मा भूदिति शब्दे धर्मान्तरोत्कर्षमापादयति । अपकर्षस्तु घटः कृतकः सन्नश्रावणो दृष्ट, एवं शब्दोऽपि भवेद्, नो चेद् घटवदनित्योऽपि माभूदिति शब्दे श्रावणधर्ममपकर्षति । वर्ण्यावर्ण्याभ्यां प्रत्यवस्थानं वर्ण्यावर्ण्यसमे जाती भवतः । व्यापनीयो वर्ण्यस्तद्विपरीतोऽवर्ण्यस्तावेतौ वर्ण्यावर्ण्यौ साध्यदृष्टान्तधर्मौ विपर्यस्यन् वर्ण्यावर्ण्यसमे जाती प्रयुङ्क्ते । यथाविधः शब्दधर्मः कृतकत्वादिना न तादृग् घटधर्मो न तादृक् शब्दधर्म इति साध्यधर्मदृष्टान्तधर्मौ हि तुल्यौ कर्तव्यौ । अत्र तु विपर्यासः, यतो यादृग्घटधर्मः कृतकत्वादि न तादृक् शब्दधर्मः । घटस्य ह्यन्यादृशं कुम्भकारादिजन्यं कृतकत्वम् । शब्दस्य हि ताल्वोष्ठादिव्यापारजमिति । धर्मान्तरे विकल्पेन प्रत्यवस्थानं विकल्पसमा जातिः । यथा कृतकं किंचिन्मृदु दृष्टं राङ्कवशय्याऽऽ-

दि, किञ्चित्कठोरं कुठारादि । एवं कृतकं किञ्चिदनित्यं भविष्यति घटादिकम् । किञ्चिन्नित्यं शब्दादीति । साध्यसाम्यापादनेन प्रसवस्थानं साध्यसमा जातिः । यथा घटः तथा शब्दः प्राप्तः, तर्हि यथा शब्दस्तथा घट इति । शब्दश्च साध्य इति घटोऽपि साध्यो भवेत्, ततश्च न साध्यं साध्यस्य दृष्टान्तो, विरुद्धलक्षणत्वान्न दृष्टान्तः स्यात् । न चेदेवं तथाऽपि वैलक्षण्यात्सुतरामदृष्टान्त इति । प्राप्यप्राप्तिविकल्पाभ्यां प्रसवस्थानं, प्राप्यप्राप्तिसमे जाती । यथा यदेतत्कृतकत्वं त्वया साधनमुपन्यस्तं तत्किं प्राप्यं साधयत्साप्राप्यं वा । प्राप्यं चेद् द्वयोर्विद्यमानयोरेव प्राप्तिर्भवति न तत्सदसतोरिति द्वयोश्च सत्त्वात्किं कस्य साध्यं साधनं वा । अप्राप्यन्तु साधनमयुक्तमतिप्रसङ्गादिति । अतिप्रसङ्गापादनेन प्रसवस्थानं प्रसङ्गसमा जातिः । यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते जातिवाद्याह—यद्यनित्यत्वे कृतकत्वं साधनं, कृतकत्वमिदानीं किं साधनं तत्साधने किं साधनमिति । प्रतिदृष्टान्तेन प्रसवस्थानं प्रतिदृष्टान्तसमा जातिः । यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते जातिवाद्याह—यथा घटः प्रयत्नानन्तरीयकोऽनित्योदृष्ट एवं प्रतिदृष्टान्त आकाशं नित्यमपि प्रयत्नानन्तरीयकं दृष्टं कूपखननप्रयत्नानन्तरमुपलम्भादिति । न चेदमनैकान्तिकत्वोद्भावनं, भङ्ग्यन्तरेण प्रसवस्थानात् । अनुत्पत्त्या प्रसवस्थानम् अनुत्पत्तिसमा जातिः । यथाऽनुत्पन्ने शब्दाख्ये धर्मिणि कृतकत्वं धर्मः क्व वर्तते, तदेवं हेत्वभावादसिद्धिरनित्यस्येति। साधर्म्यसमा वैधर्म्यसमा वा या जातिर्यथा पूर्वमुदाहृता, सैव संशयेनोपसंहियमाणा संशयसमा जातिर्भवति । यथा किं घटसाधर्म्यात्कृतकत्वादनित्यः शब्दः, किं वा तद्वैधर्म्येणाकाश-

साम्यान्निरवयवत्वान्नित्य इति । द्वितीयपक्षोत्थापनबुद्ध्या प्रयुज्यमाना सैव साधर्म्यसमा वैधर्म्यसमा वा जातिः प्रकरणसमा भवति । तत्रैवानित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे, नित्यः शब्दः श्रावणत्वात् शब्दत्ववदिति, उद्भावनप्रकारभेदमात्रे सति नानात्वं द्रष्टव्यम् । त्रैकाल्यानुपपत्त्या हेतोः प्रत्यवस्थापनमहेतुसमा जातिः । यथा हेतुः साधनं, तत्साध्यात्पूर्वं पश्चाद्वा सह वा भवेत् । यदि पूर्वमसति साध्ये तत्कस्य साधनम्, अथ पश्चात्साधनं पूर्वं तर्हि साध्यं तस्मिंश्च पूर्वसिद्धे किं साधनेन, अथ युगपत्साध्यसाधने तर्हि तयोः सव्येतरगोविषाणयोरिव साध्यसाधनभाव एव न भवेदिति । अर्थापत्त्या प्रत्यवस्थानम् अर्थापत्तिसमा जातिः । यद्यनित्यसाधर्म्यात्कृतकत्वादनित्यः शब्दोऽर्थादापद्यते, नित्यसाधर्म्यान्नित्य इति । अस्ति चास्य निरवयवेनाकाशेन साधर्म्यं निरवयवत्वमित्युद्भावनप्रकारभेद एवायमिति । अविशेषापादनेन प्रत्यवस्थानमविशेषसमा जातिः । यथा यदि शब्दघटयोरेको धर्मः कृतकत्वमिष्यते तर्हि समानधर्मयोगात्तयोरविशेषे तद्वदेव सर्वपदार्थानामविशेषः प्रसज्यत इति । उपपत्त्या प्रत्यवस्थानमुपपत्तिसमा जातिः । यथा यदि कृतकत्वोपपत्त्या शब्दस्यानित्यत्वं, निरवयवत्वोपपत्त्या नित्यत्वमपि कस्मान्न भवति पक्षद्वयोपपत्त्याऽनध्यवसायपर्यवसानत्वं विवक्षितमित्युद्भावनप्रकारभेद एवायम् । उपलब्धेन प्रत्यवस्थानमुपलब्धिसमा जातिः । यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति प्रयुक्ते प्रत्यवतिष्ठते न खलु प्रयत्नानन्तरीयकत्वमनित्यत्वे साधनं, साधनं तदुच्यते येन विना न साध्यमुपलभ्यते, उपलभ्यते च प्रयत्नानन्तरीयकत्वेन विनाऽपि विद्युदादावनित्यत्वं, शब्देऽपि क्वचिद्वायुवेगभज्यमानवनस्पत्यादिजन्ये तथेति ।

अनुपलब्धिप्रसवस्थानादनुपलब्धिसमा जातिः। यथा तत्रैव प्रयत्नानन्तरयिकत्वहेतावुपन्यस्ते, स प्राह जातिवादी न प्रयत्नकार्यः शब्दः प्रागुच्चारणादस्त्येवासावावरणयोगात्तु नोपलभ्यते। आवरणानुपलम्भेऽप्यनुपलम्भान्नास्त्येव शब्द इति चेन्न। आवरणानुपलम्भेऽप्यनुपलम्भसद्भावादावरणानुपलब्धेश्चानुपलम्भादभावः। तदभावे चावरणोपलब्धेर्भावो भवति। ततश्च तदन्तरितमूलकीलोदकादिवदावरणोपलब्धिकृतमेव शब्दस्य प्रागुच्चारणादग्रहणमिति प्रयत्नकार्याभावान्नित्यः शब्द इति। साध्यधर्मनित्यानित्यत्वविकल्पेन शब्दनित्यताऽऽपादनं नित्यसमा जातिः। यथा अनित्यः शब्द इति प्रतिज्ञाते, जातिवादी विकल्पयति येयमनित्यता शब्दस्योच्यते सा किमनित्या नित्या वेति। यद्यनित्या तदियमवश्यमपायिनीत्यनित्यताया अभावान्नित्यः शब्दः। अथ नित्यैवेति तथाऽपि धर्मस्य नित्यत्वात्तस्य च निराश्रितस्यानुपपत्तेः तदाश्रयभूतः शब्दोऽपि नित्य एव, स चेन्न तदनित्यत्वे तद्धर्मानित्यत्वायोगादित्युभयथा नित्यः शब्द इति। एवं सर्वभावानित्यत्वोपपादनेन प्रसवस्थानमनित्यसमा जातिः। यथा घटसाधर्म्यमनित्यत्वेन शब्दस्यास्तीति, तस्यानित्यत्वं यदि प्रतिपाद्यते तद्घटेन सर्वपदार्थानामस्त्येव किमपि साधर्म्यमिति तेषामप्यनित्यत्वं स्यात्। अथ पदार्थान्तराणां तथाभावेऽपि नानित्यत्वं तर्हि शब्दस्यापि तन्मा भूदिति अनित्यत्वमात्रापादनपूर्वकविशेषोद्भावनाच्चाविशेषसमातो भिन्नेयं जातिः। प्रयत्नकार्यनानात्वोपन्यासेन प्रसवस्थानं कार्यसमा जातिः। यथाऽनित्यः शब्दः प्रयत्नानन्तरयिकत्वादित्युक्ते जातिवाद्याह—प्रयत्नस्य द्वैरूप्यं दृष्टं किं चिदसदेवेन जन्यते यथा घटादिकं, किं चित्सदेवावरणव्युदासादिना

व्यज्यते यथा मृदन्तरितमूलकीलादि । एवं प्रयत्नकार्यनानात्वादेष प्रयत्नेन शब्दो व्यज्यते जन्यते वेति संशय इति संशयापादानप्रकारभेदाच्च संशयसमातः कार्यसमा जातिर्भिद्यते । तदेवमुद्भावनविषयविकल्पभेदेन जातीनामानन्त्ये संकीर्णोदाहरणविवक्षया चतुर्विंशतिजातिभेदा एते दर्शिता इति ।

दूषणाभासानुक्त्वा निग्रहस्थानमाह—

निग्रहस्थानमाख्यातं परो येन निगृह्यते ।
प्रतिज्ञाहानिसंन्यासविरोधादिविभेदवत् ॥ ३२ ॥

येन केन चिद्रूपेण परो विपक्षो निगृह्यते परवादी वचननिग्रहे पात्यते तन्निग्रहस्थानमाख्यातं कथितमिति । कति चिद्भेदान् नामतो निर्दिशन्नाह—प्रतिज्ञाहानिसंन्यासविरोधादिविभेदवत् । हानिसंन्यासविरोधाः प्रतिज्ञाशब्देन संबध्यन्ते । आदिशब्देन शेषानपि भेदान् परामृशति । एतद्दूषणजालमुत्पाद्यते येन तन्निग्रहस्थानम्। यदुक्तं—"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" । तत्र विप्रतिपत्तिः साधनाभासे साधनबुद्धि, दूषणाभासे च दूषणबुद्धिरिति । अप्रतिपत्तिः साधनस्यादूषणं, दूषणस्य चानुद्धरणम् । तद्धि निग्रहस्थानं द्वाविंशतिभेदम् । तद्यथा—प्रतिज्ञाहानिः, प्रतिज्ञाऽन्तरं, प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः, हेत्वन्तरम्, अर्थान्तरं, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्तकालं, न्यूनम्, अधिकं, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपो मतानुज्ञा, पर्य्यनुयोज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासः, । तत्र हेतावनैकान्तिकीकृते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्युपगतवतः प्रतिज्ञाहानिनाम निग्रहस्थानं भवति। यथा अनित्यः शब्द, ऐन्द्रियिकत्वाद् घटवदिति प्रतिज्ञासा-

धनाय वादी वदन् परेण सामान्यमैन्द्रियिकमपि नित्यं दृष्टमिति हेतावनैकान्तिकीकृते, यद्येवं ब्रूयात् सामान्यवद्घटोऽपि नित्यो भवति स एवं ब्रुवाणः शब्दनित्यत्वप्रतिज्ञां जह्यात् । प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरसाधनमभिदधतः प्रतिज्ञाऽन्तरनाम निग्रहस्थानं भवति । अनित्यः शब्द, ऐन्द्रियिकत्वादित्युक्ते तथैव सामान्येनैव व्यभिचारेणोदिते यदि ब्रूयाद् युक्तं सामान्यमैन्द्रियिकं नित्यं तद्धि सर्वगतमसर्वगतस्तु शब्द इति, सोऽयमनित्यः शब्द इति पूर्वप्रतिज्ञातः प्रतिज्ञाऽन्तरमसर्वगतः शब्द इति प्रतिज्ञाऽन्तरेण निगृहीतो भवति । प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधनाम निग्रहस्थानं भवति । गुणव्यतिरिक्तं द्रव्यं रूपादिभ्योऽर्थान्तरस्यानुपलब्धेरिति, सोऽयं प्रतिज्ञाहेत्वोर्विरोधो यदि गुणव्यतिरिक्तं द्रव्यं कथं रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः, अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः कथं गुणव्यतिरिक्तं द्रव्यमिति तदयं प्रतिज्ञाहेत्वोर्विरुद्धाभिधानात्पराजीयते । पक्षसाधने परेण दूषिते तदुद्धरणाशक्त्या प्रतिज्ञामेव निह्नवानस्य प्रतिज्ञासंन्यासनाम निग्रहस्थानं भवति । यथा अनित्यः शब्द ऐन्द्रियिकत्वादित्युक्ते तथैव सामान्येनानैकान्तिकतायामुद्भावितायां यदि ब्रूयात् क एवमाह नित्यः शब्द इति प्रतिज्ञासंन्यासात् पराजितो भवतीति । अविशेषाभिहिते हेतौ प्रतिषिद्धे तद्विशेषणमभिदधतो हेत्वन्तरनाम निग्रहस्थानं भवति । तस्मिन्नेव प्रयोगे तथैव सामान्येऽस्य व्यभिचारेण दूषिते जातिमत्त्वे सतीत्यादिविशेषणमुपाददानो हेत्वन्तरेण निगृहीतो भवति । प्रकृतादर्थान्तरं तदौपयिकमभिदधतोऽर्थान्तरनाम निग्रहस्थानं भवति । नित्यः शब्दः कृतकत्वादिति हेतुः । हेतुर्हिनोतेर्धातोस्तुप्रत्यये कृदन्तं

पदम्, पदं च नाम तद्धितनिपातोपसर्गा इति प्रस्तुत्य नामादीनि व्याचक्षाणोऽर्थान्तरेण निगृह्यत इति । अभिधेयरहितवर्णानुपूर्वीप्रयोगमात्रं निरर्थकनाम निग्रहस्थानं भवति । यथा नित्यः शब्दः कचतटपानां गजडदवत्त्वाद् घझढधभवादित्येतदपि सर्वथाऽर्थशून्यत्वान्निग्रहणाय कल्पेत साध्यानुपयोगाद्वा। यत्साधनवाक्यं दूषणवाक्यं वा त्रिवारमाभिहितमपि पर्षत्प्रतिवादिभ्यां बोद्धुं न शक्यते तदाऽविज्ञातार्थनाम निग्रहस्थानं भवति। पूर्वापरासंगतपदसमूहप्रयोगादप्रतिष्ठितवाक्यार्थमपार्थकनाम निग्रहस्थानं भवति, दश दाडिमानि षडपूपा इति । प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनक्रममुल्लङ्घ्यावयवविपर्यासेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालनाम निग्रहस्थानं भवति । स्वप्रतिपत्तिवत् परप्रतिपत्तेर्जनने परार्थानुमानक्रमस्यापगमात् । पञ्चावयवे वाक्ये प्रयोक्तव्ये तदेकतमेनानुमानावयवेन हीनं न्यूननाम निग्रहस्थानं भवति, साधनाभावे साध्यसिद्धेरभावात् प्रतिज्ञाऽऽदीनां पञ्चानामपि साधनत्वात् । एकेनैव हेतुनोदाहरणेन वा प्रतिपादितेऽर्थे हेत्वन्तरमुदाहरणान्तरं वा वदतोऽधिकनाम निग्रहस्थानं भवति । शब्दार्थयोः पुनर्वचनं पुनरुक्तनाम निग्रहस्थानं भवति । अन्यत्रानुवादात् शब्दपुनरुक्तं नाम यत्र स एव शब्दः पुनरुच्चार्यते यथा नित्यः शब्दो नित्यः शब्द इति । अर्थपुनरुक्तं तु यत्र सोऽर्थः प्रथममन्येन शब्देनोच्चार्यते पुनः पर्यायान्तरेणोच्यते यथा अनित्यः शब्दो, विनाशी ध्वनिरिति । अनुवादे तु पौनरुक्त्यमदोषः । यथा हेतूपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति । पर्षदावेदितस्य वादिभिरभिहितस्यापि यदप्रत्युच्चारणं तदननुभाषणनाम निग्रहस्थानं भवति। पर्षदा विज्ञातस्यापि वादिवाक्यार्थस्य प्रतिवादि-

नो यदज्ञानं तदज्ञाननाम निग्रहस्थानं भवति । अविदितोत्तर-विषयो हि किमुत्तरं ब्रूयात्, न चाननुभाषणमेवेदं, ज्ञातेऽपि वस्तुन्यनुभाषणासामर्थ्यदर्शनात् । परपक्षे गृहीतेऽप्यनुभाषितेऽपि तस्मिन्नुत्तराप्रतिपत्तिरप्रतिभानाम निग्रहस्थानं भवति । कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपनाम निग्रहस्थानं भवति । सिषाधयिषितस्यार्थस्याशक्यसाधनतामवसाय कथां विच्छिनत्तीदं मम करणीयं परिहीयते, पीनसेन कण्ठ उपरुद्धइत्याद्यभिधाय कथां विच्छिन्दन् विक्षेपेण पराजीयते । स्वपक्षेपरापादितदोषमनुद्धृत्य तमेव परपक्षे प्रतीतिमापादयतो मतानुज्ञानाम निग्रहस्थानं भवति । चौरो भवान् पुरुषत्वात् प्रसिद्धचौरवदित्युक्ते, भवानपि चौरः पुरुषत्वादिति ब्रुवन्नात्मनः परापादितचौरत्वदोषमभ्युपगतवान् भवतीति मतानुज्ञया निगृह्यते । निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणनाम निग्रहस्थानं भवति । पर्यनुयोज्यो नाम निग्रहोपपत्त्याऽवश्यं नोदनीय, "इदन्ते निग्रहस्थानमुपनतमतो निगृहीतोऽसि" इत्येवं वचनीयस्तमुपेक्ष्य न निगृह्णाति यः स पर्यनुयोज्योपेक्षणेन निगृह्यते । अनिग्रहस्थाने निग्रहस्थानानुयोगान्निरनुयोज्यानुयोगनाम निग्रहस्थानं भवति । उपपन्नवादिनमप्रमादिनमनिग्रहार्हमपि "निगृहीतोऽसी"ति यो ब्रूयात्स एवाभूतदोषोद्भावनान्निगृह्यत इति । सिद्धान्तमभ्युपेत्य नियमात्कथाप्रसङ्गोऽपसिद्धान्तनाम निग्रहस्थानम् । यः प्रथमं कञ्चित्सिद्धान्तमभ्युपगम्य कथामुपाक्रमत, तत्र च सिषाधयिषितार्थसाधनाय परोपालम्भो यथा सिद्धान्तविरुद्धमभिधत्ते सोऽपसिद्धान्तेन निगृह्यते । हेत्वाभासाश्च यथोक्ता असिद्धविरुद्धादयो निग्रहस्थानम् इति । भेदान्तरानन्त्येऽपि निग्रहस्थानानां द्वाविंशतिर्मूलभेदा निवेदिता इति ।

अथोपसंहरन्नाह—

नैयायिकमतस्यैवं समासः कथितोऽधुना ।
सांख्याभिमतभावानामिदानीमयमुच्यते ॥ ३३ ॥

एवम् इत्थंप्रकारतया नैयायिकमतस्य शिवशासनस्य समासः संक्षेपोऽधुना कथितो निवेदितः साम्प्रतमेव निष्ठित इत्यर्थः । इदानीं पुनरयं समासः सांख्याभिमतभावानाम् उच्यते । सांख्याः कापिला इत्यर्थः । तदभिमता तदभीष्टा ये भावाः पञ्चविंशतितत्त्वादयस्तेषां संक्षेपोऽतः परं कथ्यत इत्यर्थः ॥

तदेवाह—

एतेषा या समावस्था सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका॥ ३४॥

एतेषां सांख्यानां प्रकृतिः प्रीत्यप्रीतिविषादात्मकानां लाघवोपष्टम्भगौरवधर्माणां सत्त्वरजस्तमसां त्रयाणामपि गुणानां या साम्यावस्था समतयाऽवस्थितिः सा किल प्रकृतिरुच्यते, किलेत्याप्तप्रवादे, सा प्रकृतिः कथ्यते । अन्यच्च सा प्रधानाव्यक्तशब्दाभ्यां वाच्या प्रधानाव्यक्तशब्देन च प्रकृतिराख्यायते । शास्त्रे प्रकृतिः प्रधानमव्यक्तं चेति पर्याया न तत्त्वान्तरमित्यर्थः । तथा नित्यस्वरूपिका शाश्वतभावतया प्रसिद्धेत्यर्थः । उच्यते च नित्या नानापुरुषाश्रया च तद्दर्शनेन प्रकृतिर्यदाह—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृतिरिति ।

दर्शनस्वरूपमाह—

साख्या निरीश्वराः के चित्के चिदीश्वरदेवताः ।
सर्वेषामपि तेषां स्यात्तत्त्वानां पञ्चविंशतिः ॥३५॥

के चित्सांख्या निरीश्वरा ईश्वरं देवतया न मन्यन्ते केवलाध्यात्मवेदिनः । के चित्पुनरीश्वरदेवता महेश्वरं स्वशासनाधिष्टातारमाहुः । सर्वेषामिति । तेषां केवलनित्यात्मवादिनामीश्वरदेवतानां च सर्वेषां सांख्यमतानुसारिणां शासने तत्त्वानां पंचविंशतिः स्यात् । तत्त्वं ह्यपवर्गसाधकं बीजमिति सर्ववादिसंवादः । यदुक्तम् ।

पंचविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥
तन्मते पंचविंशतिस्तत्त्वानीत्यर्थः ।

गुणत्रयमाह—

सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम् ।
प्रसादतोषदैन्यादिकार्यलिङ्गं क्रमेण तत् ॥ ३६ ॥

तावदिति प्रक्रमे । सत्त्वरजस्तमश्चेति गुणत्रयं ज्ञेयम् । तद् गुणत्रयं, क्रमेण परिपाट्या, प्रसादतोषदैन्यादिकार्यलिङ्गं गुणत्रयेणेदं लिङ्गत्रयं क्रमेण जन्यते । सत्त्वगुणेन प्रसादकार्यलिङ्गं, वदननयनादिप्रसन्नता सत्त्वगुणेन स्यादित्यर्थः । रजोगुणेन तोषः स चानन्दपर्यायः, तल्लिङ्गानि स्फूर्त्यादीनि रजोगुणेनाभिव्यज्यन्त इत्यर्थः । तमोगुणेन च दैन्यं जन्यते "हा दैव नष्टोऽस्मि वञ्चितोऽस्मी"त्यादिवदनविच्छायतानेत्रसंकोचादिव्यङ्ग्यं दैन्यं तमोगुणलिङ्गमिति । दैन्यादीत्यादिशब्देन दुःखत्रयमाक्षिप्यते, तद्यथा आध्यात्मिकम्, आधिभौतिकम्, आधि-

दैविकं चेति। तत्राध्यात्मिकं द्विविधं शारीरं मानसं च। शारीरं वात-पित्तश्लेष्मणां वैषम्यनिमित्तम्, मानसं कामक्रोधलोभमोहेर्ष्याविषयादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यं दुःखं द्वेधा, आधिभौतिकम् आधिदैविकं चेति। तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्, आधिदैविकं यक्षराक्षसग्रहाद्यावेशहेतुकमिति।

अनेन दुःखत्रयेणाभिहतस्य प्राणिनस्तत्त्वजिज्ञासोत्पद्यतेऽतस्तान्येव तत्त्वान्याह—

ततः संजायते बुद्धिर्महानिति यकोच्यते।
अहंकारस्ततोऽपि स्यात्तस्मात्षोडशको गणः ॥३७॥

ततो गुणत्रयाभिघाताद् बुद्धिः संजायते यका बुद्धिर्महानिति उच्यते महच्छब्देन कीर्यत इत्यर्थः। एवमेतन्नान्यथा, गौरयं नाश्वः, स्थाणुरेष नायं पुरुष इत्येवं निश्चयस्तेन पदार्थप्रतिपत्तिहेतुर्योऽध्यवसायः सा बुद्धिरिति। तस्यास्त्वष्टौ रूपाणि तद्दर्शनविश्रुतानि। यदाह। धर्मज्ञानवैराग्यैश्वर्यरूपाणि चत्वारि सात्त्विकानि, अधर्मादीनि तु तत्प्रतिपक्षभूतानि चत्वारि तामसानीत्यष्टौ। ततो बुद्धेरहंकारः स चाभिमानात्मको-यथा अहं शब्दे, अहं रूपे, अहं रसे, अहं स्पर्शे, अहं गन्धे, अहं स्वामी, अहम् ईश्वरः, असौ मया हतः, अहं त्वां हनिष्यामीत्यादि-प्रत्ययरूप,स्तस्मादहंकारात्षोडशको गणो "जायत" इत्यध्याहारो-

---

१ अत्र क्रमेण प्रतीतिपञ्चकाकारस्थाने, अहं शृणोमि, अहं रूपयामि, अहं रसयामि, अहं स्पृशामि, अहं जिघ्रामि, इत्येवाकारपञ्चकं ज्याय इति भाति, मूले निर्दिष्टाकारकप्रतीतीनामनानुभविकत्वाद् । ग्रन्थकारलेखानुपूर्वीभङ्गभिया तु मूलस्थपाठो न पराऽवर्त्ति।

ऽस्तिभवतीत्यादिवत्। पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि एकादशं मनः पञ्च भूतानि षोडशको गणः। तथाऽऽह,ईश्वरकृष्णः।

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष"इति।

षोडशकगणमेवाह—

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम्।
पञ्च बुद्धीन्द्रियाण्याहुस्तथा कर्मेन्द्रियाणि च ॥३८॥
पायूपस्थवचःपाणिपादाख्यानि मनस्तथा।
अन्यानि पञ्चरूपाणि तन्मात्राणीति षोडश ॥३९॥

युग्मम्।

पञ्च बुद्धीन्द्रियाणीति सम्बन्धः। स्पर्शनं त्वगिन्द्रियं, रसनं जिह्वा, घ्राणं नासिका, चक्षुर्नेत्रं, पञ्चमं श्रोत्रं कर्ण इति, एतानि पञ्चबुद्धिप्रधानानि बुद्धिसहचराण्येव ज्ञानं जनयन्तीति कृत्वा बुद्धीन्द्रियाण्याहुः कथयन्ति, तन्मतीया इति। तथा कर्मेन्द्रियाणि चेति। तथा पूर्वोद्दिष्टपञ्चसंख्यामात्रमपि परामृशति। तान्येवाह—पायूपस्थवचःपाणिपादाख्यानीति। पायुरपानं, उपस्थः प्रजननं,वचो वाक्यं,पाणिर्हस्तः पादश्चरण,स्तदाख्यानि पञ्च कर्मेन्द्रियाणि, कर्म कार्यव्यापारस्तस्य साधनानीन्द्रियाणीति कर्मेन्द्रियाणि। तथा मन एकादशमिन्द्रियमित्यर्थः। अन्यानि पञ्चरूपाणि तन्मात्राणि चेति। रूपरसगन्धशब्दस्पर्शाख्यानि तन्मात्राणीति षोडश ज्ञेयाः।

पञ्चतन्मात्रेभ्यः पञ्चभूतोत्पत्तिमाह—

रूपात्तेजो रसादापो गन्धाद्भूमिः स्वरान्नभः।
स्पर्शाद्वायुस्तथैवं च पञ्चभ्यो भूतपञ्चकम् ॥४०॥

पञ्चभ्य इति, पञ्चतन्मात्रेभ्यः पञ्चभूतकमिति सम्बन्धः । रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्राद् भूमिः, स्वरतन्मात्रादाकाशं, स्पर्शतन्मात्राद्वायुः, एवं पञ्चतन्मात्रेभ्यः पञ्च भूतान्युत्पद्यन्ते । असाधारणैकैकगुणकथनमिदम्, उत्पत्तिश्च शब्दतन्मात्रादाकाशं शब्दगुणं शब्दो ह्याम्बरगुण इति । शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुण इति । शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणमिति । शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणा इति । शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायत इति पञ्चभ्यः पञ्चभूतकमित्यर्थः ।

प्रकृतिविस्तरमेवोपसंहरन्नाह—

एवं चतुर्विंशतितत्त्वरूपं निवेदितं सांख्यमते प्रधानम् ।
अन्यस्त्वकर्ता विगुणस्तु भोक्ता,तत्त्वं पुमान्नित्यचिदभ्युपेतः ४१

एवं पूर्वोक्तप्रकारेण सांख्यमते चतुर्विंशतितत्त्वरूपं प्रधानं निवेदितम् । प्रकृतिर्महानहङ्कारश्चेति त्रयं, पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि, मनस्त्वेकं, पञ्च तन्मात्राणि, पञ्चभूतानि, चेति चतुर्विंशतिस्तत्त्वानि रूपं यस्येति, एवंविधा प्रकृतिः कथितेत्यर्थः। पञ्चविंशतितमं तत्त्वमाह—अन्यस्त्विति। अन्योऽकर्ता पुरुषः, प्रकृतेरेव संसरणादिधर्मत्वाद्, यदुक्तं—प्रकृतिः करोति प्रकृतिर्बध्यते प्रकृतिर्मुच्यते, पुरुषोऽबद्धः पुरुषो मुक्तः, पुरुषस्तु

अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः ।
अकर्ता निर्गुणः सूक्ष्मः आत्मा कापिलदर्शने ॥

पुरुषगुणानाह—विगुण इति । सत्त्वरजस्तमोरूपगुणत्रयविकलः । तथा भोक्ता भोगी, एवंप्रकारः पुमान् तत्त्वं

पञ्चविंशतितमं तत्त्वमित्यर्थः । तथा नित्यचिदभ्युपेतः, नित्या चासौ चिच्चैतन्यशक्तिस्तयाऽभ्युपेतः सहितः । आत्मा हि स्वं बुद्धेरव्यतिरिक्तमभिमन्यते । सुखदुःखादयश्च विषया इन्द्रियद्वारेण बुद्धौ संक्रामन्ति । बुद्धिश्चोभयमुखदर्पणाकारा । ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते । ततः सुख्यहं दुःख्यहमित्युपचर्यते । आह च पातञ्जले, "शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्माऽपि तदात्मक इव प्रतिभासत" इति । मुख्यतस्तु चिच्छक्तिर्विषयपरिच्छेदशून्या । बुद्धेरेव विषयपरिच्छेदस्वभावत्वात् चिच्छक्तिसन्निधानाच्चाचेतनाऽपि बुद्धिश्चेतनावतीवावभासते । वादमहार्णवोऽप्याह—

बुद्धिदर्पणसंक्रान्तमर्थविप्रतिबिम्बकम् ।
द्वितीयदर्पणकल्पे पुरुषे ह्यधिरोहति ॥
तदेव भोक्तृत्वमस्य न तु विकारोत्पत्तिरिति। तथा चासुरिः—
विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छो यथा चन्द्रमसोऽम्भसि ॥
विन्ध्यवासी त्वेवं भोगमाचष्टे—
पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सान्निध्यादुपाधेः स्फटिको यथेति ॥
नित्यचिज्ज्ञानयुक्तः ।

बन्धमोक्षसंसाराश्च नित्येऽप्यात्मनि भृत्यगतयोर्जयपराजययोरिव तत्फलकोशलाभादिसम्बन्धेन स्वामिन्युपचारवदत्राप्युपचर्यन्त इत्यदोषः ।

तत्त्वोपसंहारमाह—

पञ्चाविंशातितत्त्वानि सांख्यस्यैव भवन्ति च ।
प्रधाननरयोश्चात्र वृत्तिः पङ्ग्वन्धयोरिव ॥ ४२ ॥

पूर्वार्धं निगदसिद्धम् । अत्र सांख्यमते प्रधाननरयोः प्रकृतिपुरुषयोर्वृत्तिर्वर्तनं पङ्ग्वन्धयोरिव पङ्गुश्चरणविकलः, अन्धश्च नेत्रविकलः । यथा पङ्ग्वन्धौ संयुक्तावेव कार्यसाधनाय प्रभवतो न पृथग्भूतौ । प्रकृतिपुरुषयोरपि तथैव कार्यकर्तृत्वम् । प्रकृत्युपात्तं पुरुषो भुङ्क्त इत्यर्थः ।

मोक्षप्रमाणं चाह—

प्रकृतिवियोगो मोक्षः पुरुषस्यैवान्तरज्ञानात् ।
मानत्रितयं च भवेत् प्रत्यक्षं लैङ्गिकं शाब्दम् ॥४३॥

मोक्षः किमुच्यत इत्याह । पुरुषस्यात्मन आन्तरज्ञानात्त्रिविधबन्धविच्छेदात्प्रकृतिवियोगो यः स मोक्षः प्रकृत्या सह वियोगे विरहे सति पुरुषस्यापवर्ग इति । आन्तरज्ञानं च बन्धविच्छेदाद्भवति । बन्धश्च प्राकृतिकवैकृतिकदाक्षिणभेदात्त्रिविधः । तद्यथा । प्रकृतावात्मज्ञानाद् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः । ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते तेषां वैकारिकः । इष्टापूर्ते दाक्षिणः, इष्टापूर्तं जनभोजनदानादिकं तस्मिन् । पुरुषतत्त्वानभिज्ञो हीष्टकारी कामोपहतमना बध्यत इति ।

इष्टापूर्तं मन्यमाना वरिष्ठं
नान्यत् श्रेयो येऽभिनन्दन्ति मूढाः ।
नाकस्य पृष्ठे ते सुकृतेन भूत्वा
इमं लोकं हीनतरं वा विशन्तीति वचनात् ॥

इति त्रिविधबन्धविच्छेदात्परमब्रह्मज्ञानानुभवस्ततः प्रकृतिवियोगः पुरुषस्य, प्रकृतिपुरुषविवेकदर्शनाच्च निवृत्तायां प्रकृतौ, पुरुषस्य स्वरूपावस्थानं मोक्ष इति श्लोकपूर्वार्द्धम् ।

मानत्रितयं प्रमाणत्रयं च, भवेद् स्यात्, प्रत्यक्षं लैङ्गिकं शाब्दं चकारः सर्वत्र सम्बध्यते । प्रत्यक्षमिन्द्रियोपलभ्यं, लैङ्गिकमनुमानगम्यं, शाब्दं चागमस्वरूपमिति प्रमाणत्रयम् ।

अथोपसंहरन्नाह—

एवं सांख्यमतस्यापि समासः कथितोऽधुना ।
जैनदर्शनसंक्षेपः कथ्यते सुविचारवान् ॥ ४४ ॥

एवं पूर्वोक्तप्रकारेण सांख्यमतस्यापि समासः संक्षेपः कथितः । अपि समुच्चयार्थे न केवलं बौद्धनैयायिकयोः संक्षेप उक्तः, सांख्यमतस्याप्यधुना कथित इति । सांख्य इति पुरुषनिमित्तेयं सञ्ज्ञा । संख्यस्य इमे सांख्याः । तालव्यो वा शकारः, शङ्खनामाऽऽदिपुरुषः । अथ क्रमायातं जैनमतोद्देशमाह—अधुनेत्युत्तरार्द्धेन सम्बध्यते । अधुना इदानीं जैनदर्शनसंक्षेपः कथ्यते कथंभूत इति सुविचारवान् । सुष्ठु शोभनो विचारोऽर्थोऽस्यास्तीत्यर्थे मतुप् । सुविचारवानिति साभिप्रायं पदम् । अपरदर्शनानि हि ।

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिरि-

त्याद्युक्त्या न विचारपदवीमाद्रियन्ते । जैनस्त्वाह—

---

१ अप्रामाणिकोऽयं कल्पः । प्रथमकल्पस्तु कथमपि सङ्गमनीयः । वस्तुतस्तु, "शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयत" इति व्यासस्मृत्या भावार्थकाङ्प्रत्ययनिष्पन्नज्ञानवाचकसङ्ख्याशब्दात्सम्बन्धिबोधकशैषिकाणा "सांख्य"शब्दः सिद्धः । यद्वा "संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते । चतुर्विंशतितत्त्वानि तेन सांख्याः प्रकीर्त्तिता" इति भारतात्, संख्याशब्दाद्वेदार्थकाणा निष्पन्नः "सांख्य"शब्दः । उभयथाऽपि योगरूढः ।

अस्ति वक्तव्यता का चित्तेनेदं न विचार्यते ।
निर्दोषं काञ्चनं चेत्स्यात्परीक्षाया बिभेति किम् ॥

इति युक्तियुक्तविचारपरम्परापरिचयपथपथिकत्वेन जैनो युक्तिमार्गमेवावगाहते । न च पारम्पर्यादिपक्षपातेन युक्तिमुल्लङ्घयति परमार्हतः । उक्तञ्च—

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु ।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ॥

इत्यादिहेतुहेतिशतनिरस्तविपक्षप्रसरत्वेन "सुविचारवान्" इत्यसाधारणविशेषणप्रसरणं ज्ञेयमिति ।

तदेवाह—

जिनेन्द्रो देवता तत्र रागद्वेषविवर्जितः ।
हतमोहमहामल्लः केवलज्ञानदर्शनः ॥ ४५ ॥
सुरासुरेन्द्रसंपूज्यः सद्भूतार्थोपदेशकः ।
कृत्स्नकर्मक्षयं कृत्वा संप्राप्तः परमं पदम् ॥ ४६ ॥

तत्र तस्मिन् जैनमते जिनेन्द्रो देवता कृत्स्नकर्मक्षयं कृत्वा परमं पदं सम्प्राप्त इति सम्बन्धः । जैनेन्द्र इति जयन्ति रागादीनिति जिनाः सामान्यकेवलिनस्तेषामिन्द्रः स्वामी तादृशासदृशचतुस्त्रिंशदतिशयसम्पत्सहितो जिनेन्द्रो देवता दर्शनप्रवर्तक आदिपुरुष, एष कीदृक् शिवं संप्राप्त इति परासाधारणानि विशेषणान्याह—रागद्वेषविवर्जित इति । रागः सांसारिकस्नेहोऽनुग्रहलक्षणः, द्वेषो वैराग्याद्यनुबन्धान्निग्रहलक्षणः, ताभ्यां विवर्जितो रहितः । एतावेव दुर्जयौ दुरन्तभवसम्पातहेतुकतया च मुक्तिप्रतिरोधकौ समये प्रसिद्धौ । यदाह—

को दुःक्खं पाविज्जा कस्स न सुक्खेहिं विम्हहो हुज्जा ।
को अ न लभेज्ज मुक्खं रागद्दोसा जइ न हुज्जा ॥

तथा हतमहामोहमल्लः मोहनीयकर्मोदयाच्च हिंसाऽऽत्मकशास्त्रेभ्योऽपि मुक्तिकाङ्क्षणादिव्यामोहो मोहः स एव दुर्जेयत्वान्महामल्ल इव महामल्लः, हतो मोहो महामल्लो येनेति स तथा । रागद्वेषमोहसद्भावादेव न चान्यतीर्थाधिष्ठातारो मुक्त्यङ्गतया प्रतिभासन्ते, तत्सद्भावश्च तेषु सुज्ञेय एव । यदुक्तम्—

रागोऽङ्गनासङ्गमनानुमेयो द्वेषो द्विषां दारणेहितगम्यः ।
मोहः कुदृत्तागमदोषसाध्यो नो यस्य देवस्य स चैवमर्हन् ॥

इति रागद्वेषमोहरहितो भगवान्, तथा केवलज्ञानदर्शनः । धवखदिरपलाशादिव्यक्तिविशेषावबोधो ज्ञानम् । वनमिति सामान्यावबोधो दर्शनम् । केवलशब्दश्चोभयत्र सम्बध्यते । केवलमिन्द्रियादिज्ञानानपेक्षं ज्ञानं दर्शनञ्च यस्येति । केवलज्ञानकेवलदर्शनात्मको हि भगवान् करतलकलितविमलमुक्ताफलवद्द्रव्यपर्यायविशुद्धमखिलमिदमनवरतं जगत्स्वरूपं पश्यतीति केवलज्ञानदर्शन इति पदं साभिप्रायम् । अन्यस्य हि प्रथमं दर्शनमुत्पद्यते, ततो ज्ञानं, केवलिनस्त्वादौ ज्ञानं ततो दर्शनमिति । सुरासुरेन्द्रसम्पूज्यः । सेवाविधानसावधाननिरन्तरढौकमानदासायमानदेवदानववन्दनीयः । तादृशैरपि पूज्यस्य मानवतिर्यक्खेचरकिंनरनिकरसंसेव्यत्वमानुषङ्गिकमिति । तथा सद्भूतार्थोपदेशकः । सद्भूतार्थान् द्रव्यपर्यायरूपान् नित्यानित्यसामान्यविशेषसदसदभिलाप्याद्यनन्तधर्मात्मकान् पदार्थानुपदिशति । तथा हि, वस्तुनस्तावदर्थक्रियाकारित्वं लक्षणम् । तच्च नित्यैकान्ते न घटते । अप्रच्युतानुत्पन्नस्थिरैकरूपो हि नित्यः स च क्रमेणार्थक्रियां कुर्वीताक्रमेण वा, अन्योन्यव्यतिरिक्तध-

र्माणामर्थानां प्रकारान्तरेणोत्पादाभावात्, तत्र न क्रमेण स हि कालान्तरभाविनीः क्रियाः प्रथमक्रियाकाल एव प्रसह्य कुर्यात् समर्थस्य कालक्षेपायोगात्, कालक्षेपिणो वा सामर्थ्याप्राप्तेः । समर्थो हि तत्सहकारिसमवधानेन तमर्थं करोतीति चेद्, न तस्य सामर्थ्यमपरसहकारिसापेक्षवृत्तित्वात् "सापेक्षमसमर्थमि"ति न्यायात् । न तेन सहकारिणोऽपेक्ष्यन्ते, ऽपि तु कार्यमेव सहकारिष्वसत्स्वभवत्तमपेक्षत इति चेत्, तर्किं स भावोऽसमर्थः समर्थो वा । समर्थश्चेत्किं सहकारिप्रेक्षणादीनि तान्यपेक्षते न पुनर्झटिति घटयति । ननु समर्थमपि बीजमिलाजालानिलादिसहकारिसहितमेवाङ्कुरं करोति नान्यथा, तर्किं बीजस्य सहकारिभिः किं चिदुपाक्रियते न वा । यदि नोपक्रियते तदा सहकारिसन्निधानात्प्रागिव किं न सोऽर्थक्रियायामुदास्ते, उपाक्रियते चेत्स, तर्हि तैरुपकारो भिन्नोऽभिन्नो वा क्रियत इति वाच्यम् । अभेदे स एव क्रियत इति लाभमिच्छतो मूलक्षतिरायाता, कृतकत्वेन तस्यानित्यत्वापत्तेः । भेदे सति कथं तस्योपकारः किं न सह्यविन्ध्यादेरपि । तत्सम्बन्धात्तस्यायमिति चेत् । उपकार्योपकारकयोः कः सम्बन्धः । न तावत्संयोगो द्रव्ययोरेव तस्य भावात् । अत्र तूपकार्यं द्रव्यमुपकारश्च क्रियेति न संयोगो, नापि समवायः, तस्यैकत्वाद्व्यापकत्वाच्च प्रत्यासत्तिविप्रकर्षाभावेन सर्वत्र तुल्यत्वाद् न नियतैः सम्बन्धिभिः सम्बन्धो युक्तः । नियतसम्बन्धिसम्बन्धे चाङ्गीक्रियमाणे तत्कृतोपकारोऽस्य समवायस्याभ्युपगन्तव्यः, तथा च सत्युपकारस्य भेदाभेदकल्पना तदवस्थैव । उपकारस्य समवायादभेदे समवाय एव कृतः स्यात् । भेदे पुनरपि समवायस्य न नियतसम्बन्धे सम्बन्धत्वं, तन्नैकान्तनित्यो भावः क्रमेणार्थक्रियां कुरुते ।

नाप्यक्रमेण । न ह्येको भावः सकलकालभाविनीर्युगपत्सर्वाः क्रियाः करोतीति प्रातीतिकं, कुरुतां वा तथाऽपि स द्वितीयक्षणे किं कुर्यात् । करणे वा क्रमपक्षभावी दोषः । अकरणे स्वर्थक्रियाकारित्वाभावादवस्तुत्वप्रसङ्ग इत्येकान्तनित्या क्रमाक्रमाभ्यां व्याप्ताऽर्थक्रिया व्यापकानुपलब्धिबलाद्व्यापकनिवृत्तौ निवर्तमाना व्याप्यमर्थक्रियाकारित्वं निवर्तयति। अर्थक्रियाकारित्वञ्च निवर्तमानं स्वव्याप्यसत्त्वं निवर्तयतीति नैकान्तनित्यपक्षो युक्तिक्षमः । एकान्तानित्यपक्षोऽपि न कक्षीकरणार्हः । अनित्यो हि प्रतिक्षणविनाशी, स च न क्रमेणार्थक्रियासमर्थो देशकृतस्य कालकृतस्य च क्रमस्यैवाभावात् । क्रमो हि पौर्वापर्य,न्तत्क्षणिकस्यासम्भवि, अवस्थितस्यैव हि नानादेशकालव्याप्तिर्देशक्रमः कालक्रमश्चाभिधीयते । न चैतस्मिन् विनाशिनि साऽस्ति । यदाहुः—

यो यत्रैव स तत्रैव यो यदैव स तदैव सः ।
न देशकालयोर्व्याप्तिर्भावानामिह विद्यते ॥

न च सन्तानापेक्षया पूर्वोत्तरक्षणानां क्रमः सम्भवति । सन्तानस्यावस्तुत्वात् । वस्तुत्वेऽपि तस्य यदि क्षणिकत्वं, न तर्हि क्षणेभ्यः कश्चिद्विशेषः । अथाक्षणिकत्वं, तर्हि समाप्तः क्षणभङ्गवादः । नाप्यक्रमेणार्थक्रिया क्षणिके सम्भवति । स ह्येको बीजपूरादिरूपादिक्षणो युगपदनेकान् रसादिक्षणान् जनयन्नेकेन स्वभावेन जनयेद् नानास्वभावैर्वा । यद्येकेन, तदा तेषां रसादिक्षणानामेकत्वं स्यादेकस्वभावानन्यत्वात् । अथ नानास्वभावैर्जनयति किं चिद्रूपादिकमुपादानभावेन किं चिद्रतादिकं सहकारित्वेनेति, ते तर्हि स्वभावास्तस्यात्मभूता अनात्मभूता वा । अनात्मभूताश्चेत्स्वभावत्वहानिः । यद्यात्मभूतास्तर्हि तस्या-

नेकत्वमनेकस्वभावत्वात् । स्वभावानां वैकत्वं प्रसज्येत । तदव्यतिरिक्तत्वात्तेषां तस्य चैकत्वात् । अथ य एवैकत्रोपादानभावः स एवान्यत्र सहकारिभाव इति न स्वभावभेद इष्यते, तर्हि नित्यस्यैकरूपस्य क्रमेण नानाकार्यकारिणः स्वभावभेदः कार्यसांकर्यं च कथमिष्यते क्षणिकवादिना । अथ नित्यमेकस्वरूपत्वादक्रमम्, अक्रमाच्च क्रमिणां नानाकार्याणां कथमुत्पत्तिरिति चेदहो स्वपक्षपक्षपाती देवानांप्रियः । यः खलु स्वयमेकस्मान्निरंशाद्रूपादिक्षणलक्षणात्कारणाद्युगपदनेककारणसाध्यान्यनेककार्याण्यङ्गीकुर्वाणोऽपि, परपक्षे नित्येऽपि वस्तुनि क्रमेण नानाकार्यकरणेऽपि विरोधमुद्भावयति तस्मात्क्षणिकस्यापि भावस्याक्रमेणार्थक्रिया दुर्घटा इत्यनित्यैकान्तादपि क्रमाक्रमयोर्निवृत्त्यैव व्याप्याऽर्थक्रिया व्यावर्तते । तद्व्यावृत्तौ च सत्त्वमपि व्यापाकानुपलम्भबलेनैव निवर्तत इत्येकान्तानित्यवादो न रमणीयः । स्याद्वादे तु पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेन भावानामर्थक्रियोपपत्तिरविरुद्धा । न चैकत्र वस्तुनि परस्परविरुद्धधर्माध्यासयोगादसन् स्याद्वाद इति वाच्यम् । नित्यपक्षानित्यपक्षविलक्षणस्य कथं चित्सदसदात्मकस्य पक्षान्तरस्याङ्गीक्रियमाणत्वात् तथैव च सर्वैरनुभवादिति । तथा च पठन्ति ।

भागे सिंहो नरो भागे योऽर्धौ भागद्वयात्मकः ।
तमभागं विभागेन नरसिंहं प्रचक्षत इति ॥

तथा सामान्यैकान्तं, विशेषैकान्तं, भिन्नौ सामान्यविशेषौ, चेत्थं निराचष्टे । तथा हि । विशेषाः सामान्याद्भिन्ना अभिन्ना वा । भिन्नाश्चेन्मण्डूकजटाभारानुकाराः । अभिन्नाश्चेत्तदेव तत्स्वरूपवदिति सामान्यैकान्तः । सामान्यैकान्तवादिनस्तु

द्रव्यास्तिकनयानुपातिनो मीमांसकभेदा अद्वैतवादिनः सांख्याश्च। पर्यायनयान्वयिनो भाषन्ते विविक्ताः क्षणक्षयिणो विशेषा एव परमार्थस्ततो विष्वग्भूतस्य सामान्यस्याप्रतीयमानत्वात्। न हि गवादिव्यक्त्यनुभवकाले वर्णस्थानात्मकं व्यक्तिरूपमवहायान्यर्तिक चिदेकमनुयायि प्रत्यक्षे प्रतिभासते तादृशस्यानुभवाभावात्। तथा च पठन्ति—

एतासु पञ्चस्ववभासिनीषु
प्रत्यक्षबोधे स्फुटमङ्गुलीषु।
साधारणं रूपमवेक्षते यः
शृङ्गं शिरस्यात्मन ईक्षते सः॥

एकाकारपरामर्शप्रत्ययस्तु स्वहेतुदत्तशक्तिभ्यो व्यक्तिभ्य एवोत्पद्यत इति न तेन सामान्यसाधनं न्याय्यम्। किं च यदिदं सामान्यं परिकल्प्यते, तदेकमनेकं च। एकमपि सर्वगतम सर्वगतं च। सर्वगतं चेर्तिक न व्यक्त्यन्तरालेष्वपि लभ्यते, सर्वगतैकत्वाभ्युपगमे च तस्य यथा गोत्वसामान्यं गोव्यक्तीः क्रोडीकरोति, एवं किं न घटपटादिव्यक्तीरप्यविशेषात्। असर्वगतं चेद्विशेषरूपापत्तिरभ्युपगमबाधश्च। अथानेकं गोत्वाश्वत्वघटत्वपटत्वादिभेदभिन्नत्वात्, तर्हि विशेषा एव स्वीकृता अन्योन्यव्यावृत्तिहेतुत्वात्। न हि यद्गोत्वं तदश्वत्वात्मकमिति। अर्थक्रियाकारित्वं च वस्तुनो लक्षणं तच्च विशेषेष्वेव स्फुटं लक्ष्यते, न हि सामान्येन का चिदर्थक्रिया क्रियते तस्य निष्क्रियत्वात्। वाहदोहादिष्वर्थक्रियासु विशेषाणामेवोपयोगात्। तदेदं सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा। भिन्नं चेदवस्तु, विशेषविश्लेषार्थक्रियाकारित्वाभावात्। अभिन्नं चेद्विशेषा एव तत्स्वरूपवदिति विशेषैकान्तवादः। नैगमनया-

नुगामिनस्त्वाहुः । स्वतन्त्रौ सामान्यविशेषौ, तथैव प्रमाणेन प्रतीतत्वात्। तथा हि। सामान्यविशेषावत्यन्तं भिन्नौ, विरुद्धधर्माध्यासितत्वाद्, यावेवं तावेवं यथा पाथःपावकौ, तथा चेतौ, तस्मात्तथा । सामान्यं हि गोत्वादि सर्वगतं, तद्विपरीताश्च शबलशाबलेयादयो विशेषाः ततः कथमेषामैक्यं युक्तम् । न सामान्यात् पृथग् विशेषस्योपलम्भ इति चेत्, कथं तर्हि तस्योपलम्भ इति वाच्यम् । सामान्यव्याप्तस्येति चेत्। न तर्हि स विशेषोपलम्भः, सामान्यस्यापि तेन ग्रहणात्। ततश्च तेन बोधेन विविक्तविशेषग्रहणाभावात् तद्वाचकं ध्वनिं तत्साध्यं च व्यवहारं न प्रवर्तयेत् प्रमाता, न चैत्तदस्ति विशेषाभिधानव्यवहारयोः प्रवृत्तिदर्शना,त्तस्माद्विशेषमभिलषता तत्र व्यवहारं प्रवर्तयता तद्ग्राहको बोधोऽभ्युपगन्तव्यः । एवं सामान्यस्थाने विशेषशब्दं विशेषस्थाने च सामान्यशब्दं प्रयुञ्जानेन सामान्येऽपि तद्ग्राहको बोधो विविक्तोऽङ्गीकर्तव्यः । तस्मात्स्वस्वग्राहिणि ज्ञाने पृथक् प्रतिभासमानत्वाद् द्वावपीतरेतरविशेकलितौ, ततो न सामान्यविशेषात्मकत्वं वस्तुनो घटत इति स्वतन्त्रः सामान्यविशेषवादः । स्वतन्त्रसामान्यविशेषदेशका नैगमनयानुरोधिनः काणादा आक्षपादाश्च । तदेतत्पक्षत्रयमपि क्षोदं न क्षमते । प्रमाणबाधितत्वात् । सामान्यविशेषोभयात्मकस्यैव वस्तुनो निर्विगानमनुभूयमानत्वात् । वस्तुनो हि लक्षणमर्थक्रियाकारित्वं, तच्चानेकान्तवाद एवाविकलं कलयन्ति परीक्षकाः । तथा हि । गौरित्युक्ते खुरककुदलाङ्गूलसास्नाविषाणाद्यवयवसंपन्नं वस्तुरूपं सर्वव्यक्तयनुयायि प्रतीयते, तदा महिष्यादिव्यावृत्तिरपि प्रतीयते । यत्रापि च शबला गौरित्युच्यते, तत्रापि च यथा विशेषप्रतिभासस्तथा गोत्वप्रति-

भासोऽपि स्फुट एव । शबलेति केवलविशेषोच्चारणेऽप्यर्थात्प्रकरणाद्वा गोत्वमनुवर्तते । अपि च शबलत्वमपि नानारूपं, तथा दर्शनात् । ततो वक्ता शबलेत्युक्ते क्रोडीकृतशबलसामान्यं विवक्षितगोव्यक्तिगतमेव शबलत्वं व्यवस्थाप्यते । तदेवमाबालगोपालं प्रतीतप्रसिद्धेऽपि वस्तुनः सामान्यविशेषात्मकत्वे तदुभयैकान्तवादः प्रलापमात्रम् । न हि क्व चित्कदाचित्केन चित् किं चित्सामान्यं विशेषविनाकृतमनुभूयते, विशेषा वा तद्विनाकृताः । यदाहुः—

द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा दृष्टा मानेन केन चेति ॥

केवलं दुर्णयबलप्रभावितप्रबलमतिव्यामोहादेकमपलप्यान्यतरद् व्यवस्थापयन्ति कुमतयः । सोऽयमन्धगजन्यायः । येऽपि च तदेकान्तपक्षोपनिपातिनः प्रागुक्तदोषास्तेऽप्यनेकान्तवादप्रचण्डमुद्गरप्रहारजर्जरितत्वान्नोच्छ्वसितुमपि क्षमाः । स्वतन्त्रसामान्यविशेषवादिनस्त्वेवं प्रतिक्षेप्याः सामान्यं प्रतिव्यक्ति कथं चिद्भिन्नं, कथं चित्तदात्मकत्वाद्विसदृशपरिणामवत् । यथैव हि काचिद्व्यक्तिरुपलभ्यमाना व्यक्त्यन्तराद्विशिष्टा विसदृशपरिणामदर्शनादवतिष्ठते, तथा सदृशपरिणामात्मकसामान्यदर्शनात्समानेति, तेन समानो गौरयं, सोऽनेन समान इति प्रतीतेः । न चास्य व्यक्तिस्वरूपादभिन्नत्वात्सामान्यरूपताव्याघातः । यतो रूपादीनामपि व्यक्तिस्वरूपादभिन्नत्वमस्ति । न च तेषां गुणरूपताव्याघातः । कथं चिद्व्यतिरेकस्तु रूपादीनामिव सदृशपरिणामस्याप्यस्त्येव पृथग्व्यपदेशादिभाक्त्वात् । विशेषा अपि नैकान्तेन सामान्यात्पृथग् भवितुमर्हन्ति । यतो यदि सामान्यं सर्वगतं सिद्धं भवेत्तदा तेषा-

मसर्वगतत्वं, ततो विरुद्धधर्माध्यासः स्याद्, न च तस्य तत्सिद्धं, प्रागुक्तयुक्त्या निराकृतत्वात्। सामान्यस्य विशेषाणाञ्च परस्परं कथं चिदव्यतिरेकेणैकानेकरूपतया व्यवस्थितत्वात् । विशेषेभ्योऽव्यतिरिक्तत्वाद्धि सामान्यमप्यनेकमिष्यते । सामान्यात्तु विशेषाणामव्यतिरेकात् तेऽप्येकरूपा इति । एकत्वं च सामान्यस्य संग्रहनयार्पणात्सर्वत्र विज्ञेयम् । अनेकत्वं च प्रमाणार्पणा,त्तस्य सदृशपरिणामरूपस्य विसदृशपरिणामवत् प्रतिव्यक्तिभेदात् । एवं चासिद्धं सामान्यविशेषयोः सर्वथा विरुद्धधर्माध्यासितत्वम् । कथं चिद्विरुद्धर्माध्यासितत्वं चेद्विवक्षितं तदाऽस्मत्पक्षप्रवेशः । कथं चिद्विरुद्धर्माध्यासस्य कथं चिद्भेदाविनाभूतत्वात् । पाथःपावकदृष्टान्तोऽपि साध्यसाधनविकलः, तयोरपि कथं चिद्विरुद्धधर्माध्यासितत्वेन भिन्नत्वेन च स्वीकारात्, पयस्त्वपावकत्वादिना हि तयोर्विरुद्धधर्माध्यासो भेदश्च, द्रव्यत्वादिना पुनस्तद्वैपरीत्यमिति । तथा च कथं न सामान्यविशेषात्मकत्वं वस्तुनो घटत इति । उक्तं च—

दोहिं विणएहिं पणीयं सत्थमुलूगेण तहवि मिच्छत्तं ।
जं सविसयप्पहाणत्तणेण अण्णोणणिरवेक्खं ॥ तथा

निर्विशेषं हि सामान्यं भवेत्खरविषाणवत् ।
सामान्यरहितत्वेन विशेषास्तद्वदेव हि ॥

तथैकान्तसत्त्वमेकान्तासत्त्वं च वार्त्तमेव । तथा हि । सर्वभावानां हि सदसदात्मकत्वमेव स्वरूपम् । एकान्तसत्त्वे वस्तुनो वैस्वरूप्यं स्यात् । एकान्तासत्त्वे च निःस्वभावता भावानां स्यात् । तस्मात्स्वरूपेण सत्त्वात्, पररूपेण चासत्त्वात् सदसदात्मकं वस्तु सिद्धम् । यदाहुः—

"सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्त्वं स्यात् स्वरूपस्याप्यसम्भव" इति ॥

ततश्चैकस्मिन् घटे सर्वेषां घटव्यतिरिक्तपदार्थानामभावरूपेण वृत्तेरनेकान्तात्मकत्वं घटस्य सूपपादम् । एवं चैकस्मिन्नर्थे ज्ञाते सर्वेषामर्थानां ज्ञानं, सर्वपदार्थपरिच्छेदमन्तरेण तन्निषेधात्मन एकस्य वस्तुनो विविक्ततया परिच्छेदासम्भवात् । आगमोऽप्येवमेव व्यवस्थितः ।

"जे एगं जाणइ सो सव्वं जाणइ जो सव्वं जाणइ सो एगं जाणइ" । तथा—

एको भावः सर्वथा येन दृष्टः
सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टाः
एको भावः सर्वथा तेन दृष्ट इति

सुघटं सदसदनेकान्तात्मकं वस्तु । अनयैव भङ्ग्या स्यादस्तिस्यान्नास्तिस्यादवक्तव्यादिसप्तभङ्गीविस्तरस्य जगत्—पदार्थसार्थव्यापकत्वाद् अभिलाप्यानभिलाप्यात्मकमप्यूह्यमिति । सद्भूतार्थोपदेशक इति, कृत्स्नकर्मक्षयं कृत्वेति । कृत्स्नानि सर्वाणि घात्यघात्यादीनि यानि कर्माणि जीवभोग्यवेद्यपुद्गलास्तेषां क्षयं निर्जरणं विधाय; परमं पदं सम्प्राप्तः । अपरे हि सौगतादयो मोक्षमवाप्यापि तीर्थनिकारादिसम्भवे भूयो भूयो भवमवतरन्ति । यदाहुः—

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारत इति

न ते परमार्थतो मोक्षगतिभाजः, कर्मक्षयाभावात् । न हि तत्त्वतः कर्मक्षये पुनर्भवावतारः । यदुक्तम्—

दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुर इति ॥

अर्हंश्च भगवान् कर्मक्षयपूर्वमेव शिवपदं प्राप्त इति ।

तत्त्वान्याह—

जीवाजीवौ तथा पुण्यं पापमाश्रवसंवरौ ।
बन्धश्च निर्जरामोक्षौ नव तत्त्वानि तन्मते ॥४७॥

तन्मते जैनमते, नव तत्त्वानि सम्भवन्तीति ज्ञेयम् । नामानि निगदसिद्धान्येव ।

जीवाजीवपुण्यतत्त्वमेवाह—

तत्र ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो विवृत्तिमान् ।
कर्त्ता शुभाशुभं कर्म भोक्ता कर्मफलस्य च ॥४८॥
चैतन्यलक्षणो जीवो, यश्चैतद्विपरीतवान् ।
अजीवः स समाख्यातः, पुण्यं सत्कर्मपुद्गलाः॥४९॥

युग्मम् ।

तत्र जैनमते, चैतन्यलक्षणो जीव इति सम्बन्धः । विशेषणान्याह—ज्ञानादिधर्मेभ्यो भिन्नाभिन्न इति । ज्ञानमादिर्येषां धर्माणामिति ज्ञानदर्शनचारित्ररूपा धर्मगुणास्तेभ्योऽयं जीवश्चतुर्दशभेदोऽपि कथञ्चिद्भिन्नः कथञ्चिदभिन्न इत्यर्थः । एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तेषु स्वापेक्षया ज्ञानवत्त्वमस्त्येवेत्यभिन्नत्वं ज्ञानादिभ्यः, परापेक्षया पुनरज्ञानवत्त्वमिति भिन्नत्वम् । लेशतश्चेत्सर्वजीवेषु न ज्ञानवत्त्वं, तदा जीवोऽजीवत्वं प्राप्नुयात् । तथा च सिद्धान्तः—

"सव्वजीवाणं पियणं अक्खरस्स अणन्तओ भागो निच्चुग्घाडिओ ।
जइ सो वि आवरेज्झा ता जीवो अजीवत्तं पाविज्झा ।
सुद्धा वि मेहसमुदये होइ पहा चन्दसूराणम्" ॥

तथा विद्यत्तिमानिति। विद्यत्तिः परिणामः साऽस्यास्तीति मत्वर्थीयो मतुप्। सुरनरनारकतिर्यङ्क्षु एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तजातिषु विविधोत्पत्तिरूपान्परिणामाननुभवति जीव इत्यर्थः। अन्यच्च शुभाशुभं कर्म कर्त्ता। शुभं सातवेद्यम्, अशुभमसातवेद्यम्। शुभञ्चाशुभञ्चेति द्वन्द्वः। एवंविधं कर्म भोक्तव्यफलकर्तृभूतं कर्त्ता, स्वात्मसाद्विधाता उपार्जयितेति यावत्। न च साङ्ख्यवदकर्त्ताऽऽत्मा शुभाशुभाबन्धकश्चेति। तथा कर्मफलम्भोक्ता। न च केवलः कर्त्ता, किं तु भोक्ताऽपि स्वोपार्जितपुण्यपापकर्मफलस्य वेदयिता। न चान्यकृतस्यान्यो भोक्ता। तथा चागमः—

"जीवाणं भन्त! किं अत्तकडे दुक्खे, परकडे दुक्खे, तदुभयकडे दुक्खे,।

गोयम! अत्तकडे दुक्खे, नो परकडे दुक्खे, नो तदुभयकडे दुक्खे," इति॥

कर्त्तैव भोक्ता। तथा चैतन्यलक्षण इति। चैतन्यं चेतनास्वभावत्वं, तदेव लक्षणं मूलगुणो यस्येति। सूक्ष्मबादरभेदा एकेन्द्रिया,स्तथा विकलेन्द्रियास्त्रयः, संज्ञासंज्ञिभेदाश्च पञ्चेन्द्रियाः, सर्वेऽपि पर्याप्ता अपर्याप्ताश्चेति चतुर्दशापि जीवभेदाश्चैतन्यं न व्यभिचरन्तीति। अथाजीवमाह—"यश्चैतद्वैपरीत्यवानजीवः स समाख्यात" इति। यः पुनस्तस्माज्जीवलक्षणाद्वैपरीत्यमन्यथात्वमस्यास्तीति तद्वैपरीत्यवान् विपरीतस्वभावोऽचेतनः सोऽजीवः समाख्यातः कथितः पूर्वसूरिभिरिति। भेदाश्च धर्माधर्माकाशपुद्गलाः स्कन्धदेशप्रदेशगुणा अद्धाकेवलपरमाणुश्चेति चतुर्दश जीवभेदाः। पुण्यं सत्कर्मपुद्गला इति। पुण्यं नाम तत्त्वं कीदृगित्याह—सत्कर्मपुद्गला इति। सच्छोभनं सातवेद्यं कर्म, तस्य पुद्गला दलपाटकानि पुण्यप्रकृतय इत्यर्थः। ताश्च द्वाचत्वारिंशत्तद्यथा—

नरतिरिसुराउउच्चं सायं परघायआयवुज्जोयं ।
तित्थुस्सासस्सुनिमाणं पणिंदिवइरुस्सभचउरंसं ॥
तसदसचउवन्नाई सुरमणुदुगपंचतणुउवंगतिअं ।
अगुरुलहुपढमखगई बायालीसं सुहपयडी ॥
भावार्थस्तु ग्रन्थविस्तरभयान्नोच्यत इति श्लोकार्थः ।

शेषतत्त्वमाह—

पापं तद्विपरीतन्तु मिथ्यात्वाद्यास्तु हेतवः ।
यस्तैर्बन्धः स विज्ञेय आश्रवो जिनशासने ॥५०॥

तु पुनस्तद्विपरीतं पुण्यप्रकृतिविसदृशं पापं पापतत्त्वमित्यर्थः । मिथ्यात्वाद्याश्चेति । मिथ्यादर्शनाविरतिप्रमादकषाययोगा हेतवः । पापस्य कारणानि तत्प्रकृतयश्च द्व्यशीतिस्तद्यथा—

"थावरदसचउजाई अपढमसंठाणखगइसंघयणा ।
तिरिनिरयदुगाउजाई वन्नचऊनामचउतीसा ॥
नरयाउनीयअस्सा-
यघाइपणयालसहियवासीई" इति ।

पुण्यप्रकृतिव्यतिरिक्ताः पापप्रकृतयो द्व्यशीतिः ।

वर्णचतुष्कस्य तु शुभाशुभरूपेणोभयत्रापि सम्बध्यमानत्वान्न दोषः । यस्तैर्मिथ्यादर्शनादिभिर्बन्धः कर्मबन्धः स जिनशासन आश्रवो विज्ञेयः, आश्रवतत्त्वं ज्ञेयमित्यर्थः । तत्प्रकृतयश्च द्वाचत्वारिंशत् । तथा हि । पञ्चेन्द्रियाणि, चत्वारः कषायाः, पञ्च व्रतानि, मनोवचनकायाः, पञ्चविंशतिक्रियाश्च कायिक्यादय, इत्याश्रवः ।

संवरस्तन्निरोधस्तु बन्धो जीवस्य कर्मणः ।
अन्योन्यानुगमात्कर्मसम्बन्धो यो द्वयोरपि ॥५१॥

तु पुनस्तन्निरोध आश्रवद्वारप्रतिरोधः संवरतत्त्वम् । संवरप्रकृतयस्तु सप्तपञ्चाशत्तद्यथा—

समिइगुत्तिपरीसहजइधम्मभावणाचरित्ताणि ।
पणतिगदुवीसदसवार पञ्चभेएहिं सगवणा ॥

पञ्च समितय,स्तिस्रो गुप्तयो, द्वाविंशतिः परीषहा, दशविधो यतिधर्मः, द्वादश भावनाः,पञ्च चारित्राणीति प्रकृतयः । बन्धो नाम जीवस्य प्राणिनः कर्मणा वेद्यस्यान्योन्यानुगमात् परस्परक्षीरनीरन्यायेन लोलीभावाद् यो द्वयोरपि जीवकर्मणोः सम्बन्धः संयोगः स बन्धनाम तत्त्वमित्यर्थः । स चतुर्विधः प्रकृतिस्थित्यनुभागप्रदेशभेदात् ।

"स्वभावः प्रकृतिः प्रोक्तः स्थितिः कालावधारणम् ।
अनुभागो रसो ज्ञेयः प्रदेशो दलसञ्चयः" ॥

इत्यादिः स बन्धो ज्ञेयः ।

निर्जरामोक्षौ चाह—

बद्धस्य कर्मणः शाटो यस्तु सा निर्जरा मता ।
आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते ॥ ५२ ॥

यः पुनर्बद्धस्य स्पृष्टबद्धनिधत्तनिकाचितादिरूपेणार्जितस्य कर्मणस्तपश्चरणध्यानजपादिभिः शाटः कर्मक्षपणं सा निर्जरा मता पूर्वसूरिभिरिति । सा पुनर्द्विविधा, सकामाकामभेदेन । तु पुनर्देहादेरात्यन्तिको वियोगो मोक्ष उच्यते। स च नवविधो यथा—

"संतपयवरूवणया दव्वमाणं च खित्तपसणा य ।
कालो य अन्तरं भागो भावो अप्पा बहुं चेव" इति ॥

नवप्रकारो हि करणीयः । बाह्यप्राणानामात्यन्तिकापुनर्भावित्वेनाभावः शिव इत्यर्थः । ननु सर्वथा प्राणाभावादजीवत्वप्रसङ्गः, तथा च द्वितीयतत्त्वान्तर्भूतत्वान् मोक्षतत्त्वाभाव इति चेन्न । मोक्षे हि द्रव्यप्राणानामेवाभावः । भावप्राणास्तु नैष्कर्मिकावस्थायामपि सन्त्येव । यदुक्तम् ।

"यस्मात्क्षायिकसम्यक्त्वं वीर्यसिद्धत्वदर्शनज्ञानैः ।
आत्यन्तिकैः संयुक्तो निर्द्वन्द्वेनापि च सुखेन ॥
ज्ञानादयस्तु भावप्राणा मुक्तोऽपि जीवति स तर्हि ।
तस्माज्जीवत्वं हि नित्यं सर्वस्य जीवस्य" इति ॥

सङ्गतदेहवियोगान्मोक्ष, आदिशब्दादेहेन्द्रियधर्मविरहोऽपीति पद्यार्थः ।

एवं नामोद्देशेन तत्त्वानि सङ्कीर्त्य फलपूर्वकमुपसंहारमाह—

एतानि तत्र तत्त्वानि यः श्रद्धत्ते स्थिराशयः ।
सम्यक्त्वज्ञानयोगेन तस्य चारित्रयोग्यता ॥५३॥

एतानि पूर्वोक्तानि, तत्र जिनमते, तत्त्वानि यः कश्चित् स्थिराशयो दृढचित्तः सन् श्रद्धत्ते, अवैपरीत्येन मनुते । एतावता जानन्नपि अश्रद्दधानो मिथ्यादृगेव । यथोक्तं—श्रीगन्धिहस्तिमहातर्के । "द्वादशाङ्गमपि श्रुतं विदर्शनस्य मिथ्ये"ति । तस्य दृढमानसस्य सम्यक्त्वयोगेन चारित्रयोग्यता चारित्राईता । सम्यक्त्वज्ञानयोगेनेति । सम्यक्त्वं च ज्ञानं च सम्यक्त्वज्ञाने तयोर्योगस्तेन । ज्ञानदर्शनविनाकृतस्य हि चारित्रस्य सम्यक्चारित्रस्य व्यवच्छेदार्थं सम्यक्त्वज्ञानग्रहणमिति ।

फलमाह—

तथा भव्यत्वपाकेन यस्यैतत्त्रितयं भवेत् ।
सम्यग्ज्ञानक्रियायोगाज्जायते मोक्षभाजनम् ॥५४॥

तथेत्युपदर्शने। भव्यत्वपाकेन परिपक्वभव्यत्वेन तद्भव एवावश्यं मोक्षे गन्तव्यमिति। भव्यत्वस्य परिपाकेन यस्य पुंस एतत्त्रितयं दर्शनज्ञानचारित्ररूपं भवेत् । यत्तदोर्नित्याभिसम्बन्धात् सोऽनुक्तोऽपि सम्बध्यत इति। स पुमान्मोक्षभाजनं जायते निर्वाणश्रियं भुङ्क्त इत्यर्थः। कस्मात् सम्यग्ज्ञानक्रियायोगात्। सम्यगिति। सम्यक्त्वं दर्शनं, ज्ञानमागमावबोधः,क्रिया च चरणकरणात्मिकास्तासां योगः सम्बन्धस्तस्माद्। न च केवलं दर्शनं ज्ञानं चारित्रं वा मोक्षहेतुकम्। यदाहुर्भद्रबाहुस्वामिपादाः—

सुबहुं पि सुयमहीयं किं काही चरणविप्पमुक्कस्स।
अन्धस्स जह पलित्ता दीवसयसहस्सकोडी वि॥

तथा

नाणं चरित्तहीणं लिंगग्गहणं च दंसणविहीणं।
संजमहीणं च तवं जो चरइ निरत्थयं तस्स॥

दर्शनज्ञानचारित्राणि हि समुदितान्येव मोक्षकारणानि। यदुवाच, वाचकमुख्यः—"दर्शनज्ञानचारित्राणि मोक्षमार्ग" इति।

प्रमाणे आह—

प्रत्यक्षं च परोक्षं च द्वे प्रमाणे तथा मते।
अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह॥ ५५॥

तथेति प्रस्तुतमतानुसन्धाने। द्वे प्रमाणे मते अभिमते, के ते इत्याह—प्रत्यक्षं च परोक्षं चेति । अश्नुते अक्ष्णोति वा व्याप्नोति सकलद्रव्यक्षेत्रकालभावानित्यक्षो जीवोऽश्नुते विषयमित्यक्षमिन्द्रियं च अक्षमक्षं प्रतिगतं प्रत्यक्षमिन्द्रियाण्याश्रितव्यवहारसाधकं यज्ज्ञानमुत्पद्यते तत् प्रत्यक्षमित्यर्थः। अवधिमनःपर्यायकेवलज्ञानानि, तद्भेदाश्च प्रत्यक्षमेव अत एव सांव्यवहारिकपारमार्थिकैन्द्रियकातीन्द्रियकादयो भेदा अनुमानादधिकज्ञानविशेषप्रकाशकत्वादत्रैवान्तर्भवन्ति। परोक्षं चेति। अक्षाणां परं परोक्षम्। अक्षेभ्यः परतो

वर्तत इति वा । परेणेन्द्रियादिना वोक्ष्यते परोक्षं स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदम् । अमुयैव भङ्ग्या मतिश्रुतज्ञाने अपि परोक्षमेवेति, द्वे प्रमाणे । प्रमाणमुक्त्वा तद्गोचरमाह—तु पुनः, इह जिनमते,प्रमाणविषयः प्रमाणयोः प्रत्यक्षपरोक्षयोर्विषयो गोचरो ज्ञेय इत्यध्याहारः । किं तदित्याशङ्क्यायमनन्तधर्मकं वस्त्विति । वस्तुतत्त्वं पदार्थस्वरूपं किंविशिष्टम् अनन्तधर्मकम् अनन्तास्त्रिकालविषयत्वादपरिमिता ये धर्माः सहभाविनः क्रमभाविनश्च पर्याया यत्रेति । अनेन साधनमपि दर्शितम् । तथा हि । सत्त्वमिति धर्मि, अनन्तधर्मात्मकत्वं साध्यो धर्मः, सत्त्वान्यथानुपपत्तेरिति हेतुः । अन्यथाऽनुपपत्त्येकलक्षणत्वाद्धेतोरन्तर्व्याप्त्यैव साध्यस्य सिद्धत्वाद् दृष्टान्तादिभिर्न प्रयोजनं, यदनन्तधर्मकं न भवति तत् सदपि न भवति यथा वियदिन्दीवरमिति केवलव्यतिरेकी हेतुः । साधर्म्यदृष्टान्तानां पक्षकुक्षिनिक्षिप्तत्वेनान्वयायोगाद् । अनन्तधर्मात्मकत्वं चात्मनि तावत्साकारानाकारोपयोगिता कर्तृत्वं भोक्तृत्वं प्रदेशाष्टकनिश्चलता अमूर्तत्वमसङ्ख्यातप्रदेशात्मकता जीवत्वमित्यादयः सहभाविनो धर्मा, हर्षविषादशोकसुखदुःखदेवनारकातिर्यङ्नरत्वादयस्तु क्रमभाविनः । धर्मास्तिकायादिष्वप्यसङ्ख्येयप्रदेशात्मकत्वं गत्याद्युपग्रहकारित्वं मत्यादिज्ञानविषयत्वं तत्तदवच्छेदकावच्छेद्यत्वमवस्थितत्वमरूपित्वमेकद्रव्यत्वं निष्क्रियत्वमित्यादयः । घटे पुनरामत्वं पाकजरूपादिमत्त्वं पृथुबुध्नोदरकम्बुग्रीवत्वं जलादिधारणहरणसामर्थ्यं मत्यादिज्ञानविषयत्वं नवत्वं पुराणत्वमित्यादयः । एवं सर्वपदार्थेषु नानानयमताभिज्ञेन शाब्दानार्थांश्च पर्यायान् प्रतीत्य वाच्यशब्देष्वप्युदात्तानुदात्तस्वरितविवृतसंवृतघोषनादाघोषाल्पप्राणमहाप्राणताऽऽदयः, तत्तदर्थप्रत्यायनशक्त्यादयश्चावसेयाः । अस्य हेतोरने-

कान्तप्रचण्डमुद्गराघातदलितशक्तित्वेनासिद्धविरुद्धानैकान्तिकत्वादीनां कण्टकानामनवकाश एवेत्येवंविधपर्यायास्यन्तसुभगं वस्तु जिनशासने प्रमाणविषय इत्यर्थः ।

लक्ष्यनिर्देशं कृत्वा लक्षणमाह—

अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरज् ज्ञेयं परोक्षं ग्रहणेक्षया ॥ ५६ ॥

तत्र प्रत्यक्षमिति लक्ष्यनिर्देशः । अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशमिति लक्षणनिर्देशः । परोक्षोऽक्षगोचरातीतः, ततोऽन्योऽपरोक्षस्तद्भावस्तत्ता तया साक्षात्कृततयेति यावत् । अर्थ्यत इत्यर्थो गम्यत इति हृदयम्, अर्थ्यत इति वाऽर्थो दाहपाकाद्यर्थक्रियाऽर्थिभिरभिलष्यत, इति तस्य । ग्राहकं, व्यवसायात्मकतया परिच्छेदकं यज् ज्ञानं तदीदृशमिति ईदृगेव प्रत्यक्षमिति संटङ्कः । अपरोक्षतयेत्यनेन परोक्षलक्षणसङ्कीर्णतामध्यक्षस्य परिहरति । तस्यासाक्षात्कारितयाऽर्थग्रहणरूपत्वादिति । ईदृशमिति । अमुना तु पूर्वोक्तन्यायात्सावधारणत्वेन विशेषणकदम्बसचिवलक्षणज्ञानोपदर्शनात्परपरिकल्पितस्य युक्तेरयं प्रत्यक्षतां प्रतिक्षिपति। एवं च यदाहु"रिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्," तथा "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमि"त्यादि, तदयुक्तमित्युक्तं भवति । अपूर्वप्रादुर्भावस्य प्रमाणबाधितत्वादत्यन्तासतां शशविषाणादीनामप्युत्पत्तिप्रसङ्गात् । तस्मादिदमात्मरूपतया विद्यमानमेव विशेषकुद्धेतुकलापसन्निधानात्साक्षादर्थग्रहणपरिणामरूपतया निर्वर्त्तते, तथा चोत्पन्नजन्मरूपादिविशेषणं न सम्भवेदथैवंविधार्थसूचकमेवैतादित्याचक्षीथास्तथा सत्यविगानमेवेत्यास्तां तावत् । अधुना परोक्षलक्षणं दर्शयति ।

इतरदित्यादि । अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानं प्रत्यक्षमुक्तम् । तस्मादितरदसाक्षादर्थग्राहकं ज्ञानं परोक्षमिति ज्ञेयमवगन्तव्यम् । तदपि स्वसंवेदनापेक्षतया प्रत्यक्षमेव, बहिरर्थापेक्षया तु परोक्षव्यपदेशमश्नुत इति दर्शयन्नाह। ग्रहणेक्षयेति । इह ग्रहणं प्रक्रमाद्बहिः प्रवर्त्तनमुच्यते, अन्यथा विशेषणवैयर्थ्यात्तस्येक्षाऽपेक्षा तया बहिःप्रवृत्तिपर्यालोचनयेति यावत् । तदयमर्थो यद्यपि स्वयं प्रत्यक्षं तथाऽपि लिङ्गशब्दादिद्वारेण बहिर्विषयग्रहणेऽसाक्षात्कारितया व्याप्रियत इति परोक्षमित्युच्यत इत्यर्थः ।

पूर्वोक्तमेव वस्तुतत्त्वमनन्तधर्मात्मकतया दृढयन्नाह—

येनोत्पादव्ययध्रौव्ययुक्तं यत्सत्तदिष्यते ।
अनन्तधर्मकं वस्तु तेनोक्तं मानगोचरः ॥ ५७ ॥

येन कारणेन यदुत्पादव्ययध्रौव्ययुक्तं तत्सत्सत्त्वरूपमिष्यते तेन कारणेनानन्तधर्मकं वस्तु मानगोचरः, प्रत्यक्षपरोक्षप्रमाणविषय, उक्तं कथितमिति सम्बन्धः । उत्पादश्च व्ययश्च ध्रौव्यञ्च, उत्पादव्ययध्रौव्याणि तेषां युक्तं मेलस्तदेव सत्त्वमिति प्रतिज्ञा,इष्यते केवलज्ञानिभिरभिलष्यत इति । वस्तुतत्त्वं चोत्पादव्ययध्रौव्यात्मकम् । तथा हि । उर्वीपर्वततर्वादिकं सर्वं वस्तु द्रव्यात्मना नोत्पद्यते, विपद्यते, वा परिस्फुटमन्वयादर्शनात् । लूनपुनर्जातनखादिष्वन्वयदर्शनेन व्यभिचार इति न वाच्यम् । प्रमाणेन बाध्यमानस्यान्वयस्यापरिस्फुटत्वात् । न च प्रस्तुतोऽन्वयः प्रमाणविरुद्धः, सत्यप्रत्यभिज्ञानसिद्धत्वात्—

सर्वव्यक्तिषु नियतं क्षणे क्षणेऽन्यत्वमथ च न विशेषः ।
सदृशोश्चित्यपचित्योराकृतिजातिव्यवस्थानादिति—

वचनात्ततो द्रव्यात्मना स्थितिरेव सर्वस्य वस्तुनः, पर्यायात्मना तु सर्वं वस्तूत्पद्यते विपद्यते, चास्खलितपर्यायानुभव-

सद्भावात् । न चैवं शुक्लशङ्खे पीतादिपर्यायानुभवेन व्यभिचारः, तस्य स्खलद्रूपत्वात् । न खलु सोऽस्खलद्रूपो येन पूर्वाकारविनाशोऽजहद्वृत्तोत्तराकारोत्पादाविनाभावी भवेत् । न च जीवादौ वस्तुनि हर्षामर्षौदासीन्यादिपर्यायपरंपराऽनुभवः स्खलद्रूपः, कस्य चिद्बाधकस्याभावात् । ननूत्पादादयः परस्परं भिद्यन्ते न वा, यदि भिद्यन्ते कथमेकं वस्तु त्र्यात्मकं, न भिद्यन्ते चेत्तथाऽपि कथमेकं वस्तु त्र्यात्मकं, तथा च यद्युत्पादादयो भिन्नाः कथमेकं त्र्यात्मकम्, अथोत्पत्त्यादयोऽभिन्नाः कथमेकं त्र्यात्मकमिति चेत् । तदयुक्तं, कथञ्चिद्भिन्नलक्षणत्वेन तेषां कथंचिद्भेदाभ्युपगमात् । तथा हि उत्पादविनाशध्रौव्याणि, स्याद्भिन्नानि, भिन्नलक्षणत्वा,द्रूपादिवत् । न च भिन्नलक्षणत्वमसिद्धम् । असत आत्मलाभः,सतः सत्त्वाविप्रयोगो,द्रव्यरूपतयाऽनुवर्त्तनं,च खलूत्पादादीनां परस्परमसङ्कीर्णानि लक्षणानि सकललोकसाक्षिकाण्येव । न चामी भिन्नलक्षणा अपि,परस्परानपेक्षाः,खपुष्पवदसत्त्वापत्तेः । तथा ह्युत्पादः, केवलो नास्ति,स्थितिविगमरहितत्वात्, कूर्मरोमवत् । तथा विनाशः, केवलो नास्ति, स्थित्युत्पत्तिरहितत्वा,त्तद्वदेव । स्थितिः, केवला नास्ति, विनाशोत्पादशून्यत्वात्, तद्वदेव,त्र्यन्योन्यापेक्षाणामुत्पादादीनां वस्तुनि सत्त्वं प्रतिपत्तव्यम् । तथा चोक्तं—

"घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वलम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद्वस्तुत्रयात्मकम्" ॥

इति । व्यतिरेकश्च यदुत्पादव्ययध्रौव्यात्मकं न भवति तद्वस्त्वेव न, यथा खरविषाणं, यथेदं तथेदमिति । अत एवान-

न्तधर्मकं वस्तु मानगोचरः प्रोक्तम् । अनन्ता धर्माः पर्यायाः सामान्यविशेषलक्षणा यत्रेत्यनन्तधर्मकं वस्त्विति । उत्पादव्ययध्रौव्यात्मकस्यैवानेकधर्मकत्वं युक्तियुक्ततामनुभवतीति ज्ञापनायैव भूयोऽनन्तधर्मकपदप्रयोगो, न पुनः पाश्चात्यपद्योक्तानन्तधर्मकपदेन पौनरुक्त्यमाशङ्कनीयमिति पद्यार्थः ।

ग्रन्थस्य बालावबोधार्थफलकत्वादथोपसंहरन्नाह—

जैनदर्शनसंक्षेप इत्येष कथितोऽनघः ।
पूर्वापरविघातस्तु यत्र क्वापि न विद्यते ॥ ५८ ॥

इति पूर्वोक्तप्रकारेण, एष प्रत्यक्षलक्ष्यो, जैनदर्शनसंक्षेपः कथितः, विस्तरस्यागाधत्वेन वक्तुमगोचरत्वात् । उपयोगसारः संक्षेपो निवेदितः किंभूतोऽनघो निर्दूषणः सर्ववक्तव्यस्य सर्वज्ञमूलत्वेन दोषकालुष्यानवकाशात् । तु समुच्चयार्थे । तत्र पुनः पूर्वापरविघातः क्वापि न विद्यते, पूर्वस्मिन्नादा,वपरस्मिन्, मान्ते च विघातो विरुद्धार्थता यत्र दर्शने क्वापि पर्यन्तग्रन्थेऽपि परस्परविसंवादो नास्ति, आस्तां तावत्केवलभाषितेषु द्वादशाङ्गेषु पारंपर्यग्रन्थेष्वपि सुसम्बद्धार्थत्वाद् विरुद्धार्थदौर्गन्ध्याभावः । अयं भावो, यत् परतैर्थिकानां मूलशास्त्रेष्वपि न युक्तियुक्ततां पश्यामः, किं पुनः पाश्चात्यविमलम्भग्रथितग्रन्थकथासु, यच्च क्वापि क्वापि कारुण्यादिपुण्यकर्मपुण्यानि च वचांसि कानि चिदाकर्णयामस्तान्यपि त्वदुक्तसूक्तसुधापयोधिमन्थोद्गतान्येव रत्नानीव सङ्गृह्य स्वात्मानं रत्नपतय इव बहु मन्वानाः मुधा प्रगल्भन्ते यदाहुः—श्रीसिद्धसेनदिवाकरपादाः—

"सुनिश्चितं नः परतन्त्रयुक्तिषु
स्फुरन्ति याः काश्चन सूक्तिसम्पदः ।

तथैव ताः पूर्णमहार्णवोत्थिता
जगत्प्रमाणं जिनवाक्यविप्रुष" इति परमार्थः।

अथ वैशेषिकमतस्य देवताऽऽदिसाम्येन नैयायिकेभ्यो ये विशेषं न मन्यन्ते तान् बोधयन्नाह—

देवताविषये भेदो नास्ति नैयायिकैः समम् ।
वैशेषिकाणां तत्त्वेषु विद्यतेऽसौ निर्दिश्यते ॥५९॥

शिवदेवतासाम्येऽपि,तत्त्वादिविशेषविशिष्टत्वाद् वैशेषिकास्तेषां वैशेषिकाणां काणादादीनां नैयायिकैराक्षपादैः समं सार्द्धं देवताविषये शिवदेवताऽभ्युपगमे भेदो विशेषो नास्ति,तत्त्वेषु शासनरहस्येषु भेदो विद्यते । तुशब्दोऽध्याहार्यः । असौ विशेषो नैयायिकेभ्यः पृथग्भावो, निर्दिश्यते प्रकाश्यत इत्यर्थः ।

तान्येव तत्त्वान्याह—

द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम् ।
विशेषसमवायौ च तत्त्वषट्कं हि तन्मते ॥ ६० ॥

तन्मते वैशेषिकमते, हि निश्चयेन, तत्त्वषट्कं ज्ञेयमिति सम्बन्धः । कथमित्याह–द्रव्यं गुण इत्यादि । आदिमतत्त्वं द्रव्यनाम, भेदबाहुल्येऽपि सामान्यादेकम् । द्वितीयतत्त्वं गुणनाम,तथेति भेदान्तरसूचने । तृतीयं तत्त्वं कर्मसञ्ज्ञम् । चतुर्थकं च तत्त्वं सामान्यम् । चतुर्थमेव चतुर्थकं स्वार्थे कः प्रत्ययः । चः समुच्चये । अन्यच्च विशेषसमवायौ । विशेषश्च समवायश्चेति द्वन्द्वः । इति तद्दर्शने तत्त्वानि षड् ज्ञेयानि ।

भेदानाह—

तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि ।
कालदिगात्ममनांसि च, गुणाः पुनश्चतुर्विंशतिधा ६१

स्पर्शरसरूपगन्धाः शब्दः सङ्ख्या विभागसंयोगौ ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च ॥ ६२ ॥
बुद्धिः सुखदुःखेच्छा धर्माधर्मौ प्रयत्नसंस्कारौ ।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते ॥ ६३ ॥

नवद्रव्याणि चतुर्विंशतिगुणाश्च, निगदसिद्धान्येव । संस्कारस्य वेगभावनास्थितिस्थापकभेदात्त्रिविधत्वेऽपि संस्कारत्वजात्यपेक्षयैकत्वम् । शौर्यौदार्यादीनां च गुणानामेष्वेव चतुर्विंशतिगुणेष्वन्तर्भावान्नाधिक्यम् ।

कर्मसामान्यभेदानाह—

उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम् ।
पञ्चविधं कर्मैतत्परापरे द्वे तु सामान्ये ॥ ६४ ॥

पञ्चापि कर्मभेदाः स्पष्टा एव, गमनग्रहणाद् भ्रमणरेचनस्यन्दनाद्यवरोधः । तु पुनः, सामान्ये द्वे द्विसङ्ख्ये । के ते इत्याह—परापरे । परञ्चापरं च परापरे, परसामान्यमपरसामान्यं चेत्यर्थः ।

एतद्व्यक्तिं विशेषव्यक्तिं चाह—

तत्र परं सत्ताऽऽख्यं द्रव्यत्वाद्यपर,मथ विशेषस्तु ।
निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिशेत् ॥६५॥

तत्र तयोर्मध्ये परं सत्ता भावो महासामान्यमिति वोच्यते, द्रव्यत्वाद्यवान्तरसामान्यापेक्षया महाविषयत्वात् । अपरसामान्यं द्रव्यत्वादि, एतच्च सामान्यविशेष इत्यपि व्यपदिश्यते । तथा हि । द्रव्यत्वं नवसु द्रव्येषु वर्तमानत्वात्सामान्यं, गुणकर्मभ्यो व्यावृत्तत्वाद्विशेषः, ततः कर्मधारये सामान्यविशेष इति । एवं द्रव्यत्वाद्यपक्षया पृथिवीत्वादिकमपरं, तदपेक्षया घटत्वादि-

कम् । एवं चतुर्विंशतौ गुणेषु वृत्तेर्गुणत्वं सामान्यं, द्रव्यकर्मभ्यो व्यावृत्तेश्च विशेषः। एवं गुणत्वापेक्षया रूपत्वादिकं, तदपेक्षया नीलत्वादिकम् । एवं पञ्चसु कर्मसु वर्त्तमानत्वात्कर्मत्वं सामान्यं, द्रव्यगुणेभ्यो व्यावृत्तत्वाद्विशेषः। एवं कर्मत्वापेक्षयोत्क्षेपणत्वादिकं ज्ञेयम् । तत्र सत्ता द्रव्यगुणकर्मभ्योऽर्थान्तरं कया युक्त्येति चेत् । उच्यते । न द्रव्यं सत्ता, द्रव्यादन्येत्यर्थः, एकद्रव्यत्त्वाद्, एकैकस्मिन् द्रव्ये वर्तमानत्वादित्यर्थः, द्रव्यत्ववद्, यथा द्रव्यत्वं नवसु द्रव्येषु प्रत्येकं वर्तमानं द्रव्यं न भवति, किं तु सामान्यं विशेषलक्षणं द्रव्यत्वमेव, एवं सत्ताऽपि । वैशेषिकाणां हि, अद्रव्यं वा द्रव्यं, अनेकद्रव्यं वा द्रव्यं, तत्राद्रव्यं द्रव्यमाकाशं कालो दिगात्मानः परमाणवः, अनेकद्रव्यं तु द्व्यणुकादिस्कन्धा, एकद्रव्यं तु द्रव्यमेव न भवति, एकद्रव्यवती सत्ता इति द्रव्यलक्षणविलक्षणत्त्वान्न द्रव्यम् । एवं न गुणः सत्ता, गुणेष्वभावाद्, गुणत्ववत् । यदि हि सत्ता, गुणः स्याद् न तर्हि गुणेषु वर्त्तेत, निर्गुणत्वाद् गुणानां, वर्त्तते च गुणेषु सत्ता, "सन् गुण" इति प्रतीतेः। तथा न सत्ता कर्म, कर्मसु भावात्, कर्मत्ववत् । यदि च सत्ता कर्म स्यान्न तर्हि कर्मसु वर्त्तेत, निष्कर्मत्वात्कर्मणां, वर्त्तते च कर्मसु भावः, "सत्कर्मे"ति प्रतीतेः । तस्मात्पदार्थान्तरं सत्ता। अथ विशेषपदार्थमाहार्याऽर्द्धेन–विशेषस्त्विति । निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिशेत् । विनिर्दिशेत् कथ येद्, आचार्य इति ज्ञेयम् । कथमित्याह–अन्त्यो विशेषो नित्यद्रव्यवृत्तिरिति। तथा हि । नित्यद्रव्यवृत्तयोऽन्त्या विशेषा अत्यन्तव्यावृत्तिहेतवस्ते द्रव्यादिवैलक्षण्यात् पदार्थान्तरम् । तथा च प्रशस्तकारः, अन्तेषु भवा अन्त्याः, स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनःसु

प्रतिद्रव्यमेकशो वर्त्तमाना असन्तव्यावृत्तिबुद्धिहेतवः । तथा ऽस्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिक्रियाऽवयवोपचयापचयविशेषसंयोगानिमित्तासम्भवाद्, येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयं विलक्षणोऽमिति प्रत्ययव्यावृत्ति,र्देशकालविप्रकर्षदृष्टे च परमाणौ स एवायमिति च प्रत्यभिज्ञानं च भवति तेऽन्त्या विशेषा इति । अमी च विशेषा एव, न तु द्रव्यत्वादिवत्सामान्यविशषोभयरूपा व्यावृत्तेरेव हेतुत्वादित्यर्थः ।

समवायपदार्थव्यक्तिलक्षणमाह—

य इहायुतसिद्धानामाधाराधेयभूतभावानाम् ।
सम्बन्ध इह प्रत्ययहेतुः प्रोक्तः स समवायः ॥ ६६ ॥

इह प्रस्तुतमते, अयुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुर्यः सम्बन्धः स समवायः । यथेह तन्तुषु पट इत्यादिप्रत्ययस्यासाधारणं कारणं समवायः । यद्वशात् स्वकारणसामर्थ्यादुपजायमानं पटाद्याधार्यं तन्त्वाद्याधारे सम्बध्यते, यथा छिदिः क्रिया छेद्येनेति । अयुतसिद्धानामिति । परस्परपरिहारेण पृथगाश्रयानाश्रितानामाश्रयाश्रयिभाव इति । परस्परवैधर्म्यं तु विविक्तैरभ्यूह्यं, षण्णामपि पदार्थानां स्वरूपकथनमात्राधिकृतत्वाद् ग्रन्थस्य, नेह प्रतन्यत इति ।

प्रमाणव्यक्तिमाह—

प्रमाणं च द्विधाऽमीषां प्रत्यक्षं लैङ्गिकं तथा ।
वैशेषिकमतस्यैवं संक्षेपः परिकीर्त्तितः ॥ ६७ ॥

यद्यप्यौलूक्यशासने व्योमशिवाचार्योक्तानि त्रीणि प्रमाणानि, तथाऽपि श्रीधरमतापेक्षयाऽत्रोभे एव निगदिते । अमीषां वैशेषिकाणां, प्रमाणं द्विधा द्विप्रकारम् । चः पुनरर्थे । कथमित्याह

प्रत्यक्षमेकं प्रमाणं, तथेति द्वितीयभेदपरामर्शे, लैङ्गिकमनुमानम्। उपसंहरन्नाह–एवमिति। एवमिति प्रकारसूचनं, यद्यपि प्रमातृफलाद्यपेक्षया बहु वक्तव्यं, तथाऽप्येवममुना प्रकारेण वैशेषिकमतस्य संक्षेपः कथितः परिकीर्त्तित इति।

षष्ठं दर्शनमाह—

जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविशेषणः।
देवो न विद्यते कोऽपि यस्य मानं वचो भवेत् ॥६८॥

जैमिनिमुनेरमी इति जैमिनीयाः। पुत्रपौत्राद्यर्थे तद्धित ईयप्रत्ययः। जैमिनिशिष्याश्चैके उत्तरमीमांसावादिनः, एके पूर्वमीमांसावादिनः। तत्रोत्तरमीमांसावादिनो वेदान्तिनस्ते हि केवलब्रह्माद्वैतवादसाधनव्यसनिनः शब्दार्थखण्डनाय युक्तीः खेटयन्तो निर्वाच्यतत्त्वे व्यवतिष्ठन्ते। यदाहुः—

"अन्तर्भावितसत्त्वं चेत्कारणं सदसत्ततः।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः॥
यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा।
यद्येतत्स्वयमर्थेभ्यो रोचते तत्र के वयम्॥
एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्व चित्।
आस्ते न वीरधीरस्य भङ्गः सङ्गरकेलिषु॥
एवं वादिप्रतिवादिनोः
समस्तलोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः।
का तदस्तु गतिस्तद्वद्वस्तुधीव्यवहारयोः॥
उपपादयितुं तैस्तैर्मतैरशङ्कनीययोः।
अनिर्वक्तव्यतावादपादसेवा गतिस्तयोः॥
इत्यादिप्रलयकालानिलक्षुभितचरमसलिलराशिकल्लोलमाला-

ऽनुकारिणः परब्रह्माद्वैतसाधकहेतूपन्यासाः प्रोच्छलन्तश्चतुरचमत्कारं जनयन्तः क पर्यवस्यन्ति तास्तु युक्तयः सूत्रकृतानुल्लिङ्गितत्वाद् ग्रन्थविस्तरभयाच्च नेह प्रपञ्च्यन्ते, ऽभियुक्तैस्तु खण्डनमहातर्कादवसेयाः । पूर्वमीमांसावादिनश्च द्विधा प्राभाकरा भाट्टाश्च क्रमेण पञ्चषट्प्रमाणप्ररूपकाः । अत्र तु सामान्येन सूत्रकृत् पूर्वमीमांसावादिन एव जैमिनीयानुद्दिष्टवान् । ते पुनर्जैमिनीयाः, प्राहुः कथयन्ति, कथमित्याह—सर्वज्ञादिविशेषणः कोऽपि देवो न विद्यते यस्य वचो वचनं मानं प्रमाणं भवेत् । सर्वज्ञादिविशेषण इति । सर्वज्ञादिना गुणेन विशेष्य इति । आदिशब्दाद्विभुत्वनित्यत्वचिदात्मकत्वादिविशिष्टः कोऽपि देवो नास्ति यद्वचनं प्रमाणतामनुभवेद्, मानुषतनुत्वाविशेषेण विप्रलम्भकत्वाद् दुष्टपुरुषवत् । सर्वज्ञादिगुणविशिष्टपुरुषाद्यभाव इत्यर्थः । अथ किङ्कुरायमाणसुरासुरसेव्यमानताऽऽद्युपलक्षणेन त्रैलोक्यसाम्राज्यसूचकच्छत्रचामरादिविभूत्यन्यथानुपपत्तेश्चास्ति काश्चित् पुरुषविशेषः सर्वज्ञ इति चेन्न । त्वद्यथोक्तवचनप्रपञ्चोपन्यासैरेव निरस्तत्वाद् । यथा—

"देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान्" ॥

अथ यथाऽनादेरपि सुवर्णमलस्य क्षारमृत्पुटपाकादिप्रक्रियया शोध्यमानस्य निर्मलत्व, मेवमात्मनोऽपि निरन्तरज्ञानाद्यभ्यासेन विगतमलत्वात् किं न सम्भवेदिति मतिस्तदपि न ह्यभ्यासमात्रसाम्ये शुद्धेरपि तदेव तादवस्थ्यम् । यदुक्तम्—

"गरुत्मच्छाखामृगयोर्लङ्घनाभ्याससम्भवे ।
समानेऽपि समानत्वं लङ्घनस्य न विद्यते" ॥

न च सुतरां चरणशक्तिमानपि पङ्गुरखर्वपर्वतशिखामधिरोढुं क्षमः । उक्तञ्च—

"दशहस्तान्तरं व्योम्नो यो नामोत्प्लुत्य गच्छति।
न योजनशतं गन्तुं शक्तोऽभ्यासशतैरपि" ॥

अथ मा भवतु मानुषस्य सर्वज्ञत्वं, ब्रह्मविष्णुमहेश्वरादीनामस्तु ते हि देवाः, सम्भवन्त्यपि तेष्वतिशायिसम्पत्। यदाह कुमारिलः।

अथापि वेदहेतुत्वाद् ब्रह्मविष्णुमहेश्वराः।
कामं भवन्तु सर्वज्ञाः सार्वज्ञ्यं मानुषस्य किम्" ॥

एतदपि न, रागद्वेषमूलनिग्रहानुग्रहग्रस्तानामसम्भाव्यमिदमेषामिति। न च प्रत्यक्षं तत्साधकं, "संबद्धं वर्त्तमानं च गृह्यते चक्षुरादिने"ति वचनात्। न चानुमानं, प्रत्यक्षदृष्ट एवार्थे तत्प्रवृत्तेः। न चागमः, सर्वज्ञस्यासिद्धत्वेन तस्य विवादास्पदत्वात्। न चोपमानं, तदभावादेव। अर्थापत्तिरपि न, सर्वज्ञसाधकस्यान्यथाऽनुपपन्नलिङ्गस्यादर्शनात्। यदि परमभावप्रमाणगोचरः सर्वज्ञ इति स्थितम्। प्रयोगश्चात्र—नास्ति सर्वज्ञः, प्रत्यक्षादिगोचरातिक्रान्तत्वात्, शशशृङ्गवदिति।

अथ कथं यथाऽवस्थिततत्त्वनिर्णय इत्याह—

तस्मादतीन्द्रियार्थानां साक्षाद् द्रष्टुरभावतः।
नित्येभ्यो वेदवाक्येभ्यो यथाऽर्थत्वविनिश्चयः ॥६९॥

तस्मात्प्रामाणिकपुरुषाभावादतीन्द्रियार्थानां चक्षुरगोचरपदार्थानां साक्षाद् द्रष्टुर्ज्ञातुः सर्वज्ञादेः पुरुषस्याभावाद् नित्येभ्यः शाश्वतेभ्यो वेदवाक्येभ्योऽपौरुषेयवचनेभ्यो यथाऽर्थत्वविनिर्णयो यथाऽवस्थितपदार्थधर्मादिस्वरूपविवेचनं "भवती"त्यध्याहारः। अपौरुषेयत्वं च वेदानाम्—

"अपाणिपादो ह्यमनो गृहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः।

स वेत्ति विश्वं न च तस्य वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम्" ॥

इत्यादिभावनया रागद्वेषादिदोषतिरस्कारपूर्वकं भावनीयमिति ।

अथ यथाऽवस्थितार्थव्यवस्थापकं तत्त्वोपदेशमाह—

अत एव पुरा कार्यो वेदपाठः प्रयत्नतः ।
ततो धर्मस्य जिज्ञासा कर्त्तव्या धर्मसाधनी ॥७०॥

यतो हेतोर्वेदाभिहितानुष्ठानादेव तत्त्वनिर्णयः, अत एव पुरा पूर्वं प्रयत्नतो यत्नाद्वेदपाठः कार्यः 'ऋग्यजुःसामाथर्वाणो वेदास्तेषां पाठः कण्ठपीठलुठत्पाठप्रतिष्ठा, नानुश्रवणमात्रेण सम्यगवबोधस्थिरता, ततोऽनन्तरं साधनीयपुण्योपचयहेतुधर्मस्य हेयोपादेयस्वरूपस्य वेदाभिहितस्य जिज्ञासा ज्ञातुमिच्छा कर्त्तव्या विधेया । वेदोक्ताभिधेयविधाने यतितव्यमित्यर्थः ।

वेदोक्तधर्मोपदेशमेवाह—

नोदनालक्षणो धर्मो, नोदना तु क्रियां प्रति ।
प्रवर्त्तकं वचः, प्राहुः स्वःकामोऽग्निं यजेद्यथा॥७१॥

नोदनैव लक्षणं यस्य स नोदनालक्षणो धर्मः । तत्स्वरूपमेव सूत्रकृदाह। तु पुन,र्नोदनां क्रियां प्रति प्रवर्त्तकं वचः प्राहुः । वेदोक्तस्वर्गादिसाधकाम्नायस्य क्रियाप्रवर्त्तकं वचनं नोदनामाहुरित्यर्थः। शिष्यानुकम्पया तत्सूत्रेणैव दृष्टान्तयन्नाह—स्वःकामोऽग्निं यजेद्यथा । यथा येन प्रकारेण स्वःकामः स्वर्गाभिलाषी जनोऽग्निं यजेद् अग्निकार्यं कुर्यात् । यथाऽहुस्तत्सूत्रम् । अग्निहोत्रं जुहुयात्स्वर्गकाम इति ।

प्रमाणान्याह—

प्रत्यक्षमनुमानं च शब्दश्चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥७२॥

जैमिनेः पूर्ववेदान्तवादिनः, षट् प्रमाणानि ज्ञेयानीति सम्बन्धः । यद्यपि प्राभाकराणां मते पञ्च प्रमाणानि, भाट्टानामेव षट्, तथाऽप्यत्र ग्रन्थकृत्सामान्यतः षट्सङ्ख्यामाचष्टे ।

प्रमाणनामानि निगदसिद्धान्येव, निरुक्तमाह—

तत्र प्रत्यक्षमक्षाणां संप्रयोगे सतां मतिः ।
आत्मनो बुद्धिजन्मेत्यनुमानं लैङ्गिकं पुनः ॥७३॥

तत्र प्रमाणषट्के, अक्षाणान्द्रियाणां, संप्रयोगे पदार्थैः सह संयोगे, सतामुपहितेन्द्रियाणां मतिर्बुद्धिरिदमित्यवबोधः, तत्प्रत्यक्षं प्रमाणं "भवती"त्यध्याहारः । यत्तदावनुक्ताप्यर्थसम्बन्धौ ज्ञेयौ । सतामिति—विदुषामदुष्टेन्द्रियाणामित्यर्थः । एतावता मरुमरीचिकायां जलभ्रमः, शुक्तौ रजतभ्रमश्चेन्द्रियार्थसंप्रयोगजोऽपि द्रष्टुरविकलेन्द्रियत्वाभावान्न प्रत्यक्षं तत्प्रमाणकोटिमधिशेते । अनुमानमाह—आत्मनो बुद्धिजन्मेत्यनुमानं लैङ्गिकं पुनः । आत्मा यदनुमिमीते स्वयं, तदनुमानमित्यर्थः । अनुमानलैङ्गिकयोः शब्दाभेदेऽप्यनुमीयत इत्यनुमानं, लिङ्गाज्जातं लैङ्गिकमिति व्युत्पत्तिभेदाद्भेदो ज्ञेय उभयशब्दकथनं तु बालावबोधार्थमेवेति ।

शाब्दं शाश्वतवेदोत्थ,मुपमानं प्रकीर्त्तितम् ।
प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य भाजनम् ॥७४॥

शाब्दमागमप्रमाणं शाश्वतवेदोत्थं, शाश्वतान्नित्याद्वेदाज्जातम् । आगमप्रमाणमित्यर्थः । शाश्वतत्वं च वेदानामपौरुषेयत्वादेव ।

उपमानमाह–यत्प्रसिद्धार्थस्य प्रतीतपदार्थस्य साधर्म्यादप्रसिद्धस्य वस्तुनः साधनं तदुपमानं प्रमाणं प्रकीर्त्तितं कथितम् । यथा प्रसिद्धगोगवयस्वरूपो वनेचरोऽप्रसिद्धगवयस्वरूपं नागरिकं प्राह, "यथा गौस्तथा गवय"इति, भोः खुरककुदलाङ्गूलसास्नाऽऽदिमन्तं पदार्थं गामिति जानासि, गवयोऽपि तथास्वरूपो ज्ञेय इत्युपमानम् । अत्र सूत्रानुक्तावपि यत्तदावर्थसम्बन्धार्थमध्याहार्यौ ।

अर्थापत्तिमाह—

दृष्टार्थानुपपत्त्या तु कस्याप्यर्थस्य कल्पना ।
क्रियते यद्बलेनासावर्थापत्तिरुदाहृता ॥ ७५ ॥

असौ पुनरर्थापत्तिरुदाहृता कथिता, अर्थापत्तिप्रमाणं प्रोक्तमित्यर्थः । यद्बलेन कस्याप्यदृष्टस्यार्थस्य कल्पना क्रियते सङ्घटना विधीयते,कया दृष्टार्थानुपपत्त्या दृष्टः परिचितः प्रत्यक्षलक्ष्यो योऽर्थो देवदत्ते पीनत्त्वादिः तस्यानुपपत्त्या अघटमानतया अन्यथानुपपत्तेः । यथा पीनो देवदत्तो दिवा न भुङ्क्ते, पीनत्वस्यान्यथानुपपत्त्या रात्राववश्यं भुङ्क्त इत्यर्थ इत्यत्र, दृष्टं विना भोजनं पीनत्वं दुर्घटं, दिवा च न भुङ्क्ते,ऽतो रात्राववश्यमदृष्टं भोजनं ज्ञापयतीत्यर्थापत्तिः प्रमाणम् ।

अथाभावप्रमाणमाह—

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्ताऽवबोधार्थं तत्राभावप्रमाणता ॥७६॥

यत्र वस्तुरूपे, अभावादौ पदार्थे प्रमाणपञ्चकं पूर्वोक्तं न जायते, तत्राभावप्रमाणता ज्ञेयेति सम्बन्धः । किमर्थमित्याह— वस्तुसत्ताऽवबोधार्थम् । वस्तुनोऽभावरूपस्य मुण्डभूतलादेः सत्ता

घटाद्यभावसद्भावः तस्यावबोधः प्रामाणिकपथावतारणं तदर्थं तद्धेतोरित्यर्थः। ननु कथमभावस्य प्रामाण्यं, प्रत्यक्षं तावद्भूतलमेवेदं घटादि न भवतीत्यन्वयव्यतिरेकद्वारेण वस्तुपरिच्छेदः, तदधिकं विषयमभावैकरूपं निराचष्ट, इति किं विषयमाश्रित्याभावप्रामाण्यं स्यात्। मुण्डभूतले घटाभावमाश्रित्येति चेत्। मैवम्। घटाभावप्रतिबद्धभूतलग्रहणासिद्धेः। तदुक्तम्—

"न तावदिन्द्रियेणैषां नास्तीत्युत्पद्यते मतिः।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि॥
गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया" इति॥

नास्तिताज्ञानग्रहणावसरे प्रामाण्यमेवाभावस्य, केवलं भावांश इन्द्रियसन्निकर्षजत्वेन पञ्चप्रमाणागोचरसञ्चरिष्णुतामनुभवन्नाबालगोपालाङ्गनाप्रसिद्धं व्यवहारं प्रवर्त्तयति। अभावांशस्तु प्रमाणपञ्चकविषयबहिर्भूतत्वात्केवलभूतलग्रहणाद्युपयोगित्वादभावप्रमाणव्यपदेशमश्नुत इति सिद्धमभावस्यापि युक्तियुक्ततया प्रामाण्यमिति।

उपसंहरन्नाह—

जैमिनीयमतस्यापि संक्षेपोऽयं निवेदितः।
एवमास्तिकवादानां कृतं संक्षेपकीर्त्तनम्॥७७॥

अपिशब्दान्न केवलमपरदर्शनानां, जैमिनीयमतस्याप्ययं संक्षेपो निवेदितः कथितः। वक्तव्यस्य बाहुल्याट्टीकामात्रे सामस्त्यकथनायोगात् संक्षेप एव प्रोक्तोऽस्ति। अथ सूत्रकृत्सम्मतसंक्षेपमुक्त्वा निगमनमाह। एवमिति। एवमित्थम्, आस्तिकवादिनामिह परलोकगतिपुण्यपापास्तिक्यवादिनां बौद्धनैयायिक-

साङ्ख्यजैनवैशेषिकजैमिनीयानां संक्षेपकीर्त्तनं कृतं, संक्षेपेण वक्तव्यमभिहितमित्यर्थः ।

विशेषान्तरमाह—

नैयायिकमतादन्ये भेदं वैशेषिकैः सह ॥
न मन्यन्ते मते तेषां पञ्चैवास्तिकवादिनः ॥७८॥

अन्य आचार्या नैयायिकमताद्वैशेषिकैः सह भेदं न मन्यन्ते दर्शनाधिष्ठात्रेकदैवतत्वात् पृथग्दर्शनं नाभ्युपगच्छन्ति तेषां मतापेक्षयाऽऽस्तिकवादिनः पञ्चैव ।

दर्शनानां षट्सङ्ख्या जगति प्रसिद्धा कथं फलतीत्याह—

षष्ठदर्शनसङ्ख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपात्कथ्यते तेन तन्मतम् ॥७९॥

ये नैयायिकवैशेषिकयोरेकरूपत्वेनाभेदं मन्यमाना दर्शनपञ्चकमेवाचक्षते, तन्मते षष्ठदर्शनसङ्ख्या लोकायतमतक्षेपात्पूर्यते। तु पुनरर्थे, किलेति परमाप्तान्नाये,तेन कारणेन तन्मतं चार्वाकमतं कथ्यते तत्स्वरूपमुच्यत इति ।

तदेवाह—

लोकायता वदन्त्येवं नास्ति देवो न निर्वृतिः ।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः ॥८०॥

लोकायता नास्तिका, एवममुना प्रकारेण वदन्ति कथमित्याह—सर्वज्ञादिर्नास्ति, निर्वृतिर्मोक्षो नास्ति, अन्यच्च, न विद्येते, कौ धर्माधर्मौ, धर्मश्चाधर्मश्चेति द्वन्द्वः । पुण्यपापे न स्त इत्यर्थः । पुण्यपापयोर्धर्माधर्मयोः फलं स्वर्गनरकादिरूपं नेति नास्ति, तदपि पुण्यपापयोरभावे कौतस्त्यं तत्फलमित्यादि । तच्छास्त्रो-

क्तमेव सोल्लुण्ठं दर्शयन्नाह—तथा च तन्मतम् । तथा चेत्युपदर्शने । तन्मतं, प्रस्तावान्नास्तिकमतम् ।

कथमित्याह—

एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! बृकपदं पश्य यद्बदन्ति बहुश्रुताः ॥८१॥

अयं लोकः संसार एतावानेव एतावन्मात्र एव यावान् यावन्मात्रमिन्द्रियगोचरः । इन्द्रियं स्पर्शनरसनघ्राणचक्षुःश्रोत्रभेदात्पञ्चविधं तस्य गोचरो विषयः । पञ्चेन्द्रियव्यक्तीकृतमेव वस्त्वास्ति नापरं किं चन । अत्र लोकग्रहणाल्लोकस्थपदार्थसार्थस्य सङ्ग्रहः । तथा परे पुण्यपापसाध्यं स्वर्गनरकाद्याहुः, तदप्रमाणं प्रत्यक्षाभावादेव । अप्रत्यक्षमप्यस्तीति चेच्छशशृङ्गवन्ध्यास्तनन्धयादीनामपि भावोऽस्तु । तथा हि । स्पर्शनेन्द्रियेण तावन्मृदुकठोरशीतोष्णस्निग्धरूक्षादिभावा उपलभ्यन्ते । रसनेन्द्रियेण कटुकषायाम्लमधुरास्वादलेह्यचूष्यपेयादयो वेद्यन्ते । घ्राणेन्द्रियेण मृगमदमलयजघनसारागुरुप्रभृतिसुरभिवस्तुपरमलोद्गारपरम्पराः परिचीयन्ते । चक्षुरिन्द्रियेण भूभूधरपुरप्राकारघटपटस्तम्भाम्भोरुहादिमनुष्यपशुश्वापदादिस्थावरजङ्गमपदार्थसार्था अनुभूयन्ते । श्रोत्रेन्द्रियेण प्रथिष्ठगाथकपथपथिकप्रथ्यमानतालमानमूर्च्छनाप्रेङ्खोलनाखेलन्मधुरध्वनय आकर्ण्यन्ते । इति पञ्चप्रकारप्रत्यक्षदृष्टमेव वस्तुतत्त्वं प्रमाणपदवीमवगाहते । शेषप्रमाणानामनुभवाभावादेव निरस्तत्वाद्, गगनकुसुमवत् । ये चास्पृष्टमनास्वादितमनाघ्रातमदृष्टमश्रुतमप्याद्रियमाणाः स्वर्गमोक्षादिसुखपिपासाऽनुबन्धचेतोवृत्तयो दुश्चरतरतपश्चरणादिकष्टपिष्टकया स्वजन्म क्षपयन्ति, तन्महासाहसं तेषामिति । किं चाप्रत्यक्षमप्यस्तितयाऽभ्युपगम्यते

चेज्जगदनपन्हुतमेव स्याद्, दरिद्रो हि स्वर्णराशिर्मेऽस्तीत्यनुध्याय हेलयैव दौःस्थ्यं दलयेत्, दासोऽपि स्वचेतसि स्वामितामवलम्ब्य किङ्करतां निराकुर्यादिति,न कोऽपि स्वानभिमतमालिन्यमश्नुवीत। एवं न कश्चित्सेव्यसेवकभावो दरिद्रधनिभावो वा स्यात् । तथा च जगद्व्यवस्थाविलोपप्रसङ्ग इति सुस्थितमिन्द्रियगोचर एव प्रमाणम् । ये चानुमानागमादिप्रामाण्यमनुमन्वानाः पुण्य-पापव्यापारप्राप्यस्वर्गनरकादिसुखासुखं व्यवस्थापयन्तो वाचाटा न विरमन्ति, तान् प्रति दृष्टान्तमाह । भद्रे वृकपदं पश्येति । यथा हि कश्चित्पुरुषो वृकपददर्शनसमुद्भूतकुतूहलां दयितां मन्थरतरप्रसृमरसमीरणसमीकृतपांशुप्रकारस्वाङ्गुलिन्यासेन वृ-कपदाकारतां विधाय प्राह—हे भद्रे ! वृकपदं पश्य । कोऽर्थः । यथा तस्या अविदितपरमार्थाया मुग्धाया विदग्धो वल्लभो वृकचरणनिरीक्षणाग्रहं कराङ्गुलिन्यासमात्रेण प्रलोभ्य पूरित-वान्, एवममी अपि धर्मच्छद्मधूर्त्ताः परवञ्चनप्रवणा यत् किं चिदनुमानागमादिदार्ढ्यमादर्श्य व्यर्थं मुग्धजनान् स्वर्गादिप्राप्ति-लभ्यभोगाभोगप्रलोभनया भक्ष्याभक्ष्यगम्यागम्येहेयोपादेयादि-सङ्कटे पातयन्ति, मुग्धधार्मिकान्ध्यं चोत्पादयन्ति । एवमेवार्थं प्रमाणकोटिमधिरोपयन्तश्च यद्बहुश्रुताः परमार्थवेदिनो वदन्ति, वक्ष्यमाणपद्येनेत्यर्थः ।

पिब खाद च जातशोभने ! यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्त्तते समुदयमात्रामिदं कलेवरम् ८२

हे जातशोभने ! भावप्रधानत्वान्निर्देशानां, जातं शोभनत्वं वदननयनादित्वं यस्याः सेति तत्सम्बोधनम् । पिब पेयापेयव्यव-स्थावैसंष्ठुल्येन मदिरादेः पानं कुरु न केवलं पिब, खाद च भ-क्ष्याभक्ष्यनिरपेक्षतया मांसादिकं भक्षय । यद्वा पिबेति अधरा-

दिपानं कुरु, खादेति भोगानुपभुङ्क्ष्वेति काम्युपदेशः, स्वयौवनं सफलीकुर्वित्यर्थः। अथ सुलभमेव पुण्यानुभावाद्भवान्तरेऽपि शोभनत्वमिति परोक्तमाशङ्क्याह—वरगात्रि प्रधानाङ्गि ! यदतीतम्, अतिक्रान्तं यौवनादि तत्ते तव भूयो न, किं तु जराजीर्णत्वमेव भविष्यतीत्यर्थः । जातशोभनेवरगात्रीतिसम्बोधनयोः समानार्थयोरप्यादरानुरागातिरेकान्न पौनरुक्त्यं दोषः। यदुक्तम्

"अनुवादादरवीप्साभृशार्थविनियोगहेत्वसूयासु ।
ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम्" ॥

ननु स्वेच्छयाऽविच्छिन्ने खादने पाने दुस्तरा परलोके कष्टपरंपरा, सुलभं भवति सुकृतसञ्चये भवान्तरेऽपि यौवनादिकमिति पराशङ्कां दूषयन्नाह—न हि भीरु गतं निवर्तते । हे भीरु ! परोक्तमात्रेण नरकादिप्राप्यदुःखभयाकुले ! गतम्, इहभवातिक्रान्तं सुखयौवनादि न निवर्त्तते परलोके नाढौकते परलोकसुखाकाङ्क्षया तपश्चरणादिकष्टक्रियाभिरिहत्यसुखोपेक्षा व्यर्थेत्यर्थः। अथ जन्यजनकसम्बन्धसद्भावादमुना कायेन परलोकेऽपि सहेतुकं सुखदुःखादिकं वेदितव्यमवश्यमेवेति चेद्। आह । समुदयमात्रामेदं कलेवरम् ।इदं कलेवरं शरीरं समुदयमात्रं समुदयो मेलः वक्ष्यमाणचतुर्भूतानां संयोगस्तन्मात्रं मात्रशब्दोऽवधारणे भूतचतुष्टयसम्बन्ध एव कायो, न च पूर्वभवादिशुभाशुभकर्मविपाकवेद्यसुखदुःखादिसव्यपेक्ष इत्यर्थः। संयोगाश्च तरुशिखरावलीलीनशकुनिगणवत्, क्षणतो विनश्वरास्तस्मात् परलोकानपेक्षया यथेच्छं पिब, खाद चेति वृत्तार्थः ।

चैतन्यमाह—

किं च पृथ्वी जलं तेजो वायुर्भूतचतुष्टयम् ।
चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि ॥ ८३ ॥

किं चेत्युपदर्शने,पृथ्वी भूमिः,जलमापः, तेजो वन्हिः, वायुः पवन, इति भूतचतुष्टयं तेषां चार्वाकाणां चैतन्यभूमिः चैतन्योत्पत्तिकारणं चत्वार्यपि भूतानि संभूय सपिण्डं चैतन्यं जनयन्तीत्यर्थः । तु पुन,मानं प्रमाणं, हि निश्चितम्, अक्षजमेव प्रत्यक्षमेवैकं प्रमाणमित्यर्थः ।

ननु भूतचतुष्टयसंयोगजदेहचैतन्योत्पत्तिः कथं प्रतीयतामित्याशङ्क्याह—

पृथ्व्यादिभूतसंहत्यां तथा देहादिसम्भवः ।
मदशक्तिः सुराऽङ्गेभ्यो यद्वत्तद्वत्स्थिताऽऽत्मता॥८४॥

पृथिव्यादीनि पृथिव्यप्तेजोवायुरूपाणि यानि भूतानि तेषां संहत्यां मेले संयोगे सति, तथेत्युपदर्शने, देहादिसम्भवः, आदिशब्दादितरे भूधरादिपदार्था अपि चतुष्टयसंयोगजाता एव ज्ञेयाः। दृष्टान्तमाह—यद्वद् येन प्रकारेण सुराऽङ्गेभ्यो गुडधातक्यादिभ्यो मद्याङ्गेभ्यो मदशक्तिरुन्मादकत्वं भवति, तद्वत्तथा भूतचतुष्टयसम्बन्धात् शरीर आत्मता स्थिता सचेतनत्वं जातमित्यर्थः ।

इति स्थिते यदुपदेशपूर्वकमुपसंहारमाह—

तस्माद् दृष्टपरित्यागाददृष्टे च प्रवर्तनम् ।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे ॥८५॥

तस्मादिति पूर्वोक्तानुस्मारणे, पूर्वं तस्मात्तः कारणाद् दृष्टपरित्यागाद् दृष्टं पेयापेयखाद्याखाद्यगम्यागम्यानुरूपं प्रत्यक्षानुभाव्यं यत्सुखं, तस्य परित्यागाददृष्टे तपश्चरणादिकष्टक्रियासाध्यपरलोकसुखादौ प्रवर्तनं प्रवृत्तिः । चः समुच्चये । यत्तदोर्नैयत्यार्द्धे यत्सम्बन्धो ज्ञेयः। तल्लोकस्य विमूढत्वमज्ञानत्वं चार्वाकाः

लौकायतिकाः प्रतिषेदिरे प्रतिपन्नाः। मूढलोका हि विप्रतारकवचनोपन्यासभाषितज्ञानाः सांसारिकं सुखं परित्यज्य व्यर्थं स्वर्गं मोक्षपिपासया तपोजपध्यानहोमादिभिरिहस्थं सुखं हस्तगतमुपेक्षन्त इति।

साध्यावृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने।
निरर्था सा मते तेषां सा चाकाशात् परा न हि॥८६॥

साध्यस्य मनीषितस्य कस्य चिद्वस्तुन आवृत्तिः प्राप्तिः, कस्य चिद्वस्तुनोऽनभीष्टस्य निवृत्तिरभावः, ताभ्यां जने लोके या प्रीतिर्जायते उत्पद्यते सा तेषां चार्वाकाणां निरर्थिका निराभिप्राया शून्या मताऽभीष्टा। भवार्जितपुण्यपापसाध्यं सुखदुःखादिकं सर्वथा न विद्यत इत्यर्थः। सा च प्रीतिराकाशाद् गगनात् परा न हि यथाऽऽकाशं शून्यं तथैषाऽपि प्रीतिरभारूपैवेत्यर्थः।

उपसंहारमाह—

लोकायतमतेऽप्येवं संक्षेपोऽयं निवेदितः।
अभिधेयतात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिः॥८७॥

एवममुना प्रकारेण लोकायतमतेऽप्ययं संक्षेपो निवेदितः। अपिः समुच्चये। न केवलं परमते संक्षेप उक्तो लोकायतमतेऽपि। अथ सर्वदर्शनसम्मतसङ्ग्रहे परस्परकल्पितानल्पविकल्पजल्परूपे निरूपिते किंकर्त्तव्यमूढानां प्राणिनां कर्त्तव्योपदेशमाह—अभिधेयेति। सुबुद्धिभिः पण्डितैरभिधेयतात्पर्यार्थः पर्यालोच्यः। अभिधेयं कथनीयं मुक्त्यङ्गतया प्रतिपाद्यं यद्दर्शनस्वरूपं तस्य तात्पर्यार्थः सारार्थो विचारणीयः। सुबुद्धिभिरिति। शुद्धा पक्षपातरहिता बुद्धिर्येषामिति। न तु कदाग्रहग्रहिलैः। यदुक्तम्—

आग्रही बत निनीषति युक्तिं
तत्र यत्र मतिरस्य निविष्टा ।
पक्षपातरहितस्य हि तस्य
यत्र तत्र मतिरेति निवेशमिति ॥

दर्शनानां पर्यन्तैकसारूप्येऽपि पृथक् पृथगुपदेष्टव्याद्विमतिसम्भवे विमूढस्य प्राणिनः सर्वस्पृक्तया दुर्लभं स्वर्गापवर्गसाधकत्वम् अतो विमर्शनीयस्तात्त्विकोऽर्थः । यथा च विचारितं चिरंतनैः ।

श्रोतव्यः सौगतो धर्मः कर्त्तव्यः पुनरार्हतः ।
वैदिको व्यवहर्तव्यो ध्यातव्यः परमः शिवः ॥

इत्यादिविमृश्य श्रेयस्करं रहस्यमभ्युपगन्तव्यं कुशलमतिभिरिति पर्यन्तश्लोकार्थः ।

सप्ताशीतिः श्लोकसूत्रं, टीकामानं विनिश्चितम् ।
सहस्रमेकं द्विशती द्वापञ्चाशदनुष्टुभाम् ॥

इति श्रीहरिभद्रसूरिकृतषड्दर्शनसमुच्चये मणिभद्रकृता
लघुवृत्तिः समाप्ता ।
शम् ।



मूलमात्र—

षड्दर्शनसमुच्चये

ग्रन्थारम्भादि ।

सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकम् ।
सर्वदर्शनवाच्योऽर्थः संक्षेपेण निगद्यते ॥ १ ॥
दर्शनानि षडेवात्र मूलभेदव्यपेक्षया ।
देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥ २ ॥

षड्दर्शनोद्देशः ।

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ॥ ३ ॥

बौद्धमतम् ।

तत्र बौद्धमते तावद्देवता सुगतः किल ।
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥ ४ ॥
दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ५ ॥
समुदेति यतो लोके रागादीनां गणोऽखिलः ।
आत्मात्मीयस्वभावाख्यः समुदयः स संमतः ॥६॥

क्षणिकाः सर्वसंस्कारा इत्येवं वासना तु या ।
स मार्ग इति विज्ञेयो, निरोधो मोक्ष उच्यते ॥७॥
पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशायतनानि च ॥ ८ ॥
प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने ।
प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः ॥९॥
प्रत्यक्षं कल्पनाऽपोढमभ्रान्तं तत्र बुध्यताम् ।
त्रिरूपाल्लिङ्गतो लिङ्गिज्ञानं त्वनुमानसंज्ञितम् ॥१०॥
रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता ।
विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव्यन्ताम् ॥११॥
बौद्धराद्धान्तवाच्यस्य संक्षेपोऽय निवेदितः, ।

नैयायिकमतम् ।

नैयायिकमतस्येतः कथ्यमानो निशम्यताम् ॥१२॥
आक्षपादमते देवः सृष्टिसंहारकृच्छिवः ।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः ॥ १३ ॥
तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा ।
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥ १४ ।
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च॥१५।
जातयो निग्रहस्थानान्येषामेवं प्ररूपणा, ।

अर्थोपलब्धिहेतुः स्यात्प्रमाणं तच्चतुर्विधम् ॥१६॥
प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा, ।
तत्रेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिकम् ॥ १७ ॥
व्यवसायात्मकं ज्ञानं व्यपदेशविवर्जितम् ।
प्रत्यक्ष,मितरन्मानन्तत्पूर्वं त्रिविधं भवेत् ॥ १८ ॥
पूर्ववच्छेषवच्चैव दृष्टं सामान्यतस्तथा ।
तत्राद्यं कारणात्कार्यमनुमानमिह गीयते ॥ १९ ॥
रोलम्बगवलव्यालतमालमलिनत्विषः ।
वृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः ॥२०॥
कार्यात्कारणानुमानं यच्च तच्छेषवन्मतम् ।
तथाविधनदीपूरान्मेघो वृष्टो यथोपरि ॥ २१ ॥
यच्च सामान्यतो दृष्टं तदेवं गतिपूर्विका ।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा ॥ २२ ॥
प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम् ।
उपमानं समाख्यातं यथा गौर्गवयस्तथा ॥ २३ ॥
शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधम्, ।
प्रमेयं चात्मदेहार्थबुद्धीन्द्रियसुखादि च ॥ २४ ॥
किमेतदिति सन्दिग्धः प्रत्ययः संशयो मतः ।
प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनम् ॥२५॥
दृष्टान्तस्तु भवेदेष विवादविषयो न यः, ।

सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः ॥२६॥
प्रतिज्ञाहेतुदृष्टान्तोपनया निगमस्तथा ।
अवयवाः पञ्च तर्कः संशयोपरमो भवेत् ॥२७॥
यथा काकादिसंपातात् स्थाणुना भाव्यमत्र हि, ।
ऊर्ध्वं संदेहतर्काभ्या प्रत्ययो निर्णयो मतः ॥२८॥
आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् ।
यः कथाऽभ्यासहेतुः स्यादसौ वाद उदाहृतः॥२९॥
विजिगीषुकथा या तुच्छलजात्यादिदूषणम् ।
स जल्पः, सा वितण्डा तु या प्रतिपक्षवर्जिता॥३०॥
हेत्वाभासा असिद्धाद्या,श्छलं कूपो नवोदकः ।
जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः ॥३१॥
निग्रहस्थानमाख्यातं परो येन निगृह्यते ।
प्रतिज्ञाहानिसंन्यासविरोधादिविभेदवत् ॥ ३२ ॥
नैयायिकमतस्यैवं समासः कथितोऽधुना ।

सांख्यमतम् ।

सांख्याभिमतभावानामिदानीमयमुच्यते ॥ ३३ ॥
एतेषां या समावस्था सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका॥३४॥
सांख्या निरीश्वराः के चित्के चिदीश्वरदेवताः ।
सर्वेषामपि तेसां स्यात्तत्त्वानां पञ्चविंशतिः ॥३५॥

सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम् ।
प्रसादतोषदैन्यादिकार्यालिङ्गं क्रमेण तत् ॥ ३६ ॥
ततः संजायते बुद्धिर्महानिति यकोच्यते ।
अहंकारस्ततोऽपि स्यात्तस्मात्षोडशको गणः ॥३७॥
स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम् ।
पञ्च बुद्धीन्द्रियाण्याहुस्तथा कर्मेन्द्रियाणि च ॥३८॥
पायूपस्थवचःपाणिपादाख्यानि मनस्तथा ।
अन्यानि पञ्चरूपाणि तन्मात्राणीति षोडश ॥३९॥
रूपात्तेजो रसादापो गन्धाद्भूमिः स्वरान्नभः ।
स्पर्शाद्वायुस्तथैवं च पञ्चभ्यो भूतपञ्चकम् ॥४०॥
एवं चतुर्विंशतितत्त्वरूपं निवेदितं सांख्यमते प्रधानम् ।
अन्यस्त्वकर्ता विगुणस्तु भोक्ता,तत्त्वं पुमान्नित्यचिदभ्युपेतः४१
पञ्चविंशतिस्तत्त्वानि सांख्यस्यैव भवन्ति च ।
प्रधाननरयोश्चात्र वृत्तिः पङ्ग्वन्धयोरिव ॥ ४२ ॥
प्रकृतिवियोगो मोक्षः पुरुषस्यैवान्तरज्ञानात् ।
मानत्रितयं च भवेत् प्रत्यक्षं लैङ्गिकं शाब्दम्॥४३॥
एवं सांख्यमतस्यापि समासः कथितोऽधुना ।

जैनमतम् ।

जैनदर्शनसंक्षेपः कथ्यते सुविचारवान् ॥ ४४ ॥
जिनेन्द्रो देवता तत्र रागद्वेषविवर्जितः ।

हतमोहमहामल्लः केवलज्ञानदर्शनः ॥ ४५ ॥
सुरासुरेन्द्रसंपूज्यः सद्भूतार्थोपदेशकः ।
कृत्स्नकर्मक्षयं कृत्वा संप्राप्तः परमं पदम् ॥४६॥
जीवाजीवौ तथा पुण्यं पापमाश्रवसंवरौ ।
बन्धश्च निर्जरामोक्षौ नव तत्त्वानि तन्मते ॥४७॥
तत्र ज्ञानादिधर्मैन्यो भिन्नाभिन्नो विवृत्तिमान् ।
कर्त्ता शुभाशुभं कर्म भोक्ता कर्मफलस्य च ॥४८॥
चैतन्यलक्षणो जीवो, यश्चैतद्वैपरीत्यवान् ।
अजीवः स समाख्यातः, पुण्यं सत्कर्मपुद्गलाः ॥४९॥
पापं तद्विपरीतन्तु मिथ्यात्वाद्यास्तु हेतवः ।
यस्तैर्बन्धः स विज्ञेय आश्रवो जिनशासने ॥५०॥
संवरस्तान्निरोधस्तु बन्धो जीवस्य कर्मणः ।
अन्योन्यानुगमात्कर्मसम्बन्धो यो द्वयोरपि ॥५१॥
बद्धस्य कर्मणः शाटो यस्तु सा निर्जरा मता ।
आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते ॥५२॥
एतानि तत्र तत्त्वानि यः श्रद्धत्ते स्थिराशयः ।
सम्यक्त्वज्ञानयोगेन तस्य चारित्रयोग्यता ॥५३॥
तथा भव्यत्वपाकेन यस्यैतत्त्रितयं भवेत् ।
सम्यग्ज्ञानक्रियायोगाज्जायते मोक्षभाजनम् ॥५४॥
प्रत्यक्षं च परोक्षं च द्वे प्रमाणे तथा मते ।

अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह ॥ ५५ ॥
अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्ष,मितरज् ज्ञेयं परोक्षं ग्रहणेक्षया ॥ ५६ ॥
येनोत्पादव्ययध्रौव्ययुक्तं यत्सत्तदिष्यते ।
अनन्तधर्मकं वस्तु तेनोक्तं मानगोचरः ॥ ५७ ॥
जैनदर्शनसंक्षेप इत्येष कथितोऽनघः ।
पूर्वापरविघातस्तु यत्र क्वापि न विद्यते ॥ ५८ ॥
देवताविषये भेदो नास्ति नैयायिकैः समम् ।
वैशेषिकाणां तत्त्वेषु विद्यतेऽसौ निर्दिश्यते ॥५९॥

काणाददर्शनम् ।

द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम् ।
विशेषसमवायौ च तत्त्वषट्कं हि तन्मते ॥६०॥
तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि ।
कालदिगात्ममनांसि गुणाः पुनश्चतुर्विंशतिधा॥ ६१॥
स्पर्शरसरूपगन्धाः शब्दः सङ्ख्या विभागसंयोगौ ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च ॥६२॥
बुद्धिः सुखदुःखेच्छा धर्माधर्मौ प्रयत्नसंस्कारौ ।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते ॥ ६३ ॥
उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम् ।
पञ्चविधं कर्मैत,त्परापरे द्वे तु सामान्ये ॥ ६४ ॥

तत्र परं सत्ताऽऽख्यं द्रव्यत्वाद्यपर,मथ विशेषस्तु ।
निश्चयतो नित्यद्रव्यवृत्तिरन्यो विनिर्दिशेत् ॥६५॥
य इहायुतसिद्धानामाधाराधेयभूतभावानाम् ।
सम्बन्ध इह प्रत्ययहेतुः प्रोक्तः स समवायः ॥६६॥
प्रमाणं च द्विधाऽमीषां प्रत्यक्षं लैङ्गिकं तथा ।
वैशेषिकमतस्यैवं संक्षेपःपरिकीर्त्तितः ॥ ६७ ॥

जैमिनिमतम् ।

जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविशेषणः ।
देवो न विद्यते कोऽपि यस्य मानं वचो भवेत्॥६८॥
तस्मादतीन्द्रियार्थानां साक्षाद् द्रष्टुरभावतः ।
नित्येभ्यो वेदवाक्येभ्यो यथाऽर्थत्वविनिश्चयः ॥६९॥
अत एव पुरा कार्यो वेदपाठः प्रयत्नतः ।
ततो धर्मस्य जिज्ञासा कर्त्तव्या धर्मसाधनी ॥७०॥
नोदनालक्षणो धर्मो, नादनो तु क्रियां प्रति ।
प्रवर्त्तकं वचः, प्राहुः स्वःकामोऽग्निं यजेद्यथा॥७१॥
प्रत्यक्षमनुमानं च शब्दश्चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥७२॥
तत्र प्रत्यक्षमक्षाणां संप्रयोगे सतां मतिः ।
आत्मनो बुद्धिजन्मेत्यनुमानं लैङ्गिकं पुनः ॥७३॥
शाब्दं शाश्वतवेदोत्थ,मुपमानं प्रकीर्त्तितम् ।

प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य भाजनम् ॥७४॥
दृष्टार्थानुपपत्त्या तु कस्याप्यर्थस्य कल्पना ।
क्रियते यद्बलेनासावर्थापत्तिरुदाहृता ॥ ७५ ॥
प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्ताऽवबोधार्थं तत्राभावप्रमाणता ॥ ७६ ॥
जैमिनीयमतस्यापि संक्षेपोऽयं निवेदितः ।
एवमास्तिकवादानां कृतं संक्षेपकीर्त्तनम् ॥ ७७ ॥
नैयायिकमतादन्ये भेदं वैशेषिकैः सह ।
न मन्यन्ते मते तेषां पञ्चैवास्तिकवादिनः ॥७८॥
षष्ठदर्शनसङ्ख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपात्कथ्यते तेन तन्मतम् ॥ ७९ ॥

चार्वाकमतम् ।

लोकायता वदन्त्येवं नास्ति देवो न निर्वृतिः ।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः ॥ ८० ॥
एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! बृकपदं पश्य यद्वदन्ति बहुश्रुताः ॥ ८१ ॥
पिब खाद च जातशोभने ! यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्त्तते समुदयमात्रामिदं कलेवरम् ८२
किं च पृथ्वी जलं तेजो वायुर्भूतचतुष्टयम् ।
चैतन्यभूमिरेतेषां मानं त्वक्षजमेव हि ॥ ८३ ॥

पृथ्व्यादिभूतसंहत्यां तथा देहादिसम्भवः ।
मदशक्तिः सुराऽङ्गेभ्यो यद्वत्तद्वत्स्थिताऽऽत्मता॥८४॥
तस्माद् दृष्टपरित्यागाददृष्टे च प्रवर्तनम् ।
लोकस्य तद्विमूढत्वं चार्वाकाः प्रतिपेदिरे ॥८५॥
साध्यावृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने ।
निरर्था सा मता तेषां सा चाकाशात् परा न हि॥८६॥
लोकायतमतेऽप्येवं संक्षेपोऽयं निवेदितः ।
अभिधेयतात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिः ॥८७॥

इति षड्दर्शनसमुच्चयः ।



प्राकृतसंस्करणात्मकं

षड्दर्शनसमुच्चयपरिशिष्टम् ।

———ooo———

पृ० ३ प० ३

भट्ठेण चरित्ताउ दंसणमिह दिढयरं गहेयव्वं ।
सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ॥
भ्रष्टेन चरित्राद् दर्शनमिह दृढतरं ग्रहीतव्यम् ।
सिध्यन्ति चरणरहिता दर्शनरहिता न सिध्यन्ति ॥

पृ० ३ प० १९

असियसयं किरियाणं अकिरियवाईण हुंति चुलसीई ।
अन्नाणिय सत्तट्ठी वेणइआणं च वत्तीसं ॥
अशीतिशतं क्रियाणामक्रियावादिनो भवन्ति चतुरशीतिः ।
आत्मवादिनः सप्तषष्टिर्विनयवादिनां च द्वात्रिंशत् ॥

पृ० ४ प० १

को दुःक्खं पाविज्जा कस्स न सुक्खेहिं विम्हहो हुज्जा ।
कोअ न लभेज्ज मुक्खं रागद्दोसा जइ न हुज्जा ॥
को दुःखं प्राप्नुयात्कस्य न सौख्यैर्विस्मयो भवेत् ।
कश्च न लभेत मोक्षं रागद्वेषौ यदि न भवेताम् ॥

पृ० ४७ प० १६

दोहिंवि णएहिं णीयं सत्थमुलूगेण तहवि मिच्छत्तं ।
जं सविसयप्पहाणत्तणेण अण्णोणणिरवेक्खं ॥

---

१ अत्र "भट्ठेणे"त्येव सुपाठः । "सद्धेणे"ति तु मूलेऽसंगतः ।

द्वाभ्यामपि नयाभ्यां प्रणीतं शास्त्रमुलूकेन तथाऽपि मिथ्यात्वम् ।

यत्सविषयप्रधानत्वेनान्योन्यनिरपेक्षम् ॥

पृ० ४८ प० ६

जो एगं जाणइ सो सव्वं जाणइ
जो सव्वं जाणइ सो एगं जाणइ ।
य एकं जानाति स सर्वं जानाति
यः सर्वं जानाति स एकं जानाति ।

पृ० ४९ प० २१

सव्वजीवाणं पियणं अक्खरस्स अणन्तओ भागो निच्चुग्घाडिओ ।

जइ सोवि आवरेज्झा ता जीवो अजीवत्तं पाविज्झा ।
सुद्धावि मेहसमुदये होइ पहा चन्दसूराणम् ॥
सर्वजीवानामपि चाक्षरस्यानन्तको भागो नित्योद्घाटितः ।
यदि सोऽप्यावियेत तर्हि जीवोऽजीवत्वं प्राप्नुयात् ।
शुद्धाऽपि मेघसमुदये भवति प्रभा चन्द्रसूर्ययोः ॥

पृ० ५० प० १०

जीवाणं भन्त ! किं अत्तकडे दुक्खे, परकडे दुक्खे, तदुभयकडे दुक्खे ।

गोयम ! अत्तकडे दुक्खे, नो परकडे दुक्खे, नो तदुभयकडे दुक्खे इति ॥

जीवानां भदन्त ! किमात्मकृतं दुःखं परकृतं दुःखं तदुभयकृतं दुःखम् ।

गोतम ! आत्मकृतं दुःखं, नो परकृतं दुःखं, नो तदुभयकृतं-
दुःखम् ॥

पृ० ५१ प० १

नरतिरिसुराउउच्चं सायं परघाय आयवुज्जोयं ।
तित्थुस्सासुनिमाणं पणिंदिवइरुस्सभचउरंसं ॥
तसदसचउवन्नाई सुरमणुदुगपंचतणु उवंगतिअं ।
अगुरुलहु पड मखगई बायालीसं सुहपयडी ॥

नरतिर्यक्सुरायुरुच्चं सातं पराघातातपोद्योतम् ।
तीर्थोच्छ्वासनिर्माणं पञ्चेन्द्रियवज्रर्षभचतुरस्रम् ॥
त्रसदशकं वर्णचतुष्कं सुरमनुजद्विकं तनुपञ्चकमुपाङ्गत्रिकम् ॥
अगुरुलघुप्रथमखगतिर्द्वाचत्वारिंशत् शुभप्रकृतयः ॥

पृ० ५१ प० १३

थावरदस चउजाई अपढमसंठाण खगइसंघयणा ।
तिरिनिरयदुगाउजाई वन्नचऊनाम चउतीसा ॥
नरयाउनीयअस्सायघाइपणयालसाहियवासीई ।

स्थावरदशकं जातिचतुष्कमप्रथमसंस्थानखगतिसंहननानि ॥
तिर्यग्निरयद्विकायुर्जातिवर्णचतुष्कं नाम चत्वारिंशत् ॥
नरकायुर्नीचासाघातिपञ्चचत्वारिंशत्साहितद्व्यशीतिः ।

पृ० ५२ प० ५

समिइगुत्तिपरीसहजइधम्मभावचरित्ताणि ।
पणतिगदुवीसदसबारपञ्चभेएहिं सगवणा ॥

समितिगुप्तिपरीषहयतिधर्मभावनाचरित्राणि ।
पञ्चत्रिद्वाविंशतिदशद्वादशपञ्चभेदैः सप्तपञ्चाशत् ॥

पृ० ५२ प० २३

संतपयवरूवणया दव्वमाणं च खित्तपसणा य ।
कालो य अन्तरं भागो भावो अप्पा बहुं चेव ॥
सत्पदप्ररूपणता द्रव्यप्रमाणं च क्षेत्रस्पर्शना च ।
कालश्चान्तरं भागो भावोऽल्पबहुत्वं च ॥

पृ० ५५ प० ९

सुबहुंपि सुयमहीयं किं काही चरणविप्पमुक्कस्स ।
अन्धस्स जह पलित्ता दीवसयसहस्सकोडीवि ॥
नाणं चरित्तहीणं लिंगग्गहणं च दंसणविहीणं ।
संजमहीणं च तवं जो चरइ निरत्थयं तस्स ॥
सुबह्वपि श्रुतमधीतं किं करिष्यति चरणविप्रयुक्तस्य ।
अन्धस्य यथा प्रदीपा दीपशतसहस्रकोटिरपि ।
ज्ञानं चरित्रहीनं लिङ्गग्रहणं च दर्शनविहीनम् ।
संयमहीनं च तपः यश्चरति निरर्थकं तस्य ॥

इति ।